तेऊ पम्हा सुक्का तिन्नि वि एयाओ धम्मलेसाओ ।
एयाहिं तिहिं वि जीवो सुग्गइं उववज्जई" ॥ – अध्य० ३४ गा० ५६-५७

જીવો પરલોકમાં ક્યારે જાય છે ? તે બતાવતાં **ગાથા-૬૦માં** કહેલ છે કે,

"अंतोमुहत्तंमि गए अंतमुहुत्तंमि सेसए चेव ।
लेसाहिं परिणयाहिं जीवा गच्छंति परलोयं" ॥ – अध्य० ३४ गा० ६०

છેલ્લે **ગાથા-૬૧ની** મૂળગાથામાં અને વૃત્તિમાં વૃત્તિકાર કહે છે કે અપ્રશસ્ત લેશ્યાઓ દુર્ગતિનું કારણ છે અને પ્રશસ્ત લેશ્યાઓ સુગતિનું કારણ છે, તેથી આ અધ્યયનમાં જણાવેલ લેશ્યાઓના અનુભાગને જાણીને અપ્રશસ્ત લેશ્યાઓનો ત્યાગ કરીને પ્રશસ્ત લેશ્યાઓનો મુનિ આશ્રય કરે.[૨૯]

૩૫. અનગારગતિ :- અપ્રશસ્ત લેશ્યાઓનો ત્યાગ કરવા અને પ્રશસ્ત લેશ્યાઓનો આશ્રય કરવા કહ્યું, તે ભિક્ષુગુણવાળાઓને જ કરવા માટે શક્ય છે, એથી ભિક્ષુના ગુણો આ અધ્યયનમાં બતાવેલ છે.

ગાથા-૧માં બતાવેલ છે કે,

"सुणेह मे एगग्गमणे(णा) मग्गं बुद्धेहिं देसियं ।
जमायरंतो भिक्खू दुक्खाणंतकरो भवे" ॥ – अध्य० ३५ गा० १

ગૃહવાસનો ત્યાગ કરેલ મુનિ આ સંગોનો ત્યાગ કરે એ પ્રમાણે **ગાથા-૨ના** ઉત્તરાર્ધમાં કહેલ છે, તે વૃત્તિકાર **ગાથા-૩ની** વૃત્તિમાં બતાવે છે–

सङ्गस्वरूपमाह–'जेहिं'ति 'सुब्व्यत्ययाद्' येषु सज्यन्ते प्रतिबध्यन्ते मानवाः 'उपलक्षणत्वादन्येऽपि जीवाः' ॥ तथैव हिंसां प्राणनाशम्, अलीकं, चौर्यं च स्पष्टम्, अब्रह्मसेवनं मैथुनाचरणम्, इच्छा,

---

२९. "तम्हा एयासि लेसाणं अणुभागे वियाणिया ।
अप्पसत्थाओ वज्जित्ता पसत्थाओ अहिट्ठिए मुणि" ॥ त्ति बेमि ॥ – अ० ३४ गा० ६१

व्याख्या–"यस्मादप्रशस्ता एता दुर्गतिहेतवः प्रशस्ताश्च सुगतिहेतवः । तस्मादेतासामनन्तरमुक्तानां लेश्यानामनुभागं विज्ञायाप्रशस्ताः कृष्णाद्यास्तिस्रो वर्जयित्वा प्रशस्तास्तैजस्याद्यास्तिस्रोऽधितिष्ठेत भावप्रतिपत्त्याश्रयेन्मुनिरिति ब्रवीमीति प्राग्वत् ॥ – अ० ३४ गा० ६१ वृत्तौ

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

काममप्राप्तवस्तुकाङ्क्षारूपम्, लोभं च लब्धवस्तुगृद्ध्यात्मकमनेनोभयेनापि परिग्रह उक्तस्तं च संयतो यतिः परिवर्जयेत्। अनेन मूलगुणा उक्ताः'' ॥ – अध्य० ३५ गा० ३ वृत्तौ

મુનિ કેવી રીતે ભિક્ષાટન કરે અને કેવી રીતે વાપરે ? તે **ગાથા-૧૬।૧૭માં** બતાવેલ છે.[30]

''णिज्जूहिऊण आहारं कालधम्मे उवट्ठिए ।
चइऊण माणुसं बोंदिं पहू दुक्खे विमुच्चई'' ॥ – अध्य० ३५ गा० २०

कीदृशः सन् ? इत्याह–

''निम्ममो निरहंकारो वीयरागो अणासवो ।
संपत्तो केवलं नाणं सासयं परिनिव्वुडे'' ॥ त्ति बेमि ॥ – अध्य० ३५ गा० २१

૩૬. **જીવાજીવવિભક્તિ :-** ભિક્ષુના ગુણો જીવ-અજીવના સ્વરૂપના પરિજ્ઞાનથી જ આસેવન કરવા માટે શક્ય છે, તેથી આ અધ્યયનમાં જીવ-અજીવનું સ્વરૂપ બતાવેલ છે.

ગાથા-૧માં કહ્યું છે કે, જીવ ઉપયોગલક્ષણવાળો છે અને અજીવ તેનાથી વિપરીત છે, તે જીવ-અજીવની વિભક્તિ =તેના ભેદ વગેરેનું વિભાગથી કથન મને કહો ! તેથી ગુરુ શિષ્યને કહે છે કે એકાગ્રચિત્તપૂર્વક હે શિષ્યો સાંભળો. તે જીવ-અજીવની વિભક્તિને જાણીને ભિક્ષુ સંયમમાં સમ્યગ્ યત્ન કરે છે.

ગાથા-૨માં લોક અને અલોકની વિભક્તિ, **ગાથા-૩માં** જીવ અને વિભક્તિ દ્રવ્ય, ક્ષેત્ર, કાળ અને ભાવથી થાય છે તે બતાવેલ છે.

ત્યારપછી સ્વલ્પ વક્તવ્યતા હોવાથી અજીવની પ્રરૂપણા પ્રથમ દ્રવ્યથી, ક્ષેત્રથી, કાળથી અને ભાવથી **ગાથા ૪।૪૬માં** કરેલ છે **ગાથા-૪૬ની** વૃત્તિમાં વૃત્તિકારે કહ્યું છે કે, વર્ણ, ગંધ, રસ, સ્પર્શ, અને સંસ્થાનના સકલ ભાંગા ૪૮૨ 'પરિસ્થૂર' ન્યાયથી થાય છે અન્યથા આ દરેકના તારતમ્યથી અનંતપણું હોવાથી અનંતા જ ભાંગા સંભવે છે.

ગાથા-૪૮માં જીવના (૧) સંસારસ્થ અને (૨) સિદ્ધ એમ બે પ્રકાર બતાવેલ છે. ત્યાં સિદ્ધના જીવો અનેક પ્રકારે કહેલા છે તે અલ્પવક્તવ્યતા હોવાથી પાછળ નિર્દેશ હોવા છતાં પૂર્વે સિદ્ધના ભેદો બતાવેલ છે. **ગાથા ૪૯।૬૭માં** સિદ્ધના જીવોનું સ્વરૂપ, ભેદો, ઈષત્પ્રાગ્ભારાનું સ્વરૂપ, લોકાંતનું સ્વરૂપ, સિદ્ધના જીવોની અવગાહના વગેરે બતાવેલ છે. **ગાથા ૬૮।૨૪૭માં** સંસારી જીવોનું સ્વરૂપ બતાવેલ છે. તેમાં સંસારી જીવો બે પ્રકારના છે–(૧) ત્રસ અને (૨) સ્થાવર. તેમાં સ્થાવર જીવોના ત્રણ પ્રકાર છે–(૧) પૃથિવીજીવો, (૨) અપ્જીવો (૩)

---

३०. ''समुयाणं उंछमेसिज्जा जहासुत्तमणिंदियं ।
लाभालाभंमि संतुट्ठे पिंडवायं चरे मुणी ॥
अलोलो न रसे गिद्धो जिब्भादंतो अमुच्छिए ।
न रसट्ठाए भुंजिज्जा जवणट्ठाए महामुणी'' ॥ – अध्य० ३५ गा० १६-१७

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

વનસ્પતિજીવો તેમાં **ગાથા ૭૦।૮૩માં** પૃથ્વીકાયજીવોનું સ્વરૂપ, **ગાથા ૮૪।૯૧માં** અપ્કાયજીવોનું સ્વરૂપ, **ગાથા ૯૨।૧૦૫માં** વનસ્પતિકાય જીવોનું સ્વરૂપ બતાવેલ છે.

સ્થાવરજીવોનું સ્વરૂપ બતાવ્યા પછી ત્રસ જીવોનું સ્વરૂપ બતાવેલ છે. તેમાં (૧) તેઉકાયજીવો (૨) વાયુકાયજીવો અને (૩) સ્થૂલ બેઇન્દ્રિયાદિ ઉદારજીવોની ગણના કરેલ છે. તેજો અને વાયુના જીવોને ગતિથી ત્રસપણું કહેલ છે અને ઉદારજીવોને લબ્ધિથી ત્રસપણું કહેલ છે. તેમાં **ગાથા ૧૦૮।૧૧૬માં** તેઉકાય જીવોનું સ્વરૂપ, **ગાથા ૧૧૭।૧૨૫માં** વાયુકાયજીવોનું સ્વરૂપ બતાવેલ છે.

ત્યારપછી ઉદારત્રસના (૧) બેઇંદ્રિય, (૨) તેઇંદ્રિય, (૩) ચઉરિંદ્રિય અને (૪) પંચેદ્રિય એમ ચાર પ્રકાર બતાવેલ છે. તેમાં **ગાથા ૧૨૭।૧૩૫માં** બેઇંદ્રિયજીવોનું સ્વરૂપ, ગાથા **૧૩૬।૧૪૪માં** તેઇંદ્રિયજીવોનું સ્વરૂપ, **ગાથા ૧૪૫।૧૫૪માં** ચઉરિંદ્રિય જીવોનું સ્વરૂપ બતાવેલ છે.

ત્યારપછી પંચેન્દ્રિય જીવના (૧) નૈરયિક, (૨) તિર્યંચ, (૩) મનુજ અને (૪) દેવ એમ ચાર પ્રકાર બતાવેલ છે. તેમાં **ગાથા ૧૫૬।૧૬૯માં** નૈરયિકજીવોનું સ્વરૂપ, **ગાથા ૧૭૦।૧૯૪માં** સંમૂર્છિમ, ગર્ભજ જલચર, સ્થલચર અને ખેચર તિર્યંચના જીવોનું સ્વરૂપ **ગાથા ૧૯૫।૨૦૩માં** ૧૫ કર્મભૂમિ, ૩૦ અકર્મભૂમિ અને ૫૬ અંતર્દ્વીપમાં થયેલ સંમૂર્છિમ અને ગર્ભજ મનુષ્યનું સ્વરૂપ, **ગાથા ૨૦૪।૨૪૭માં** ભવનપતિ, વાણમંતર, જ્યોતિષ્ અને વૈમાનિકદેવોનું સ્વરૂપ બતાવેલ છે.

ગાથા-૨૪૯માં ઉપદેશ બતાવેલ છે કે,

> **"इइ जीवमजीवे य सुच्चा सद्दहिऊण य ।**
> **सव्वनयाण अणुमए रमेज्जा संजमे मुणी"** ॥ अध्य० गा० २४९

ગાથા-૨૫૦માં કહેલ છે કે, ઘણા વર્ષો સુધી શ્રામણ્યને પાળીને મુનિ આ ક્રમ યોગવડે સંલેખના કરે. ત્યારપછી **ગાથા ૨૫૧।૨૫૫માં** સંલેખનના ભેદના અભિધાનપૂર્વક કમયોગ બતાવેલ છે. અને તેની ટીકામાં વૃત્તિકારે છેલ્લે કહ્યું છે કે "एतद्विस्तरः श्रीनिशीथचूर्णितोऽवसेयः" ॥

અણસણનો સ્વીકાર કરનાર મહાત્માએ અશુભભાવનાનો ત્યાગ કરવો જોઈએ. તેથી અશુભ ભાવનાની પરિહાર્યતા અને અનર્થહેતુતા **ગાથા ૨૫૬માં** બતાવેલ છે.

ગાથા ૨૫૭।૨૫૯માં દુર્લભબોધિ અને સુલભબોધિ કોણ બને છે તે બતાવેલ છે.[31]

---

३१. मिच्छादंसणरत्ता सनियाणा हु हिंसगा ।
इय जे मरंति जीवा तेसिं पुण दुल्लहा बोही ॥

सम्मद्दंसणरत्ता अनियाणा सुक्कलेसमोगाढा ।
इय जे मरंति जीवा सुलहा तेसिं भवे बोही ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ગાથા-૨૯૦-૨૯૧માં સંલેખનાદિનું માહાત્મ્ય બતાવેલ છે, ત્યારપછી **ગાથા-૨૯૨માં** કહ્યું છે કે જિનવચન ભાવથી કર્તવ્ય છે અને ભાવકરણ આલોચનાથી થાય છે તે આલોચના સાંભળવા માટે યોગ્ય કોણ છે તે બતાવતાં કહે છે કે, "बह्वागमविज्ञानाः समाधेश्चितस्वास्थ्य-स्योत्पादकाश्च गुणग्राहिणश्च"—આવા આચાર્યભગવંતો યોગ્ય છે. **ગાથા-૨૯૨ની ટીકામાં** વૃત્તિકારે છેલ્લે કહ્યું છે કે, 'एते एवालोचनाश्रवणफलं परेषां विशुद्धिलक्षणं सम्पादयितुमीशते' इति ॥

ગાથા ૨૯૩।૨૯૭માં કાંદર્પીભાવના, આભિયોગિકીભાવના, કિલ્બિષીકીભાવના, આસુરીભાવના અને મોહીભાવનાનું સ્વરૂપ બતાવેલ છે. **ગાથા ૨૯૭ના** અંતે વૃત્તિકારે यदाहु:—થી કહે છે કે,

"एयाओ भावणाओ भावित्ता देवदुग्गइं जंति ।
तत्तो य चुया संता पडंति भवसागरमणंतं" ॥

— अध्य० ३६ गा० २६७ वृत्तौ उद्धरण:

ગાથા ૨૯૮માં છેલ્લે સૂત્રકારે કહેલ છે કે,

"इइ पाउकरे बुद्धे नायए परिनिव्वुए ।
छत्तीसं उत्तरज्झाए भवसिद्धीयसंमए" ॥ त्ति बेमि ॥ — अध्य० गा० २६८

નિર્યુક્તિકારશ્રી **ભદ્રબાહુસ્વામીમહારાજે** પણ આનું માહાત્મ્ય બતાવેલ છે કે,

"જે ખરેખર આસન્નસિદ્ધિવાળા રત્નત્રયીના આરાધક ગ્રંથિભેદવાળા ભવ્ય આત્માઓ છે. તે આ છત્રીશ ઉત્તરાધ્યયનોને ભણે છે."[૩૨]

"તેથી શ્રીજિનકથિત અર્થભેદરૂપ અનંતગમોથી અને શબ્દપર્યાયરૂપ પર્યવોથી યુક્ત ઉત્તરાધ્યયનો ઉપધાન આદિ ઉચિત ક્રિયારૂપ યોગ પ્રમાણે ગુરુના પ્રસાદથી ભણવા જોઈએ."[૩૩]

છેલ્લે વૃત્તિકારે **૨૦ શ્લોકોમાં** સ્વગુરુપરંપરા વગેરે પ્રશસ્તિમાં બતાવેલ છે અને ત્યારપછી ગ્રંથલેખનનો સમય વગેરે બતાવેલ છે.

નોંધ :—અધ્યયન-૩૬।૯૭મી ગાથા "लोएगदेसे...."ની ટીકામાં છેલ્લે કહ્યું છે કે, इयं च गाथा क्वापि न दृश्यते । यत्र प्रतौ भवति, तत्रैवं व्याख्यायते ॥

मिच्छादंसणरत्ता सनिआणा कण्हलेसमोगाढा ।
इय जे मरंति जीवा तेसिं पुण दुल्लहा बोही ॥ — अ० ३६ गा० २५७।२५९

३२. "जे किर भवसिद्धीया परित्तसंसारिया य जे भव्वा ।
ते किर पढंति एए छत्तीसं उत्तरज्झाए" ॥१॥ — उत्त० निर्यु० गा० ५५८

३३. "तम्हा जिणपन्नत्ते अणंतगम—पज्जवेहि संजुत्ते ।
अज्झाए जहजोगं गुरुप्पसाया अहिज्जेज्जा" ॥२॥ — उत्त० निर्यु० गा० ५५९

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

આ રીતે **'ઉત્તરાધ્યયનસૂત્ર ભાગ-૨માં' ૧૭થી** ૩૬ અધ્યયનોનું સ્વરૂપ બતાવેલ છે.

૧થી ૩૬ અધ્યયનોમાં આવતા પદાર્થો અહીં તો માત્ર આ યોગગ્રંથની વાનગીસ્વરૂપે બતાવેલ છે. બાકી તો સૂત્રગાંભીર્ય અને અર્થગાંભીર્યથી ભરપૂર આ આખું **'ઉત્તરાધ્યયનસૂત્ર'** એક યોગગ્રંથસ્વરૂપ છે. ૧થી ૩૬ અધ્યયનોમાં સંપૂર્ણ મોક્ષમાર્ગનું વર્ણન અને મુક્તિપ્રાપ્તિના ઉપાયો અને મુક્તિનું સ્વરૂપ આવરી લીધું છે.

ઉપકારસ્મરણ :-

આ ઉત્તરાધ્યયનસૂત્રના સંપાદનકાર્યમાં પરમપૂજ્ય પંન્યાસપ્રવર શ્રી**વજ્રસેનવિજય-મહારાજસાહેબે** મને જે સ્વાધ્યાય કરવાનો લાભ આપ્યો છે અને તે દરમ્યાન મારા જે અધ્યવસાયોની અતિનિર્મળતા થઈ છે, તે બદલ પૂજ્યશ્રીની ખૂબ ખૂબ ૠણી છું અને મારું પરમસદ્ભાગ્ય સમજુ છું કે, આ મૂલાગમગ્રંથના કાર્યમાં મારો જે સમય વ્યતીત થયો તે મારા જીવનનો શ્રેષ્ઠ સમય સમજું છું. ૩૬ અધ્યયનોનો આ વિસ્તૃત પરિચય મેં મારી અનુપ્રેક્ષા માટે તૈયાર કરેલ છે. એના દ્વારા અન્ય યોગમાર્ગના સાધક આત્માઓને પણ સંયમજીવનમાં ભાવોલ્લાસ પ્રગટે અને તેના દ્વારા સાધનામાં સ્વ-પરને અપ્રમત્તદશા પ્રાપ્ત થાય એ જ ભાવનાથી આ પ્રયાસ કરેલ છે.

આ ઉત્તરાધ્યયનગ્રંથના સંપાદન કાર્યમાં પ્રૂફવાચન વગેરેમાં ઘણી કાળજી રાખેલ છે આમ છતાં દૃષ્ટિદોષથી કે અનાભોગથી જે કોઈ અશુદ્ધિઓ રહી ગયેલ હોય તે વિદ્વજ્જનો સુધારીને વાંચે અને તે બદલ ત્રિવિધે ત્રિવિધે મિચ્છા મિ દુક્કડં માંગું છું.

પ્રાંતે અંતરની એક જ ભાવના છે કે, યોગગ્રંથસ્વરૂપ આ આગમગ્રંથના ચિંતન, મનન અને નિદિધ્યાસન દ્વારા યોગમાર્ગને આરાધી સાધી આત્માનું મૂળસ્વરૂપ અસંગભાવમાં રહેવાનું છે એ અસંગદશાને પ્રાપ્ત કરી, અપૂર્વકરણ, અનિવૃત્તિકરણ, પ્રાતિભજ્ઞાનની પ્રાપ્તિ, ક્ષપકશ્રેણિ આરોહણ દ્વારા વીતરાગસ્વરૂપને પામી યોગનિરોધ, શૈલેશીકરણ દ્વારા સર્વકર્મ વિનિર્મુક્ત બની આત્માના શુદ્ધ ચૈતન્યસ્વરૂપને-સિદ્ધસ્વરૂપને પ્રાપ્ત કરી અનંતકાળ સુધી નિજ શાશ્વત સુખના ભોક્તા હું અને સૌ કોઈ લઘુકર્મીભવ્યજીવો બનીએ એ જ અંતરની શુભકામના....!!

शिवमस्तु सर्वजगतः

— સા. ચંદનબાલાશ્રી

એફ-૨ જેઠાભાઈ પાર્ક,
નારાયણનગર રોડ,
પાલડી, અમદાવાદ-૭
ફાગણ સુદ-૧૩, વિ.સં. ૨૦૬૫,
સોમવાર, તા. ૯-૨-૨૦૦૯.

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

विषयानुक्रमणिका

उत्तरज्झयणाणि

[२]

१७-३६ अध्ययनानि

विषय	पृष्ठक्रमाङ्क
પ્રકાશકીય	૭-૮
સંપાદકીય	૯-૧૦
પ્રાક્કથન	૧૧-૩૬
अध्ययनानि	
सप्तदशं पापश्रमणीयमध्ययनम्	४६७-४७५
अष्टादशं संयतीयमध्ययनम्	४७६-५५६
एकोनविंशं मृगापुत्रीयमध्ययनम्	५५७-५७८
विंशतितमं महानिर्ग्रन्थीयमध्ययनम्	५७९-५९३
एकविंशं समुद्रपालीयमध्ययनम्	५९४-६००
द्वाविंशं रथनेमीयमध्ययनम्	६०१-६३७
चतुर्विंशं प्रवचनमात्रीयमध्ययनम्	६३८-६५१
पञ्चविंशं यज्ञीयाध्ययनम्	६५२-६६३
षड्विंशं सामाचार्याख्यमध्ययनम्	६६४-६७९
सप्तविंशं खलुङ्कीयमध्ययनम्	६८०-६८४
अष्टाविंशं मोक्षमार्गीयमध्ययनम्	६८५-७००

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एकोनत्रिंशं सम्यक्त्वपराक्रमाख्यमध्ययनम्	७०१-७३१
त्रिंशत्तमं तपोमार्गगत्याख्यमध्ययनम्	७३२-७४६
एकत्रिंशत्तमं चरणविधिनामकमध्ययनम्	७४७-७६२
द्वात्रिंशत्तमं प्रमादस्थानाख्यमध्ययनम्	७६३-७९६
त्रयस्त्रिंशं कर्मप्रकृतिनामाध्ययनम्	७९७-८०४
चतुस्त्रिंशं लेश्याध्ययनम्	८०५-८१९
पञ्चत्रिंशमनगारगतिनामकाध्ययनम्	८२०-८२५
षट्त्रिंशं जीवाजीवविभक्तिसंज्ञमध्ययनम्	८२६-८७२
टीकाकृत्प्रशस्तिः	८७३-८७५
[१] परिशिष्टम्-मूलगाथानामकाराद्यनुक्रमः	८७७-९०२
[२] परिशिष्टम्-मूलगाथागतोपमा-दृष्टान्ताः	९०३-९०५
[३] परिशिष्टम्-मूलगाथागतसूक्तानि	९०६-९१०
[४] परिशिष्टम्-मूलटीकागतकथा-दृष्टान्ताः	९११-९१४
[५] परिशिष्टम्-टीकागतोद्धरणानामकाराद्यनुक्रमः	९१५-९२७
[६] परिशिष्टम्-टीकाकृत्प्रशस्तीनामकाराद्यनुक्रमः	९२८
[७] परिशिष्टम्-टीकागतव्याकरणविमर्शः	९२९-९३७
[८] परिशिष्टम्-टीकागतन्यायादिविमर्शः	९३८

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

उत्तरज्झयणाणि

भाग-२

१७-३६ अध्ययनानि

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सप्तदशं पापश्रमणीयमध्ययनम्

इह प्रागध्ययने ब्रह्मचर्यगुप्तय उक्तास्ताश्च पापस्थानवर्जनादेवेति पापश्रमणस्वरूपाभिधायकं सप्तदशमध्ययनमारभ्यते—

जे केइ उ पव्वइए नियंठे धम्मं सुणित्ता विणओववन्ने ।
सुदुल्लहं लहिउं बोहिलाभं विहरिज्ज पच्छा य जहासुहं तु ॥१॥

व्याख्या—यः कश्चित् 'तुः पूरणे' **प्रव्रजितो** निष्क्रान्तो **निर्ग्रन्थो धर्मं** श्रुतचारित्ररूपं **श्रुत्वा** विनयेन ज्ञानाद्युपचारात्मकेनोपपन्नो युक्तो **विनयोपपन्नः** । **सुदुर्लभं** सुष्ठु दुष्प्रापं 'लहिउं'ति **लब्ध्वा** प्राप्य **बोधिलाभम**र्हदुक्तधर्मप्राप्तिरूपमनेन भावतः प्रव्रजित इत्युक्तं स्यात् । स किमित्याह—**विहरेच्चरेत् पश्चात्** प्रव्रजनोत्तरकालं '**च** पुनरर्थे' । कोऽर्थः ? पूर्वं सिंहवृत्त्या प्रव्रज्य पश्चात् पुनर्यथासुखं यथा यथा निद्रा—विकथाऽऽदिकरणलक्षणेन प्रकारेण सुखमात्मनोऽवभासते । 'तुरेवार्थे' **यथासुखमेव** शृगालवृत्त्यैव विहरेदित्यर्थः ॥१॥

स च गुरुणान्येन वाधीष्वेत्युक्तो यद् वक्ति तदाह—

सिज्जा दढा पाउरणं मे अत्थि उप्पज्जई भुत्तु तहेव पाउं ।
जाणामि जं वट्टइ आउसु त्ति किं नामु काहामि सुएण भंते ! ॥२॥

व्याख्या—शय्या वसतिर्**दृढा** शीत—वातातप—जलाद्युपद्रवैरनभिभाव्या । तथा **प्रावरणं** 'मे' **ममास्ति** । किञ्चो**त्पद्यते भोक्तुं** भोजनाय **तथा पातुं** पानाय 'यथाक्रममशनं पानं चेति शेषः' तथा **जानामि यद् वर्तते** यदिदानीमस्ति, **आयुष्मन्नि**ति प्रेरयितुः सम्बोधन**मित्य**स्माद् हेतोः **किं नाम** ? न किञ्चिदित्यर्थः 'किं क्षेपे' 'काहामि'त्ति **करिष्यामि श्रुतेनागमेन** 'अधीतेनेत्यध्याहारः' **भदन्त** पूज्य ! अयमस्याशयो-यथा ये भवन्तोधीयन्ते तेऽपि नातीन्द्रियं वस्तु किञ्चनावबुध्यन्ते तत् किं हृदय—गल—तालुशोषकारिणाऽधीतेन ? इत्येवमध्यवसितो यः, स पापश्रमण इत्युच्यते । इतीहापि सिंहावलोकितन्यायेन सम्बध्यते इति ॥२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

किञ्च–

जे केइ उ पव्वइए निद्दासीले पगामसो ।
भुच्चा पिच्चा सुहं सुवई पावसमणि त्ति वुच्चई ॥३॥

व्याख्या–**यः कश्चित् प्रव्रजितो निद्राशीलः प्रकामशो** बहुशो **भुक्त्वा** दध्योदनादि, **पीत्वा** दुग्धादि **सुखं** यथा स्यादेवं सकलानुष्ठाननिरपेक्ष एव **स्वपिति** यः, स **पापश्रमण इत्युच्यते** इति । अत्र दृष्टान्तमाह–

अत्रास्ति **भरते** क्षेत्रे मधुरा **मथुरा** पुरी ।
विहारा यत् हारन्ति विशुद्धा भूरमोरसि ॥१॥

यस्याः सरसतां वीक्ष्य **कालिन्दी** यत्र कालिमाम् ।
दधावियं मम गुणं जग्राह चेत्यसूयया ॥२॥

तत्रैयुरन्यदाऽनेकशिष्याः **श्रीमङ्गुसूरयः** ।
श्रुताब्धिपारदृश्वानो विहरन्तो भुवतस्तले ॥३॥

महेभ्या भावसद्भक्तियुक्ता श्राद्धा यदृच्छया ।
साधुभ्यो ददते तत्र भोज्यं पेयं रसाद्भुतम् ॥४॥

ततश्च सातर्द्धि-रसगौरवत्रयगृद्धितः ।
सुखशीलतया जाताः सूरयो नित्यवासिनः ॥५॥

प्रणीतमशनं स्वैरमश्नन्त्युच्चैः पिबन्ति च ।
सुरभि स्वादु पानीयं खाद्य-स्वाद्ये अदन्ति ते ॥६॥

सर्वर्त्तुसुखदायां हि शय्यायां शेरतेऽनिशम् ।
सातगौरविताः किन्तु जातास्ते शिथिलक्रियाः ॥७॥

एते तपस्विषु श्रेष्ठाः सच्चारित्रिषु सत्तमाः ।
उपदेष्टृषु वागीशाः किमन्ये संयतब्रुवाः ? ॥८॥

इति श्लाघाऽन्यनिन्दाभ्यामनुमोदनया तु ते ।
हृष्यन्तोऽहंयवो मिथ्यादृशो मिथ्याभिमानगाः ॥९॥

क्षेत्रे कुले च ममताभाजः प्रतिबन्धमास्तिकेषु भृशम् ।
कुर्वाणास्तस्थुस्ते श्रुतपाठ-तपस्सु निरपेक्षाः ॥१०॥ **त्रिभिः कुलकम्**

विहाय सन्तोषमनन्तसौख्यदं रज्यन्ति तुच्छेष्वपि गौरवेषु ।
अल्पस्य हेतोर्बहु हारयन्ति ते दुरन्तता ही ! खलु मोहकर्मणः ॥११॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

स चाचार्योऽप्रतिक्रान्तव्रतातीचारवारकः ।
आयुःक्षये महायक्षः पुरनिर्धमनेऽजनि ॥१२॥
स्वं ज्ञात्वाऽवधिना पूर्वभवं गौरवदूषितम् ।
शिष्यान् बोधयितुं स्वीयान् तद्वहिर्गमनाध्वनि ॥१३॥
दीर्घां प्रासारयज्जिह्वां तां दृष्ट्वा मुनयोऽब्रुवन् ।
कस्त्वं भोश्चेष्टयेदृश्याऽस्मान् बिभीषयसे कथम् ? ॥१४॥
यक्षः प्राख्यद् विषण्णास्यो भो वाचंयमपुङ्गवाः ! ।
जानीत यूयमात्मीयं गुरुं तं **मङ्गु**नामकम् ॥१५॥
नित्यवासात् तथा तीव्रगोरवत्रयसेवनात् ।
सोऽहमीदृग्विधे स्थानेऽभूवमल्पर्द्धिकः सुरः ॥१६॥
ततो यूयं सदावासं गौरवत्रितयं तथा ।
प्रतिबन्धं परित्यज्य विहरध्वं व्रतादराः ॥१७॥
स्वीकृत्य तद्वचस्तेऽन्तेवासिनो भवभीलुकाः ।
ततो विहृत्य चारित्रं निरीहाः प्रत्यपालयन् ॥१८॥
यथैवं **मङ्गु**राचार्यो नित्यवासादियोगतः ।
पापश्रमणतां भेजे नैषा कार्या तथाऽपरैः ॥१९॥

इति रसादिगृद्धत्वेन पापश्रमणत्वे **मङ्गवा**चार्यकथा ॥३॥
तथा—

आयरिय-उवज्झाएहिं सुयं विणयं च गाहिए ।
ते चेव खिंसई बाले पावसमणि त्ति वुच्चई ॥४॥

व्याख्या—आचार्योपाध्यायैः श्रुतं विनयं च ग्राहितः शिक्षितो 'यैरिति गम्यते' । **तानेवा**चार्यादीन् **खिंसति** निन्दति **बालो** विवेकविकलो यः, स **पापश्रमण इत्युच्यते** इति ॥४॥

ज्ञानविषयं पापश्रमणमुक्त्वा दर्शनविषयं तदाह—

आयरिय-उवज्झायाणं सम्मं नो पडितप्पई ।
अप्पडिपूयए थद्धे पावसमणि त्ति वुच्चई ॥५॥

व्याख्या—आचार्योपाध्यायानां सम्यगवैपरीत्येन **न परितप्यते** न तत्तप्ति

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भक्तादिचिन्तां करोति । तथा **अप्रतिपूजको**ऽर्हदादिषु यथोचितप्रतिपत्तरहितः **स्तब्धो** गर्वाध्मात आत्मानमेव बहु मन्यते यः, स **पापश्रमण इत्युच्यत** इति ॥५॥

चारित्रविषयं तदाह—

सम्मद्दमाणो पाणाणि बीयाणि हरियाणि य ।
असंजए संजयमन्नमाणे पावसमणि त्ति वुच्चई ॥६॥

व्याख्या—संमर्दयन् प्राणानिति प्राणिनो द्वीन्द्रियादीन्, **बीजानि** शाल्यादीनि, **हरितानि** दूर्वादीनि 'सर्वैकेन्द्रियोपलक्षणमिदम्' अत **एवासंयतो**ऽपि **संयतो**ऽहमिति **मन्यमानो**ऽनेन संविग्नपाक्षिकत्वमप्यस्य नास्तीत्युक्तं स **पापश्रमण इत्युच्यते** ॥६॥

तथा—

संथारं फलगं पीढं निसिज्जं पायकंबलं ।
अप्पमज्जियमारुहइ पावसमणि त्ति वुच्चई ॥७॥

व्याख्या—संस्तारकं कम्बलादि, **फलकं** दारुमयं, **पीठमासनं**, **निषिद्या** स्वाध्यायभूमिः, **पादकम्बलं** पादपुञ्छनम्, **अप्रमृज्य** रजोहरणादिनोपलक्षणादप्रत्युपेक्ष्य **चारोहति** यः, स पापश्रमण इत्युच्यते ॥७॥

तथा—

दवदवस्स चरई पमत्ते य अभिक्खणं ।
उल्लंघणे य चंडे य पावसमणि त्ति वुच्चई ॥८॥

व्याख्या—द्रुतं द्रुतं शीघ्रं शीघ्रं तथाविधालम्बनं विना त्वरितं **चरति** गच्छति भिक्षाचर्यादिषु पर्यटति **प्रमत्तश्च** प्रमादवान् **अभीक्ष्णं** वारं वारं **उल्लङ्घनश्च** वत्स—बालादीनामधःकर्ता **चण्डश्च** क्रोधनो यः, स **पापश्रमण इत्युच्यते** ॥८॥

तथा—

पडिलेहेइ पमत्ते अवउज्झइ पायकंबलं ।
पडिलेहाअणाउत्ते पावसमणि त्ति वुच्चई ॥९॥

व्याख्या—प्रतिलेखयति प्रत्युपेक्षते **प्रमत्तः** सन् । 'अवउज्झइ'त्ति **अपोह्यति** यत्र तत्र निक्षिपति **पादकम्बलं** पादपुञ्छनम् । 'उपलक्षणात् सर्वोपधि' न प्रत्युपेक्षत इत्यर्थः । स एवं **प्रतिलेखनानायुक्तः** प्रत्युपेक्षाऽनुपयुक्तश्च यः, स **पापश्रमण इत्युच्यते** ॥९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तथा—

पडिलेहेइ पमत्ते से किंचि हु निसामिया ।
गुरुं परिभावए निच्चं पावसमणि त्ति वुच्चई ॥१०॥

व्याख्या—प्रतिलेखयति प्रमत्तः स 'किंचि हु'त्ति 'हुरप्यर्थः' ततः **किञ्चिदपि** विकथादिकं **निशम्य** श्रुत्वा तत्राक्षिप्तचित्ततयेति भावः । **गुरून् परिभवतीति** गुरुपरिभावको **नित्यम्** । को भावोऽसम्यक् प्रत्युपेक्षमाणो वितथमाचरन् वा गुरुभिर्नोदितस्तानेवाभिभवति, यथा स्वयमेव प्रत्युपेक्षध्वम्, युष्माभिरेव वयमित्थं शिक्षिता भवतामेवायं दोष इत्यादि यः, स **पापश्रमण इत्युच्यते** ॥१०॥

किञ्च—

बहुमाई पमुहरी थद्धे लुद्धे अणिग्गहे ।
असंविभागी अचियत्ते पावसमणि त्ति वुच्चई ॥११॥

व्याख्या—बहुमायी प्रभूतवञ्चनाप्रयोगवान्, **प्रकर्षेण मुखरो** वाचालः, **स्तब्धो लुब्ध** इति प्राग्वत् । **अनिग्रहो** न निग्रहीतेन्द्रियनोइन्द्रियः । **असंविभागी** गुरु—ग्लानादिभ्योऽशनादि न संविभज्य दाता । 'अचियत्ते'त्ति गुर्वादिष्वप्य**प्रीतिमान्** यः, स **पापश्रमण इत्युच्यते** ॥११॥

अन्यच्च—

विवायं च उईरेइ अहम्मे अत्तपन्नहा ।
वुग्गहे कलहे रत्ते पावसमणि त्ति वुच्चई ॥१२॥

व्याख्या—विवादं वाक्कलहं '**चः** पूरणे' 'उईरेइ'त्ति **उदीरयत्यु**पशान्तमप्युत्प्रासनादिना वृद्धिं नयति । **अधर्मो**ऽसदाचारः 'अत्तपन्नह'त्ति आप्तां सद्बोधरूपतया हितां प्रज्ञां स्वस्यान्येषां वा बुद्धिं कुतर्कव्याकुलीकरणतो हन्तीत्या**प्तप्रज्ञहा** । **व्युद्ग्रहे** दण्डादिघातजे विरोधे, **कलहे** वाचिके **रक्तः** सक्तो यः, स **पापश्रमण इत्युच्यते** ॥१२॥

अपरं च—

अथिरासणे कुक्कुईए जत्थ तत्थ निसीयई ।
आसणंमि अणाउत्ते पावसमणि त्ति वुच्चई ॥१३॥

व्याख्या—अस्थिरासनः कुत्कुचः स्पन्दकः **यत्र तत्र** संसक्तरजस्कादावपि **निषीदत्युपविशत्यासने अनायुक्तो**ऽनुपयुक्तो यः, स **पापश्रमण इत्युच्यते** ॥१३॥

तथा—

ससरक्खपाउ सुवई सिज्जं न पडिलेहए ।
संथारए अणाउत्ते पावसमणि त्ति वुच्चई ॥१४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—सह रजसा वर्तेते इति सरजस्कौ एवंविधौ पादो यस्य स **सरजस्कपादः**। [**स्वपिति**] कोऽर्थः ? पादावप्रमृज्य शेते तथा **शय्यां** वसतिं **न प्रतिलेखयति** 'उपलक्षणान्न प्रमार्जयति'। **संस्तारके** कम्बलादौ 'सुप्त इति शेषः' **अनायुक्तः** '[1]**कुक्कुडिपायपसारण आयामेउं पुणो वि आउंटे**' इत्यागमार्थानुपयुक्तो यः, स **पापश्रमण इत्युच्यते** इति ॥१४॥

तपोऽतिक्रमतः पापश्रमणमाह—

दुद्ध-दही विगईओ आहारेइ अभिक्खणं।
अरए य तवोकम्मे पावसमणि त्ति वुच्चई ॥१५॥

व्याख्या—दुग्धं च दधि च **दधि—दुग्धं** 'प्राकृतत्वात् सूत्रे व्यत्ययः' विकृतिहेतुत्वाद् **विकृती** 'उपलक्षणाद् घृताद्यशेषविकृतिपरिग्रहः' **आहारयत्यभीक्ष्णं** वारं वारं तथाविधपुष्टालम्बनं विनाऽपीति भावः। अत **एवारतिश्चा**प्रीतिमांश्च **तपःकर्मणि** यः, स **पापश्रमण इत्युच्यते** ॥१५॥

अपि च—

अत्थंतंमि य सूरंमि आहारेइ अभिक्खणं।
चोइओ पडिचोएइ पावसमणि त्ति वुच्चई ॥१६॥

व्याख्या—अस्तान्ते अस्तमयपर्यन्ते 'उदयादारभ्येति गम्यते' **सूर्ये आहारयत्यभीक्ष्णम्**। कोऽर्थः ? प्रातरारभ्य सन्ध्यां यावत् पुनःपुनर्भुङ्क्ते। 'चोइओ पडिचोएइ'त्ति केनचिद् गीतार्थेन **चोदितो** यथाऽऽयुष्मन्! किमिति त्वया नित्यमाहारतत्परतयैव स्थीयते ? दुर्लभेयं मनुजत्वादिसामग्री तत एनामवाप्य तपसि किं नोद्यम्यते ? इति प्रेरितः सन् **प्रतिचोदयति** यथा त्वमेवं जानन्नपि भवान्न विकृष्टतपः कुरुते इति प्रतिवक्ति यः, स **पापश्रमण इत्युच्यते** ॥१६॥

तथा—

आयरियपरिच्चाई परपासंडसेवए।
गाणंगणिए दुब्भूए पावसमणि त्ति वुच्चई ॥१७॥

व्याख्या—आचार्यपरित्यागी, ते हि तपसि सीदन्तं नोदयन्त्यानीतं चान्नादि बालग्लानादिभ्यो दापयन्त्यतोऽतीवाहारलौल्यात् तत्परित्यजनशीलः। परपाखण्डान् '**मृद्वी शय्या०**' इत्यादिवादिनो बौद्धादीनत्यन्ताहारप्रसक्तान् सेवते इति **परपाखण्डसेवकः**। तथा स्वेच्छया षण्मासाभ्यन्तरमेव गणाद् गणं संक्रामतीति **गाणंगणिकः** इत्यागमिकी भाषा।

---

१. कुक्कुटीपादप्रसारणं आयम्य पुनरप्याकुञ्चेत्।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अत एव दुर्भूतो दुर्निन्दितं भूतं भवनमस्येति **दुर्भूतो** दुराचारतया निन्द्यो भूत इत्यर्थः यः, स **पापश्रमण इत्युच्यते** ॥१७॥

वीर्याचारविषयं तमाह—

सयं गेहं परिच्चज्ज परगेहंसि वावडे ।
निमित्तेण य ववहरे पावसमणि त्ति वुच्चई ॥१८॥

व्याख्या—स्वकमात्मीयं 'गेहं' **गृहं परित्यज्य** त्यक्त्वा प्रव्रज्याऽङ्गीकरणतः **परगृहे**ऽन्यगृहे 'वावडे'त्ति **व्याप्रियते** पिण्डार्थी सन् स्वतस्तत्कृत्यानि कुरुते इत्यर्थः । **निमित्तेन च** शुभाशुभसूचकेन वचनेन **व्यवहरति** द्रव्यार्जनं करोति यः, स **पापश्रमण इत्युच्यते** । अत्रार्थे दृष्टान्तस्तथाहि—

कस्मिंश्चित् सन्निवेशेऽभूत् क्षत्रियो ग्रामनायकः ।
महाराजाज्ञया सोऽगाद् द्रष्टुं देशान्तरं सुधीः ॥१॥

काले भूयस्तरे जाते तद्भार्या रमणोत्सुका ।
भिक्षार्थमागतं कञ्चित् साधुमेकमपृच्छत ॥२॥

भोः ! सर्वज्ञसुता यूयं निमित्तं वित्थ वा न वा ? ।
साधुनोक्तमहं साधु तज्जानामि जिनागमात् ॥३॥

यद्येवं तर्हि मे ब्रूहि प्राणनाथः कदैष्यति ? ।
सोऽवग् ज्ञानावलोकेन श्वः समेष्यति ते धवः ॥४॥

किमभिज्ञानमत्रार्थे वद ज्ञानविदां वरः ।
मुनिस्तद्गुह्यदेशस्थं मषं स्वप्नादि चादिशत् ॥५॥

सञ्जातप्रत्यया साऽनु तज्ज्ञानगुणरञ्जिता ।
ततस्तस्मै ददौ तुष्टा मोदकादि यथेप्सितम् ॥६॥ **युग्मम्**

अथ द्वितीयेऽह्नि गृहं प्रमार्जनोपलिम्पन-स्वस्तिकमण्डनाद्भुतम् ।
ससूत्रकण्ठैः कलशैर्विभूषितं साऽचीकरद् वन्दनमालिकाङ्कितम् ॥७॥

प्रातः पत्युरभिमुखं सा प्रैषीत् स्वपरीजनम् ।
स समायानथैकाकी स्वगृहाचारमीक्षितुम् ॥८॥

ग्रामेशो ददृशे तेन नतस्तेनाप्यभाणि सः ।
युष्मकाभिः कथं ज्ञातं मदागमनमद्य भोः ? ॥९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ततः परिजनोऽवादीत् त्वत्पत्नीवचसैव हि ।
ततो विस्मितचित्तोऽसावन्तरुल्लसितप्रमुत् ॥१०॥

समागात् स्वगृहं चित्रां वीक्ष्य तादृग्गृहश्रियम् ।
कथं मदागमो ज्ञात इत्यपृच्छन्निजां प्रियाम् ॥११॥

सर्वं गुह्यमषाद्येषा साधुप्रोक्तमचीकथत् ।
ग्रामाध्यक्षस्ततो रुष्टो मुनौ मिथ्याविकल्पनात् ॥१२॥ **युग्मम्**

परीक्षार्थं समाहूय तं साधुं प्रणिपत्य च ।
सोऽपृच्छत् कथय त्वं भोः ! यदि विज्ञानवानसि ॥१३॥

वडवाया यथैतस्या गर्भः कीदृग् भविष्यति ? ।
किशोरः पञ्चपुण्ड्राङ्कोपेतस्तेनेति जल्पितम् ॥१४॥

ग्रामेशस्तत्प्रतीत्यर्थं व्यदारीद् वडवोदरम् ।
दृष्टो यथावदुक्तोऽथ किशोरः पञ्चचन्द्रकः ॥१५॥

तेनाभाणि पुनः सत्यं यद्येतद् वचनं तव ।
नाभविष्यत् तदा तुदं तेऽभविष्यद् विदारितम् ॥१६॥

ततः सत्कृत्य तं साधु विससर्ज स भौतिकः ।
एवं निमित्ततः सोऽथ पापश्रमणकोऽभवत् ॥१७॥

इति निमित्तादिप्रयोगे **साधुकथा** ॥१८॥
अपि च–

सन्नाइपिंडं जेमेइ नेच्छई सामुदाणियं ।
गिहिनिसिज्जं च वाहेई पावसमणि त्ति वुच्चई ॥१९॥

व्याख्या–स्वज्ञातिभिः स्वजनैर्निजकोऽयमिति यः स्निग्धाद्याहारो दीयते, स **स्वज्ञातिपिण्डस्तं जेमति** भुङ्क्ते । **नेच्छति** समुदानानि भिक्षास्तेषां समूहः **सामुदानिकं** बहुगृहसम्बन्धिनं भिक्षासमूहमज्ञातोञ्छमित्यर्थः । **गृहिणां निषिद्या** तूल्यादिशय्यां **वाहयति** सुखशीलतया आरोहति यः, स **पापश्रमण इत्युच्यत** इति ॥१९॥

अथाध्ययनमुपसंहरन् दोषासेवन–त्यागयोः फलमाह–

एयारिसे पंचकुसीलऽसंवुडे रूवंधरे मुणिपवराण हेट्ठिमे ।
अयंसि लोए विसमेव गरहिए न से इहं नेव परत्थ लोए ॥२०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—एतादृशो यादृश उक्तः, पञ्च कुशीलाः पार्श्वस्थादयस्तद्वदसंवृतोऽनिरुद्धाश्रवद्वारः **पञ्चकुशीलासंवृतः** । रूपं रजोहरणादिवेषं धारयतीति **रूपंधरः** 'प्राकृतत्वात् सूत्रे बिन्दुभावः' । **मुनिप्रवराणां** 'हिट्ठिमो'त्ति **अधोभागवर्ती** जघन्यसंयमस्थानवर्तितया निकृष्टः । एतत्फलमाह—'अयंसि'त्ति **अस्मिन् लोके विषमिव गर्हितो** धिगेनं भ्रष्टप्रतिज्ञमिति नीचैरपि निन्द्यतेऽत एव **न स इहे**तीह लोके **नैव परत्र लोके** 'परमार्थतः सन्निति शेषः' । यस्य नैहिक आमुष्मिकोऽपि गुणलाभस्तस्य सत्सु गणनाभावादविद्यमानतैवेति भावः ॥२०॥

जे वज्जए एय सया उ दोसे से सुव्वए होइ मुणीण मज्झे ।
अयंसि लोए अमयं व पूइए आराहए लोगमिणं तहा परं ॥२१॥
त्ति बेमि ॥

व्याख्या—यो वर्जयत्येतानुक्तरूपान् **सदा दोषान्** पापानुष्ठानरूपान् **स** तादृशः **सुव्रतो** निरतिचारतया प्रशस्यव्रतो **भवति मुनीनां मध्ये** भावमुनित्वेन स मुनिमध्ये गण्यत इति भावः । तथा **चास्मिन् लोकेऽमृतमिव पूजित आराधयति लोकमिमम्**इहलोकं **तथा परं** परलोकमिति । इह सकललोकपूज्यतया परलोके च सुगतिप्राप्तेः, ततः पापवर्जनमेव कार्यमिति । **इति** समाप्तौ **ब्रवीमी**ति प्राग्वत् ॥२१॥ ग्रं० १४१-८॥

इति श्रीकमलसंयमोपाद्यायविरचितायां सर्वार्थसिद्धौ श्रीउत्तराध्ययनटीकायां सप्तदशं पापश्रमणीयमध्ययनं समाप्तम् ॥१७॥

• • •

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अष्टादशं संयतीयमध्ययनम्

अनन्तराध्ययने पापस्थानवर्जनमुक्तम् । तच्च भोगर्द्धित्यागतः संयतस्यैव भवतीत्यतः **संजयो**दाहरणतः प्रतिपादयन्नाह—

कंपिल्ले नयरे राया उदिन्नबलवाहणो ।
नामेणं संजए नामं मिगव्वं उवनिग्गए ॥१॥

व्याख्या—काम्पील्ये नगरे राजा नृपतिरुदीर्णमुदयप्राप्तं बलं शरीरसमार्थ्यं वाहनं गजाश्वादि यस्यासाव**ुदीर्णबलवाहनः** । स च **नाम्ना**भिधानेन **सञ्जयो** नामेति प्रसिद्धौ ततश्च **सञ्जय**नाम्ना प्रसिद्धो **मृगव्यां** मृगयां प्रति **उपनिर्गतो** निष्क्रान्तः 'तत एव नगरादिति गम्यम्' ॥१॥

स च कीदृग् विनिर्गतः ?, किं च कृतवानित्याह—

हयाणीए गयाणीए रहाणीए तहेव य ।
पायत्ताणीए महया सव्वओ परिवारिए ॥२॥

मिए छुभित्ता हयगओ कंपिलुज्जाणकेसरे ।
भिए संते मिए तत्थ वहेइ रसमुच्छिए ॥३॥

अनयोर्व्याख्या—विभक्तिव्यत्ययाद् **हयानीकेन, गजानीकेन, रथानीकेन, तथैव च** पदातीनां समूहः **पादातं तदनीकेन** कटकेन **महता** सुविस्तृतेन **सर्वतः परिवारितः** सन् ॥ किं ? **मृगान्** क्षिप्त्वा प्रेरयित्वा काम्पील्यस्य तस्यैव नगरस्य केसरनामकमुद्यानं **काम्पील्योद्यानकेसरं तस्मिन् भीतान्** त्रस्तान् **सतो मितान्** परिमितांस्**तत्र** तेषु मृगेषु मध्ये 'वहेइ'त्ति **हन्ति** व्यापादवति शरादिभिः कृत्वा **रसस्**तत्पिशितास्वादस्**तत्र मूर्च्छितो** गृद्धः इति सूत्रद्वयार्थः ॥२-३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अत्रान्तरे यदभूत् तदाह—

अह केसरंमि उज्जाणे अणगारे तवोधणे ।
सज्झाय-ज्झाणसंजुत्ते धम्मज्झाणं ज्झियायइ ॥४॥
अप्फोवमंडवंमी झायती क्खवितासवे ।
तस्सागए मिए पासं वहेइ से णराहिवे ॥५॥

अनयोर्व्याख्या—अथानन्तरं तस्मिन् **केसरोद्यानेऽनगारस्तपोधनः स्वाध्यायो**ऽनुप्रेक्षणादिः, **ध्यानं** धर्मध्यानादि **ताभ्यां युक्तो** यथाऽवसरं तदासेवकोऽत एव **धर्मध्यानमा**ज्ञाविचयादि **ध्यायति** चिन्तयति ॥ क्वेत्याह—'अप्फोव' इति वृद्धानुवादाद् **वृक्षाद्याकीर्णः** स चासौ **मण्डपश्च तत्र ध्यायति** 'धर्मध्यानादीति गम्यते' पुनरभिधानं ध्यानस्य अतिशयकरणीयताख्यापकम् । स च कीदृशः ? **क्षपिताश्रवः** निर्मूलोन्मूलितकर्मबन्धहेतुः । अथ **तस्य** मुनेः पार्श्वं समीपं **आगतान् मृगान् हन्ति स नराधिपो** राजा **सञ्जय** इति सूत्रद्वयार्थः ॥४-५॥

तदा च किमभूदित्याह—

अह आसगओ राया खिप्पमागम्म सो तहिं ।
हए मिए उ पासित्ता अणगारं तत्थ पासई ॥६॥

व्याख्या—अथानन्तरमश्वगतो राजा क्षिप्रं शीघ्र**मागत्य स** इति **सञ्जय**नामा **तस्मिंस्त**पोधनाधिष्ठिते मण्डपे **हतान्** व्यापादितान् 'तुशब्द एवार्थे' ततो **मृगानेव** न पुनरनगारं, **दृष्ट्वा**ऽनन्तरमवहितोऽ**नगारं** साधुं **तत्र** मण्डपान्तः **पश्यती**ति ॥६॥

ततः किमसावकार्षीदित्याह—

अह राया तत्थ संभंतो अणगारो मणाहओ ।
मए उ मंदपुन्नेण रसगिद्धेण घत्तुणा ॥७॥
आसं विसज्जइत्ताणं अणगारस्स सो निवो ।
विणएण वंदई पाए भगवं ! एत्थ मे खमे ॥८॥

अनयोर्व्याख्या—अथ राजा तत्र मुनिदर्शने सति **सम्भ्रान्तो** भीतो यथाऽ**नगारो मनाक्** स्तोकं **हतो** भविष्यति 'तदासन्नमृगहननादित्यभिप्रायः' **मया तु मन्दपुण्येन** स्तोकपुण्यवता **रसगृद्धेन** 'घत्तुण'त्ति **घातकेन** हननशीलेनेत्यर्थः ॥ तत**श्चाश्वं विसृज्य अनगारस्य स नृपो विनयेन वन्दते पादौ** वक्ति च यथा **भगवन्नत्रै**तस्मिन् मृगवधे **मम**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

'अपराधमिति शेषः' **क्षमस्व** सहस्व ॥७-८॥

ततश्च—

अह मोणेण सो भगवं अणगारे झाणमस्सिए ।
रायाणं न पडिमंतेइ तओ राया भयद्दुओ ॥९॥

संजओ अहमस्सीति भगवं ! वाहराहि मे ।
कुद्धे तेएण अणगारे दहिज्ज नरकोडिओ ॥१०॥

अनयोर्व्याख्या—अथ मौनेन स भगवाननगारो ध्यानमाश्रितो राजानं न प्रतिमन्त्रयते न प्रतिवक्ति यथाऽहं क्षमिष्ये नवेति । **ततस्तत्**प्रतिवचनाभावादयमवश्यं क्रुद्ध इति **राजा भयद्रुतो** भयत्रस्तो मां मध्यमप्रकृतिं ज्ञात्वा सुतरां कोपं करिष्यतीति । निजैश्वर्यं ज्ञापयन्नाह 'संजउ'त्ति **संयत**नामा राजाऽ**हमस्मि,** न तु नीच **इत्यस्माद्** हेतो**र्व्याहर** सम्भाषय 'मे' इति **माम्** । न चाहमनर्थकं भयद्रुत इत्याह **क्रुद्धस्तेजसा अनगारो दहेन्नरकोटीरपि,** आस्तां शतं सहस्रं वेत्यतो भयद्रुत इत्यर्थः ॥९-१०॥

अथ मुनिराह—

अभयं पत्थिवा ! तुब्भं अभयदाया भवाहि य ।
अणिच्चे जीवलोगंमि किं हिंसाए पसज्जसि ? ॥११॥

जया सव्वं परिच्चज्ज गंतव्वमवसस्स ते ।
अणिच्चे जीवलोगंमि किं रज्जंमि पसज्जसि ? ॥१२॥

अनयोर्व्याख्या—अभयं पार्थिव ! राजन् ! 'तुब्भ'त्ति **तव** 'न कश्चित् त्वां दहतीति भावः' इत्थमाश्वास्योपदेशमाह—**अभयदाता च** त्वमपि **भव** यथा भवतो मृत्यु-भयमेवमन्येषामपीत्यर्थः । **अनित्ये जीवलोके किं हिंसायां प्रसजसि** ? । अल्पदिनकृते किमित्थं पापमुपार्जयसि ? नेदमुचितमित्यर्थः ॥ इत्थं चानित्यत्वे सिद्धे 'जय'त्ति **यदा सर्वं** कोशान्तःपुरादि **परित्यज्य गन्तव्यं** भवान्तरं **अवशस्य** अस्वतन्त्रस्य 'ते' **तव** ततोऽ**नित्ये जीवलोके किं राज्ये प्रसजसि** ? हिंसादिनिमित्तत्वादस्य ॥११-१२॥

अनित्यत्वं भावयितुमेवाह—

जीवियं चेव रूवं च विज्जुसंपायचंचलं ।
जत्थ तं मुज्झसी रायं ! पेच्चत्थं नावबुज्झसी ॥१३॥

व्याख्या—जीवितं जीवनं **चैव रूपं च विद्युत्सम्पातो** विद्युच्चलनं तद्वच्च**ञ्चलं**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

यत्र जीविते रूपे च **त्वं मुह्यसि** मोहं गच्छसि **राजन् ! प्रेत्यार्थं** परलोकप्रयोजनं **नावबुध्यसे** परलोककृत्यावबोधोऽपि नास्ति कुतस्तत्करणं तवेत्यर्थः ॥१३॥

अथ मोहपरिहारार्थमिदमाह—

दाराणि य सुता चेव मित्ता य तह बंधवा ।
जीवंतमणुजीवंति मयं णाणुवयंति य ॥१४॥

नीहरंति मयं पुत्ता पियरं परमदुक्खिया ।
पियरो वि तहा पुत्ते बंधू रायं ! तवं चरे ॥१५॥

अनयोर्व्याख्या—दाराश्च सुताश्चैव मित्राणि तथा बान्धवा अपि **जीवन्तमनुजीवन्ति** तदुपार्जितद्रव्यभोगाशयाऽनुवर्तन्ते तदनुगच्छन्ति, **मृतं पुनर्नानुव्रजन्त्यपि,** किं पुनः सह यास्यन्ति ? । अतः कृतघ्नेषु कलत्रादिषु नास्था विधेयेति भावः ॥ अपि च **निःसारयन्ति मृतं पुत्राः पितरम् । परमदुःखिता** अतिशयसञ्जातदुःखा अपि **पितरोऽपि तथा पुत्रान्** निःसारयन्ति बन्धवश्च 'बन्धूनिति शेषः' । ततो **राजन् । तपश्चरेः** व्रतमासेवस्व ॥१४-१५॥

तत्पुत्रादयः किं कुर्वन्तीत्याह—

ततो तेणज्जिए दव्वे दारे य परिरक्खिए ।
कीलंतन्ने नरा राया हट्ठ-तुट्ठमलंकिया ॥१६॥

व्याख्या—ततो निःसारणादनन्तरं **तेन** पित्रादि**नोपार्जिते द्रव्ये दारेषु च परिरक्षितेषु** सर्वोपायप्रतिपालितेषु 'आर्षत्वादेकवचनम्' **क्रीडन्ति** रमन्ते 'तेनैव धनेन तैरेव दारैरिति गम्यम्' **अन्ये नरा हे राजन् ! हृष्टाः तुष्टा अलङ्कृताः** । तत्र हृष्टाः बहिःपुलकिताः, तुष्टाः मनःसमाधिभाजः, अलङ्कृता विभूषिताः । इयं च भवस्थितिरीदृशी । अतस्तपश्चरेरिति सम्बन्धः ॥१६॥

मृतस्य को वृत्तान्त इत्याह—

तेणावि जं कयं कम्मं सुहं वा जइ वा दुहं ।
कम्मुणा तेण संजुत्तो गच्छती उ परं भवं ॥१७॥

व्याख्या—तेनापि पित्रादिमृतेनापि **यत् कृतं कर्म शुभं वा यदि** वेत्यथवा**ऽशुभम्** । 'तुशब्दस्य व्यस्तसम्बद्धत्वादेवकारार्थत्वात्' **तेनैव** शुभाशुभरूपेण **कर्मणा,** न तु धनादिना **संयुक्तो गच्छति परं भवं** भवान्तरं शुभाशुभयोः कर्मणोरनुयायित्वाच्छुभहेतु तप एव चरेरित्यर्थः ॥१७॥

Jain Education International 2010_02   For Private & Personal Use Only   www.jainelibrary.org

अथ तद्वचः श्रुत्वा राजा किमकार्षीदित्याह—

सोऊण तस्स सो धम्मं अणगारस्स अंतिए ।
महया संवेग-निव्वेयं समावन्नो नराहिवो ॥१८॥

संजओ चईउं रज्जं निक्खंतो जिणसासणे ।
गद्दभालिस्स भगवओ अणगारस्स अंतिए ॥१९॥

अनयोर्व्याख्या—श्रुत्वा आकर्ण्य **तस्य** प्रस्तुतस्यानगारस्यान्तिके इति सम्बन्धः । **स** इति **सञ्जयाख्यो धर्ममुक्त**स्वरूपं 'महय'त्ति 'आर्षत्वान्महत्' **संवेग—निर्वेदं समापन्नो नराधिपो** राजा ॥ ततश्च **सञ्जयः** सञ्जयनामा **त्यक्त्वा राज्यं निष्क्रान्तः** प्रव्रजितो **जिनशासने,** न तु सुगतादिमते इति भावः । **गर्दभालेः** गर्दभालिनाम्नो **भगवतोऽनगार-स्यान्तिके सञ्जयो**ऽयमुपगतवान् । स हि **गर्दभालि**नामा गुरुरिति सूत्रद्वयार्थः ॥१८-१९॥

स चैवमुपात्तव्रतोऽवगतकृत्याकृत्यविभागः सामाचारीप्रयतश्चानियतचर्यया विहरं-स्तथाविधं सन्निवेशमाजगाम । तत्र तस्य यदभूत्, तदाह—

चिच्चा रट्ठं पव्वईओ खत्तिओ परिभासई ।
जहा ते दीसई रूवं पसन्नं ते तहा मणो ॥२०॥

किंनामे किंगुत्ते कस्सट्ठाए व माहणे ? ।
कहं पडियरसी बुद्धे कहं विणीय त्ति वुच्चसि ? ॥२१॥

अनयोर्व्याख्या—त्यक्त्वा राष्ट्रं देशं **प्रव्रजितः क्षत्रियः** क्षत्रजातिरनिर्दिष्टनामा **परिभाषते 'सञ्जय**मुनिमित्युपस्कारः' । स हि पूर्वजन्मनि वैमानिक आसीत्, ततश्च्युत्वा क्षत्रियकुले समुत्पद्य तथाविधनिमित्ततः स्मृतपूर्वजन्मा तत एवोत्पन्नवैराग्यश्च प्रव्रजितवान् विहरंश्च तत्र **सञ्जय**मुनिं दृष्ट्वा विमर्शार्थमिदमुक्तवान् । **यथा ते दृश्यते रूपमा**कृतिः **प्रसन्नं** निर्विकारं तथा 'ते' **तव मनः** 'प्रसन्नमिति प्रक्रमः' । तत्कलुषतायां बहिरपि न प्रसन्नतासम्भवः ॥ तथा **किंनामा** ? **किंगोत्रः** ? 'कस्सट्ठाए'त्ति **कस्मै चार्थाय** प्रयोजनाय **माहनो** हिंसानिवृत्तः ? प्रव्रजित इति भावः । **कथं** वा **प्रतिचरसि** सेवसे **बुद्धानाचार्यादीन् कथं** वा **विनीतः** ? **इत्युच्यसे** ॥२०-२१॥

सञ्जयमुनिराह—

संजओ नाम नामेणं तहा गुत्तेण गोयमो ।
गद्दभाली ममायरिया विज्जाचरणपारगा ॥२२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या–'नामेत्यामन्त्रणे' अहं **संजयो नाम्ना, तथा गोत्रेण गौतमः** । शेषप्रश्नत्रयोत्तरमाह–**गर्दभालयो** नामानो **ममाचार्या विद्याचरणपारगाः** श्रुतचारित्रपर्यन्तगामिनः । एवं च कथयतस्तस्यायमेवाभिसन्धिः । **गर्दभाल्या**चार्यैर्जीवघातात् निवर्तितोऽहं तैश्च श्रुत-धरैस्तन्निवृत्तौ मुक्तिस्वरूपं फलमभ्यधायि । तदर्थं माहनोऽस्मि । तदुपदेशानुसारतो गुरूनपि प्रतिचरामि । तच्छासनसावधानत्वाद् विनीतश्चेत्यर्थः ॥२२॥

अथ तद्वचनश्रुतप्रमुदितमना अपृष्टोऽपि क्षत्रियमुनिस्तं प्रति तत्त्वोपदेशमाह–

किरियं अकिरियं विणयं अन्नाणं च महामुणी ! ।
एएहिं चेव ठाणेहिं मेयन्ने किं पभासई ? ॥२३॥

व्याख्या–क्रियाऽस्तीत्येवंरूपा, **अक्रिया** तद्विपरीता, **विनयो** नमस्करणादिः । 'सर्वत्र लिङ्गव्यत्ययः प्राकृतत्वात्' । **अज्ञानं** तत्त्वानवगमश्चेति । **हे महामुने ! एतैः** क्रियादिभिश्चतुर्भिः **स्थानैः** कृत्वा 'मेयन्ने'त्ति मेयं प्रमेयं जीवादि जानन्तीति **मेयज्ञाः** स्वाभिप्रायकल्पितैः क्रियादिभिर्वस्तुपरिच्छेदिन इत्यर्थः । **किमि**ति कुत्सितं **प्रभाषन्ते,** विचाराक्षमत्वात्, तथाहि–ये तावत् क्रियावादिनस्तेऽस्तिक्रियाविशिष्टमात्मानं मन्यमाना अपि विभुरविभुः, कर्ता अकर्ता, मूर्त्तोऽमूर्त्तोऽसावित्याद्येकान्तवादमभ्युपगताः । कुत्सितभाषणं चैतद् युक्त्यागमबाधितत्वात् । तथाहि–विभुत्वाद्यङ्गीकारे तल्लिङ्गभूतचैतन्यस्य सर्वत्रोपलम्भप्रसङ्गः । अङ्गुष्ठपर्वमात्राधिष्ठातृतायां स्वरूपाविभुत्वैकान्ते शरीरव्यापिचैतन्यानुपपत्तिरेवं कर्तृत्वाद्यनुपपत्तिरपि वाच्या । अक्रियावादिनस्त्वस्तिक्रियाविशिष्टमात्मानं नेच्छन्त्येवैतच्चासङ्गततरं प्रत्यक्षादिप्रमाणप्रसिद्धत्वात् तस्य । वैनयिकवादिनस्तु सुर-नृपति-यति-चतुष्पद-पक्षि-मकरादिनमस्करणान्निवृत्तिमभ्युपगताः । अन्याय्यं चैतल्लोके समये च गुणाधिकस्यैव विनययोग्यत्वेन प्रसिद्धत्वात्, इतरस्याप्रयोजकत्वात् । अज्ञानवादिनस्तु कीटसङ्ख्यापरिज्ञानतुल्येन किमात्मादिज्ञानेन, तपःप्रभृतिकष्टादेवेष्टसिद्धिरिति प्रतिपन्नाः । इदं चात्यन्तमयुक्तं ज्ञानं विना सत्प्रवृत्तेरप्यनुपपत्तेः । अतः सर्वेऽप्यमी कुत्सितं प्रभाषन्त इति स्थितम् । एतद्विस्तरस्तु **बृहट्टीकातो**ऽवसेयः ॥२३॥

न चैतन्मयैवोच्यते, किन्तु–

इइ पाउकरे बुद्धे नायए परिनिव्वुए ।
विज्जाचरणसंपन्ने सच्चे सच्चपरक्कमे ॥२४॥

व्याख्या–इत्येतत् क्रियादिवादिनः कुत्सितं भाषन्त इत्येवं रूपं **प्रादुरकार्षीत्** प्रकटितवान् **बुद्धो ज्ञाततत्त्वः** ज्ञात एव ज्ञातकः क्षत्रियः स चेह प्रस्तावान्**महावीरः**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

परिनिर्वृत इति कषायाग्निशमनाच्छीतीभूतो **विद्या-चरणाभ्यां** क्षायिकज्ञान—चारित्राभ्यां **सम्पन्नो**ऽत एव **सत्यः** सत्यवाक् **सत्यपराक्रमो**ऽवन्ध्यवीर्य इति ॥२४॥

तेषां च फलमाह—

पडंति नरए घोरे जे नरा पावकारिणो ।
दिव्वं च गइं गच्छंति चरित्ता धम्ममारियं ॥२५॥

व्याख्या—पतन्ति नरके घोरे ये नराः पापकारिणः प्रस्तुतत्वादुन्मार्गप्ररूपणात्मकविधायिनः । ये त्वनीदृशास्ते पुन**र्दिव्यां गतिं गच्छन्ति** । किं कृत्वा ? **चरित्वा** आसेव्य **धर्मं** 'आरियं'ति **आर्यं** सत्प्ररूपणारूपं ततश्च सत्प्ररूपणापरेणैव भवता भाव्यमित्युपदेशार्थः ॥२५॥

अमीषां पापकारित्वमुपपादयति—

मायाबुइयमेयं तु मुसाभासा निरत्थिया ।
संजममाणो वि अहं वसामि इरियामि य ॥२६॥

व्याख्या—मायया शाठ्येन 'बुइयं'ति उक्तं मायोक्तम् । एतत् क्रियादिवादिवचनम् । 'तुरवधारणे' ततश्च **मायोक्तमेवैतत्** । अतश्चैत**न्मृषाभाषा निरर्थिका** प्रयोजकार्थशून्या । तत एव 'संजममाणो वि'त्ति 'अपिरेवकारार्थः' ततः **संयच्छन्नेव** उपरमन्नेव तदुक्त्याकर्णनादिभ्यो**ऽहं वसामि** तिष्ठामि 'उपाश्रयादाविति गम्यते' । 'इरियामि'त्ति ईरैव कोऽर्थः ? **ईर्यया यामि** गच्छामि **च** गोचरादिष्विति । इह च स्वयं स्वस्वरूपकथनं तन्मनः-स्थिरीकरणार्थम् । उक्तं हि—"[१]**गुणसुट्ठियस्स वयणं घय—महुसित्त व्व पविभाइ**" इति ॥२६॥

स्वस्य तद्वचनाकर्णनादिनिवृत्तेः कारणमाह—

सव्वे ते विइया मज्झं मिच्छादिट्ठी अणारिया ।
विज्जमाणे परे लोए सम्मं जाणामि अप्पगं ॥२७॥

व्याख्या—सर्वे ते क्रियादिवादिनो **विदिता मम** यथाऽमी **मिथ्यादृष्टयो**स्त **एवानार्या** अनार्यकर्मप्रवृत्ताः । कथं विदिता इत्याह—**विद्यमाने** सति **परे लोके**ऽत्र जन्मनि **सम्यग् जानाम्यात्मानम्** । ततः परलोकात्मनोः सम्यग्ज्ञानान्मम ते विदिता अतो मा मिथ्यात्वात् परत्र नरकादिभवभ्रमणं भूयादिति तदुक्त्याकर्णनादिभ्यः संयच्छामीति ॥२७॥

---

१. गुणसुस्थितस्य वचनं घृतमधुसिक्तमिव प्रविभाति ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कथं पुनरात्मनः परलोकादिसद्भावं जानासीत्याह—

अहमासि महापाणे जुइमं वाससओवमे ।
जा सा पाली महापाली दिव्वा वरिससओवमा ॥२८॥

से चुए बंभलोगाओ माणुसं भवमागओ ।
अप्पणो य परेसिं च आउं जाणे जहा तहा ॥२९॥

अनयोर्व्याख्या—अहमभूवं महाप्राणे ब्रह्मलोकविमाने **द्युतिमान्** 'वाससय'त्ति मध्यमपदलोपी समास इति वर्षशतजीविता उपमा यस्य स **वर्षशतोपमः** । यथेदानीं वर्षशतजीवी पूर्णायुरुच्यते, एवमहं तत्र सम्पूर्णायुरभूवम् । तथाहि—**या सा** पालिरिव **पालिर्जी**वितजलधारणाद् भवस्थितिः सा च पल्योपमप्रमाणा, **महापाली** तु सागरोपम-प्रमाणा तस्यास्ततो महत्त्वात् । दिवि भवा **दिव्या** । तथा—"[1]**वाससए वाससएक्किक्के अवहियमि जो कालो**" इत्यादिवचनात् केशोद्धारहेतुभिर्वर्षशतैरुपमा 'अर्थात् पल्यविषया' यस्यां सा **वर्षशतोपमा** । तत्र मम महापाली दिव्या भवस्थितिः 'आसीदित्युपस्कारः' ॥ 'से' इत्य**थ** स्थितिक्षये **च्युतो ब्रह्मलोकान्मानुष्यं भवमागतः** । जातिस्मरणाति-शयमाख्यायातिशयान्तरमाह—**आत्मनश्च परेषां चायुर्जाने यथा**ऽस्ति **तथै**व, न त्वन्यथेत्यभिप्रायः ॥२८-२९॥

इत्थं प्रसङ्गतः परितोषतश्चापृष्टमपि स्ववृत्तान्तमभिधायोपदेष्टुमाह—

नानारुइं च छंदं च परिवज्जिजज्ज संजए ।
अणट्ठा जे य सव्वत्था इइ विज्जामणुसंचरे ॥३०॥

व्याख्या—नाना अनेकधा रुचिं क्रियैकान्ताद्यभिलाषं **नानारुचिं छन्दश्च** स्व-विकल्पिताभिप्रायरूपं **परिवर्जयेत् संयतो** यतस्तथा । **अनर्था** निष्प्रयोजना **ये च** 'व्यापारा इति गम्यते' तानपि **सर्वत्र** 'वर्जयेदिति सम्बन्धः' । आकारोऽलाक्षणिकः । **इत्येवं**रूपां **विद्यां** तत्त्वज्ञानात्मिका**मनु**लक्षीकृत्य **संचरेः** संयमाध्वनि यायाः ॥३०॥

अपि च—

पडिक्कमामि पसिणाणं परमंतेहिं वा पुणो ।
अहो उट्ठिए अहोरायं इइ विज्जा तवं चरे ॥३१॥

व्याख्या—प्रतिक्रमामि निवर्ते **प्रश्नेभ्यः** शुभाशुभसूचकेभ्यो दीपप्रश्नादिभ्यः ।

---

१. वर्षशते वर्षशतैकैकेऽवहिते यः कालः ।

Jain Education International 2010_02		For Private & Personal Use Only		www.jainelibrary.org

तथा परे गृहस्थास्तेषां मन्त्रा गृहकार्यादिपर्यालोचनरूपास्तेभ्यः '**वा**शब्दः समुच्चये, **पुन**र्विशेषणे' एषामतिसावद्यत्वविशिष्टेभ्यः **परमन्त्रेभ्यश्च प्रतिक्रमामि** । सोपस्कारत्वात् सूत्रस्य य ईदृशाभिप्रायवान् स '**अहो** ! इति विस्मये' **उत्थितो** धर्मं प्रत्युद्यतः खलु **अहोरात्रम**हर्निशं **इतीत्येतद्** 'विज्ज'त्ति **विद्वान्** जानन् सन् **तप** एव **चरे**रासेवस्व, न तु प्रश्नादिकं सावधारणतया व्याख्येयम् ॥३१॥

अत्रान्तरे तस्य सातिशयतामवगम्य **संजय**मुनिनोक्तं ममाप्यायुराख्याहि, ततोऽसावाह—

जं च मे पुच्छसी काले सम्मं सुद्धेण चेयसा ।
ताइं पाउकरे बुद्धे तं णाणं जिणसासणे ॥३२॥

व्याख्या—यच्च मां पृच्छसि काले कालविषये **सम्यक् शुद्धेन चेतसो**पलक्षितः । 'ताइं'ति **तत् प्रादुष्कृतवान्** प्रकटीकृतवान् **बुद्धः** सर्वज्ञोऽत एव **तज्ज्ञानं जिनशासन** एव नान्यत्र दर्शने 'सावधारणत्वाद् वाक्यस्य' अतो जिनशासने यत्नो विधेयो यथा त्वमपि जानीषे इत्यर्थः ॥३२॥

पुनरुपदेष्टुमाह—

किरियं च रोयए धीरो अकिरियं परिवज्जए ।
दिट्ठिए दिट्ठिसंपन्नो धम्मं चर सुदुच्चरं ॥३३॥

व्याख्या—क्रियां चास्ति जीव इत्यादिरूपां **रोचयेद् धीरः अक्रियां** नास्त्यात्मेत्यादिकां **परिवर्जयेत्** । ततश्च **दृष्ट्या** सम्यग्दर्शनात्मिकया उपलक्षितो दृष्ट्या सम्यग्ज्ञानात्मिकया **सम्पन्न** एवं सम्यग्दर्शनज्ञानान्वितः सन् **धर्मं** चारित्रधर्मं **चर** सुदुश्चरमिति ॥३३॥

अथ पुनः क्षत्रियमुनिः **संजयमुनिं** प्रति महापुरुषोदाहरणैर्धर्ममुपदिशन्नाह—

एयं पुण्णं पयं सोच्चा अत्थ-धम्मोवसोहियं ।
भरहो वि भारहं वासं चिच्चा कामाइं पव्वए ॥३४॥

व्याख्या—एतदनन्तरोक्तं **पुण्यं** पुण्यहेतुकं **पदं** क्रियादिस्थापनारूपं नानारुचिवर्जनाद्यावेदकं च शब्दसन्दर्भं **श्रुत्वा** । अर्थः स्वर्गापवर्गादिः, धर्मस्तदुपायभूतः श्रुतधर्मादिस्ताभ्यामुपशोभित**मर्थधर्मोपशोभितम्** । **भरतोऽपि** प्रथमचक्रवर्त्यपि यथावक्ष्यमाणाः **सगरा**दयस्तथाऽयमपीत्यर्थः । **भारतं वर्षं त्यक्त्वा** चशब्दस्याध्याहारात् **कामांश्च** त्यक्त्वा **प्राव्राजीत्** । तच्चरित्रोद्देशो यथा—

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कोशलायां युगादीशजिनसर्वसुताग्रणीः ।
साम्राज्यं **भरतो** भेजे **मघवेव** त्रिविष्टपे ॥१॥

पूर्वजन्मास्खलत्साधुवैयावृत्त्यप्रसादतः ।
आससाद महाभोगं प्राथम्यं चक्रवर्तिनाम् ॥२॥

चतुर्दशमहारत्न—नवसेवधिसंनिधिः ।
द्वात्रिंशन्मौलिवद्राजसहस्रकृतशासनः ॥३॥

चतुःषष्टिसहस्रान्तःपुरीभोगमहार्णवे ।
रममाणो यथाकामं जलद्विप इवान्वहम् ॥४॥

द्वासप्ततिसहस्रोरुपत्तनादिमहेशताम् ।
षण्णवतिकोटिमितिग्रामपादात्यवैभवम् ॥५॥

अब्ध्यष्टमितिलक्षाणां रथाश्व-करिणामपि ।
दधत् प्रभुत्वं षट्खण्डभरतेऽप्येकनायकः ॥६॥

वस्त्रासन-धनान्नाद्यैर्वात्सल्यं समधर्मिणाम् ।
कुर्वंश्चिरं सिषेवेऽसौ श्री**युगादिजिनेश्व**रम् ॥७॥

जाते मुक्तिपरीरम्भसुभगेऽथ जगद्विभौ ।
अष्टापदेऽचले **सिंहनिषद्या**ऽऽख्ये जिनालये ॥८॥

विश्वश्लाघे चतुर्द्वारे योजनायामशालिनि ।
त्रिगव्यूतोच्छ्रये रत्नदलैरेव स्वकारिते ॥९॥

मणीमयमहापीठे देवच्छन्दकवर्तिनः ।
सिंहासनपरीवारोपकृतिच्छत्रशालिनः ॥१०॥

निजवर्णप्रमाणाङ्कसंयुक्तान् स्थापनाऽर्हतः ।
यथाजिनोपदेशेन स्थापितान् **वृषभा**दिकान् ॥११॥

वन्दमानोऽर्चयन् भक्त्या शक्त्या तीर्थं प्रभावयन् ।
शुद्धदृक् पञ्च पूर्वाणां लक्षान् द्रागत्यवाहयत् ॥१२॥

तदा श्री**भरते** राज्यं प्राज्यं शासति भूतले ।
धर्मार्थ-काम-मोक्षाणां काऽपि वृद्धिः पराऽभवत् ॥१३॥

अन्यदा स्फातिमान् स्नातालङ्कृतोऽधिकदीधितिः ।
नृपतिर्मुकुरागारमगाद् द्रष्टुं वपुःश्रियम् ॥१४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पश्यतः स्वाङ्गसौन्दर्यमङ्गुलीतः कथञ्चन ।
पपात मुद्रिका चक्री राभस्यान्न विवेद ताम् ॥१५॥

क्रमात् तां मुकुरे तादृगुपाधिवियुताङ्गुलीम् ।
मुण्डोत्तमाङ्ग्वन्निःश्रीकां व्यलोकत भूपतिः ॥१६॥

सर्वत्रोपाधिजन्या श्रीरिति प्रत्ययहेतवे ।
भूधवोऽपनयद् देहादेकैकं भूषणं क्रमात् ॥१७॥

निखिलालङ्कृतित्यक्तमात्मानं श्रीपरिच्युतम् ।
लूनपद्मं सर इवालोक्य दध्यौ क्षितीश्वरः ॥१८॥

"अहो ! वृथाऽभिमानोऽयं मूढानां मोहहेतुकः ।
आगन्तुकद्रव्यकृते सौन्दर्ये काऽवलिप्तता ? ॥१९॥

स्वभावसुन्दरे ह्येकमात्मरूपं निरञ्जनम् ।
अन्यत् सर्वं भवत्येव विपाके वैपरीत्यभाक् ॥२०॥

पवित्रं रुचिरं वस्तु यत्सङ्गादितरद् भवेत् ।
तत्रापि वपुषि भ्रान्त्या कल्पयन्त्यभिरामताम् ॥२१॥

तदेतस्याकृतज्ञस्य शर्मणे पापकर्मभिः ।
जन्म व्यर्थयितुं युक्तं न तत्त्वज्ञानिनो मम ॥२२॥

षट्खण्डभरतैश्वर्यं यद्यप्यात्तमरिक्षयात् ।
ततः किं ? परमैश्वर्यं नाप्यं मोहक्षयं विना ॥२३॥

किञ्च—

रे रे पश्यत पश्यतेह चरितं किञ्चिज्जनस्याद्भुतं,
अन्धस्येक्षणशालिनोऽपि विदतोऽपि भ्रान्तिमच्चेतसः ।
यद्यत्रात्मनि रागतः सुखमुरु स्यात् तत्र न प्रीतिमान्,
यस्मिन् दृष्टिगतेऽति नास्ति कुशलं तं गाढमालिङ्गति" ॥२४॥

इत्यादि चिन्तयाऽऽयातसच्चारित्राभिसन्धितः ।
वर्धमानशुभध्यानाद् **भरतो**ऽजनि केवली ॥२५॥

अथ श्रीशक्रविज्ञप्तो व्यवहारमनुस्पृशन् ।
पञ्चमौष्टिकमाधत्त लोचं स्वेनैव पाणिना ॥२६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सहस्रैर्दशभी राज्ञां सहितो भावलिङ्ग्यपि ।
प्रव्रज्यामग्रहीच्छक्रोपनीतद्रव्यलिङ्गभृत् ॥२७॥

लक्षपूर्वी केवलित्वे पर्याये सोऽत्यवाहयत् ।
नैका विहारव्याहारैर्जनताः प्रत्यबूबुधत् ॥२८॥

आदित्ययश:प्रमुखास्ततश्चाष्टौ तदङ्गजाः ।
भोजं भोजं महीराज्यं धृत्वा मुकुटमार्षभम् ॥२९॥

तथैव केवलं प्राप्य प्रबोध्य भविकान् जनान् ।
प्रापुश्च परमानन्दं निर्वृत्ते **भरते** क्रमात् ॥३०॥

इति **भरत**चरित्रम् ॥३४॥

तथा—

सगरो वि सागरंतं भरहवासं नराहिवो ।
इस्सरियं केवलं हिच्चा दयाए परिनिव्वुडो ॥३५॥

व्याख्या—सगरोऽपि द्वितीयश्चक्र्यपि **सागरान्तं** समुद्रपर्यन्तं पूर्वादिदिग्त्रये । उत्तरस्यां हिमवदन्तं **भारतवर्षं** भरतक्षेत्रं **नराधिपः** राजा । **ऐश्वर्यं** च **केवलं** परिपूर्णं **हित्वा** त्यक्त्वा **दयया** संयमेव **परिनिर्वृत्तो** मुक्तः । तथाहि—

श्री**युगादि**प्रभोर्वंशे **कोशला**यामिलापतिः ।
जितशत्रुः प्रतापाग्निदग्धशत्रुपतङ्गकः ॥१॥

रूप-लावण्य-सौभाग्य-सम्पदामस्ति सेवधिः ।
विजयेति जगत्ख्याता कान्ताऽस्यान्तःपुराग्रणी: ॥२॥

तत्कुक्षिभूः सुवर्णाङ्गः सिन्धुराङ्को जगत्पतिः ।
विश्वप्रदीपो द्वितीयो जिनोऽभूद**जितः** सुतः ॥३॥

युवराजोऽनुजो राज्ञः **सुमित्रविजया**ह्वयः ।
पुत्रो **यशोमती**कुक्षिभूस्तस्य **सगरा**भिधः ॥४॥

गजादिस्वप्ननिर्णीतचक्रिभोगो महाभुजः ।
समर्थोऽप्य**जित**स्वामिसेवायां स्वमलीनयत् ॥५॥

तौ प्राप्तपुण्यतारुण्यौ नैका भूमीश्वराङ्गजाः ।
वल्लभाः परिणिन्याते तथा च सुखमासतुः ॥६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

वैजयेयस्य साम्राज्यं दत्त्वोपादितसानुजः ।
नृपतिः संयमैश्वर्यमैक्ष्वाकूणां ह्ययं क्रमः ॥७॥

षट्खण्डमात्रनियतशासनं चक्रवर्त्तिनाम् ।
एकाकारं त्रिलोकेऽपि तदभूद**जित**प्रभोः ॥८॥

स्वयं यमक्षणे क्षीणमोहो राज्यधुराधरम् ।
प्रभुः श्री**सगरं** कृत्वा निष्क्रान्तो जगदर्चितः ॥९॥

सगरोऽपि समुत्पन्नचक्राद्यखिलसाधनः ।
षट्खण्डभरताधीशश्चक्रवर्त्ती क्रमादभूत् ॥१०॥

तस्य **जह्नु**कुमाराद्या वीराः शूराः प्रतापिनः ।
षष्टिः सहस्राः पुत्राणामजायन्त जयोद्धुराः ॥११॥

स तैः परिवृतः पुत्रैर्मूर्त्तवीररसैरिव ।
न दुष्करं जगज्जेतुं सेन्द्रासुरममन्यत ॥१२॥

स्वभ्यस्तां कामपि कलामन्यदा वीक्ष्य भूप्रभुः ।
स्वैरं वरं वृणीष्वेति **जह्नु**माह बृहत्सुतम् ॥१३॥

सोऽपि बद्धाञ्जलिः प्रोचेऽभिलाषोऽसौ मम प्रभो ! ।
पश्याम्यहं महीपीठं सबन्धुः सर्वरत्नयुक् ॥१४॥

सुतवाक्यं महीनाथः प्रीत्यैव प्रत्यपद्यत ।
स्कन्धावारमुपादाय निर्जगाम शुभक्षणे ॥१५॥

चक्रिरत्नान्युपादाय यात्यस्मिन् ससहोदरे ।
क्षोभं क्षोण्यखिला लेभे बालेव प्रौढसङ्गमात् ॥१६॥

महीं जनपद-ग्राम-नगराकर-काननाम् ।
सरो-गिरि-सरिच्छ्रेणीं ददर्शासौ सकौतुकः ॥१७॥

उपाष्टापदमायातस्तस्य स्फाटिकदीधितेः ।
रामणीयकमालोक्य जन्म मेने तदैव सः ॥१८॥

सैन्यमस्य निवेश्याधः सतन्त्रोऽसौ तमारुहत् ।
अपश्यत् फुल्लनेत्राब्जश्चैत्यं **भरत**कारितम् ॥१९॥

स्वर्ण-चन्द्रार्क-रत्नादिपुद्गलैरिव निर्मिते ।
यथोक्तं तत्र जैनानि बिम्बान्यानर्च शुद्धिमान् ॥२०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

हृष्टोऽथामात्यमापृच्छद् धन्यः श्री**भरतेश्वरः** ।
येनेदृशे महादुर्गे चिरस्थायि यशः कृतम् ॥२१॥

शैलः कोऽपीदृशोऽस्त्यन्यः सर्वद्रष्टव्यभाजनम् ।
कारयामो वयं यत्र पवित्रं चैत्यमीदृशम् ॥२२॥

भवेज्जन्म-रमा-बुद्धिसाफल्यं सुस्थिरं यशः ।
पुण्यवृद्धिः स्व-परयोरिति चैत्यफलं विदुः ॥२३॥

नियुक्तैरथ सर्वाऽपि चरैरुर्वी गवेषिता ।
सूर्यात् परः प्रकाशीव ददृशे नेदृशो गिरिः ॥२४॥

जह्नुमाह ततोऽमात्य आभिजात्ययुजा गिरा ।
निश्चितं नः पुरापीदं पदं नेदंनिदं क्वचित् ॥२५॥

तच्चैत्यस्यास्य रक्षायां यतध्वं क्रमशो नराः ।
कालदोषाद् भविष्यन्ति लुब्धाः प्रायोऽविवेकिनः ॥२६॥

तन्नूत्नकारणात् पूर्वचैत्यादेः पालनं वरम् ।
यशः-कीर्त्यनपेक्षैव यदत्र विशदा मतिः ॥२७॥

इति श्रुत्वाऽथ दण्डेन पातयित्वाऽस्य भूभृतः ।
नितम्ब-दन्त-शृङ्गाद्यमष्टसोपानता कृता ॥२८॥

एतावता न दुर्गत्वं तादृशं प्रतिभासते ।
परि**कैलास**मिति तैरखानि परिखा क्षणात् ॥२९॥

चक्रभृन्नन्दनौजोभिर्दण्डरत्नं तदाऽस्फुरत् ।
आयोजनसहस्रान्तं बिभेद जगतीतलम् ॥३०॥

जर्जरीभूतभूपिण्डनिर्घातागतधूलिभिः ।
आकुलाऽभूत् तले **नागकुमार**नगरी तदा ॥३१॥

नागेश्वरोऽप्यदो ज्ञात्वाऽवधिसम्बन्धबन्धुरः ।
विस्मितोऽमितकोपाग्निरागादुपनृपाङ्गजम् ॥३२॥

अवादीदक्षरद्रूक्षाक्षरं रक्तेक्षणक्षणम् ।
महीं विभिद्य किं मत्तैर्नागपुर्युपद्रुवे ? ॥३३॥

बलमात्मवधायैव नूनं वो वेधसा कृतम् ।
निजपक्षबलादेव पतङ्गो ह्यनलं विशेत् ॥३४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

चक्रवर्त्तिसुतत्वेनोज्जृम्भन्तां स्वेच्छया भुवि ।
पातालखननं यत् तद् वितथ स्वध्वंसकारणम् ॥३५॥

अथावक् प्राञ्जलिर्**जह्नु**कुमारो **नाग**नायकम् ।
मा कुप्योऽस्मासु यन्नादश्चक्रे वस्तापहेतवे ॥३६॥

अष्टापदमहातीर्थरक्षायै परिखा कृता ।
यत् कृतं तत् कृतं नाथ करिष्याम इतोऽधिकम् ॥३७॥

विषह्यमेकशो ह्याग इति **नागा**धिपे गते ।
ज्येष्ठः प्राह क्षणं स्थित्वाऽवरजान् वरजात्यगीः ॥३८॥

परिखैषा रजःपूरैः कालत पूरयिष्यते ।
पूरयामस्तदम्भोभिः कार्ये दार्ढ्य हि शस्यते ॥३९॥

ततस्तैर्दण्डरत्नेन प्रणाल्या कृतया जलम् ।
विभिद्य गङ्गामानीय खातिकां तामपूरयन् ॥४०॥

उच्छलल्लोलकल्लोलं परितो**ऽष्टापदं** जलम् ।
परिखामप्यतिक्रम्य चचले जलराशिवत् ॥४१॥

यथा पूर्वं रजः पेते तथा तन्नागवेश्मसु ।
पपात सुतरां नीरं भेदकेभ्यो हि भेदकम् ॥४२॥

नाग-नागीकुलं तत्र जलेऽथ जलजन्तुवत् ।
तरद् वीक्ष्य पुनर्दत्तावधिर्**नाग**विभुर्जगौ ॥४३॥

यदि पापात्मनां तेषामागो मृषितमेकशः ।
ततोऽधिकमुपद्रोतुं धिगेभिरुपचक्रमे ॥४४॥

दुर्जनानामुपशमो दण्डैरेव न सामभिः ।
मधुरैर्नौषधैर्यान्ति दुःसाध्यव्याधयो नृणाम् ॥४५॥

पीडयित्वा परान् जन्तून् यत् किञ्चित् सुकृतार्जनम् ।
पापार्जनं तत्त्वतस्तन्मांस-मद्यादिदानवत् ॥४६॥

इत्यधिक्रोधसम्बन्धबाध्यमानकृपारसः ।
आहूय दृग्विषान् नागानिति निःशङ्कमादिशत् ॥४७॥

सगराङ्गभुवां षष्टिं सहस्रानपि नेत्रजैः ।
अह्नाय वह्निभिर्भस्मीभूतान् कुरुत लीलया ॥४८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तैरप्यादेशतत्कालं निःसृत्यैते महोरगैः ।
नामैकशेषतां नीता नेत्राग्निविषयीकृताः ॥४९॥

ईदृश्युत्पातसम्पाते शोचनैस्तत्परिग्रहैः ।
रोदनाक्रन्द-दैन्यानामद्वैतमिव निर्ममे ॥५०॥

प्रभग्नवलये तेषामवरोधाङ्गनाजने ।
अविश्रान्तं प्रलपति क्षणज्ञो मन्त्र्यवोचत ॥५१॥

इदं दैवकृतं किञ्चिदाकस्मिकमचिन्तितम् ।
अशक्यैकप्रतीकारमिदानीं जातमश्रुतम् ॥५२॥

एकोऽप्येषां न जेयः स्यादिन्द्राद्यैर्मिलितैरपि ।
युगपत् तेऽहिभिर्दग्धाः पूत्कृत्यं ननु किम्पुरः ? ॥५३॥

दारुणत्वं परीणामे संसारस्य यदुच्यते ।
व्यलोकि तदिदं साक्षादाप्तोक्ता ह्यन्यथा न गीः ॥५४॥

अयं दैवपरीणामः केनापि हि न शक्यते ।
निवारयितुमागच्छन् तत् किं निष्फलया शुचा ? ॥५५॥

न शोकविषयाः कर्तुं युज्यन्ते ते कुमारकाः ।
यत् ते यशःशरीरेण जीवन्ति सुकृतार्जनात् ॥५६॥

इत्यादिनाऽथ संस्थाप्य माध्यस्थ्ये शोचकं जनम् ।
उद्दिश्य **कोशलां** सैन्यं प्रयाणकमकारयत् ॥५७॥

तददूरपदं प्राप्तैः क्रमात् सामन्त-मन्त्रिभिः ।
पर्यालोचीदमन्योऽन्यं लज्जा-शोक-भयाकुलैः ॥५८॥

महाराजः कथं दृश्यस्तस्य दर्श्यं कथं मुखम् ? ।
यत् कुमारान् विना नैकः कोऽपि दग्धो महाहिभिः ॥५९॥

अरेऽहिभिः कुमारेषु दह्यमानेषु निष्कृपम् ।
कृतघ्नैर्नियतत्वेन स्वस्वात्मोद्धारितः कथम् ? ॥६०॥

प्रज्वाल्य मद्भुजव्यूहं स्वदोश्चक्रं निरर्थकम् ।
सहानीय मुखं स्वीयं दर्शयन्तो न लज्जथ ? ॥६१॥

आयातैरपि युष्माभिः किं साध्यं कुमरोज्झितैः ? ।
भक्तत्वमपि नाज्ञापि ही ! केनाप्यग्निसेवनात् ॥६२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इदं निरर्गलं जल्पन् केन वार्यः क्षितीश्वरः ? ।
इदानीमपि तत् सेव्यो वह्निर्गत्यन्तरं विना ॥६३॥ **चतुर्भिः कलापकम्**

इतः कोऽपि द्विजस्तत्रोपसृत्यैतानभाषत ।
ज्ञाततादृग्व्यतिकरश्चातुरीपरिकीर्णवाक् ॥६४॥

अनेनालं विषादेनास्मि प्राग् ज्ञापयिता नृपम् ।
ततो निवेद्यं युष्माभिर्न भेतव्यं क्षितीश्वरात् ॥६५॥

इत्युदित्वैष निर्नाथशवमादाय चक्रिणः ।
सौधद्वारमगाद् 'मुष्टो मुष्टो मुष्ट' इत्युच्चरन् ॥६६॥

कृपोद्दीपनमाकर्ण्य तदाक्रन्दं धराधवः ।
विप्रमाहूय पप्रच्छ केन मुष्टोऽतिदुःख्यसि ? ॥६७॥

द्विजोऽथ दैन्ययुक् प्राख्यदेक एवायमात्मजः ।
दैवाद् दष्टोऽहिना देव ! मृतस्तं प्राणय प्रभो ! ॥६८॥

समर्थोऽसि जगत्त्राणे निराधारोऽस्मि सर्वथा ।
तद् देहि सुतभिक्षां मे किमसाध्यं भवादृशाम् ? ॥६९॥

इतस्ते मन्त्रि-सामन्ता भूपमानम्य संसदि ।
निविष्टा एत्य चक्री च दिदेश भिषजस्तदा ॥७०॥

उपायशतमाधाय निर्विषं विप्रनन्दनम् ।
कुरुध्वं तेऽपि तद्वृत्तज्ञातारो नृपमूचिरे ॥७१॥

यत्र कोऽपि मृतो नाङ्गी भूतिं यदि ततः कुलात् ।
आनयत्येष भूदेवः स्यात् सज्जोऽस्य सुतस्तदा ॥७२॥

सर्वां पुरीं परिभ्रम्य विप्रः प्राप्तोऽवदन्नृपम् ।
सहस्रशो हि जातानि मरणानि गृहे गृहे ॥७३॥

ततः क्व तादृशी भूतिर्लभ्येत्यथ नृपोऽवदत् ।
सर्वसाधारणे मृत्यौ तदियत् किमु शोचसि ? ॥७४॥

स हि कोऽप्यस्ति संसारे मृत्युना यो न जग्रसे ? ।
तत् किं विज्ञाततत्त्वोऽपि त्वमेकः परिताम्यसि ? ॥७५॥

देव ! सत्यमिदं वेद्मि परमेकं सुतं विना ।
क्षीण एवाधुना वंशः किञ्चित् प्रतिकुरुष्व तत् ॥७६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तेनेत्युक्तेऽवदच्चक्री तपस्विन् ! विधिनिर्मितम् ।
हरिणा चक्रिणा मन्त्रैः शस्त्रैरपि न वार्यते ॥७७॥

मूर्ख एव हि शोकेन स्वमात्मानं विमिश्रयेत् ।
कृतेऽपि बहुशः शोके मृतो यन्न निवर्तते ॥७८॥

प्रहरन् शक्यते वीरः प्रहर्तुं दृष्टिगोचरः ।
अदृष्टे वैरिणि विधौ कः कुर्यात् पौरुषं भटः ? ॥७९॥

परस्मै सुखमुच्यन्ते वैराग्यजनिका गिरः ।
त्वयाऽपि न प्रभो ! शोच्यं यदेवमसि तत्त्ववित् ॥८०॥

असम्भाव्यं यतः शोककारणं किञ्चिदस्ति ते ।
इति विप्रवचः श्रुत्वा किं किमित्याह भूपतिः ॥८१॥

ततः सोऽप्याह निर्नाथं सैन्यमेतदुपागतम् ।
षष्टिं सुतसहस्रांस्तु कालोऽकवलयत् क्षणात् ॥८२॥

अस्माद् वज्रानलप्रायादक्षरश्रवणान्नृपः ।
पपातावृतचैतन्यः पृथ्व्यां सिंहासनाल्लुठन् ॥८३॥

कथञ्चिदाप्तचैतन्यो विरराम न रोदनात् ।
पिशाचकीव बहुशो व्यलपन्मुक्तकुन्तलः ॥८४॥

रे पाप्मन् ! दैव ! हरता युगपन्मम बालकान् ।
दुष्पूरोदरमापूरि नादाता किं परानतः ? ॥८५॥

समकालपतत्सर्वपुत्रमृत्युमहाशनिः ।
न सञ्जहार यदि मां न ममाथ मृतिः क्वचित् ? ॥८६॥

मध्ये षष्टिसहस्राणां न ह्येकोऽप्युद्धृतः सुतः ।
हहा ! किमवलम्बेन संस्थाप्यं हृदयं मया ? ॥८७॥

इति पूत्कृत्य पूत्कृत्य रोदिति क्षितिवल्लभे ।
बभाण ब्राह्मणो युक्त्या प्रस्तुतोपशमोचितम् ॥८८॥

क्वेदृशं मज्जनं शोके उपदेशः क्व तादृशः ? ।
क्व तादृक् तत्त्वविज्ञानं क्वेदृशी मूढता दृढा ! ॥८९॥

परापदि सुखं लोकः संसारानित्यतां वदेत् ।
स्वबन्धुमरणे चित्रं जह्यात् सर्वोऽपि धीरताम् ॥९०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एकस्यापि हि पुत्रस्य मृत्युः सोढुं न शक्यते ।
यत्तु षष्टिसहस्राणां समं तददितिदुःसहम् ॥९१॥

सन्त एव सहाः सोढुं व्यसनं किन्तु गुर्वपि ।
उर्व्येव सहते वज्रपातं न तु तृणोच्चयः ॥९२॥

धैर्यमाश्रय सत्तत्त्वमात्मारामं विचारय ।
त्वं किं मुह्यसि दोषघ्न ! **श्रुताजित**जिनेन्द्रगीः ॥९३॥

पुत्रादीष्टवियोगो हि मूढानां शोकसाधनम् ।
मोहान्तर्हितवैराग्यव्यञ्जकस्तु मनस्विनाम् ॥९४॥

विप्रेणेत्युक्तिविन्यासैरल्पशोके कृते नृपे ।
तैरप्यमात्य-सामन्तैर्यथावृत्तं न्यवेद्यत ॥९५॥

प्रधानगुरुभिर्वृद्धैर्धीरितश्च क्रमादसौ ।
कर्तव्यमुचितं सर्वं चक्रे सत्त्ववदग्रणीः ॥९६॥

इत**श्चाष्टापदो**पान्तवासिभिर्ज्ञापिते जनैः ।
परिखोद्भेदिभिर्नीरैर्जाते नीवृदुपप्लवे ॥९७॥

निजान्वयाम्बरे पूषा **जह्नु**जातो **भगीरथः** ।
निवृत्त्यै तदुपद्रुत्याः समादिश्यत चक्रिणा ॥९८॥

सोऽप्यु**पाष्टापदं** गत्वाऽष्टमं कृत्वोरगेश्वरम् ।
आराध्य प्रकटीभूतं तच्चिन्तितममार्गयत् ॥९९॥

सोऽप्याह नय दण्डेन **गङ्गां** प्राचीपयोनिधिम् ।
उपद्रवकृतो वार्यो मयेत्याख्याय सोऽगमत् ॥१००॥

ततो **नागब**लिं कृत्वा गिरीन् दण्डेन चूर्णयन् ।
गङ्गाप्रवाहमाकृष्य पूर्वाम्भोधावमेलयत् ॥१०१॥

आत्तानेकनदीवृन्दः स यत्राविशदम्बुधिम् ।
गङ्गासागर इत्याख्यं तत् तीर्थं तत्र पप्रथे ॥१०२॥

पूर्वं हि **जह्नु**नाऽऽकृष्टा **गङ्गा**ऽभूदिति **जाह्नवी** ।
भगीरथाब्धिं नीतत्वादासीद् **भागीरथी**ति च ॥१०३॥

कृतकृत्यः क्रमात् पौत्रः पितामहमुपागमत् ।
सत्कृत्य कृत्यवित् पट्टे निजेऽस्थापयदञ्जसा ॥१०४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

स्वयं **त्वजित**तीर्थेशप्रसादादाप्य संयमम् ।
कृतकर्मक्षयः सिद्धिसौधमध्यास शाश्वतम् ॥१०५॥

भगीरथोऽन्यदापृच्छत् सर्वज्ञं युगपन्मृतेः ।
कारणं किं कुमाराणामित्याह भगवानपि ॥१०६॥

सङ्घः **पल्लीपरिसर**ग्रामं प्राप्तः पुरा महान् ।
श्री**सम्मेत**महातीर्थनमस्यायै व्रजन् क्रमात् ॥१०७॥

अनार्यैः परतस्तत्र मिलित्वाऽयमुपद्रुतः ।
आक्रोश-निन्दनाघातैर्धनाद्युद्दालनैरपि ॥१०८॥

तत्प्रत्ययमघं कर्म बद्धं तैरपि चिक्कणम् ।
तत्रैककुम्भकारस्तु लुण्टतस्तानवारयत् ॥१०९॥

अथ सङ्घेऽग्रतो याते प्रक्रान्तसुकृतोत्सुके ।
क्वचित् प्रजापतौ तस्मिन् गते ज्ञातिनिमन्त्रिते ॥११०॥

राज्ञस्तद्ग्रामचौरेण लक्ष्मीवेश्मनि लुण्टिते ।
निरुद्धद्वारमज्वालि ग्रामोऽसौ तत्क्षणं भटैः ॥१११॥

तस्मिन् जनसहस्राणां षष्टिरेकपदे मृता ।
क्वचित् कौद्रविकात्वेन जाता वर्षासु कानने ॥११२॥

करी तेन पथा गच्छन्नमर्दयदिमाः क्षणात् ।
सङ्घोपद्रवपापेनाभ्रमन्नानाकुयोनिषु ॥११३॥

अनन्तरभवे किञ्चित् कृत्वा पुण्यं तथाविधम् ।
षष्ट्यङ्गजसहस्रत्वं लेभिरे **सगरे**शितुः ॥११४॥

सामुदायिकतत्कर्मशेषाद् युगपदाप्नुवन् ।
मृत्युं तेऽपि हि सेत्स्यन्ति चैत्यरक्षोत्थपुण्यतः ॥११५॥

स कुम्भकृत् क्वचित् ग्रामे मृतो भूत्वा धनी वणिक् ।
तदा सुकृतकर्मा सोऽभून्नृपोऽनन्तरे भवे ॥११६॥

भुक्तभोगः परिव्रज्यां स प्रपद्य दिवं गतः ।
ततश्च्युतो **जह्नु**सुतो राजाऽभूस्त्वं **भगीरथः** ॥११७॥

चक्रिपौत्र इदं श्रुत्वा स्वयं जिनवरोदितम् ।
सुश्राद्धधर्ममादाय चिरं साम्राज्यमन्वशात् ॥११८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इति **सगर**चरित्रं मोहतार्णैकदात्रं,
श्रुतिपथमवतार्य स्वादु चित्तेऽवधार्य ।
किमपि तदिह कृत्यं कृत्यमत्यन्तनुत्यं;
शिवसुखपरिरम्भः स्यादतः क्षीणदम्भः ॥११९॥

इति **सगर**चरित्रम् ॥३५॥

चइत्ता भारहं वासं चक्कवट्टी महिड्ढिओ ।
पव्वज्जामब्भुवगओ मघवं नाम महाजसो ॥३६॥

व्याख्या—त्यक्त्वा भारतं क्षेत्रं चक्रवर्त्तिर्महर्द्धिकः प्रव्रज्यामभ्युपगतः प्राप्तः **मघवा नामा महायशा** इति सुगमम् । तच्चरित्रोद्देशस्तु—

श्रावस्त्यां पुरि सत्**समुद्रविजय**क्ष्मापान्वये भानुमान्,
श्री**भद्रो**दररत्नभूधरमणिः चक्री तृतीयो महान् ।
साम्राज्यं **मघवा** विमुच्य विपुलं लात्वोत्तमं संयमं;
सोऽपि प्राप **सनत्कुमार**तविषं ज्ञान-क्रियाऽभ्युद्यतः ॥३६॥

सणंकुमारो मणुस्सिंदो चक्कवट्टी महिड्ढिओ ।
पुत्तं रज्जे ठवेऊणं सो वि राया तवं चरे ॥३७॥

व्याख्या—सन्तकुमारनामा **मनुष्येन्द्रो** मनुष्येषु इन्द्र इवेन्द्रः **चक्रवर्त्तिर्महर्द्धिकः पुत्रं राज्ये स्थापयित्वा सोऽपि राजा तपः चरे**दकरोदिति सुगमम् । अथ **सनत्कुमार**-चरित्रम्—

कुरुजाङ्गलदेशालङ्कारे **गजपुरे** पुरे ।
कुरुवंशावतंसः श्री**अश्वसेनो**ऽभवन्नृपः ॥१॥

सौख्यकामगवी कामं **सहदेवी**ति तत्प्रिया ।
चतुर्दशमहास्वप्नसूचितस्तत्सुतोऽजनि ॥२॥

सन्तकुमार इत्याख्याश्चक्रित्वोचितभाग्यवान् ।
बाल्यादपि समभ्यस्तकलस्तारुण्यमाश्रयत् ॥३॥

महेन्द्रसिंह इत्यस्य निर्विशेषमनाः सुहृत् ।
पांशुक्रीडा-कलादाने व्यतिरेकं न योऽभजत् ॥४॥

पुष्पकालेऽन्यदोद्यानं राज्ञि क्रीडार्थमागते ।
हयं जलधिकल्लोलं कुमारः स्फारमारुहत् ॥५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सुताः क्षितिभृतोऽन्येऽपि स्वं स्वमर्वन्तमाश्रिताः ।
समं वाहयितुं लग्ना जगदाश्चर्यकारिणः ॥६॥

वक्रशिक्षः कुमाराश्वस्तथा पञ्चमधारया ।
त्वरितं गन्तुमारेभे यथा प्रापददृश्यताम् ॥७॥

ससैन्यः केटके तस्य लग्नः क्षोणीभृदाकुलः ।
इतः प्रचण्डवातोऽश्वक्रमाध्वानमभञ्जयत् ॥८॥

अथो **महेन्द्रसिंहे**न तद्वियोगविषयादिना ।
व्यज्ञपि क्ष्माभृदानेताऽस्मीदानीमेव तं प्रभो ! ॥९॥

निवर्ततां महाराज इत्युक्त्या वलिते नृपे ।
स साहसी सुहृच्छुध्यै विवेशारण्यमुद्भ्रमन् ॥१०॥

वर्षप्रान्ते क्वचित् सारकासारोपान्तसंस्थितम् ।
तरुणीश्रेणिमध्यस्थं स वीक्षामास भूपजम् ॥११॥

चिरं व्यकल्पयत् क्वायं कुमारस्तरुणीवृतः ।
विभ्रमः कोऽप्यसौ मेऽस्ति किं वा सत्यमिदं भवेत् ? ॥१२॥

इति दोलायमानेऽस्मिन्नुच्चैरूचेऽथ बन्दिना ।
विश्वाधार ! कुमा**राश्वसेन**वंशरवे ! जय ॥१३॥

श्रुत्वेति क्षीणसन्देहः प्राप्तकिञ्चिद्रसान्तरम् ।
कुमारदृक्पथं गत्वा यावदस्थात् क्षणं सुहृत् ॥१४॥

उपलक्ष्य क्षणादेनमभ्युत्थाय नृपाङ्गभूः ।
उत्थाप्य पादपतितमालिङ्ग्योपन्यवीविशत् ॥१५॥

कृत्वैकान्तमपृच्छच्चानन्दोच्छ्वसितकण्टकः ।
कथं मित्र ! त्वमेकाकी महारण्यमिदं श्रितः ? ॥१६॥

कथमत्रास्मि विज्ञातो गुरुरम्बा च सौख्यभाक् ।
आख्यन्**महेन्द्रसिंहो**ऽपि सर्वमस्य यथास्थितम् ॥१७॥

वरविद्याधरस्त्रीभिर्मज्जितो भोजितोऽपि च ।
कुमारं ज्ञातवृत्तान्तमपृच्छत् स्वच्छमानसः ॥१८॥

न हि स्वयं निजां ख्यातिं कुर्वते सज्जना इति ।
निजां **बहुलमत्याख्यां** तदर्थं त्वादिशत् प्रियाम् ॥१९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

रतिवेश्म स्वयं गत्वा प्रसुप्तो व्याजनिद्रया ।
विद्यया साऽपि विज्ञाय कौमारं चरितं जगौ ॥२०॥
तेनाश्वेन तदा वन्यामार्यपुत्रः प्रवेशितः ।
श्रान्ते तस्मिन् मृते नीरकृतेऽसौ वनमभ्रमत् ॥२१॥
सुकोमलतनुर्ग्रीष्मे दीर्घाध्वातर्षधर्षितः ।
अनाप्नुवन् जलं सप्तच्छदच्छायां क्षणं श्रितः ॥२२॥
मूर्च्छाविलुप्तचैतन्यस्तत्रास्ते क्षितितल्पगः ।
तावत् तत्पुण्याकृष्टेन यक्षेणैतद्द्रुवासिना ॥२३॥
सिक्तो जलेन सर्वाङ्गमयमावृत्तचेतनः ।
पपौ तदुपनीताम्बु तुष्टश्चैनमथावदत् ॥२४॥
कस्त्वं कुत इदं नीरमत्यन्तस्वादु शीतलम् ? ।
स प्राहात्रत्ययक्षोऽहमम्ब्वानीतं च मानसात् ॥२५॥
आचचक्षे कुमारस्तं मां नेहि लघु मानसम् ।
तत्र चाद्भुतमीक्षित्वा स्नात्वा सन्तोषमादधे ॥२६॥
उक्त्यनन्तरमेवासौ नीतो यक्षेण तत् सरः ।
मराल-कमलारामरम्यं दृष्ट्वैव पिप्रिये ॥२७॥
स्वैरं मज्जनमाधाय यावत् तटमियाय सः ।
असिताक्षाभिधो यक्षस्तावत् प्रादुरभूत् पुरः ॥२८॥
व्यसनस्थोऽयमेकाकी कुमार इति दुष्टधीः ।
प्राग्भवारिः कुमारेण नियोद्धुमुपचक्रमे ॥२९॥
मरुद्भिः क्षुभितो नैष तन्मुक्तैर्गिरिभञ्जनैः ।
पिशाचैर्दहनाकारैर्न च भीतो मनागपि ॥३०॥
अत्रोटयन्नागपाशं तत्कृतं जीर्णरज्जुवत् ।
तन्मुक्तमुद्गरं मुष्टिघातेन द्रागचूर्णयत् ॥३१॥
अपसार्य गिरिं यक्षमुक्तं दोर्भ्यां च वक्षसः ।
असौ पराक्रमी बाहुयुद्धेन तमखेदयत् ॥३२॥
देव इत्याप न मृतिं मृताभासः परं क्षणात् ।
मुक्त्वा राटिमसौ नष्टः कुमारकरपीडितः ॥३३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ववर्ष खचरश्रेणिः कौतुकालोकमागता ।
यक्षजेतुः कुमारस्योत्तमाङ्गे कुसुमोच्चयम् ॥३४॥

विजित्य राक्षसं यावदेषोऽगादनु पश्चिमम् ।
कियद् भुवोऽन्तरे तावदपश्यन्नन्दनं वनम् ॥३५॥

तन्मध्येऽष्टौ दिशां कन्या इव सौभाग्यभाजनम् ।
स्निग्धं ददर्श विद्याभृत्कनीर्गुणकरण्डिकाः ॥३६॥

नन्वरण्येऽत्र का एता इत्युपसृत्य पृष्टवान् ।
यूयं काः कस्य नन्दिन्यस्ता अप्यूचुरिति प्रियम् ॥३७॥

अद्य नः सुकृतं किञ्चिदूर्जस्वि स्फुटमस्ति यत् ।
स्वदर्शनेन नेत्राणामातिथेयं त्वया कृतम् ॥३८॥

इतोऽस्ति नातिदूरे पूरस्माकं प्रियसङ्गमा ।
तत्र गत्वा भज स्वास्थ्यं स्वयं ज्ञाताऽखिलं क्रमात् ॥३९॥

कुमारस्ताभिरित्युक्तेऽचलत् तद्दर्शिताध्वना ।
सन्ध्यायां तां पुरीमाप सर्वस्वमिव सम्पदाम् ॥४०॥

कन्याज्ञापितवृत्तान्तो भूपस्तं संसदागतम् ।
सत्कृत्य **भानुवेगा**ख्यः स्नेहान्वितमिदं जगौ ॥४१॥

अलं चर्चाभिरन्याभिर्ममाष्टावद्भुताः सुताः ।
तद्योग्यपतिलाभेऽहं चिन्तया व्याकुलोऽभवम् ॥४२॥

जेता**ऽसिता**ख्ययक्षस्यैतासां भावी वरो वरः ।
इत्य**र्चिमालि**नाऽभाणि मुनिना ज्ञानिना पुरा ॥४३॥

तदुद्वहैताः साफल्यमस्त्वासां जन्मनस्त्वया ।
इत्यागृह्यार्यपुत्रेण विभूत्या ता व्यवाहयत् ॥४४॥

आमुक्तकङ्कणः सुष्वापैताभिर्वासवेश्मनि ।
प्रबुद्धः प्रातरद्राक्षीत् स्वमरण्येऽद्वितीयकम् ॥४५॥

स्वप्नायमानवीवाहो निर्विषादमनाः पुरः ।
गिरिशीर्षे मणि-स्वर्णमयमैक्षिष्ट मन्दिरम् ॥४६॥

प्रागिवेयमपि भ्रान्तिर्भवितेति व्यचिन्तयत् ।
यावत् प्राप्तस्तदासन्नं तावत् शुश्राव रोदनम् ॥४७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

प्रविश्य भवनं भूमिमारुरोह च सप्तमीम् ।
तत्रैक्षामास पद्माक्षीमेकां विरहपीडिताम् ॥४८॥

सनत्कुमार ! मे भूया भर्ताऽन्यत्रापि जन्मनि ।
पुनः पुनर्भणित्वेदं रुदन्तीं तामुवाच सः ॥४९॥

बाले ! **सनत्कुमारस्य** काऽसि त्वमधितद् यतः ।
एवं स्निह्यसि साऽप्याह किञ्चिद्विपरिदेवना ॥५०॥

सुरप्रभस्य साकेतनायकस्य सुताऽस्म्यहम् ।
सुनन्दाऽऽख्या प्रियाऽत्यन्तं प्रसूश्च**न्द्रयशा**स्तु मे ॥५१॥

दूतानीतोपमातीतचित्रतद्रूपमोहिता ।
तस्यैव दयितात्वेन जनकेनास्मि कल्पिता ॥५२॥

तद्विवाहकृतोत्कण्ठाऽकस्माद् गगनचारिणा ।
हृत्वा केनापि मुक्ताऽत्र नवे वेश्मनि रोदिमि ॥५३॥

स च क्वापि जगामेति जल्पन्त्यामेव खेचरः ।
नन्दनो**ऽशनिवेग**स्य **वज्रवेगः** स आगमत् ॥५४॥

सङ्कथां सह मत्पत्न्या कुर्वाणोऽसीति निर्भरम् ।
कोपेन व्योम्नि चिक्षेप कुमारं माररूपिणम् ॥५५॥

कुमारोऽपि निहत्यैनं मुष्टिना दुष्टखेचरम् ।
उपकन्यं द्रुतं प्राप निःशल्या मुमुदे च सा ॥५६॥

गन्धर्वेण विवाहेन तां पत्नीकृत्य तस्थुषि ।
कुमारे **वज्रवेग**स्य नाम्ना **सन्ध्यावली** स्वसा ॥५७॥

उपायाता पुरो वीक्ष्य कुपिता भ्रातरं हतम् ।
भ्रातृघ्नपतितां स्वस्मिन् स्मृत्वा ज्ञानिनिवेदिताम् ॥५८॥

शान्ता च कुमरं पाणिग्रहणायोपतस्थुषी ।
सुनन्दाऽनुमतो भूपसुतस्तामप्युदूढवान् ॥५९॥

अथ पुत्रवधात् क्रुद्धो**ऽशनिवेगो** महाबलः ।
चमूभिः पूरितव्योमा कुमारमभ्यषेणयत् ॥६०॥

चन्द्रवेग-भानुवेगादयो विद्याधराः पुरे ।
कुमारस्य सहायत्वे ससैन्या उपतस्थिरे ॥६१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

प्रवर्तितजगत्क्षोभे सैन्ययोरुभयो रणे ।
कुमारोऽ**शनिवेगे** स्वयं योद्धुमुपास्थितः ॥६२॥

नागास्त्रं गरुडास्त्रेणाग्नेयं तद् वारुणेन च ।
वायव्यमचलास्त्रेण तन्मुक्तं कुमरो न्यहन् ॥६३॥

तदा **सन्ध्यावली**दत्त**प्रज्ञप्ति**विद्यया बली ।
निर्जीवं तद्धनुश्चक्रे नाराचैः कुमरः क्षणात् ॥६४॥

तस्याथ कोशकृष्टासेः क्रुधाऽन्धस्य प्रधावतः ।
तत्कालप्राप्तचक्रेण राजसूर्गलमच्छिदत् ॥६५॥

सङ्क्रान्तसर्वविद्याभृद्राज्यश्रीः प्रसरन्महाः ।
चण्डवेगादिभिर्युक्तस्तं सौधं प्राप सम्मदात् ॥६६॥

सन्ध्यावली-सुनन्दाभ्यामानन्दितमनास्ततः ।
अलञ्चकार **वैताढ्यं** कुमारो भाग्यसेवधिः ॥६७॥

तत्रास्य **चण्डवेगा**द्यैर्विधाधरनरेश्वरैः ।
विद्याधरमहाराज्याभिषेको विदधेतमाम् ॥६८॥

चण्डवेगोऽन्यदा स्वीयनगरे निजवेश्मनि ।
नीत्वाऽऽर्यपुत्रं सत्कृत्य बद्धाञ्जलिरभाषत ॥६९॥

ज्ञानिना मे पुराऽऽदिष्टं कन्याशतमिदं तव ।
भानुवेगस्य ताश्चाष्टौ चक्रभृत् परिणेष्यति ॥७०॥

इतो मासात् समेताऽसौ मानसं तत्र जेष्यति ।
असिताख्यं सुरं पूर्वभवासुहृदमुद्धतम् ॥७१॥

सनत्कुमारनाम्नोऽस्य कथं वैरी स चेच्छृणु ।
पुरे पुराऽभूद् विक्रमयशाः **स्वर्णपुरे** नृपः ॥७२॥

तस्यावरोधेऽस्ति पञ्चशती राजन्ययोषिताम् ।
सर्वस्त्रीगुणसङ्क्रान्त्या दूषणैः प्रोषितं यतः ॥७३॥

सोऽन्यदा **नागदत्त**स्य सार्थवाहस्य वल्लभाम् ।
तद्रूपमोहितो **विष्णुश्रिय**मन्तःपुरेऽक्षिपत् ॥७४॥

तत्पतिस्तद्वियोगार्तस्तद्दर्शनमनाप्नुवन् ।
मत्तो विलापतो मूढो निनाय समयं भ्रमन् ॥७५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

नृपस्त्यक्तान्यकर्तव्योऽपमानितपराङ्गनः ।
अचिन्तितापवादं च तस्यामेवान्वरज्यत ॥७६॥

ईर्ष्ययाखिलराज्ञीभिर्मिलित्वा कार्मणादिना ।
निपातितायामेतस्यां नृपोऽपि ग्रथिलोऽभवत् ॥७७॥

महामूढो न **विष्णुश्री**देहं दग्धुममन्यत ।
मन्त्रिभिर्मन्त्रयित्वाऽथ तदमोचि बहिर्वने ॥७८॥

तमपश्यन् रुदंस्त्यक्तसर्वपानक-भोजनः ।
त्र्यहमस्थाद् दिशः शून्या वीक्ष्यमाणस्तदाऽऽतुरः ॥७९॥

सचिवैरपि सोऽरण्ये निन्ये तत्र तमैक्षत ।
काकाकृष्टदृशं स्पष्टगलत्पूतिं चलत्कृमिम् ॥८०॥

ततोऽसौ लब्धचैतन्यस्तादृग्मौढ्यपरिच्युतः ।
निनिन्द भृशमात्मानं हा ! किमेतन्मया कृतम् ? ॥८१॥

यदर्थं कीर्त्ति-यशसी लज्जा-शील-कुलान्यपि ।
सर्वमेकपदे त्यक्तं तस्यावस्थेयमीदृशी ॥८२॥

सर्वं भवविवर्तेऽस्मिन्नीदृगेवान्तदारुणम् ।
अहो ! भक्षितहृत्पूर इव भ्रान्तोऽहमन्वहम् ॥८३॥

संविग्न इत्यसौ दीक्षामादाय विविधं तपः ।
कृत्वा संलिख्य पर्यन्ते तृतीये स्वः सुरोऽभवत् ॥८४॥

जज्ञे **रत्नपुरे** श्राद्धो **जिनधर्मा**भिधस्ततः ।
जिनधर्मं विना यस्य न किञ्चिदभवत् प्रियम् ॥८५॥

इतः स **नागदत्तो**ऽपि वल्लभाविरहार्दितः ।
आर्तध्यानी मृतो भूरिभवांस्तिर्यक्ष्वपूरयत् ॥८६॥

द्विजः **सिंहपुरे** भूत्वा परिव्राडजनि क्रमात् ।
नानाऽज्ञानतपःसक्तः सोऽथ **रत्नपुरं** ययौ ॥८७॥

हरिवाहनभूपेनामन्त्रितस्तद्गृहं गतः ।
पारणार्थी स राजा हि भक्तोऽत्यन्तं त्रिदण्डिनाम् ॥८८॥

तत्र दैवेन सोऽद्राक्षीज्जिनधर्ममुपागतम् ।
अज्वलत् पूर्ववैरेण बभाण च धराधवम् ॥८९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पृष्ठिस्थभाजनेऽस्यान्यव्यावृत्त्या पारयाम्यहम् ।
राजन् पायसमत्युष्णं न यावज्जीवनमन्यथा ॥९०॥

ऋषिघातांहसा भीतोऽनुमेने तद्वचो नृपः ।
दृष्टिरागादथाहूय द्रुतं श्रेष्ठिनमादिशत् ॥९१॥

तपस्विभक्त्या सम्पन्नो मृत्युः स्वर्गो हि तत्त्वतः ।
तत्कृताभिग्रहस्येत्थमस्य कारय पारणम् ॥९२॥

कृतनिर्दम्भधर्मोऽसौ निर्विषादस्ततो न्यधात् ।
पृष्ठिमेतत्पुरः सोऽपि पात्र्यामत्र शनैः शनैः ॥९३॥

पायसीं बुभुजेऽत्युष्णां श्रेष्ठी तत्परितापतः ।
भुक्तोत्तरं विदीर्णत्वक्पीडितात्माऽगमद् गृहम् ॥९४॥

सम्मान्य क्षमयित्वा स्वान् कृत्वा चैत्यार्चनादिकम् ।
व्रतीभूय गिरेः शीर्षे गृध्रपृष्ठेन मृत्युना ॥९५॥

समाहितो मृतः कल्पे **सौधर्मे**ऽभूत् सुराधिपः ।
तत्कर्मणा तस्य यानं हस्तिमल्लस्त्रिदण्ड्यपि ॥९६॥

ततश्च्युतो बहु भ्रान्त्वाऽ**सिताक्षो**ऽयं सुरोऽभवत् ।
सनत्कुमारचक्री तु शक्रोऽभूद् **हस्तिनापुरे** ॥९७॥

वैरहेतुरयं ज्ञेय इत्युक्ते ज्ञानिना तदा ।
भानुवेगो मया प्रैषि निवेश्य प्रियसङ्गमाम् ॥९८॥

विवाहितो **भानुवेग**स्याष्टौ भ्रातुः सुता अपि ।
तन्मर्षितव्यं यत् त्यक्तस्तदा लग्नादिहेतुना ॥९९॥

कन्याशतं मदीयं तदनुगृह्णातु पाणिना ।
वध्वोऽष्टावपि पश्यन्तु सम्प्रति स्ववराननम् ॥१००॥

अथैता अपि तत्रैयुरार्यपुत्रश्च ताः कनीः ।
शतं श्री**चण्डवेग**स्योदवहद् विविधोत्सवैः ॥१०१॥

दशोत्तरप्रियतमाशतसौख्यस्य तिष्ठतः ।
तत्र प्रियतमस्याद्य मनीषेयमजायत ॥१०२॥

युद्धं यत्रा**सिताक्षे**ण वृत्तं तत्र गमिष्यते ।
अतः स्ववल्लभावृन्दवृतोऽमुं देशमाश्रितः ॥१०३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अत्र प्रेक्षणकाक्षूणक्षणानुभवभासुरः ।
त्वया सुहृत् परीरब्धोऽजागरीद् राजसूरितः ॥१०४॥

सतन्त्रः प्राप **वैताढ्यं** विज्ञप्तः सुहृदाऽन्यदा ।
त्वद्वियोगाग्निसन्तप्तौ त्वन्माता-पितरौ भृशम् ॥१०५॥

अतः किं भूरि वक्तव्यं विज्ञोऽसि हि कुरूचितम् ।
इत्युक्त्यनन्तरं **चण्डवेगा**दीन् सोऽन्वजिज्ञपत् ॥१०६॥

ततो विद्याधरश्रेणिसेनया स पुरस्कृतः ।
नभोऽध्वना सतन्त्रो द्राक् चक्र्यगान्निजपत्तनम् ॥१०७॥

आलिङ्ग्य सुतमुद्धूतस्वार्जितश्रीभरोद्धुरम् ।
जनकावन्वभूतां तत् सुखं वाच्यं न यद् भवेत् ॥१०८॥

आकरा इव हर्षस्य नागरा जज्ञिरेऽखिलाः ।
अभ्यषिञ्चन्निजे राज्ये कृतकृत्योऽथ तं नृपः ॥१०९॥

मित्रं **महेन्द्रसिंहा**ख्यं तस्य सेनापतिं न्यधात् ।
स्वयं धर्माहतस्तीर्थे व्रत्यभूदुपसद्गुरु ॥११०॥

कर्मक्षयक्षमं कृत्वा तपः प्राप महोदयम् ।
श्रीमान् **सनत्कुमारो**ऽपि भेजे राज्यमहोदयम् ॥१११॥

चक्राद्यखिलरत्नर्द्धिर्दशभिः शरदां शतैः ।
प्रसाध्य भरतं सर्वं प्रसिद्धश्चक्रवर्त्यभूत् ॥११२॥

तस्य राज्याभिषेकस्य क्षणे द्वादशवार्षिके ।
श्रीशक्रोऽवधिना ज्ञात्वा श्रीदमित्यादिशन्मुदा ॥११३॥

यथाऽहमत्र शक्रोऽस्मि तथाऽसौ चक्र्यभूत् पुरा ।
समानस्थान-योनित्वात् तदसौ मे सहोदरः ॥११४॥

तद् विधेहि द्रुतं गत्वाऽस्याभिषेकमहोत्सवम् ।
अदः सुरेश्वरादेशाच्छ्रीदो भुवमवातरत् ॥११५॥

सिंहासने निवेश्यैनं चक्रिणं रत्नमण्डपे ।
सुवर्णकलशानीतैः क्षीरोदाम्भोभिरुज्ज्वलैः ॥११६॥

नृत्यन्तीभिः सुरस्त्रीभिर्गन्धर्वैः स्वादुगायिभिः ।
अभिषिच्याथ संयोज्यालङ्कारांश्चक्रिवर्ष्मणि ॥११७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

समर्प्य प्राभृतं स्फीतं दत्त्वा च्छत्रादि चाद्भुतम् ।
ऐन्द्रप्रणयमावेद्य दिवि वैश्रमणो ययौ ॥११८॥

उत्तंसीकृतजैनाज्ञमनन्यसमतैजसम् ।
भोगाभोगमनोहारि चक्री राज्यमपालयत् ॥११९॥

श्लाघामद्वैतरूपस्य चक्रिणः शक्रनिर्मिताम् ।
श्रुत्वाऽऽगतौ परीक्षायै द्वौ देवौ तत्पुरेऽन्यदा ॥१२०॥

विजयो वैजयन्तश्च विदेशीयद्विजाकृती ।
नृपस्नानक्षणेऽभ्येत्य तौ सौधद्वारि तस्थतुः ॥१२१॥

राजाज्ञयाऽन्तरायातौ खल-तैलतिरोहितम् ।
अपि तद्रूपमालोक्य विस्मितौ भुवनातिगम् ॥१२२॥

लिङ्गावगतचित्रौ तावपृच्छत् कौ युवामिति ? ।
नृपस्तावाहतुः स्वामिन् ! आवां वैदेशिकद्विजौ ॥१२३॥

अतिविश्वमनोहारिभवद्रूपदिदृक्षया ।
प्राप्ताविति नृपः श्रुत्वा प्राहेषदवलेपवान् ॥१२४॥

किमिदानीमिदं दृष्टमव्यक्तमनलङ्कृतम् ? ।
स्थितस्य दृश्यमास्थाने भुक्तस्य मम तत् पुनः ॥१२५॥

तदभ्युपेत्य तौ यातावथ भुक्तोत्तरं नृपः ।
पूरयित्वा सभां सर्वशोभया स्वासनेऽविशत् ॥१२६॥

तदा तौ तद्वपुश्चेष्टां निभाल्यान्योऽन्यमाहतुः ।
वयो-लावण्य-रूपाणि क्षणिकान्येव धिग् नृणाम् ॥१२७॥

विस्मयाच्चक्रिणा पृष्टौ सविषादाववोचतुः ।
अश्रद्धेयमिदं राजंस्तथापि शृणु कौतुकम् ॥१२८॥

रूप-यौवन-तेजांसि देवानां जन्मतोऽपि हि ।
अवस्थितानि यावत् षण्मासायुरवशिष्यते ॥१२९॥

नृणां तानि तु वर्धन्ते यावन्मध्यं निजायुषः ।
ततः परं तु हीयन्ते यावदायुः प्रपूर्यते ॥१३०॥

त्वद्रूप-यौवन-श्रीणामिदमाश्चर्यमद्भुतम् ।
यत् क्षणात् खलमैत्रीवाधुनैवैता गताः क्वचित् ॥१३१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

चक्री प्राह कथं वित्थो युवां तावप्यथोचतुः ।
राजन्नाकर्ण्यतां तत्त्वमद्याद्यदिवि वासवे ॥१३२॥
प्रेक्षमाणे सुधर्मायां सभायां दिव्यनाटकम् ।
सङ्गमाख्यः सुरः कश्चिदागा**दीशानतः** पुरः ॥१३३॥
शक्रेण सत्कृतस्यास्य दिव्यप्रसृमरत्विषा ।
निष्प्रभाऽऽसीत् सभा शाक्री भानीवादित्यतेजसा ॥१३४॥
शक्रोऽथ विस्मितैर्देवैः पृष्टो भाऽऽधिक्यकारणम् ।
आचचक्षेऽमुनाऽऽचाम्लवर्धमानं तपः कृतम् ॥१३५॥
प्राग्भवे तन्महात्माऽसौ सर्वादित्याधिकप्रभः ।
अन्यः कोऽपीदृशोऽस्तीति तत्प्रश्नेऽवक् सुरेश्वरः ॥१३६॥
कान्ति-सौभाग्य-लावण्यैर्वैश्वविश्वातिशायिनः ।
सनत्कुमाररूपस्य नायमप्युपमास्पदम् ॥१३७॥
एतदश्रद्धयैवावामायातौ त्वरितं सुरौ ।
शक्रोक्ताधिकमालोकि रूपं वः प्राचि दर्शने ॥१३८॥
साम्प्रतं ध्वस्तमेवेदमुद्भवव्याधिबाधितम् ।
ज्ञास्यसि स्वयमेवेदमित्याख्याय गतौ सुरौ ॥१३९॥
हार-केयूरसम्बन्धमपि वक्षो-भुजादिकम् ।
नृपो निरीक्ष्य विच्छायं प्रत्ययादित्यचिन्तयत् ॥१४०॥
"अहो ! क्षणिकताऽऽघ्रातं बहिरङ्गमदोऽखिलम् ।
प्रतिबन्धस्तु तत्रापि यत् तन्मौढ्यविजृम्भितम् ॥१४१॥
वपुर्मोहोऽयमज्ञानमज्ञानं रूपगर्विता ।
अज्ञानं विषयासक्तिरज्ञानं ही ! परिग्रहः ॥१४२॥
कर्तुमात्महितं किञ्चिन्ममोचितमथेत्यसौ ।
पट्टेऽभिषिच्य स्वं पुत्रं व्रतं तत्कालमाददे" ॥१४३॥
रत्नानि निधयो देवा नरेन्द्राः पत्तयोऽङ्गनाः ।
तस्यैवानु भ्रमन्ति स्म षण्मासान् प्रेमलालसाः ॥१४४॥
सिंहावलोकितेनापि तानसौ न व्यलोकयत् ।
अहो ! निरभिषङ्गत्वं वायोरिव महामुनेः ॥१४५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

चीनकूरमजातक्रमिश्रं षष्ठस्य पारणे ।
भुक्त्वा चक्रे पुनः षष्ठं स तपस्वी महामनाः ॥१४६॥

तदादि तादृशाहारदोषादस्य तनूं रुजः ।
अरुचि-ज्वर-कासाद्याः क्रमाद् भृशमबाधयन् ॥१४७॥

कच्छूस्तु सुतरां कायरूपकान्तिमचूरयत् ।
तथापि मनसा नायमचिकीर्षच्चिकित्सितम् ॥१४८॥

सप्त वर्षशतान्युच्चैरधिसेहे स वेदनाः ।
नैव घोरतपोभिश्च कदाचित् स्वं व्ययोजयत् ॥१४९॥

लब्धयोऽस्य तपोजन्या आमर्षौषधिकादयः ।
सप्ताभवन्नप्रमत्तः परं ता नानन्वयोजयत् ॥१५०॥

प्रशशंसान्यदा शक्रस्तमहो ! व्याधिबाधितः ।
सन्तकुमारराजर्षिर्नेच्छत्येव प्रतिक्रियाम् ॥१५१॥

पुनरश्रद्धया देवौ वैद्यरूपावुपागतौ ।
त्वद्व्याधिप्रशमं कुर्व इत्येनं मुहुराहतुः ॥१५२॥

अनुलग्नावविश्रान्तौ तौ मितं मुनिराड् जगौ ।
शारीरः कार्मणो वाऽयं युवयोः शक्यनाशनः ? ॥१५३॥

आद्यस्तु सुकरध्वंस इत्युक्त्वा सकलौषधीम् ।
लब्धिं प्रयुज्य सुस्वर्णवर्णां चक्रेऽङ्गुलीं क्षणात् ॥१५४॥

स्वयमेवं बहिर्व्याधिव्यूहध्वंसक्षमोऽस्म्यहम् ।
तद्बीजभूतं कर्माख्यं शक्तौ शमयतां द्रुतम् ॥१५५॥

अदो मुनिवचः श्रुत्वा तादृशस्थैर्यविस्मितौ ।
कर्मव्याधिसमुच्छेदे त्वां विना कः परः क्षमः ? ॥१५६॥

इति स्तुत्वा सुरावैन्द्रीं श्लाघां चावेद्य सम्मदात् ।
नत्वा गतौ दिवं सोऽथ तत्त्वं साधुरसाधयत् ॥१५७॥

पञ्चाशतं सहस्राणि कौमार्य-मण्डलेशताम् ।
अब्दानां परिपाल्यैष लक्षं चक्रित्वमन्वशात् ॥१५८॥

ततोऽब्दलक्षं श्रामण्यमध्याश्रित्य निरञ्जनम् ।
तृतीयं स्वर्गमध्यास **सम्मेते**ऽसौ समाधिना ॥१५९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

च्युतस्तस्माद् **विदेहे**ऽवतीर्य सेत्स्यति दीक्षया ।
सनत्कुमारवत् तस्मात् यतध्वं स्वार्थसिद्धये ॥१६०॥

इति **सनत्कुमार**चरित्रम् ॥३७॥

तथा—

चइत्ता भारहं वासं चक्कवट्टी महड्ढिओ ।
संती संतिकरो लोए पत्तो गइमणुत्तरं ॥३८॥

व्याख्या—त्यक्त्वा भारतं वर्षं चक्रवर्त्तिर्महर्द्धिको महर्द्धियुक्तः **शान्तिः शान्तिकरो लोके** मनुष्यलोके **प्राप्तो गतिमनुत्तरां** सर्वोत्कृष्टां मोक्षलक्षणामिति सुगमम् । अयं पञ्चमश्चक्री षोडशश्च तीर्थकृत् । ततश्च—

शिवसम्पत्तिकृन्नाम्नः संविग्नानन्दसाधनम् ।
चरितं **शान्ति**नाथस्य स्वामिनः किञ्चिदुच्यते ॥१॥

वैताढ्येऽस्त्युत्तरश्रेण्यां पुरं श्री**रथनूपुरम्** ।
तस्मिन्न**मिततेजाः** क्ष्मापतिर्विततविक्रमः ॥२॥

सोऽन्यदा सम्मदी स्वीय**सुतारा**भगिनीपतेः ।
ययौ श्री**विजयाख्य**स्य पार्श्वे **पोतन**पत्तनम् ॥३॥

तदोच्छ्रितध्वजं जायमाननानामहोत्सवम् ।
पुरं राजकुलं वीक्ष्यापृच्छत् प्रियतमं स्वसुः ॥४॥

राजन् ! विशेषमहसि किं निदानं विभाव्यते ? ।
ततः श्री**विजयो** भूपस्तद् वक्तुमुपचक्रमे ॥५॥

इतोऽष्टमे दिने नैमित्तिकः कोऽपि महामतिः ।
उपतस्थे सभास्थं मामाचचक्षे च सत्कृतः ॥६॥

मया निमित्ततो ज्ञातमितः सप्तमके दिने ।
पोतनाधिपतेः शीर्षे विद्युद्वह्निः पतिष्यति ॥७॥

अदः कटुवचः श्रुत्वा रुष्टेनाभाणि मन्त्रिणा ।
रे ! तिष्ठ वावदूकस्य पतिता किं तवोपरि ? ॥८॥

तेनोचे शृणु भो मन्त्रिन् ! स्वर्णवृष्टिर्भविष्यति ।
ममोपरि तदा जाते तद्वृत्ते च यथास्थिते ॥९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तथा च मयि मा कुप्यो न द्वेषः कश्चिदस्ति मे ।
निमित्तं यदुपालम्भि सद्भावात् तत् पटूकृतम् ॥१०॥

यतन्ते प्रतिकाराय विज्ञायैष्यदुपद्रवम् ।
न तु रुष्यन्ति धीमन्तः कथकायोपकारिणे ॥११॥

संवादपेशलोक्तस्य सत्कारो मे न दुर्लभः ।
शान्तोऽथ सचिवः प्राह निमित्तज्ञः कुतो भवान् ? ॥१२॥

सोऽवादीत् सह तातेन पुरा प्रव्रजितोऽभवम् ।
अचलस्वामिनो दीक्षाकाले परमसम्मदात् ॥१३॥

स्थविरैः शिक्षितः शिक्षां पाठितश्च श्रुतं बहु ।
तत्राष्टाङ्गं मया ज्ञातं निमित्तं श्रुतसागरात् ॥१४॥

ततोऽस्मि वृतकन्याया उत्प्रव्राज्य सहोदरैः ।
विवाहितो बलात् कर्म यतो बलवदात्मनि ॥१५॥

इत्युक्त्वाऽस्मिन्नुपरते एकेनाख्यायि मन्त्रिणा ।
तिष्ठत्वब्धौ नृपः पोते विद्युत् तत्र पतेन्न यत् ॥१६॥

न सम्मतं तदन्येषां यतः कर्म पुरातनम् ।
प्रभवत्येव वार्द्धौ वा गिरौ वाऽप्यविशेषतः ॥१७॥

मन्त्री **सन्मति**रित्याख्यत् **पोतना**धिपतेर्वधः ।
न तु **श्रीविजय**स्यास्य नैमित्तेन प्रवेदितः ॥१८॥

तत् **पोतन**प्रभुत्वेन कल्प्यः सप्तदिनी परः ।
अथास्थाप्यैकमत्येन यक्षः कोऽपि नृपासने ॥१९॥

सप्तमाहेऽथ मध्याह्ने विद्युदभ्युन्नता ध्वनात् ।
निपत्य यक्षमदहन्नान्यथा ज्ञानिनो वचः ॥२०॥

अहं पौषधशालायां सप्तरात्रोषितो गृहम् ।
उत्सवैरागतो राज्येऽभिषिक्तो नागरैः पुनः ॥२१॥

नैमित्तः पूजितः सर्वैस्तदिदं क्षणकारणम् ।
अश्लाघि मन्त्रिप्रागल्भ्यं श्रुत्वेत्य**मिततेजसा** ॥२२॥

मिलित्वा स्वसुरात्मीयगृहगेऽ**मिततेजसि** ।
सुतारयाऽन्यदोद्यानं युक्तः **श्रीविजयो** ययौ ॥२३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तत्र हैमं मृगं वीक्ष्य नृपोऽभाणि **सुतारया** ।
मत्क्रीडनकृते कान्त ! द्रुतमेनमुपाहर ॥२४॥

ददावे स्वयमुर्वीशोऽनुमृगं त्वरितैः पदैः ।
मृगस्तूदपतद् व्योम्नीतश्च यावत् क्षितीश्वरः ॥२५॥

देव ! कुर्कुटसर्पेण क्षतां त्रायस्व मां द्रुतम् ।
इति देवीवचः श्रुत्वा प्रत्यावृत्त्योपदेव्यगात् ॥२६॥

असौ लघु मृता तावद् तद्रागान्धोऽथ भूपतिः ।
तस्याः सह गमं कर्तुं चिताऽऽसनमुपाविशत् ॥२७॥

किं जीवितेन किं भोगैर्विनैनां प्राणवल्लभाम् ? ।
इति स्थिरमना भूपो द्रुतं वह्निमदीदिपत् ॥२८॥

लोकाक्रन्दश्च धूमश्च व्यानशाते नभोऽभितः ।
दैवाकृष्टाविवायातौ खेचरौ द्वावितोऽन्तरे ॥२९॥

तत्रैकेनाभिमन्त्र्याम्भो लघु सिक्ता ज्वलच्चिता ।
नष्टा **वैतालिनी** विद्या सुस्थश्चाह नरेश्वरः ॥३०॥

किमेतत् कौ युवां तौ चावोचतां विहिताञ्जली ।
आवां तात ! सुतौ भर्तुः प्रेष्या**वमिततेजसः** ॥३१॥

आगच्छद्भ्यां जिनं नत्वा **सुतारा**क्रन्दितं श्रुतम् ।
ददृशेऽ**शनिघोषश्च** तां हृत्वा गगने व्रजन् ॥३२॥

आवां युद्धोद्यतावुक्तौ देव्याऽलं संयुधा द्रुतम् ।
यातां **वैतालिनी**विप्रतारितो मा मृयात् प्रियः ॥३३॥

आयाताभ्यां तदावाभ्यामिह दृष्टश्चितागतः ।
वैतालिनीकृतप्रासु**सुतारा**संयुतो भवान् ॥३४॥

नष्टा साऽस्मत्प्रयोगेण न कार्याऽथ विषण्णता ।
आनीतैव **सुता**रेति प्रोच्यैतौ खचरौ गतौ ॥३५॥

ताभ्यां बोधिततद्वृत्तोऽ**मिततेजाः** ससैनिकः ।
सभग्नीजानि**रशनिघोष**माश्वभ्यषेणयत् ॥३६॥

नंष्ट्वा स्वराजधानीतः सो**ऽचल**स्वामिनोऽन्तिकम् ।
उत्पन्नकेवलस्यागादनु तत् तावपीयतुः ॥३७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ते शान्तवैराः सर्वेऽपि शुश्रुवुर्धर्ममार्हतम् ।
सुतारैकेन तत्रैवानिन्ये विद्याभृतां क्षणात् ॥३८॥

अथोचेऽश**निघोषेण** न दुर्भावान्मया हृता ।
सुताराऽपि तु दृष्टवानामभवं त्यक्तमक्षमः ॥३९॥

पूर्वस्नेहवशाद् **वैतालिनी** व्यतिकरेण तत् ।
मोहयित्वा नृपं हृत्वैनामगां क्षम्यमित्यदः ॥४०॥

आकर्ण्या**मिततेजा**स्तदपृच्छज्जिननायकम् ।
कुतः स्नेहः **सुतारा**यामस्येत्यर्हन्नपीत्यवक् ॥४१॥

भरते मगधादेशे**ऽचल**ग्रामे द्विजन्मनः ।
कस्यापि **कपिला** चेटी तत्पुत्रः **कपिलो**ऽभवत् ॥४२॥

कर्णश्रुत्यैव चतुरः स वेदांश्चतुरोऽपठत् ।
जनुर्दोषात् तु तत्रैनं नाध्यापयति कश्चन ॥४३॥

अतो देशान्तरे **रत्नपुरे**ऽध्यापकमाश्रितः ।
प्रख्याप्य स्वं द्विजसुतं स्मृत्याद्यध्ययनेच्छया ॥४४॥

तत्प्रज्ञापरितोषेणाध्यापको निजनन्दिनीम् ।
कपिलेन गुणस्तुत्यां **सत्यभामां** व्यवाहयत् ॥४५॥

अन्यदा प्रावृषि श्यामाप्रदोषे वर्षदम्बुदे ।
अन्तःकक्षं स वस्त्राणि संगोप्य गृहमाययौ ॥४६॥

तीमितांशुक इत्यन्यान्युपादायोपतस्थुषीम् ।
वस्त्राणि प्रोचिवान् कान्तां तिमिरेऽसौ निरंशकः ॥४७॥

अस्ति विद्याप्रभावो मे जलं न क्रमतेंऽशुके ।
सा तु दक्षा विवेदास्य नाग्न्यं वैद्युततेजसा ॥४८॥

अकौलीन्यमिदमिति मन्दस्नेहा क्रमादभूत् ।
सत्त्वभाजां नृणां स्त्रीणां नाकुलीने मनोरतिः ॥४९॥

तेन यद्द्विजपुत्रत्वमूचे सोऽपि द्विजोऽन्यदा ।
तत्रागात् **सत्यभामां** तं रहसीदमभाषत ॥५०॥

त्वत्पुत्रोऽयं यदि तदा पृथक् पङ्क्तिः कृता कथम् ? ।
सोऽप्यैदम्पर्यमाचष्ट मद्दास्यास्तनुभूरिति ॥५१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

निर्विण्णा कामभोगेभ्यो जिघृक्षुर्व्रतमादृता ।
अपृच्छत् **कपिलं** नानुमेने स तु कथञ्चन ॥५२॥

ततस्तत्रत्यभूपालं **श्रीषेणं** सा व्यजिज्ञपत् ।
कपिलान्मोचय स्वामिन् ! येन द्राग् व्रतमाददे ॥५३॥

येन दुष्कर्मणा क्षिप्ता नीचसङ्गतिसङ्कटे ।
तत्कर्मशत्रुहनने नान्यदौपयिकं व्रतात् ॥५४॥

भृशमुक्तः स राज्ञाऽपि तां नामुञ्चत् ततो नृपः ।
तामाह तिष्ठ तावत् त्वं यावत् तं प्रशमं नये ॥५५॥

इतश्च नृपतिः पुत्रावेकपण्याङ्गनाकृते ।
शत्रुवद् विनियुध्यन्तौ प्रश्रयादित्यशिक्षयत् ॥५६॥

"सत्स्वपाङ्क्तिकता मानहानिर्ज्ञातिष्वनादरः ।
मालिन्यमात्मनश्चेति दोषाः पण्याङ्गनागमे ॥५७॥

कुलीनक्षितिभृत्कन्याभोगौदासीन्यतो रतिः ।
वेश्यास्वनेकभुक्तासु किं युक्ता नृपजन्मनाम् ? ॥५८॥

चित्रं तत्रापि यद् भ्रात्रोः कलहस्तत्कृतेऽपि हि ।
स चन्द्रे श्यामिकाप्रायः कश्चिदुत्पातहेतवे ॥५९॥

राज्यार्थे यदसाङ्गत्यं पुत्रयोस्तदपि ध्रुवम् ।
पितुः क्लेशाय तुच्छैकवेश्याऽर्थे तु किमुच्यते ? ॥६०॥

एतत् पितृवचः श्रुत्वा गवाज्यप्रायमद्भुतम् ।
इद्धक्रोधानलौ क्ष्मापमाहतुस्तौ निरर्गलौ ॥६१॥

तात ! वृद्धोऽसि का वेश्या का वा राजाङ्गजा जने ? ।
प्रीतिरेव हि संसारे निदानं परमादरे ॥६२॥

अन्धे कुष्ठिनि पङ्गौ वा नृपेऽपि नृपजेऽपि वा ।
समव्यापारवद् वेश्यासमं पात्रं न विद्यते ॥६३॥

द्वयोरन्यतरो भ्राता न हि यावद् विपत्स्यते ।
तावत् कुतः कलिः क्षीणो यद् भाव्यं तात ! पश्य तत्" ॥६४॥

इत्यपायप्रवृत्ताङ्गजन्मदुर्वाक्यजन्मना ।
वैराग्येण शुभध्यानाद् विषभक्षी मृतो नृपः ॥६५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

शिखिनन्दिन्यभिनन्दिन्यौ संविग्ने नृपतिप्रिये ।
सत्यभामाऽपि चकिता तिस्रोऽप्यादुर्विषं तदा ॥६६॥

जाता **देवकुरु**स्थाने नृपतिस्ताश्च युग्मिनः ।
सौधर्मेऽथ ततो गत्वा **श्रीषेणा**त्मा ततश्च्युतः ॥६७॥

एष जज्ञे**ऽमिततेजाः श्रीविजयोऽभिनन्दिनी** ।
सत्यभामा सुताराऽभूत् प्रागभ्यासाच्च सङ्गतिः ॥६८॥

कपिलोऽपि भवं भ्रान्त्वा**ऽशनिघोषो**ऽभवत् स च ।
प्राक्प्रेमातिशयाद् राजन् ! द्राक् **सुताराम**पाहरत् ॥६९॥

भव्योऽहं किमभव्यो वेति पृष्टो**ऽमिततेजसा** ।
जिनोऽथ व्याहरद् भव्यस्त्वमितो नवमे भवे ॥७०॥

षोडशस्तीर्थकृद् भावी सैष **श्रीविजय**श्च ते ।
भविताऽऽद्यो गणधरस्तच्छ्रुत्वा तुष्यतः स्म ता ॥७१॥

अथो निजे निजे राज्ये गत्वा भुक्त्वा चिरं सुखम् ।
गतौ कदाचिदुद्याने चारणर्षिं ददर्शतुः ॥७२॥

चिन्तामण्युपमानेन स्वल्पेनापि नरायुषा ।
यतितव्यं तथा नित्यः परानन्दो यथोल्लसेत् ॥७३॥

इति धर्म्यां गिरं श्रुत्वा निजमायुरपृच्छताम् ।
षड्विंशतिदिनान्येवेत्युपयुज्यावदन्मुनिः ॥७४॥

पुत्रयोरथ साम्राज्यं न्यस्यादाय च संयमम् ।
पादपोपगमेनैतौ विपद्य सुसमाहितौ ॥७५॥

उत्पन्नौ **प्राणते** कल्पे विंशत्यम्बुनिधिस्थिती ।
तत्रत्यसुखसर्वस्वमुपभुज्य क्रमाच्च्युतौ ॥७६॥

जम्बूद्वीपे प्राग्विदेहे विजये **रमणीयके** ।
सीताख्याया महानद्या अपाच्यां **सुभगा**पुरि ॥७७॥

राज्ञ **स्तिमितसारस्य** भार्ययोरुदरे क्रमात् ।
वसुन्धर्यनङ्गसुन्दर्योः सुतावुदपद्यताम् ॥७८॥

अपराजित इत्याख्या तयो**रमिततेजसः** ।
अनन्तवीर्य इत्याख्याऽभव**च्छ्रीविजय**स्य च ॥७९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

बलदेव-वासुदेवौ भारतार्धक्षितीश्वरौ ।
क्रमादभूतां निःशेषक्ष्माभृच्चक्रावतंसकौ ॥८०॥

तत्पिताऽपि परिव्रज्यासुरेषु **चमरो**ऽभवत् ।
अगा**दनन्तवीर्यो**ऽपि बद्धायुः प्रथमां भुवम् ॥८१॥

द्विचत्वारिंशत्सहस्राब्दस्थितिस्तीव्रोरुवेदनाः ।
सम्यक् सेहे स संविग्नः क्व मुक्तिः कृतकर्मणः ? ॥८२॥

तत्पिता **चमरेन्द्र**स्तं नरकादुद्दिधीर्षया ।
आचकर्ष परं सोऽपि नाक्रष्टुमशकत्तमाम् ॥८३॥

अ**थापराजितो** दीक्षामुपादाय विरक्तधीः ।
क्रमादा**पाच्युतेन्द्र**त्वं द्वाविंशत्यतरायुषा ॥८४॥

इत**श्चानन्तवीर्यो**ऽपि निर्गत्य नरकोदरात् ।
खेचरोऽजनि **वैताढ्येऽच्युतेन्द्रे**णैष बोधितः ॥८५॥

प्र**व्रज्याच्युत**देवोऽभून्महर्द्धिर्दिव्यदीधितिः ।
इन्द्रस्य परमप्रीतिपात्रमुत्कर्षितस्थितिः ॥८६॥

अच्युतेन्द्रः क्रमादायुरुपभुज्य च्युतस्ततः ।
विजये **मङ्गलावत्यां रत्नसञ्चय**पत्तने ॥८७॥

क्षेमङ्करस्य भूजाने **रत्नमाला**ऽङ्गभूरभूत् ।
वज्रायुधाभिधः पुत्रः पवित्रगुणसेवधिः ॥८८॥

अपरस्तु ततस्तस्य पुत्रत्वेनोदपद्यत ।
सहस्त्रायुध इत्याख्यः पितृभक्तो महाभुजः ॥८९॥

वज्रायुधं नृपीकृत्य लात्वा **क्षेमङ्करो** व्रतम् ।
तीर्थकृत् केवली भूत्वा भव्यान् भवमतारयत् ॥९०॥

अन्यदा पौषधागारे पौषधव्रतसुस्थिरम् ।
प्रशशंसाद्यकल्पेन्द्रो **वज्रायुध**मिति स्फुटम् ॥९१॥

चलेदपि क्वचिन्मेरुः परं सेन्द्रैः सुरैरपि ।
धर्माच्चालयितुं शक्यो न तु **वज्रायुधो** बली ॥९२॥

तदश्रद्दधदेकस्तु देवो भुवमवातरत् ।
पारापतेन रूपेण **वज्रायुध**मुपागमत् ॥९३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मनुष्यभाषया दीनमुच्चरंस्त्रस्तलोचनः ।
त्रायस्व शरणायातमित्यालीनः तमञ्जसा ॥९४॥

वज्रपञ्जरगो मा भैरिति भाषिणि भूपतौ ।
श्येनोऽथ तमनुप्राप व्यात्ततुण्डः क्षुधातुरः ॥९५॥

सोऽप्युवाच महासत्त्व ! क्षुत्क्षामं भ्रमता मया ।
लेभे पारापतः सैष मद्भक्ष्यं मुञ्चत द्रुतम् ॥९६॥

अन्यथा मृत एवास्मि मत्प्राणग्रहणांहसा ।
मा लेपय निजात्मानं ततो **वज्रायुधो**ऽभणत् ॥९७॥

"ऐदम्पर्यमिदं क्षत्रधर्मस्य भुवनातिगम् ।
यः कश्चिच्छरणं प्राप्तः स रक्ष्यो निर्विवेचनम् ॥९८॥

उचितं न तवाप्येतन्नरवाचो विवेकिनः ।
हृतैरपि परप्राणैर्न युगान्तरजीविता ॥९९॥

यथा तव प्रियाः प्राणास्तथैतस्यापि निश्चितम् ।
प्रियप्राण ! प्रियप्राणं त्वममुं किं जिघांससि ?" ॥१००॥

एतन्मांसात् क्षणं तृप्तिस्तव स्यादुत्कटक्षुधः ।
अयं तु जीवितं जह्यादथ श्येनोऽवदद् गिरम् ॥१०१॥

क्षुधाऽऽर्तस्य न मे धर्मः कृपाऽऽख्यो व्यवतिष्ठते ।
प्रपालयसि किं नैनमीप्सिताहारभोज्यसि ॥१०२॥

राजोचे चेत् क्षुधाऽऽर्तोऽसि मांसमन्यद् गृहाण तत् ।
निजव्यापादितप्राणिमांसाश्यस्मीति सोऽभ्यधात् ॥१०३॥

यन्मात्रं तुलयत्येष मांसं पारापतः पतत् ।
तावदादत्स्व मे देहादित्युक्ते राजजन्मना ॥१०४॥

ओमित्याह मुदा श्येनोऽथानाय्य महतीं तुलाम् ।
पात्रे पक्षिणमेकत्र लोकसाक्षि न्यवीविशत् ॥१०५॥

उत्कृत्योत्कृत्य मांसं स्वाङ्गान्मुमोच यथा यथा ।
परत्र पात्रेऽसौ पक्षी गुरुर्जज्ञे तथा तथा ॥१०६॥

नृपो वीक्ष्य तदाश्चर्यं हाहारवमुखे जने ।
अक्षतं मां गृहाणेति स्वयमारूढवांस्तुलाम् ॥१०७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कृपा विश्वैकनुत्यानां महतां काऽप्यलौकिकी ! ।
तृणयन्ति निजप्राणानपि तेऽन्यहितेच्छया ॥१०८॥

काष्ठाप्राप्तमिदं सत्त्वं दृष्ट्वा **वज्रायुधे** महत् ।
संहृत्य देवमायां तां साक्षाद्भूय सुरोऽवदत् ॥१०९॥

श्लाघितोऽसि सुरेन्द्रेणाधिकोऽसि सुपरीक्षितः ।
विजयस्वेति तं स्तुत्वा प्रहृष्टः स्वरगात् सुरः ॥११०॥

राज्यं भुक्त्वा चिरं न्यस्य पौत्रं **शतबलं** पदे ।
सहस्रायुधयुक् वज्रायुधः परमतत्त्वदृक् ॥१११॥

पितृ**क्षेमङ्कर**स्वामितीर्थकृद्‌गणभृत्करे ।
जग्राह संयमं तच्च प्रतिपाल्य यथाविधि ॥११२॥

ग्रैवेये नवमे देवावुत्पेदानावुभावपि ।
उत्कृष्टायुः सुखं भुक्त्वा च्युतौ सुकृतपूरितौ ॥११३॥

विदेहे **पुष्कलावत्यां** विजये मञ्जुसम्पदि ।
नगर्यां **पुण्डरीकिण्यां** भूभृद्**घनरथ**प्रभोः ॥११४॥

पद्मावत्या महादेव्या मनोरममतेरपि ।
मेघरथो दृढरथ इति जातौ सुतौ क्रमात् ॥११५॥

यथा यथा वयोवृद्धिर्बुद्धिवृद्धिर्यथा यथा ।
परिणेमे तयोर्धर्मः पूर्वाभ्यासात् तथा तथा ॥११६॥

ज्ञातजीवादितत्त्वौ तौ सुश्राद्धक्रिययाऽञ्चितौ ।
विश्वं दानेन सन्तोष्याभिषिच्य च सुतं पदे ॥११७॥

पितुस्तीर्थकृत पार्श्वे सम्प्राप्तावनगारिताम् ।
विंशत्यन्यतमैः स्थानैस्तत्र **मेघरथो** मुनिः ॥११८॥

उपार्ज्य तीर्थकृन्नामकर्म संलिख्य चायुषि ।
क्षीणेऽनुत्तरदेवत्वं प्राप **सर्वार्थसिद्धिगः** ॥११९॥

त्रयस्त्रिंशत्सागरायुर्भुक्त्वा सन्तोषजं सुखम् ।
हस्तिनागपुरे राज्ञो **विश्वसेन**स्य मानिनः ॥१२०॥

अचिराद**चिरादेव्या** उदरे विश्वसुन्दरे ।
प्रोष्ठपदाद्यसप्तम्यां ततश्च्युत्वाऽवतीर्णवान् ॥१२१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

चतुर्दशमहास्वप्नोपलम्भसुभगं विभुम् ।
ज्येष्ठश्यामत्रयोदश्यां तनुजं सुषुवेऽचिरा ॥१२२॥

विहितं दिक्कुमारीभिः सूतिकर्माखिलं मुदा ।
स्नपितश्च प्रभुर्मेरौ सुरेन्द्रैर्विशदोदकैः ॥१२३॥

कृत्वा वर्धापनं भूभृद् गर्भस्थेऽस्मिन् जनेऽखिले ।
शान्तिरासीदिति प्रत्यष्ठिपच्छ्री**शान्ति**नामताम् ॥१२४॥

वर्धमानः क्रमात् सर्वकलासु कुशलः सुधीः ।
तरुणो भूभुजां नैका राजकन्या व्यवाहयत् ॥१२५॥

भेजेऽथ पैतृकं राज्यं भाग्यतश्चक्रितामपि ।
स्वयम्बुद्धोऽपि लोकान्तज्ञापितावसरः क्रमात् ॥१२६॥

संवत्सरमहादानं दत्त्वा हित्वा परिग्रहम् ।
ज्येष्ठकृष्णचतुर्दश्यां निष्क्रान्तो नृसहस्रयुक् ॥१२७॥

चतुर्ज्ञानसमग्रस्योद्यतस्य परमेशितुः ।
नवम्यां पौषशुद्धायां बभूवोज्ज्वलकेवलम् ॥१२८॥

सुरेन्द्रैर्देशनागारे त्रिप्रकारे कृते प्रभुः ।
व्याख्याय तत्त्वत्रितयं भूरिभव्यानुबूबुधत् ॥१२९॥

च्युत्वा **दृढरथः** पुत्रः प्रभो**श्चक्रायुधा**भिधः ।
भूत्वा स गणधारित्वं प्राथम्यं चाप साधुषु ॥१३०॥

ग्राम-पत्तन-देशादौ विहृत्य भगवानपि ।
ज्येष्ठकृष्णत्रयोदश्यां **सम्मेते** प्राप निर्वृतिम् ॥१३१॥

कौमार्ये मण्डलित्वे तदनु नवनिधिप्रोल्लसच्चक्रितायां,
छाद्मस्थ्यैकाब्दयुक्ते सुरकृतपरिचर्याञ्चिते केवलित्वे ।
यस्याब्दानां सहस्राः करण-करमिता विश्वविश्वैकनेतुः;
प्रत्येकं तीर्थनाथः स भवतु भवतां **शान्तिनाथः** शिवाय ॥१३२॥

इति श्री**शान्तिनाथ**चरित्रम् ॥३८॥

इक्खागरायवसभो कुंथू नाम नरेसरो ।
विक्खायकित्ती भगवं पत्तो गइमणुत्तरं ॥३९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—इक्ष्वाकुराजवृषभः । **कुन्थुर्नामा** नराणां मर्त्यानां मध्ये ईश्वर इव **नरेश्वरः**। **पुनर्विख्यातकीर्त्तिर्भगवान् प्राप्तो गतिमनुत्तराम्** । स्पष्टम् । एष च षष्ठश्चक्री सप्दशश्च जिन इति । तद्वृत्तोद्देशो यथा—

हस्तिनागपुरे सूरभूपालस्य प्रतापिनः ।
श्रीदेव्या भगवान् पुत्रः **कुन्थुनाथो**ऽभवनज्जिनः ॥१॥

प्रवयाः पैतृकं राज्यं प्राप्य संसाध्य चौजसा ।
षट्खण्ड**भरतेश**त्वं स प्रौढश्चक्रवर्त्यभूत् ॥२॥

समये व्रतमादाय षोडशाब्दीं विहृत्य च ।
उत्पाद्य केवलज्ञानं भव्यान् भवमतारयत् ॥३॥

कौमार-राज्य-चक्रित्व-व्रतेषु शरदां क्रमात् ।
त्रिविंशतिः सहस्राणि सार्धसप्तशतानि च ॥४॥

प्रत्येकमतिवाह्योच्चैः कर्म निर्मूल्य सर्वतः ।
सम्मेते सिद्धिमासाद्य शाश्वतानन्दभागभूत् ॥५॥

यत्रावतीर्णे ह्यतिलाघवेन कुन्थूपमान् श्रीः प्रददर्श शत्रून् ।
बाह्यान्तरङ्गारिगणप्रमाथी स **कुन्थुनाथः** कुशलं करोतु ॥६॥

इति **कुन्थु**चरित्रम् ॥३९॥

सागरंतं चइत्ताणं भरहं नरवरीसरो ।
अरो य अरयं पत्तो पत्तो गइमणुत्तरं ॥४०॥

व्याख्या—सागरान्तं समुद्रान्तं **[त्यक्त्वा] भरतं** भरतक्षेत्रं **नरवराणामीश्वरः** । **अर**नामा च तीर्थकृच्चक्रवर्ती रतस्य रजसो वा अभावोऽ**रतं अरजो** वा **तत्प्राप्तः** सन् **प्राप्तो** गतो **गतिमनुत्तरां** मुक्तिमित्यर्थः । तच्चरित्रसङ्ग्रहवृत्तमिदम्—

अभूद् **गजपुरे** पुरे जिनवरो**ऽर** इत्याख्यया,
सुदर्शनकुलार्यमा जगदुदारदेव्यात्मजः ।
चतुर्ष्वपि समैकविंशतिसहस्रमभयेत्य यो,
महोदयमशिश्रयद् विदितचक्रिराट् सप्तमः ॥१॥

इति **अर**जिनचरित्रम् ॥४०॥

चइत्ता भारहं वासं चक्कवट्टी महिड्ढिओ ।
चइत्ता उत्तमे भोगे महापउमो तवं चरे ॥४१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या–त्यक्त्वेति भारतं क्षेत्रं चक्रवर्त्तिर्महर्द्धिकः । पुनः **त्यक्त्वा उत्तमान्** प्रधानान् **भोगान् महापद्मश्च**क्रवर्त्तिस्**तपश्चरेद**करोत् । सुगमम् । तच्चरित्रं यथा–

हस्तिनागपुरे स्वस्तिशस्तः **पद्मोत्तरो** नृपः ।
पराक्रम्यस्य देव्यस्ति **ज्वाला** रम्या जिनाज्ञया ॥१॥

सिंहस्वप्नयुतो **विष्णुकुमारो**ऽस्याः सुतो बली ।
परश्चतुर्दशस्वप्नवान् **महापद्म**संज्ञकः ॥२॥

उभौ कलाकलापाढ्यौ चक्रिबीजं पुनर्लघुः ।
सज्जिगीष इति प्राज्ययौवराज्यमवापितः ॥३॥

इतश्चास्ति नृपो**ऽवन्त्यां श्रीधर्मो** नीतिमान् क्षमः ।
नमुचिर्नाम मन्त्र्यस्य मिथ्यादृष्टिर्दुराशयः ॥४॥

अन्यदा **सुव्रता**चार्ये तत्रायातेऽभिगच्छति ।
वन्दनार्थे पुरीलोके **नमुचिं** नृपतिर्जगौ ॥५॥

असावकालयात्रायां किं याति जनता बहिः ? ।
आगताः श्रमणा यान्ति तद्भक्ता इति सोऽवदत् ॥६॥

समाः समेषु रज्यन्ते प्रायशः स्थितिरीदृशी ।
श्रमणेष्वेषु मूर्खेषु ही ! मूर्खो लीयते जनः ॥७॥

राज्ञोचे किल लोकेषु ख्याता विद्वांस इत्यमी ।
त्वया मया च तद् गत्वा परीक्ष्यन्तेऽथ तेऽधुना ॥८॥

दुर्विदग्धोऽनुमेने तद् व्यर्थज्ञानावलेपवान् ।
तेनान्यैरपि युक् सूरिवन्दकोऽथागमन्नृपः ॥९॥

सूरिरप्यविशेषेण तेभ्योऽदाद् देशनासुधाम् ।
विषायिता सुधाऽप्येषाऽतिदुष्टे तत्र मन्त्रिणि ॥१०॥

गतद्वेषेऽपि स द्वेषं दधिर्गुणमसासहिः ।
गोमायुरिव पञ्चास्ये व्यर्थमाटोपमादधे ॥११॥

जेयः खलः शमेनैवेति नीतिज्ञो महान् गुरुः ।
मौनेनास्थाद् बुधः प्रत्यग्रहीदेकस्तमन्तिषत् ॥१२॥

तदाक्षेपलवादेव स तथाऽभून्निरुत्तरः ।
निर्यातः संसदः शीघ्रं यथाऽन्यैः काक्षवीक्षितः ॥१३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

गताः प्रमुदिताः सर्वे स्वस्थानं भूधवादयः ।
समुपात्तमहाकर्मा स त्वगाद् गुरुमत्सरः ॥१४॥

वैरमुद्वहमानोऽसौ रात्रौ तत्र तपस्विनाम् ।
वधार्थमुदसिर्यातोऽस्तम्भि देवतया रयात् ॥१५॥

धर्ममत्सरदौरात्म्यमीदृग् वीक्ष्य नृपादयः ।
श्रुतधर्माः परं भेजुर्धर्मदार्ढ्यं सुविस्मिताः ॥१६॥

अपमानं जनादाप्य निर्गत्य **नमुचि**स्ततः ।
युवराजं **गजपुरे महापद्म**मुपास्थितः ॥१७॥

सुधीः सूक्तज्ञ इत्येनं बह्वमंसीन्नृपात्मजः ।
उपायज्ञं न मुञ्चन्ति मन्त्रिणं हि महीधवाः ॥१८॥

दुर्गेश्वरं सिंहबलं दुर्जयं जेतुमन्यदा ।
स्वाम्यादेशात् ससैन्योऽसौ गत्वोपायैस्तमग्रहीत् ॥१९॥

महापद्मस्य पुरतस्तं जीवन्तमढौकयत् ।
गुणज्ञः सोऽपि सत्कृत्य तं प्रसादपरोऽवदत् ॥२०॥

त्वया न्यवारि देशस्योपद्रवो दुर्जयादरेः ।
अतो वृणु वरं किञ्चिदिष्टमस्मि प्रसादवान् ॥२१॥

मार्गयिष्माम्यवसरे तदा दद्याः प्रसद्य तम् ।
प्रपेदे तत् कुमारोऽपि स्थिरात्माऽऽश्रितवत्सलः ॥२२॥

इतश्च **ज्वालया** देव्या स्वर्ण-मुक्ता-मणीमयः ।
स्यन्दनः कारयामासे जिनयात्रार्थमद्भुतः ॥२३॥

मिथ्यादृष्टिः परा राज्ञी **लक्ष्मी**त्याख्याऽप्यकारयत् ।
सपत्नीस्पर्द्धया ब्रह्मरथं ब्राह्मणशिक्षया ॥२४॥

पुरे ब्रह्मशताङ्गस्य प्राग् भ्रमोऽस्त्विति भूधवम् ।
लक्ष्मीर्व्यजिज्ञपत् तच्च **ज्वाला**ऽश्रौषीत् सुदुःश्रवम् ॥२५॥

प्रत्यज्ञासीच्च चेज्जैनरथो न भ्रमिता पुरा ।
जन्मन्यस्मिस्तदाऽऽहारो नैव ग्राह्यो ध्रुवं मया ॥२६॥

ततोऽनन्यगतिर्भूपो न्यरौत्सीत् तद् रथद्वयम् ।
तादृग्विमानतां मातुर्दृष्ट्वा **पद्मो** व्यचिन्तयत् ॥२७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

न नाम यदि दाक्षिण्यं ममाकार्षीद् धराधवः ।
तदा **विष्णुकुमारस्य** तत् कृत्यं नाभवत् किमु ? ॥२८॥

जातापमानमालिन्यं तद्धि त्याज्यमिदं पदम् ।
ध्यात्वेत्यसौ द्वितीयासिर्निश्श्येको निरगाद् गृहात् ॥२९॥

गच्छन् प्रापाटवीमेकां तत्रागात् तापसाश्रमम् ।
सत्कृतस्तापसैः सर्वैस्तत्र तस्थौ सुखं कियत् ॥३०॥

इतश्च **चम्पा**धिपतौ क्षितीशे **जनमेजये** ।
कालशत्रुपराभूतेऽत्राणः सर्वोऽनशज्जनः ॥३१॥

नागवत्यस्य दयिता गृहीत्वा **मदनावलीम्** ।
एकां स्वपुत्रीं नश्यन्ती तत्रागात् तापसाश्रमे ॥३२॥

कुमार-**मदनावल्यो**र्दर्शनादेव चेतसि ।
तथा रागोऽभवद् व्यक्तिभावं भेजे यथाऽक्षिषु ॥३३॥

नागवत्यप्यदो ज्ञात्वा रहः प्राह निजाङ्गजाम् ।
न हि स्मरसि किं वत्से ! त्वं तन्नैमित्तिकोदितम् ? ॥३४॥

चक्रिणः पट्टपत्नीत्वं प्राप्स्यसेऽतो निजं मनः ।
किं यत्र कुत्र बध्नासि न कौलीनमिदं हि नः ॥३५॥

अथो कुलपतिः प्रोचे कुमारं शङ्किताशयः ।
गच्छ क्वचिदनाचारं मा कन्याप्रणयं कृथाः ॥३६॥

कृतो भवति हि स्नेह इत्यज्ञानोचितं वचः ।
भवितव्यतया लग्नं मनः कोऽपासितुं क्षमः ? ॥३७॥

अस्याः पतित्वमासाद्य वर्षं संसाध्य **भारतम्** ।
सर्वत्र प्रथयिष्यामि जैनधर्मप्रभावनाम् ॥३८॥

उच्चैर्मनोरथानेवं कुर्वाणः कुमरस्ततः ।
अचलत् क्रमशः प्राप पत्तनं **सिन्धुनन्दनम्** ॥३९॥

उद्यानिकायामुद्याने क्रीडत्यत्राबलाजने ।
केलीकलकले गीततूरनादे प्रसर्पति ॥४०॥

महसेनमहीशानमहेभो मदनोत्कटः ।
तच्छ्रुत्वोन्मूलितालानो हतमेण्ठः सुदुर्दमः ॥४१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

वायुवेगेन तत्रागात् ततो नारीजनोऽखिलः ।
त्रस्तो नंष्टुमशक्तश्चारोदीदशरणाश्रयः ॥४२॥

महापद्मोऽपि तद् दृष्ट्वा कृपाकुलमना गजम् ।
चिकीर्षन्नबलात्राणं प्रत्यधावदहक्कयत् ॥४३॥

वलितोऽभ्यागमद् वेगात् कुमारं कुञ्जरोऽपि हि ।
स दत्त्वा करिणो वेध्यमिममक्रीडयच्चिरम् ॥४४॥

भाग्यवान् पुरुषः कश्चिदस्मदर्थमसौ हहा ! ।
कदर्थ्यः करिणा पौरीजनः पूदकरोदिति ॥४५॥

एतदाकर्ण्य तत्रत्यो **महसेनः** क्षितीश्वरः ।
समन्त्रि-नागरोऽभ्यागादवादीच्च सुविस्मितः ॥४६॥

मा मा कुमार ! ढौकस्व प्रतीभं मुग्धतां त्यज ।
कृतान्तस्य प्रतिकृतिरसौ हि त्वदगोचरः ॥४७॥

गजमेनं वशीकर्तुं मन्ये शक्रोऽपि न क्षमः ।
कदलीकोमलाङ्गस्य कुमार ! तव का कथा ? ॥४८॥

भटाः सहस्रयोद्धारो जगज्जयिपराक्रमाः ।
ममानेके परं नागं नैनं निर्जेतुमीश्वराः ॥४९॥

पथिकोऽसि पतङ्गत्वं मा भजैतत्प्रदीपके ।
तत् साहसं न हि श्लाघ्यं यद् विपाकैकदारुणम् ॥५०॥

कुमारोऽवददुर्वीशानभिज्ञोऽसि स्थिराशयः ।
निरीक्षस्व क्षणादेव वशं नेयो मया गजः ॥५१॥

इत्युक्त्वा शास्त्रभणितैः करणैः करिणं क्षणम् ।
सम्मोह्य विद्युदुत्क्षेपं कुमारो द्विपमारुहत् ॥५२॥

अभिकुम्भस्थलं मुष्टिघातैर्नीत्वा वशं गजम् ।
दत्त्वा हस्तिपकाय द्राक् कुमारोऽस्मादवातरत् ॥५३॥

अद्वैतं साधुवादस्य पौरेभ्यः प्राप सर्वतः ।
वीरकोटीरहीरत्वं तस्याख्यन् शिशवोऽपि हि ॥५४॥

लिङ्गनिर्णीततद्वंशः सन्तुष्टस्तेन भूपतिः ।
गुणश्रेणिचणं कन्याशतं स्वीयं व्यवाहयत् ॥५५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ताद्दग्भोगविलासस्य तस्य तत्रैव तिष्ठतः ।
दिना ययुः परं चित्तान्न ययौ **मदनावली** ॥५६॥

अन्यदा शयनीयस्थं निशि तं काऽपि खेचरी ।
अपाहार्षीत् प्रगे पृष्टा स्वादुगीरिदमभ्यधात् ॥५७॥

भाग्यसौभाग्यसम्भोग्यापहारे शृणु कारणम् ।
अस्ति **वैताढ्य**शृङ्गारं वरं **सूरोदयं** पुरम् ॥५८॥

तत्रे**न्द्रधनुषो** राज्ञः **सुभद्रो**दरमौक्तिकम् ।
नन्दिनी **जयचन्द्रा**ऽस्ति निखिलस्त्रीगुणास्पदम् ॥५९॥

अनुरूपवरालाभादभूत् तस्या नरारुचिः ।
तातेनारेभिरे ताद्दग्वरार्थौपयिकान्यतः ॥६०॥

तदाज्ञया मया सर्वे **भरत**स्थनरेश्वराः ।
चित्रयित्वा पट्टिकायां सम्यक् तस्यै प्रदर्शिताः ॥६१॥

सर्वत्रारुचिरप्येषा त्वद्रूपालोकनक्षणे ।
प्राप्यावस्थान्तरं किञ्चिद् रहस्ये मामभाषत ॥६२॥

यस्येद्दक्षा गुणाः सर्वे रूपाद्या भुवनाद्भुताः ।
न ग्रहीतुमलं मातस्तदन्यो मामकं मनः ॥६३॥

स चेत् सम्पद्यते शीघ्रं प्राणाशा क्रियते तदा ।
मर्तव्यमन्यथा नूनमसून् धर्तुमशक्तया ॥६४॥

अमुं व्यतिकरं सद्यः पित्रोरहमसाधयम् ।
तावत् प्रेषयतां मां त्वदाह्वानाय समुत्सुकौ ॥६५॥

अविश्वसन्त्याः कन्यायाः सन्धेयं पुरतः कृता ।
प्रवेश्योऽग्निर्न चेदानयामि तं त्रिदिनान्तरे ॥६६॥

धात्र्यस्म्यहं **वेगवती** त्वामहार्षं तु तत्कृते ।
रोषितव्यमतो नैव जनेऽस्मिन् प्रियकारिणि ॥६७॥

इत्युक्त्वा कुमरं नीत्वा क्षणात् **सूरोदयं** पुरम् ।
जयचन्द्रा-सुभद्रेन्द्रधनुराद्यानमोदयत् ॥६८॥

आग्रहैरुत्सवैर्भूपनिर्मातै**र्जयचन्द्रिका**म् ।
महापद्मः पर्यणयत् सुखमस्थाच्च तद्गृहे ॥६९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इतश्च **जयचन्द्राया गङ्गाधर-महीधरौ** ।
मत्सरं मातुलसुतौ कुमारे दधतुस्तराम् ॥७०॥

आवाभ्यामननुज्ञातो भग्नीं यः कश्चिदावयोः ।
वैदेशिकः पर्यणैषीदभिषेण्यः स आवयोः ॥७१॥

इत्यायातौ मदाद् योद्धुं **महापद्मेन** तौ खगौ ।
प्रत्यैच्छत् तौ **महापद्मः** श्रितः खचरकोटिभिः ॥७२॥

एकोऽपि हि **महापद्मः** सर्वातिगपराक्रमः ।
तथौजोऽस्फारयत् स्वीयं नष्टौ तौ सभटौ यथा ॥७३॥

अथ लब्धजयः सर्वविद्याधरनतक्रमः ।
स्त्रीरत्नवर्जमुत्पन्नसर्वरत्नो महाद्युतिः ॥७४॥

स्फुरन्नवनिधिर्लब्धानेकविधोऽथ सोऽन्यदा ।
गतस्तमाश्रमं स्नेहात् संस्मरन् **मदनावलीम्** ॥७५॥

तस्मिन् **शतधनुः**पुत्रः क्षितीशो **जनमेजयः** ।
चक्रिणा स्फुटभाग्येन तेन तां पर्यणाययत् ॥७६॥

एतन्मुख्यचतुःषष्टिसहस्रान्तःपुरीयुतः ।
सिद्ध**भारत**षट्खण्डो द्वात्रिंशद्राट्सहस्रयुक् ॥७७॥

हस्तिनागपुरेऽभ्येत्य पितृपाताववन्दत ।
तावप्यालिङ्गतां गाढं दोर्भ्यामुज्जीविताविव ॥७८॥

ऋद्धिभिः पितुराधिक्यं दधानो विनयान्वितः ।
अद्वितीयोऽभवत् कीर्त्यो **महापद्मो** महामतिः ॥७९॥

इतश्च **सुव्रत**स्वामिशिष्यः **श्रीसुव्रतो** गुरुः ।
शिश्राय नगरोद्यानं ज्ञान-ध्यान-व्रतोद्यतः ॥८०॥

नन्तुं **पद्मोत्तरो** राजा सम्मदी सपरिच्छदः ।
गतो नत्वाऽथ शुश्राव भवनिर्वेदिनीं कथाम् ॥८१॥

प्रतिबुद्धः पुरं गत्वा **विष्णुं** प्रोवाच साञ्जसम् ।
प्रवया व्रतमादास्ये राज्यमादत्स्व पैतृकम् ॥८२॥

वञ्चितोऽहमियत्कालं तुच्छसौख्यलवाशया ।
यदस्थां परमानन्दहेतुयोगपराङ्मुखः ॥८३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

प्राह **विष्णुकुमारो**ऽपि तात ! त्वत्तोऽप्यहं भवात् ।
भृशमेव विरक्तोऽस्मि तन्ममावरजेऽस्तु तत् ॥८४॥

इत्युदीर्य **महापद्मो** दोर्भ्यामाकृष्य विष्टरे ।
अभ्यषेचि निवेश्याशु ताभ्यां पार्थिवसम्पदि ॥८५॥

राजा **विष्णुकुमारश्चो**प**सुव्रत**गुरु व्रतम् ।
जगृहाते **महापद्म**श्चक्र्यभूदुग्रशासनः ॥८६॥

तौ स्यन्दनावियत्कालं नृपादेशात् तथा स्थितौ ।
पुरेऽथाभ्रामयच्चक्री प्रथमं रथमार्हतम् ॥८७॥

जिनप्रवचनौन्नत्यमकार्षीत् किञ्चिदद्भुतम् ।
राज्ञि जैनेऽभवज्जैनधर्मवान् प्रायशो जनः ॥८८॥

कोटिशो जिनचैत्यान्यकारयद् **भरते**ऽखिले ।
जनान् शक्त्युपदेशाद्यैस्तत्पूजायामवर्तयत् ॥८९॥

निष्कलङ्कव्रतधरो भेजे **पद्मोत्तरः** शिवम् ।
लब्धी**विष्णुकुमार**स्तु विचित्रास्तपसाऽर्जयत् ॥९०॥

मेरुवत् तुङ्गदेहः स्यात् पक्षीव गगने व्रजेत् ।
कामरूपी भवेन्नानारूपैः पूरयते महीम् ॥९१॥

इत्यनन्ततपो-वीर्ययुक्तोऽपि क्षितिभृद्दरीम् ।
प्रविश्य प्रायशो ध्यानलीनोऽस्थात् स निरन्तरम् ॥९२॥

इतस्ते **सुव्रता**चार्या **हस्तिनागपुरे** पुनः ।
उद्याने समवासार्षुरज्ञासी**न्नमुचि**श्च तत् ॥९३॥

पूर्ववैरं स्मरन् व्यज्ञपयच्छ्रीचक्रवर्तिनम् ।
कोशीकृतवरपदे साम्राज्यं देहि मे निजम् ॥९४॥

वैरिनिर्यातनं मित्रपालनं पोष्यपोषणम् ।
स्वैरं धनव्ययं चान्यः कः कर्तुं भूपतेरलम् ? ॥९५॥

अस्ति कश्चिन्महायागो महाराजोचितः प्रभो ! ।
वेदप्रोक्तेन विधिना तच्चिकीर्षां प्रपूरय ॥९६॥

स्वप्रतिज्ञैकनिष्णातो लीलया प्रतिपद्य तत् ।
प्रविश्यान्तःपुरं चक्री भोगाद्वैतमसाधयत् ॥९७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अध्यतिष्ठत् ततो राज्यं **नमुचि**र्न क्वचिच्छुचिः ।
नृपमान्योऽपि हि खलो विश्वकष्टाय किं नृपः ? ॥९८॥

निर्गत्य नगराद् यागनिमित्तं यागपाटकम् ।
प्रविश्यादाय तद्दीक्षां गत्वा राजासनेऽविशत् ॥९९॥

अन्यत्र श्वेतभिक्षुभ्यः सर्वाः प्रकृतयस्तदा ।
उपायनकरा नेमुरपि पाखण्डिलिङ्गिनः ॥१००॥

तदेव च्छिद्रमुद्भाव्य प्रकाश्य च रुषाऽरुणः ।
तानेव **सुव्रता**चार्यान् भटैराजूहवन्निजैः ॥१०१॥

प्रालपच्च यदा यः स्याद् यादृशस्तादृशो नृपः ।
मान्य एव स सर्वेषां लिङ्गिनां तु विशेषतः ॥१०२॥

पार्थिवात् कः परो नाथो निर्नाथानां हि लिङ्गिनाम् ? ।
तपोवनान्यपि क्ष्मापै रक्षितानि भवन्ति हि ॥१०३॥

ममाकिञ्चित्करा यूयं स्तब्धा अथ च निन्दकाः ।
मदीयराज्ये न स्थेयं सर्वथाऽतो निरङ्कुशैः ॥१०४॥

यः स्थितः स तु मे वध्यो नाघं मे जैनहत्यया ।
बभाषेऽथैष गुरुणा **नमुचि**र्मधुरस्वरम् ॥१०५॥

न कल्प इति नायाता वयं नास्मासु मत्सरः ।
समभावा हि मुनयस्तिष्ठन्ति निजकर्मसु ॥१०६॥

भृशं शान्तैरशान्तोऽसौ वचनैः प्रत्यभाषत ।
दत्ताः सप्त दिना यात तदूर्ध्वं च स्थितौ वधः ॥१०७॥

श्रुत्वेति साधवः प्रत्यायाता निजतपोवनम् ।
काऽत्र प्रतिक्रिया कार्येत्यवदन् गुरवोऽपि तान् ॥१०८॥

मुनिनैकेन तत्रोचेऽधुना तिष्ठति **मन्दरे** ।
षष्ट्यब्दशतसंसिद्धतपा **विष्णु**मुनीश्वरः ॥१०९॥

महापद्माग्रज इति तद्गिरैष प्रशाम्यति ।
चारणश्रमणः कोऽपि तदाह्वानाय गच्छतु ॥११०॥

कः कोऽस्ति चारण इति व्यक्तावेकोऽब्रवीन्मुनिः ।
शक्तोऽहं गन्तुमागन्तुमीश्वरो नास्मि **मेरुतः** ॥१११॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

बभाषे गुरुरानेता **विष्णु**रित्यथ सोऽव्रजत् ।
क्षणात् तदन्तिकं वर्षारात्रेऽपि प्राणमच्च तम् ॥११२॥

कश्चिदाकस्मिकोऽस्त्यर्थ इति पृष्टो न्यवेदयत् ।
शृङ्गनादितमर्थं तमन्यासाध्यं स **विष्णवे** ॥११३॥

ततः करेण तं लात्वा नभसोत्पत्य स क्षणात् ।
आचार्यान् **विष्णु**रुद्याने निर्विलम्बमुपस्थितः ॥११४॥

वन्दित्वा तदनुज्ञातः सैकसाधुरगात् सभाम् ।
नमुचेस्तं विनाऽन्यैः सोऽखिलैः सभ्यैरवन्द्यत ॥११५॥

"उपविश्यासने धर्ममाख्याय भणितं ततः ।
निस्सङ्गसाधुविद्वेषो महानरककारणम् ॥११६॥

अयं ह्यनुचितः पन्था भूरिक्लेशनिबन्धनम् ।
सन्तोषिणः सर्वहिता यत् ताप्यन्ते तपोधनाः ॥११७॥

मुनयोऽमी जगन्नम्या नम्यन्ते पुरुषोत्तमैः ।
विनयः सर्वशास्त्रोक्तो भवेन्निर्विषयोऽन्यथा ॥११८॥

तुच्छक्षणिकसाम्राज्यलवान्धा अधमा नराः ।
मुनिप्रणामं काङ्क्षन्तः पात्यन्ते विधिना ह्यधः ॥११९॥

कदाशयममुं मुञ्च सुखं तिष्ठन्तु साधवः ।
किं मत्सरभरग्रस्तः श्वभ्रहेतु विचेष्टसे ? ॥१२०॥

किं न ब्रूषेऽभ्यनुज्ञाते तेषां प्रावृडवस्थितौ ? ।
मुनयो हि न वर्षासु विचरन्ति दयापराः" ॥१२१॥

कुकाष्ठादविशिष्टेन प्रोचे **नमुचि**नेत्यथ ।
किमत्र पौनरुक्तेन पञ्च तिष्ठन्तु वासरान् ॥१२२॥

ग्रामे वने पुरे शैले स्थाता तत्परतोऽत्र यः ।
मद्देशे चौरवद् वध्यो भावी स धवलाम्बरः ॥१२३॥

मान्योऽसि भृशमस्माकमाख्याहि श्वेतवाससाम् ।
साम्राज्यं वर्तते वैप्रं यान्तु भो जीवितार्थिनः ! ॥१२४॥

क्रमत्रयमितं स्थानं मया मान्याय तेऽर्पितम् ।
तद्बहिर्यो मुनिर्दृष्टः शीर्षच्छेद्यः स मेऽस्त्यरिः ॥१२५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

नायं सामोचितः पापो मूलच्छेद्यस्तु दुस्सहः ।
इत्यसौ दारुणं कोपं मुनिर्दधदवर्धत ॥१२६॥

स्फुटयन् वैक्रियं रूपं प्रदेशानथ पुद्गलान् ।
तिरयन्नूर्ध्वयंश्चापि सोऽभवल्लक्षयोजनः ॥१२७॥

तदा षट्सुरशैलोऽभूत् तिर्यग्लोकोऽथ पञ्च ते ।
अकम्पन्त महीकम्पकम्पमानाः कृताद्भुतम् ॥१२८॥

कुल्माषा इव पात्रस्था उत्पतन्ति स्म भूधराः ।
तत्पाददुर्द्धरोर्ध्वाधोऽभवत् सर्वंसहा स्थिता ॥१२९॥

तत्फूत्कारमहावातोद्धताः क्षोणिभृतोऽचलन् ।
क्रमस्तम्भौ स चिक्षेप प्राच्यापाच्यसमुद्रयोः ॥१३०॥

स पृथु ज्योतिषां चक्रं स्वचारादुदसारयत् ।
कृतं स्थूलं तृतीयांह्रिं **नमुचेः** शिरसि न्यधात् ॥१३१॥

विष्टरात् पातयित्वैनमक्षिपद् धरणीतले ।
अहो ! अत्युग्रपापस्य हस्तप्राप्यमिदं फलम् ॥१३२॥

भीतैश्चक्र्यादिभिः पादे गृहीतेऽप्यनुनीतये ।
करीव कीटिकां लग्नां न विवेद स किञ्चन ॥१३३॥

जगत्क्षोभादवधिना ज्ञात्वा तत् सुरगायनान् ।
प्राहिणोद् वासवस्तेऽपि तत्कर्णस्था इदं जगुः ॥१३४॥

स्वान्यसन्तापकशुद्धधर्मेन्धनविभावसुः ।
पन्थाः श्वभ्रगतेः क्रोधो न न्याय्योऽसौ तपस्विनाम् ॥१३५॥

विश्वातिशायिवीर्यस्य कस्ते **नमुचि**कीटके ? ।
महारम्भोऽयमेतावान् त्रिजगच्चूरणक्षमः ॥१३६॥

नखच्छेद्ये तृणे वज्रपातः सोऽयं त्वया कृतः ।
कुरुष्वोपशमं **विष्णो** ! कृते कार्ये च किं क्रुधा ? ॥१३७॥

प्रक्षिप्तो **नमुचिः** श्वभ्रे आक्रान्तोर्वी त्रिभिः क्रमैः ।
चाटितं त्रिजगच्चक्रे क्रुधाऽथो किं करिष्यासि ? ॥१३८॥

चिरादेतानि गेयानि श्रुत्वा कृत्वा जगत्कृपाम् ।
विष्णुर्निववृते क्रोधादुच्छ्र्याच्च स्ववर्ष्मणः ॥१३९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

स्वभावस्थो **महापद्म**मितराश्च यथोचितम् ।
समुपालभ्य शान्तात्मा बाह्योद्यानमशिश्रियत् ॥१४०॥

तदालोच्य प्रतिक्रम्य स मुनिर्व्यवहारतः ।
विजहार यतः सूत्रे तदालोच्यं न निश्चयात् ॥१४१॥

क्रमात् केवलमासाद्य सिद्धिसम्बन्धभागभूत् ।
महापद्मोऽपि षट्खण्डमहीं स्वैरमपालयत् ॥१४२॥

त्रिंशद्वर्षसहस्रायुरथाशीतिकरोच्छ्रयः ।
सुतनिक्षिप्तसाम्राज्यः पर्यन्ते व्रतमग्रहीत् ॥१४३॥

अधीतबहुसूत्रार्थः सुदुष्करतपोरतः ।
ध्यानधौतो **महापद्मः** सिद्धोऽभूत् प्राप्तकेवलः ॥१४४॥

वृत्तं **विष्णुकुमारस्य** प्रसङ्गादभ्यधाय्यदः ।
श्री**शान्तिनाथ**शिष्यस्तु **विष्णुर्ज्ञे**यः परोऽपि हि ॥१४५॥

इति **महापद्म**चरित्रम् ॥४१॥

एगच्छत्तं पसाहित्ता महिं माणनिसूरणो ।
हरिसेणो मणुस्सिंदो पत्तो गइमणुत्तरं ॥४२॥

व्याख्या—एकच्छत्रां महीं प्रसाध्य 'माणनिसूरणो'त्ति **दृप्तारात्यहङ्कारविनाशको हरिषेणा**ख्यो **मनुष्येन्द्रः प्राप्तो गतिमनुत्तरा**मिति । तच्चरित्रसङ्ग्रहवृत्तं यथा—

काम्पील्ये क्षितिभृन्**महाहरि**सुतसत्षष्टिहस्तोच्छ्रयो,
मेराकुक्षिसरोऽम्बुजं दशसहस्राब्दायुरुग्रप्रभः ।
चक्री श्री**हरिषेण** इत्यभिधया योऽभून्नवाग्रः;
क्षितेर्भोगं सोऽपि विमुच्य सुव्रतधरो लेभे परां निर्वृतिम् ॥१॥

इति **हरिषेणः** ॥४२॥

तथा—

अन्निओ रायसहस्सेहिं सुपरिच्चाई दमं चरे ।
जयणामो जिणक्खायं पत्तो गइमणुत्तरं ॥४३॥

व्याख्या—अन्वितो युक्तो **राजसहस्रैः** सुष्ठु शोभनप्रकारेण राज्यादि परित्यजतीति **सुपरित्यागी जयनामै**कादशश्चक्री **जिनाख्यातं दमं चरेत्** । ततश्च प्राप्तो **गतिमनुत्तरा**मिति ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तच्चरित्रलेशो यथा—

अभूद् **राजगृहे** चक्री **समुद्रविजया**ङ्गजः ।
एकादशो बली **वप्रा**कुक्षिरत्नं **जया**भिधः ॥१॥

साम्राज्यमुपभुज्याष्टाचत्वारिंशत्करोच्छ्रितः ।
कामभोगविरक्तोऽसावित्यभावयदेकदा ॥२॥

"सुचिरमपि उषित्वा बान्धवैर्विप्रयोगः,
सुचिरमपि च रन्त्वा नास्ति भोगेषु तृप्तिः ।
सुचरिमपि सुपुष्टं याति नाशं शरीरं;
सुचिरमपि विचिन्त्यो धर्म एकः सहायः ॥३॥

चक्रिणोऽपि हि ये भोगास्तेऽपि पर्यन्तनश्वराः ।
तदेकं शाश्वतं सिद्धिसौख्यं साध्यं विचक्षणैः ॥४॥

आत्मा हि क्षणिकैर्योगैः सुख-दुःखमयैर्भवे ।
भवेत् सुविपरीतात्मा मोह-मद्यवशंवदः ॥५॥

यथैव हि महाभोगा वृथैव हि तथा तथा ।
स्वप्नेभ्यः सकलेभ्योऽपि मालास्वप्नो हि निष्फलः ॥६॥

मालास्वप्नः सुखभ्रान्तः प्रबोधजनितं सुखम् ।
यदुदासे न तन्न्याय्यमबालवयसोऽपि मे" ॥७॥

इति सञ्चिन्त्य संविग्नः सुतं विनयस्य राज्यधूः ।
निष्क्रम्याब्दसहस्रायुरभून्मोक्षाश्रयो **जयः** ॥८॥

इति **जय**चरित्रम् ॥४३॥

दसन्नरज्जं मुइयं चइत्ताण मुणी चरे ।
दसन्नभद्दो निक्खंतो सक्खं सक्केण चोइओ ॥४४॥

व्याख्या—दशार्णदेशस्य **राज्यं मुदितं** मुदयवन्तं **त्यक्त्वा साक्षात् शक्रेण चोदितो**ऽधिकविभूतिदर्शनेन धर्मं प्रति प्रेरितो **दशार्णभद्रो** राजा **निष्क्रान्तः** सन् **मुनि**स्तपस्वी **चरेद**चारीप्रतिबद्धविहारेणेत्यर्थः । तच्चरित्रं यथा—

वराटविषये सन्निवेशे **धान्यपुरा**भिधे ।
महत्तरसुतोऽस्त्येकः प्रकृत्या सरलाशयः ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

दयिताऽस्य सुदुःशीला तलारक्षसुतं रहः ।
भुङ्क्ते स्वपतिपारोक्ष्ये राक्षस्यो हि मृगेक्षणाः ॥२॥
नटपेटकमध्यस्थोऽन्यदा स्त्रीवेषवान् नटः ।
अनृत्यत् तरुणः कोऽपि सा तत्राजनि रागिणी ॥३॥
चतुरा च्छन्नमागत्यावादीन्नटमहत्तरम् ।
चेदनेनैष वेषेण भुङ्क्ते मां निर्भरं रहः ॥४॥
सुवर्णाष्टशती देया मयैतस्मै तदा ध्रुवम् ।
इत्यङ्गीकार्य तत् ज्ञापयित्वाऽध्वानं गृहं गता ॥५॥
पायसीं तत्कृतेऽराध्यत् तावत् सोऽप्यागमन्नटः ।
क्रमौ प्रक्षाल्य तां भोक्तुमुपाविक्षत् क्षणेन सः ॥६॥
तं कटाक्षयमाणा सा हुं भुङ्क्ष्वाश्विति वादिनी ।
तस्य सर्पिः-सितामिश्रां पायसीं पर्यवेषयत् ॥७॥
यावन्नाद्याप्यसौ भुङ्क्ते तावद् द्वारि स दण्डिकः ।
आगादकाण्डे तां रन्तुं ततो बालाऽवदन्नटम् ॥८॥
प्रभीः प्रविश निःशङ्कमुत्तिष्ठ तिलकोष्ठकम् ।
परतः प्रेषयाम्येनं यावत् सोऽपि तथाऽकरोत् ॥९॥
तलारक्षोऽविशत् क्षिप्रं क्षैरेयीं वीक्ष्य भाजने ।
पद्माक्षि ! प्रागिमां भोक्ष्ये ततस्त्वामिति तामवक् ॥१०॥
क्षुधाऽऽर्ताऽस्म्यधुना याहि दक्ष ! नायं क्षणः स्थितेः ।
इत्युक्तोऽपि बलाद् भोक्तुं पायसीमासनेऽविशत् ॥११॥
स करोति करं स्थाले यावत् तावददःपतिः ।
शिश्राय निलयद्वारं ततः सोवाच दण्डिकम् ॥१२॥
त्वर त्वर विनष्टोऽसि तिलापवरकं श्रय ।
स्थेयं द्वारेऽस्त्यहिर्दूरे भीतः सोऽपि तथा व्यधात् ॥१३॥
आयातोऽस्याः पतिः प्रोचे किमेतदथ साऽलपत् ।
समुत्पेदेऽभिलाषोऽस्यां भोक्ष्येऽहमिति पायसीम् ॥१४॥
मदर्थमीदृशीमेनां नाकार्षीः कर्हिचित् ततः ।
प्रिये ! तदेतामास्वाद्य जिह्वा मेऽस्तु फलेग्रहिः ॥१५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पत्येत्युक्ताऽथ सा प्राहास्नातोऽनर्चितदैवतः ।
अद्याष्टम्यां कथं भोक्ता श्रिये नाचारलङ्घनम् ॥१६॥

पतिव्रतापतिः स्नात एव नित्यं सति प्रिये ! ।
स्नातायां त्वय्यहं स्नातो नास्मि किं ? मा भिदं वद ॥१७॥

इत्याख्याय बलाद् भोक्तुं तस्याः प्रववृते पतिः ।
क्षीर-खण्डाज्ययोगो हि प्राप्तो मोक्तुं न शक्यते ॥१८॥

इतः क्षुधातुर इति प्रमृद्य तिलपर्पटीम् ।
नटः फूदकरोत् सर्प इति तद् वेद दण्डिकः ॥१९॥

जीवतः सकलं भावि मा दशन्मामिहोरगः ।
इति भीतस्तदोत्तालस्तलारक्षो विनिर्ययौ ॥२०॥

अयं ह्यवसरोऽस्तीति तत्पृष्ठे निर्गतो नटः ।
पुं-स्त्रीमिथुनमैक्षिष्ट गृहान्नष्टं तु तत्पतिः ॥२१॥

किमेतदित्यनाचारव्यञ्जकं चरितं गृहे ।
इति पृष्टा सनिर्वेदं सोपालम्भं जगाद सा ॥२२॥

मया निषिद्ध एवासीः स्नानाचारातिलङ्घने ।
हा ! वृत्तातिक्रमाद् रुष्टौ गतौ गौरी-महेश्वरौ ॥२३॥

प्राग् न चेतयते मूढो न वा दीर्घं विचारयेत् ।
लाम्पट्येन कियत् कार्यं विनाशितमिदं त्वया ? ॥२४॥

महत्तरस्तु तच्छ्रुत्वा सरलोऽनुशयार्दितः ।
देवतामिव मन्वानस्तां पप्रच्छ कृताञ्जलिः ॥२५॥

कश्चित् पुनरुपायोऽस्ति सन्तुष्टौ येन तौ गृहम् ।
प्रत्यावृत्य प्रविशतः साऽथ हृष्टेत्युवाच तम् ॥२६॥

सर्वद्धर्याऽर्चय तौ कान्त ! विभवैर्न्यायसञ्चितैः ।
इमं हि परमोपायं तत्र वेदविदो विदुः ॥२७॥

अथार्जनाय वित्तस्य **महत्तरसुतो**ऽचलत् ।
स्वैरिणी पूर्णकामाऽभूत् तत्परोक्षे तदङ्गना ॥२८॥

दशार्णविषयं गत्वेक्षुवाटान् निरमापयत् ।
क्रमान्नीत्यैव सौवर्णान् षष्टिं माषानुपार्जयत् ॥२९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

स्वल्पो लाभ इति स्वान्ते न तुष्टस्तदपि प्रियाम् ।
स्मरन् निवृत्तो देशाय विशश्राम वने क्वचित् ॥३०॥

इतो **दशार्णभद्रो**ऽश्वापहृतस्तत्र भूपतिः ।
श्रान्तो मध्यन्दिनेऽभ्यगादेक एव तृषातुरः ॥३१॥

उपाचरत् स तं प्रीत्या हयोत्पर्यणनादिभिः ।
आनीय शिशिरं नीरमपाययदवीजयत् ॥३२॥

अथास्तीर्य निजं वस्त्रं व्यश्रामयदवार्तयत् ।
अरञ्जयन्महीनाथमार्जवाहितसेवया ॥३३॥

प्राप्ते परिजने राज्ञोपकारीत्ययमादरात् ।
सत्कृत्याभाषितः कोऽसि कुतो वा किंचिकीरिति ? ॥३४॥

यथास्थितमसौ सर्वं नृपायाज्ञापयत् तदा ।
ऋद्धिं ययाचे पूजाऽर्थमुर्वीशोऽथेत्यचिन्तयत् ॥३५॥

अत्यन्तर्जुर्वराकोऽयमङ्गनैकवशंवदः ।
तद्विप्रतारितश्चैवं परिभ्रमति मेदिनीम् ॥३६॥

नयाम्येनं पुरं तावत् ततः कर्ता यथोचितम् ।
इतीशः सह नीत्वैनं **दशार्णपुर**मभ्यगात् ॥३७॥

तस्मै सम्पादयामास सर्वं भोज्याम्बरादिकम् ।
स्वदेवार्चोद्यतो धर्मपुरुषोऽयमितीशिता ॥३८॥

अत्रान्तरे समवसृतं **दशार्णगिरि**मूर्धनि ।
वीरं विज्ञपयामासोद्यानपालो महीभृते ॥३९॥

अस्मै दत्त्वेप्सितं दानं **वीरं** नत्वा च भावतः ।
प्रवर्धमानसद्भाववैभवोऽचिन्तयन्नृपः ॥४०॥

''तादृग्विवेकचातुर्यत्यक्तोऽप्येष **महत्तरः** ।
यद्येवं क्लिश्यति स्वेष्टदेवताऽर्चनसम्पदे ॥४१॥

तदस्माकं विवेकश्रीमुख्यसंयोगशालिनाम् ।
विधातुं युज्यते पूजा विशेषात् त्रिजगद्गुरोः ॥४२॥

श्लाघ्यं तदेव साम्राज्यं यज्जगद्गुरुवन्दने ।
उपयोगि भवेच्छेषं दुर्गत्येकविपत्फलम् ॥४३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तत् कल्ये स्फुटसर्वद्ध्‌र्या वन्दिष्येऽहं जिनं तथा ।
यथा न वन्दितः कैरप्ययमर्हन् पुरा नृपैः'' ॥४४॥

भास्वत्यथोदिते राजा विहिताहर्मुखक्रियः ।
विलिप्तालङ्कृतः स्नात्वोदारनेपथ्यबन्धुरः ॥४५॥

कृतालङ्कारया युक्तः सेनया चतुरङ्गया ।
रम्भाऽऽकारलसत्सर्वावरोधपरिवारितः ॥४६॥

स्वजात्यवाहनारूढैः सामन्त-श्रेष्ठि-पण्डितैः ।
नागरैः सचिवैर्वीरैर्वृतश्चन्द्र इव ग्रहैः ॥४७॥

सर्वातोद्यमहानादसमवायैर्मनोहरैः ।
कर्णपेयामृतैः सर्वलोकाकाशं प्रपूरयन् ॥४८॥

उच्चस्वरं सुगम्भीरं पठद्भिर्मागधैः पुरः ।
नृत्यद्विलासिनीवर्गैः कृतलोकेन्द्रियोत्सवः ॥४९॥

ददद् दानं गजारूढः सुत्रामेवाक्षिगोचरः ।
स्फीतयन्नतुलामृद्धिं जिनं नन्तुमगान्मुदा ॥५०॥ **षड्भिः कुलकम्**

राज्ञा **महत्तरेणा**पि ववन्दे भगवान् जिनः ।
भावोन्मीलितचित्ताभ्यां स्तुतश्च परमेश्वरः ॥५१॥

दृढप्रतिज्ञो **दशार्णभद्रो**ऽसौ पुरुषोत्तमः ।
मत्कृतादधिकद्ध्‌र्यर्हद्वन्दनात् प्रतिभोत्स्यते ॥५२॥

''शक्र इत्यवधेर्ज्ञात्वाऽऽहत्योज्ज्वलतरानणून् ।
दिव्यशक्त्यैरावतेऽष्टौ व्यधत्त धवलान् रदान् ॥५३॥

तत्र प्रत्येकमष्टाष्टौ दीर्घिकाः पल्वलाम्भसः ।
तासु प्रत्येकमष्टाब्जीं पद्मे पद्मेऽष्टपत्रिकाम् ॥५४॥

पत्रे पत्रे च द्वात्रिंशद्बद्धनाटकरासकाः ।
मध्येविष्टरमासीनः सर्वत्र प्रेक्षको हरिः ॥५५॥

तत्रोपवीणयामासुः सुराः सर्वर्द्धिभासुराः ।
अर्हद्गुणांस्तथा विश्वविश्वा गर्वं यथाऽमुचत् ॥५६॥

ऐरावतस्थ एवेन्द्रस्त्रिः प्रादक्षिणयज्जिनम् ।
गजाग्रपादनमनाद् ववन्दे च जिनेश्वरम्'' ॥५७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ताद्दक् पौरन्दरं वीक्ष्यानुपमानर्द्धिवन्दम् ।
नृपो गलितगर्वोऽन्तः शान्तात्मेति व्यचिन्तयत् ॥५८॥

"अहो ! तुच्छस्वभावोऽहं यन्मृत्खण्डैकसाध्यया ।
तुच्छश्रियाऽवलिप्तोऽस्मि शक्र-चक्र्यादिहीनया ॥५९॥

माद्यन्तद्दष्टभद्रौघाः स्तोकेनापि हि बालिशाः ।
मूषको व्रीहिमास्वाद्य नृत्यत्युच्चैर्मुखो मुदा ॥६०॥

शुद्धधर्ममकार्षीत् प्राग्जन्मन्येष ततोऽधुना ।
हरिः प्रापेद्दशीं लक्ष्मीं किं न कुर्वे तदस्म्यपि ? ॥६१॥

समाङ्गावयवोऽप्यन्यं नरोऽभ्येति नरं मुदा ।
स हि पुण्याधिकः पुण्यं न सोऽपि विदधातु किम् ?" ॥६२॥

इत्यादि भावयंस्त्यक्तमोहनिद्रो महीपतिः ।
आददे संयमं वीरान्निर्विण्णः स **महत्तरः** ॥६३॥

ततो ननाम तं शक्रः प्रशशंस च वीप्सया ।
जितोऽस्म्यमुत्राशक्तोऽस्मि धीरात्मन् ! दुर्धरे व्रते ॥६४॥

जय सत्यप्रतिज्ञोऽसि कृतदुष्करवन्दनः ।
स्तुत्वेति स्वर्ययौ शक्रः परोऽप्यर्थमसाधयत् ॥६५॥

इति **दशार्णभद्रः** ॥४४॥

तथा—

नमी नमेइ अप्पाणं सक्खं सक्केण चोइओ ।
चइऊण गेहं वइदेही सामण्णं पज्जुवट्ठिओ ॥४५॥

करकंडू कलिंगेसु पंचालेसु य दुम्मुहो ।
नमी राया विदेहेसु गंधारेसु य नग्गई ॥४६॥

एए नरिंदवसभा निक्खंता जिणसासणे ।
पुत्ते रज्जे ठवेऊणं सामन्ने पज्जुवट्ठिया ॥४७॥

व्याख्या—सर्वा गाथाः सुगमाः । एतच्चारित्राणि प्राक् कथितानि नवमेऽध्ययने ततो ज्ञेयानि । नवरं सक्खं सक्केणेति **साक्षात्** प्रत्यक्षं **शक्रेण** इन्द्रेण **चोदितः** प्रेरितः ॥४५-४६-४७॥

Jain Education International 2010_02   For Private & Personal Use Only   www.jainelibrary.org

सोवीररायवसभो चिच्चा रज्जं मुणी चरे ।
उदायणो पव्वइओ पत्तो गइमणुत्तरं ॥४८॥

व्याख्या—अर्थः पूर्ववन्नवरं सौवीरेषु **सिन्धु—सौवीर**देशेषु राजवृषभः **सौवीर-राजवृषभः** । तच्चरित्रं यथा—

पुरे **वीतभया**भिख्ये **सिन्धु-सौवीर**नीवृति ।
आसी**दुदायनो** राजा राजद्युतिनिकेतनम् ॥१॥

प्रभावत्यस्य महिषी श्री**वीरा**ज्ञाप्रभाविका ।
अभीचिरिति तत्पुत्रो ज्येष्ठोऽभूद् यौवराज्यभाक् ॥२॥

क्षितीशः **सिन्धु-सौवीर**मुख्यषोडशनीवृताम् ।
सत्रिषष्टिशतस्फीतनगराणां सुसम्पदाम् ॥३॥

दशानां बद्धमौलीनां **महीसेना**दिभूभृताम् ।
अन्येषामपि वीरेभ्य-सामन्तामात्यसंसदाम् ॥४॥

पौरोवृत्त्यमाधिपत्यमाज्ञैश्वर्यं च पालयन् ।
शशा**सोदायनः** पृथ्वीं मघवेव त्रिविष्टपम् ॥५॥ **त्रिभिर्विशेषकम्**

इतः **कुमारनन्द्य**स्ति **चम्पा**यां स्वर्णकृत् पुरि ।
स्त्रीलोलोऽसौ चतुर्वर्गे कामं काममममानयत् ॥६॥

यत्र यत्राद्भुतां कन्यां वीक्षते वा शृणोति वा ।
स्वर्णपञ्चशतीं दत्त्वा तां तां गृद्धो व्यवाहयत् ॥७॥

अपिण्डयत् पञ्चशतीमेष सद्वेषयोषिताम् ।
अथेर्ष्यालुरविश्वासी द्वारि तिष्ठन् जुगोप ताः ॥८॥

गोपिता अपि तिष्ठन्ति न नार्यो हि निरर्गलाः ।
अगोपिता अपि न्याय्ये सत्यस्तिष्ठन्ति वर्त्मनि ॥९॥

स्वैरं भुङ्क्ते स्म ता लुब्धोऽन्यप्रवेशमसासहिः ।
तथापि न तुतोषासौ काष्ठैरिव महादवः ॥१०॥

अन्यदा **पञ्चशैला**ख्यद्वीपेशामर्त्यजाययोः ।
हासा-प्रहासयोर्विद्युन्माल्यकस्माच्च्युतः पतिः ॥११॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ततस्ते दध्यतुः कोऽपि व्युद्ग्राह्यः पुरुषोऽधुना ।
अस्मद्रूपातुरो मृत्वा भवेद् योऽस्मदसुप्रियः ॥१२॥

इन्द्रेण सह यान्तीभ्यां द्वीपे **नन्दीश्वरे** तदा ।
तादृक् **कुमारनन्द्या**भ्यां स्वसाध्यो ददृशे स्मरी ॥१३॥

निरीक्ष्यैते दिव्यरूपाद्भुतलावण्यभासुरे ।
स्वर्णकृन्मूर्च्छितः प्राह के युवां विश्वमोहनम् ? ॥१४॥

आवां **हासा-प्रहासा**ऽऽख्ये देव्यावित्याप्य तद्गिरम् ।
ययाचे चाटुकृद् भोगं ढोकयित्वा धनोच्चयम् ॥१५॥

अस्ति यद्यावयोः कार्यं **पञ्चशैलं** तदाऽऽव्रजेः ।
इत्युक्त्वा मोहयित्वा तं क्षणादुत्पत्य ते गते ॥१६॥

अत्यातुरात्मा पटहमदापयदयं पुरे ।
कुमारनन्दिनं पञ्चशैलं नयति यो नरः ॥१७॥

दत्ते कोटिधनं सोऽस्मै तं वृद्धः कोऽप्यवारयत् ।
अस्मि नेतेत्यसौ लात्वा पुत्रेभ्यो धनमार्पयत् ॥१८॥

स्वभावगत्वरैः प्राणैश्चेदर्थोऽमुष्य सिध्यति ।
कुटुम्बस्य धनार्थश्च वार्द्धक्यं फलितं तदा ॥१९॥

पूर्णपथ्यदनं पोतं कारयित्वा जरन्नथ ।
कुमारनन्दिना सार्धमारुह्याब्धौ प्रतस्थिवान् ॥२०॥

दूरं गतः स्वर्णकारं स प्राहङ्गुलिकाऽग्रतः ।
किञ्चित् पश्यसि कृष्णाभमयमस्ति महान् वटः ॥२१॥

अब्धिकूलाद्रिपादस्थोऽधस्तद् यास्यति वाहनम् ।
गृह्णीयास्तत्प्ररोहं त्वं दृढीभूय स्वधर्मवत् ॥२२॥

पञ्चशैलात् समेष्यन्ति भारुण्डास्तत्र पक्षिणः ।
त्रिपादास्तद्विमध्यांह्रिमाददीथाः स्थिराशयः ॥२३॥

त्वां ते नेष्यन्ति तं द्वीपमस्तु तत्र तवेप्सितम् ।
वटाधो भङ्क्ष्यते पोतो जलावर्तेऽतिगह्वरे ॥२४॥

इत्यालापसमकालं प्राप्ते तत्रैव वाहने ।
स तत्परतया सर्वं तत् कृत्वा प्राप तत्पदम् ॥२५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

हासा-प्रहासयोस्तत्र वीक्षामास स वैभवम् ।
उक्तश्चाभ्यां न नौ भोग्यस्त्वमौदारिकवर्ष्मणा ॥२६॥

पुनर्याहि निजं स्थानं किञ्चिदग्न्यादिसाधनम् ।
कुरु येन भवेः **पञ्चशैल**द्वीपाधिपत्यभाक् ॥२७॥

सर्वं तत् प्रतिपेदेऽसौ किं न कुर्वन्ति कामिनः ? ।
ताभ्यामानीय मुक्तोऽसौ **चम्पो**द्याने ततो द्रुतम् ॥२८॥

पप्रच्छ मिलितो लोकस्तत्र किं चित्रमीक्षितम् ? ।
स तु **हासा-प्रहासे**ति त्यक्त्वाऽन्यन्नाह किञ्चन ॥२९॥

तावतीष्वपि तत्स्त्रीषु रुदन्तीषु पिशाचकी ।
तन्मना उपचक्राम कारीषानलसाधनम् ॥३०॥

नागिलाख्योऽस्ति तन्मित्रं श्रावकः परमार्हतः ।
कृपाप्रीतिपरोऽभ्येत्य मित्रोचितमिदं जगौ ॥३१॥

"अपि पञ्चशतस्त्रीकः स्त्रीद्वयार्थे विषीदसि ।
किमेतदतिकातर्यमनार्योचितमाचरेः ? ॥३२॥

लब्ध्वा नृजन्म दुष्प्रापं महाऽऽनन्दकरं मुधा ।
मा हारय तुच्छभोगभ्रान्तश्चिन्तामणिनिभम् ॥३३॥

असि यद्यपि भोगार्थी तथापि सुकृतं कुरु ।
विशिष्टसुकृताद् भोगयोगो मोक्षोऽपि सिध्यति ॥३४॥

धनार्थिनां धनं दत्ते कामदः कामकामिनाम् ।
स्वर्गापवर्गसंसिद्धिहेतुर्धर्मो जिनोदितः ॥३५॥

कार्यादतो निवर्तस्व लोकद्वयविरुद्धतः ।
सखाऽसि तेन प्रोक्तोऽसि भज सन्तोषमाशये" ॥३६॥

बहुधेत्यनुशिष्टोऽपि मत्तो मृत्वा तथाऽर्तितः ।
इङ्गिनीमरणेनासौ **पञ्चशैला**धिपोऽभवत् ॥३७॥

नागिलस्त्वथ तद्वृत्तं वीक्ष्योन्मग्नविरागतः ।
परिव्रज्या**च्युते** कल्पेऽजायत त्रिदशोत्तमः ॥३८॥

तं तत्रावधिनाऽपश्यदन्यदा ससुरोत्करः ।
श्री**नन्दीश्वरयात्रा**यै चचाल त्रिदिवेश्वरः ॥३९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

स्थित्या पटहकोऽकस्माद् **विद्युन्मालि**गलेऽपतत् ।
उत्तारितोऽप्याभियोग्यात् तद्गलं नैव मुञ्चति ॥४०॥

निर्विण्णो वादयन्नास्ते तावता **नागिलामरः** ।
पुरोऽभ्येत्य जगादेनं तत्कृपाऽल्पीकृतद्युतिः ॥४१॥

मां भोः ! प्रत्यभिजानासि प्राहासौ को न वेद वः ? ।
ततो मूढमिमं ज्ञात्वा प्राच्यरूपी सुरोऽभणत् ॥४२॥

वारितोऽपि मयाऽकार्षीर्यत् कार्यमधमोचितम् ।
इदानीं तत्फलं भुङ्क्ष्व किं मुधा परिताम्यसि ? ॥४३॥

संविग्नोऽसौ ततः प्रोचेऽधुनाऽऽख्याहि ममोचितम् ।
तदा मया न मूढेन मेने मित्र ! क्षमस्व तत् ॥४४॥

"सुरोऽप्याख्यद् **वर्धमान**स्वामिनः प्रतिमां मुदा ।
स्वयं कृत्वा तदर्चायां प्रवर्तय बहून् जनान् ॥४५॥

एवं सम्यक्त्वबीजाप्तिरवन्ध्या ते भविष्यति ।
एतदेवाविरतानां मुख्यं पथ्यं श्रुतोदितम्" ॥४६॥

उक्तञ्च–

**"[1]जो कारवेइ पडिमं जिणाण जियराग-दोस-मोहाणं ।
सो पावइ अन्नभवे सुहजणणं धम्मवररयणं ॥१॥
[2]दारिद्दं दोहग्गं कुजाइ-कुसरीर-कुगइ-कुमईओ ।
अवमाण-रोय-सोया न होंति जिणबिम्बकारीणं" ॥२॥**

ततोऽसौ **हिमवच्छी**र्षाद् गृहीत्वा दारु चान्दनम् ।
निर्वर्त्य **वीरप्रतिमा**मक्षिपत् काष्ठसम्पुटे ॥४७॥

षण्मासोत्पातपतिततपोतस्योद्भ्रान्तचेतसः ।
सांयात्रिकस्योत्पातं तं निवर्त्यासावुवाच खे ॥४८॥

गृहाण सम्पुटं देवाधिदेवप्रतिमाऽऽश्रयम् ।
अयं विशिष्टतन्नाम्नाऽऽहत्योद्घाट्यः शुभाशयैः ॥४९॥

---

१. यः कारयति प्रतिमां जिनानां जितराग-द्वेष-मोहानाम् ।
स प्राप्नोत्यन्यभवे शुभजननं धर्मवररत्नम् ॥१॥

२. दारिद्र्यं दौर्भाग्यं कुजाति-कुशरीर-कुगति-कुमतयः ।
अपमान-रोग-शोका न भवन्ति जिनबिम्बकारिणाम् ॥२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

निर्विघ्नं प्राप्स्यसे वीतभयं **वीतभयं** पुरम् ।
इत्युक्त्वा सम्पुटं दत्त्वाऽऽत्मना देवस्तिरोदधे ॥५०॥

तीर्णोदधिर्वणिग् **वीतभयं** प्राप्तोऽथ भूपतेः ।
सम्पुटं पुरतो मुक्त्वोवाच व्याहृतमामरम् ॥५१॥

मिमेल प्रकृतिः सर्वा नृपतिस्तापसाश्रवः ।
दध्यौ ब्रह्माच्युतेशानां नाम्नाऽयं विघटिष्यते ॥५२॥

सृष्टि-पालन-संहारकर्तारोऽमी जगन्मताः ।
एभ्यो देवाधिदेवोऽन्यस्तापसैर्न निगद्यते ॥५३॥

इति ध्यात्वा नृपस्तत्तन्नाम-स्थामादिवर्णनैः ।
परशुं वाहयामास सुतीक्ष्णमधिकारिभिः ॥५४॥

स तु तद्घातमात्रेण धाराभङ्गमवाप्नुवन् ।
मिथ्यावादाद् रुष्ट इव विससर्जानलान् कणान् ॥५५॥

अरे ! रागोरगग्रस्ता देवदेवा भवन्मुखैः ।
ख्याता इति रुषा तैरज्वालि कौठारिकाननम् ॥५६॥

सामर्थ्यपतितो व्यर्थीभूतः परशुरुत्पतन् ।
अस्फोटयच्छिरो मिथ्यादृशां कुग्रहशालिनाम् ॥५७॥

यो यस्याभिमतो देवः स तन्नाम्ना परश्वधम् ।
अवाहयत् परं नाप वैलक्ष्यादपरं नरः ॥५८॥

अथास्मिन्ननुपरते चित्रे व्यतिकरे तदा ।
आगाद् राज्ञो महादेवी तत्त्वविज्ञा **प्रभावती** ॥५९॥

तया सम्पुटमभ्यर्च्य भणितं सुपवित्रया ।
जिनो देवाधिदेवोऽर्हन् ददातु निजदर्शनम् ॥६०॥

अथ व्यापारितेऽपीपत् कुठारे व्यभजत्तराम् ।
सम्पुटं प्रादुरासीच्च मूर्त्तिः श्रीचरमार्हतः ॥६१॥

अम्लानमाल्यसर्वाङ्गप्रतिपूर्णाऽथ चान्दनी ।
दृष्टा प्रतिकृतिर्जैनी दृग्नैर्मल्यं व्यधान्नृणाम् ॥६२॥

अन्तःपुरे जिनगृहे तां संस्थाप्य महोत्सवैः ।
त्रिसन्ध्यमर्चयत्येव नित्यं स्नाता **प्रभावती** ॥६३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

हस्तकाभिनयोपेतं सा नृत्यत्यर्हतः पुरः ।
तत्रोपवीणयामास कलकण्ठो नृपः स्वयम् ॥६४॥
अन्यदाऽतिरसं प्राप्तेऽभिनये क्षितिपः शिरः ।
अप्रेक्ष्य श्री**प्रभावत्या** विषण्णो व्यग्रमानसः ॥६५॥
वीणामपातयत् पाणेः क्रुद्धा देवी ततोऽलपत् ।
मया दुरभिनीतं किं क्षिप्ता येन विपञ्चिका ? ॥६६॥
आख्यत् क्षितिपतिः कान्ते ! मा कुप्योऽनपराधिनि ।
भ्रान्तोऽस्मि तव शीर्षेऽहं च्युतवीणोऽस्मि तच्छुचा ॥६७॥
देव्यूचे किं शुचा स्वामिन् ! निष्कलङ्को मया दधे ।
की भीर्मृत्योः पवित्रश्चेद् धर्मः सुचिरमार्हतः ॥६८॥
दृढप्रेमाऽसि चेन्नाथ ! वैधर्म्यं तत् परित्यज ।
वैधर्म्यादिष्टयोः शिष्टैर्वियोगोऽमुत्र निश्चितः ॥६९॥
इति प्रियागिरा किञ्चिज्ज्ञाततत्त्वोऽपि तापसीम् ।
भक्तिं त्यक्तुं न शेकेऽसौ दृष्टिरागो हि दुस्त्यजः ॥७०॥
अन्यदाऽर्चाक्षणे चेट्युपानयद् धौतपोतिकाम् ।
वीक्ष्य तां महिषी रक्तां रोषरक्तेक्षणा क्षणात् ॥७१॥
अरेऽनवसरज्ञाऽसि कोऽयं रक्ताम्बरक्षणः ? ।
इत्युक्त्वा मुकुरेणैनां जघानौज्झच्च साऽप्यसून् ॥७२॥
स्वाभाविकांशुकं दृष्ट्वा मृतां चैतां व्यचिन्तयत् ।
राज्ञी धिग् मां भग्ननिजव्रतां निष्फलजीविताम् ॥७३॥
आसन्नमृत्युरेतर्हि स्वार्थं शुद्धिदमात्मनः ।
साधयमीत्यनशनमयाचत धरेश्वरम् ॥७४॥
राजाऽऽह स्नेहमुज्झित्वा किमुक्ता रूक्षगीरियम् ? ।
त्वद्वियोगासहिष्णोर्मे ह्यदः प्राणहरं वचः ॥७५॥
सत्त्ववानस्मि शूरोऽस्मि सर्वत्र रणकेलिषु ।
परं कातर एवास्मि त्वद्वियोगाब्धिलङ्घने ॥७६॥
अयमासन्न एवैष्यन् वियोगः केन वार्यते ? ।
प्रसीद साधयाम्यर्थं दुष्प्रापोऽन्त्यजनुःक्षणः ॥७७॥

इति स्थिराशयां देवीं वदन्तीमाह भूपतिः ।
अस्तु तेऽभिमतं किन्तु प्रबोध्योऽहं यथा तथा ॥७८॥

अथाङ्गीकृत्य तद्वाचं प्रपद्यानशनं सुधीः ।
मृत्वा **प्रभावती** कल्पे प्रथमेऽभूत् सुरोत्तमः ॥७९॥

देवदत्ताऽभिधा कुब्जा चेटी तां मूर्त्तिमर्हतः ।
शुश्रूषते क्षमाऽधीसे जिनधर्मप्रमादिनि ॥८०॥

देवस्तु प्रत्यहं राज्ञः प्रबोधोपायमादधे ।
स तु तापसदृग्मूढो बुबोध च कथञ्चन ॥८१॥

अथ **प्रभावतीदेवो**ऽन्यदा तापसरूपभृत् ।
अढौकयत् सुधास्वादुफलानि नृपतेः पुरः ॥८२॥

आस्वाद्य तानि भूजानिः कुत्रैतानीत्युवाच तम् ।
आश्रमे नगरादूरवर्तिनीत्यभणद् व्रती ॥८३॥

रसज्ञारसवश्योऽसौ समं तेनाश्रमं गतः ।
तापसैर्भीषणाकारैर्दृढं हन्तुं प्रचक्रमे ॥८४॥

विश्वस्यैभिरहं पश्यन् नीत एको निजाश्रमम् ।
प्रक्रान्तो वैरिभिरिव हन्तुं भक्तोऽपि पापिभिः ॥८५॥

इति नश्यन् नृपो दूरं वने तत्र तरोस्तले ।
दान्त-शान्तान् मुनीन् दृष्ट्वा शरणं तानुपागमत् ॥८६॥

मा भीरिति समाश्वास्य ते सज्जाः साधवोऽभवन् ।
तापसेषु निवृत्तेषु तमाहुर्मधुरस्वरम् ॥८७॥

"धर्म एव भयार्तानां त्राणायेह परत्र य ।
परीक्षयेच्च धर्मार्थी देवं धर्मं गुरूनपि ॥८८॥

वीतरागस्तत्र देवः शुद्धो धर्मो दयामयः ।
गुरुर्ब्रह्मधरस्त्यक्तसर्वसङ्गो जगद्धितः ॥८९॥

इति रत्नत्रयस्थैर्यसुधाधौतमनाः स्थितः ।
कुर्वन् पुण्यानि लभते सुखं स्वर्गापवर्गयोः" ॥९०॥

तत् तापसेषु दौरात्म्यं माहात्म्यं चैषु साधुषु ।
वीक्ष्य क्षितीशः प्रत्यक्षं प्रबुद्धो जैनतां दधौ ॥९१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

दर्शयित्वा सुरोऽपि स्वं तामावेद्य प्रतिश्रुतिम् ।
नृपं धर्मे दृढीकृत्य प्रीतः प्राप सुरालयम् ॥९२॥

आस्थानीस्थं स्वमैक्षिष्ट नृपतिस्त्यक्तदुर्मतिः ।
श्राद्धीभूतोऽथ कुरुते सत्क्रियाः श्रावकोचिताः ॥९३॥

इतश्च श्राद्धो **गान्धारो** जिनजन्मादिभूमिकाः ।
नत्वा **वैताढ्य**मूलेऽगान्नन्तुं श्रीशाश्वतार्हतः ॥९४॥

तत्र तस्याष्टमात् तुष्टा देवता शैलमूर्धनि ।
तं निनाय ववन्देऽसौ नित्यार्हत्प्रतिमा मुदा ॥९५॥

भूयोऽप्यानीय **वैताढ्याद**धोऽमुञ्चदिमं सुरी ।
शतमष्टोत्तरं तुष्टा तस्मै सा गुटिका ददौ ॥९६॥

यद्वाञ्छयैनामास्ये त्वं क्षेप्ता सा लघु सेत्स्यति ।
इत्याख्याय तिरोभूता सुरी सोऽपि ततोऽचलत् ॥९७॥

क्रमात् तां चान्दनीं **जीवत्स्वामि**मूर्तिं नमस्यितुम् ।
आगाद् **वीतभयं वीरं** वन्दित्वा मुमुदेतमाम् ॥९८॥

उत्पन्नरुक् तत्र **देवदत्तया** परिचारितः ।
सज्जीभूतः कृतज्ञस्तददत्तास्यै गुटीशतम् ॥९९॥

कक्षीचक्रे स्वयं दीक्षामथ कुब्जाऽऽहरद् गुटीम् ।
मम ध्मातजातरूपरूपताऽऽशु भवत्विति ॥१००॥

तत्प्रभावादसौ तादृग् रूपसम्पदभूत् क्षणात् ।
सुवर्णगुलिकेत्याख्यां लेभे रम्भानिभा जनात् ॥१०१॥

अथ भोगार्थिनी दध्यौ मत्पि**तोदायनो** नृपः ।
अन्ये त्वस्य नृपाः प्रेष्यास्तत् **प्रद्योतो**ऽस्तु मे पतिः ॥१०२॥

अनया वाञ्छया प्राश गुटीमेकां विचक्षणा ।
तद्देवताऽनुभावेन तद्रक्तोऽभूत् स भूपतिः ॥१०३॥

स दूतीं व्यसृजत् तस्यै साऽजूहवदमुं तया ।
गजे**ऽनलगिरौ** सोऽप्यारुह्यागान्निशि वेगवान् ॥१०४॥

तयाऽभिरुचितायास्मै प्रोचेऽर्चामार्हतीं यदि ।
सार्धं नयसि तदहमागच्छाम्यन्यथा व्रज ॥१०५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एतत्तुल्यां परामर्चामानीयेमां ततो नयेः ।
इत्याख्याय तयोषित्वा रात्रिं प्रातस्ततोऽगमत् ॥१०६॥

चान्दनीमपरामर्चां कारयित्वा स तादृशीम् ।
प्रतिष्ठाप्य तथैवागात् तत्र तां न्यस्य तत्पदे ॥१०७॥

सुवर्णगुलिकां जीवत्स्वामिनोऽर्चां च चौरवत् ।
प्रद्योतः समुपादायावन्तीं प्रापारुणोदये ॥१०८॥

अथानलगिरिर्मूत्र-पुरीषाद्यं यदत्यजत् ।
त्रस्तास्तद्गन्धतो **वीतभये**भाः खलु जज्ञिरे ॥१०९॥

प्रद्योतागमनं तादृक्प्रबन्धादवधारयन् ।
शुश्राव **स्वर्णगुलिका**ऽपहारं धरणीश्वरः ॥११०॥

अस्त्यर्हत्प्रतिमा तावद् गता चेटी प्रयातु सा ।
इति स्वस्थाशयो मध्यन्दिने स्नातोऽरजोऽम्बरः ॥१११॥

अर्चामर्चयितुं यावत् प्राप्तस्तावद् व्यलोकयत् ।
म्लानानि चारुपुष्पाणि शुष्कं चान्दनलेपनम् ॥११२॥

विषण्णोऽसौ ततो दध्यौ नेयमर्चा सुरार्पिता ।
किन्तु तस्याः प्रतिच्छन्दो धिक् **प्रद्योतं** कुतस्करम् ॥११३॥

सोऽथास्मै व्यसृजद् दूतं सोऽपि गत्वा न्यवेदयत् ।
चेट्या न नृपतेः कार्यं **प्रद्योतै**षाऽस्तु ते प्रिया ॥११४॥

परं चौरवदानीताऽर्चा **जीवत्स्वामिनो**ऽस्ति या ।
नृपायार्पय तां नो चेद् दास्यसे शिरसा सह ॥११५॥

भुवं गृहीतां सहते सन्तोषी स निराधिपः ।
तामर्हतः परं नार्चां हृतां तत्पूजनोद्यतः ॥११६॥

मालवान् शाधि मा व्यर्थ**मुदायन**नृपासिना ।
छिन्नकण्ठः क्षणं नृत्यन् कौतुकाय भविष्यसि ॥११७॥

प्रद्योतः प्राह रूक्षाक्षं वीक्षमाणश्चरं नरम् ।
भक्तोऽसि स्वामिनो वावदूकोऽसीति प्रगल्भसे ॥११८॥

गृहीता नार्पणायैषा दूत ! साहसिना मया ।
कोऽप्यस्ति मातृजनितो हरत्वेनां स मद्गृहात् ॥११९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

धार्मिकस्तव स स्वामी तामर्चामर्चयत्वलम् ।
या तन्नियमनिर्वाहकृते मुक्ता मया तदा ॥१२०॥

उदासे **सिन्धु-सौवीरां**स्तस्याहमकुतोभयः ।
पालयत्वेष तान् जीवन्नदाता प्रतिमां पुनः ॥१२१॥

वेपमानतनुर्दाता प्रतिमामागते नृपे ।
इति चाख्याय दूतः स्राग् व्यावृत्त्यागात् स्वपत्तनम् ॥१२२॥

अ**थोदायन**भूपालश्चचाल पृतनावृतः ।
मौलिबद्धदशक्ष्मापैः सस्वसैन्यैरुपस्कृतः ॥१२३॥

प्रयाणैरनवच्छिन्नैर्भानुशोषितविष्टपे ।
ग्रीष्मकाले पथाऽऽयातं स विवेश **मरुस्थलम्** ॥१२४॥

तत्रातिशयसामर्थ्यात् तृषा नीरसनीवृति ।
भृशमभ्यभवत् सैन्यं छलमाप्येव दुर्जनः ॥१२५॥

कटके मर्त्तुमारब्धे निष्प्रतीकारया तृषा ।
नृपः **प्रभावती**देवं लघ्वागमनमस्मरत् ॥१२६॥

आगत्यावेत्य तद्वृत्तं स विचक्रे त्रिपुष्करम् ।
आदि-मध्यावसानेषु **मरूणा**मुल्लटज्जलम् ॥१२७॥

अथ तज्जीवन-स्नान-पानसज्जबलो नृपः ।
गतो**ऽवन्तीम**भिमुखायातं **प्रद्योत**मब्रवीत् ॥१२८॥

किं वृथा मारितैर्वीरैरङ्गयुद्धं तदावयोः ।
अस्तु द्विप-रथाश्वादिसद्दग्वाहनसंस्थयोः ॥१२९॥

रणो रथस्थयोरस्तु प्रतिश्रुत्येति सोपधिः ।
प्रद्योतोऽनलशैलेभमारुह्यागाद् रणाजिरम् ॥१३०॥

वाग्भ्रष्टोऽसौ जगद्भ्रष्टो भावीति द्रा**गुदायनः** ।
इभस्योत्क्षिप्तमुत्क्षिप्तं बाणैश्चरणव्यधीत् ॥१३१॥

एवं चापतदुग्रेभः **प्रद्योत**श्चोत्तरंस्ततः ।
बद्धो भाले पतिर्दास्या इत्यस्याङ्कः कृतोऽयसा ॥१३२॥

मध्ये**ऽवन्ति** प्रविश्याथाभ्यर्च्यार्चां क्ष्माभृदर्हतः ।
यावदुत्पाटयामास तावन्नभसि वागभूत् ॥१३३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मा कुरु व्यर्थमायासं नैषाऽर्चाऽलङ्करिष्यति ।
त्वत्पुरीमित्यसौ श्रुत्वा वैलक्ष्ययुगभूद् भृशम् ॥१३४॥

यदर्थमयमारम्भस्तस्यार्थस्येति वैशसम् ।
सम्पन्नमिति नो विघ्नस्तत्र किं भावि वर्तते ? ॥१३५॥

ध्यात्वेत्यु**दायनः** स्वस्मै विषयाय न्यवर्तत ।
मालवानात्मसात् कृत्वा सह नीत्वा तदीश्वरम् ॥१३६॥

विचाले प्रावृषा रुद्धः स्कन्धावारं न्यवीविशत् ।
वप्रान् दशापि राजानः कृत्वाऽस्थुः परितो नृपम् ॥१३७॥

ततो **दशपुरं** जज्ञे यच्च भुङ्क्ते नरेश्वरः ।
तत् **प्रद्योतो**ऽपि यद् भोज्ये वैरिणोऽपि न वञ्चनम् ॥१३८॥

गृहीतपौषधे पर्युषणापर्वणि भूधवे ।
प्रद्योतमवदत् सूपकारोऽद्याश्नासि किं वद ? ॥१३९॥

किमद्य पृच्छ्यते नूनं मारयिष्यति मां विषात् ।
नित्यं सह नृपेणैव भोक्तुः प्रश्नः किमन्यथा ? ॥१४०॥

प्रद्योतमिति साशङ्कं पुनः प्रोवाच पाककृत् ।
अद्य पर्युषणा राजोपोषितोऽस्तीति पृच्छ्यते ॥१४१॥

सोऽप्याह कैतवात् पर्वावजग्मे न मयाऽद्य हा ! ।
साधु ज्ञापितवानेतदहमप्यस्म्युपोषितः ॥१४२॥

ममापि पितरौ श्राद्धौ मोहाज्जातः प्रमाद्यहम् ।
अप्रत्याख्यानिना ह्यस्मिन् कथं स्थेयं सुपर्वणि ॥१४३॥

इति **प्रद्योत**वचनं सोऽपि राज्ञे न्यवेदयत् ।
सोऽपि सुश्रावको दध्यौ कैतवीति विदन्नपि ॥१४४॥

न शुध्यति प्रतिक्रान्तिर्बद्धेऽस्मिन् मम वार्षिकी ।
अवस्थितकषायाणां यदेषा न हि तात्त्विकी ॥१४५॥

प्रद्योतमथ सत्कृत्य क्षामयित्वाऽस्य मूर्धनि ।
तदक्षरापनोदाय हेमपट्टमबन्धयत् ॥१४६॥

पुन**र्मालव**साम्राज्यं **प्रद्योता**य प्रदाय सः ।
स्वयं **वीतभये** राज्यमन्वशाच्छ्री**उदायनः** ॥१४७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जिनार्चां कुरुते पात्रे दात्ते दानमनेकशः ।
कारयत्यर्हदावासान् स संविग्नः परार्हतः ॥१४८॥

अन्यदा पौषधागारे स्थितः पालितपौषधः ।
पाक्षिके पूर्वरात्रेऽसौ दध्यौ व्रतविशन्मनाः ॥१४९॥

"धन्यास्ते वसुधोद्देशा येष्वर्हज्ज्ञातनन्दनः ।
सद्वाक्सुधाह्रदो ज्ञानभानुर्विहरति प्रभुः ॥१५०॥

यदि प्रसद्य स स्वामी विश्वकारुण्यवारिधिः ।
इहायाति तदा दीक्षाऽलङ्कारमहमाददे" ॥१५१॥

अथ श्री**वर्धमानो**ऽपि सर्वज्ञः समवासरत् ।
मृगोद्याने पुरे तत्र सुपर्वपरिषद्वृतः ॥१५२॥

उदायनोऽपि निर्वेदजननीं जिनदेशनाम् ।
सतन्त्रोऽप्यशृणोद् गत्वा प्राञ्जलिश्च व्यजिज्ञपत् ॥१५३॥

प्रभो ! जनाब्जप्रत्यूष ! स्राक् कृत्वा राज्यसुस्थताम् ।
उपस्वामि मुदाऽऽदाता भवपोतं द्रुतं व्रतम् ॥१५४॥

स्वाम्याह मा विलम्बस्व गृहं यातस्ततो नृपः ।
मन्त्रिणा मन्त्रमकरोदिति धर्म्यं महामनाः ॥१५५॥

अभीचिरात्मजो राज्ये नीत्या यदि निवेश्यते ।
पात्यतेऽसौ तदा श्वभ्रे मया पित्राऽपि दुस्तरे ॥१५६॥

अन्यस्यापि गृहस्थस्य शुद्धिरारम्भिणः कुतः ? ।
स्वान्यपापनिमग्नस्य राज्ञस्तु नरको ध्रुवः ॥१५७॥

भवितास्मि व्रती **केशी** राजाऽस्तु भगिनीसुतः ।
मन्त्रयित्वेति सल्लग्ने तत्पदेऽभिषिषेच सः ॥१५८॥

स्वयं वीरकरे स्फीत्या निस्सङ्गोऽभून्महायतिः ।
विकृष्टतपसस्तस्य काले कोऽपि गदोऽभवत् ॥१५९॥

गोरसस्तत्प्रतीकार इत्येष दधि गोकुले ।
पारणादावुपादत्ते ततो न ववृधेऽस्य रुक् ॥१६०॥

क्रमाद् वव्राज राजर्षिर्विहरन् **वीतभी**पुरम् ।
केशी नृपस्ततोऽभाणि दुष्टामात्येन केनचित् ॥१६१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

परीषहपराभूतः प्रत्यादातुं महीशताम् ।
अयमागान्नृपोऽवादीदादत्तामस्य सा यतः ॥१६२॥

अमात्योऽप्यवदन्नेयं नीतिरित्येवमादिना ।
व्युद्ग्राह्य क्षितिभृच्चित्तं दुष्टश्छिद्राण्यमार्गयत् ॥१६३॥

दधि यस्या गृहे साधुर्लाति तां पशुपालिकाम् ।
प्रलोभ्य दध्नि स विषमक्षेपयदधार्मिकः ॥१६४॥

त्रिर्भक्तदेवता पात्रात् तद् दधि द्रागलोठयत् ।
व्यग्रायां चान्यदा तस्यां लात्वा तद् बुभुजे मुनिः ॥१६५॥

उपयुक्तस्ततो ध्यानी स राजर्षिरनाकुलः ।
त्रिंशद् दिनान्यनशनी निष्कर्मा प्राप निर्वृतिम् ॥१६६॥

ऋषिघातमहापापं केनापि न हि वारितम् ।
इति कोपारुणा देवी नगरं तत् सनागरम् ॥१६७॥

पूरयित्वा पांशुपूरैरुत्तुङ्गं स्थलमातनोत् ।
पापानुमतिसम्बन्धादनर्थो हि न संशयः ॥१६८॥

न मां न्यवीविशद् राज्ये मत्पितेत्यभ्यसूयया ।
पुराऽप्य**भीचिश्चम्पायां** भेजे **कोणिक**भूभुजम् ॥१६९॥

स तत्र तत्प्रसादेनाभुङ्क्त भोगान् यथेप्सितम् ।
सम्यक्त्वाणुव्रताद्यं च सुश्राद्धत्वमधारयत् ॥१७०॥

किन्**तूदायन**भूपाले पितर्यत्यक्तमत्सरः ।
संलिख्योपोषितो मासमनालोचिततत्पदः ॥१७१॥

मृत्वा**ऽसुरकुमारो**ऽभूत् पल्यायुः स ततश्च्युतः ।
नृजन्माप्य **विदेहेषु** कर्म निष्ठाप्य सेत्स्यति ॥१७२॥

इति **उदायन**चरित्रम् ॥४८॥

तहेव कासीराया सेओ-सच्च-परक्कमो ।
काम-भोगे परिच्चज्ज पहणे कम्ममहावणं ॥४९॥

व्याख्या–तथैव तेनैव प्रकारेण **काशिराजः काशि**मण्डलाधिपतिर्**नन्दना**भिधानः सप्तमबलदेव इत्यर्थः । श्रेयसि प्रशस्ये सत्ये संयमे पराक्रमो यस्येति **श्रेयः-सत्य-**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पराक्रमः काम-भोगान् परित्यज्य 'पहणे' त्ति **प्रहतवान् कर्ममहावनमिति** । तद् यथोचितं चरितम्—

काश्यामग्निशिखो राजा **जयन्त्यस्य** प्रियाङ्गना ।
तद्भवः सप्तमो रामः पुत्रोऽभून्**नन्दना**भिधः ॥१॥

दत्तः **शेषवती**कुक्षिहंसस्तस्यानुजो हरिः ।
पितर्युपरते दोष्मान् **भरता**र्धमसाधयत् ॥२॥

नन्दनानुगतो राज्यश्रियं स्फीतमपालयत् ।
षट्पञ्चाशत्सहस्राशब्दायुर्धूमायामगान्मृतः ॥३॥

नन्दनोऽथ समादाय श्रामण्यं समताऽञ्चितः ।
ध्यानैकतानः सम्प्राप केवलज्ञानमुज्ज्वलम् ॥४॥

पञ्चषष्टिसहस्राब्दीमनुपाल्यायुरद्भुतम् ।
सिद्धिं षड्विंशतिधनुःप्रमिताङ्गः प्रपेदिवान् ॥५॥

इति **नन्दन**चरित्रम् ॥४९॥

तहेव विजयओ राया आणट्ठाकित्ति पव्वए ।
रज्जं तु गुणसमिद्धं पयहित्तु महायसो ॥५०॥

व्याख्या—तथैव विजयो द्वितीयबलदेवः 'आणट्ठाकित्ति' त्ति आ समन्तात् नष्टा अकीर्तिर्यस्येत्या**नष्टाकीर्तिः** प्राव्राजीत् । तुशब्दस्याप्यर्थस्य व्यवहितसम्बन्धात् **राज्यं गुण-समृद्धमपि प्रहाय महायशाः** । तद् यथा—

द्वारावत्यां ब्रह्मराज-सुभद्रातनुजो हली ।
द्विपृष्ठवासुदेवस्याग्रजोऽभूद् **विजया**ख्यया ॥१॥

सोऽपि द्वासप्ततिसमालक्षायुषि च केशवे ।
मृते संवेगनिर्मग्नः प्रपेदे विशदं व्रतम् ॥२॥

स पञ्चसप्ततिशरल्लक्षायुरथ चोच्छ्रितः ।
धनूंषि सप्ततिः प्राप्य केवलं शिश्रिये शिवम् ॥३॥

इति **विजयो** द्वितीयो बलदेवः ॥५०॥

तहेवुग्गं तवं किच्चा अव्वक्खित्तेण चेयसा ।
महाबलो रायरिसी आदाय सिरसा सिरिं ॥५१॥

Jain Education International 2010_02   For Private & Personal Use Only   www.jainelibrary.org

व्याख्या–तथैवोग्रं तपः कृत्वा अव्याक्षिप्तेन चेतसा महाबलो राजर्षिरादाय गृहीत्वा **शिरसा** मस्तकेन 'अत्यादरख्यापकमेतत्' **श्रियं** भावश्रियं संयमरूपां तृतीयभवे परिनिर्वृत इति । तच्चरितं यथा–

पुरे **गजपुरे** राजा पौरभाग्यमिव स्फुटम् ।
बली **बलो**ऽस्ति भूपालः प्रजावत् पालयन् प्रजाः ॥१॥

प्रभावत्यस्य दयिता न कान्ता यत्पराऽद्भुता ।
महाबलस्तयोः पुत्रः सिंहस्वप्नपुरस्कृतः ॥२॥

तज्जन्मनि पिता तस्याकारयद् गुप्तिशोधनम् ।
मानवृद्धिं विश्वचित्रप्रदान् सानन्दमुत्सवान् ॥३॥

धात्रीपरिग्रहीतोऽसौ ववृधेऽम्बुनि पद्मवत् ।
कलाश्चाकलयत् सर्वा रुच्यं प्राप च यौवनम् ॥४॥

अनन्यतुल्यरूपाणां नृपः सद्गुणसम्पदाम् ।
तेनाष्टराजकन्यानां पाणिग्रहमकारयत् ॥५॥

वासवेश्माष्टकभ्राजि स्वर्विमाननिभं महत् ।
प्रादादस्मै नृपः सौधं प्रीतिदानं च तद् यथा ॥६॥

हिरण्य-स्वर्णयोरष्टौ कोटी स कुण्डलाष्टकम् ।
मौलिसौवर्णकस्थालाष्टकं सन्नाटकाष्टकम् ॥७॥

दशवेश्मसहस्राढ्यग्रामकर्मकराष्टके ।
पर्याप्तमन्यदप्यस्य भूपो भोगेऽन्वमन्यत ॥८॥

राज्यं तव तवैवैष कोशोऽसङ्ख्यधनो महान् ।
उपभुङ्क्ष्व श्रियः स्वैरमिति स्निग्धगुरोर्गिरः ॥९॥

ताभिः प्रियाभिस्तत्सौधे तथाविधसुखाम्बुधौ ।
निर्मग्नोऽसौ न बुबुधे गतं कालं **महाबलः** ॥१०॥

अन्यदा जगदीशस्य **विमल**स्यार्हतो गणी ।
पुरेऽत्र समवासार्षीद् **धर्मघोषो** मुमुक्षुयुक् ॥११॥

तत्र पर्षदि पूर्णायां सतन्त्रः श्री**महाबलः** ।
भृत्याज्ञापितवृत्तान्तः प्रीत्या गत्वाऽनमद् गुरून् ॥१२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

"भवक्लेशातिबाहुल्यं सिद्धिसौख्यातिशायिताम् ।
बन्ध-मुक्तिनिदानत्वमाश्रवैतन्निरोधयोः ॥१३॥

महाऽऽरम्भादितः श्वभ्रं कषायेभ्यो बत क्षयम् ।
महाव्रतात्मकं शुद्धं धर्मं चोपादिशद् गुरुः" ॥१४॥

महाबलोऽप्यवस्थाप्य गुरून् संविग्नमानसः ।
व्रतेच्छुर्गृहमागत्य पितरौ प्राह साञ्जसम् ॥१५॥

धर्मघोषानगारस्य देशनासुरशाखिनः ।
मुखाद् धर्मः श्रुतः शुद्धो रुचितश्च सुपथ्यवत् ॥१६॥

धन्यः सुलब्धजन्माऽसि कृतार्थोऽसि कुलोद्वह ! ।
श्रुतो यद् धर्म इत्युक्ते पितृभ्यामिति सोऽवदत् ॥१७॥

जन्म-मृत्यु-जराभीतो भवोद्विग्नो महासुखाम् ।
प्रव्रज्यामस्म्युपादाता तातौ ! युष्मदनुज्ञया ॥१८॥

अथ **प्रभावती** कर्णविषमाकर्ण्य तद्वचः ।
पपात मूर्च्छया क्लिन्नगात्रा भुवि सवेपथुः ॥१९॥

सवायुवारिधाराभिः कथञ्चिल्लब्धचेतना ।
रुदन्ती विहिताक्रन्दं सशोकमिदमब्रवीत् ॥२०॥

इष्टः कान्तो रत्नभूतः एक एव त्वमात्मजः ।
जीवितव्यादप्यभीष्टः कुलबीजं सुदुर्लभः ॥२१॥

क्षणमात्रं वियोगस्ते पित्रोः प्राणहरो ध्रुवम् ।
यावदस्मज्जीवितव्यं तन्नन्दन ! गृहे वस ॥२२॥

ततः पक्ववया जातसन्तानः प्रव्रजिष्यसि ।
महाबलोऽपि श्रुत्वेदं पितरावाह धीरधीः ॥२३॥

तथैतद् यद् भवत्प्रोक्तं परं मानुष्यको भवः ।
जरा-मृत्यु-व्यसन-रुक्-शोक-सन्तापसङ्कुलः ॥२४॥

अध्रुवः स्वप्नसङ्काशो नाशधर्मेन्द्रजालवत् ।
असौ पूर्वमयं पश्चान्मृतिं लब्धेति वेद कः ? ॥२५॥

अहीनायुरतः स्वस्थः स्वीकरोमि लघु व्रतम् ।
अथ माताऽपि तं दोर्भ्यामादायाङ्कस्थमित्यवक् ॥२६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

विशिष्टरूप-सौभाग्य-विवेक-ज्ञानसेवधेः ।
सुखोचितं तव वपुः सुकुमारं सुलक्षणम् ॥२७॥

युवाऽस्यनुभवपथं नय भोगान् गतं वयः ।
क्वेदं भूयोऽथ वार्धक्ये प्रव्रजेरथ सोऽवदत् ॥२८॥

दुःखकोश इदं देहं विविधव्याधिमन्दिरम् ।
सिरापिनद्धमांसास्थि त्वग्मात्रे किञ्चदद्भुतम् ॥२९॥

अशुचिमयमशुचिजनितमशुचिकरं देहमशुचिसर्वस्वम् ।
सततं जराकटाक्षितमबलं च मृदामभाण्डमिव ॥३०॥

तुच्छे रागोऽत्र कः काये तारुण्येऽपि च चञ्चले ।
क्षणेऽस्मिन् दुर्लभे स्वार्थं साधयाम्यथ सा जगौ ॥३१॥

विश्वविश्वोपमातीता एताः कान्तास्तवाद्भुताः ।
कुलीनाः सत्कला दक्षाश्चारुशीलार्जवक्षमाः ॥३२॥

विनीताः स्वादुभाषिण्यः सद्भावस्नेहबन्धुराः ।
भङ्क्ष्वाभिर्विषयान् स्वैरं दिवीन्द्रस्यापि दुर्लभान् ॥३३॥

उत्कृष्टतपसोऽप्याहुरेतदेवातुलं फलम् ।
अथाक्षोभ्यमना वाचमाददेऽसौ **महाबलः** ॥३४॥

बहुविघ्ना अमी भोगाः शुक्र-रक्ताद्यशौचजाः ।
स्वल्पकाः स्वल्पकालीनाः क्लेशसाध्या जडप्रियाः ॥३५॥

विपाककटवः सिद्धिसुखानन्दविबन्धकाः ।
मूलं दुर्गतिदुःखानां तातौ ! नामी तपःफलम् ॥३६॥

पताकायां तु को रागः को रागो ननु विद्युति ? ।
सन्ध्यायां ननु को रागः को रागो ननु योषिति ? ॥३७॥

अथ तावाहतुर्द्रव्यं वंशागतमथार्जितम् ।
विपुलं स्वर्ण-रत्नादि धान्यादि द्विपदादि च ॥३८॥

समृद्धिमेतां सफलीकुरुष्व भुवने ह्यसौ ।
दुष्प्रापाऽस्यै हि खिद्यन्ते जनास्तां त्यज मा मुधा ॥३९॥

सोऽथाह मेघनिर्घोषमर्थजातमिदं चलम् ।
अग्नि-चौर-नृप-प्रेत-दायादाधीनवैशसम् ॥४०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सन्तोषसुखमूलाग्नि लोभोन्मादविवर्धनम् ।
मृत्यावावश्यकत्यागं स्ववशैस्त्याज्यमुत्तमैः ॥४१॥

जनकावथ चारित्रोद्वेजिनीभिरवोचतुः ।
गीर्भिर्यथा व्रतं वत्स ! कष्टपाल्यं भवादृशाम् ॥४२॥

चर्वणीया यवा लौहा दोर्भ्यां लङ्घ्यो महोदधिः ।
पातव्याऽग्निशिखा दीप्ता यत् त्वमादत्ससे व्रतम् ॥४३॥

प्रतिस्रोतसि गङ्गायाः कथं वत्स ! गमिष्यसि ? ।
कथं वा खड्गदारायां कथं दीक्षां चरिष्यसि ? ॥४४॥

ब्रह्म पाल्यं सदा नाधाकर्मभोज्यं तपोधनैः ।
सर्वे परीषहाः सह्या भूशय्या केशलुञ्चनम् ॥४५॥

अस्नानं सततं भिक्षालब्धं वीतरसाशनम् ।
मृगचर्येत्यदः सर्वं सुखिनो दुष्करं तपः ॥४६॥

त्वां च कष्टगतं भिक्षाचरं नष्टप्रतिक्रियम् ।
पश्यन्तौ वत्स ! जीवावः कथमावां गृहस्थितौ ? ॥४७॥

अथो **महाबलो**ऽवादीदिहलोकैकचेतसाम् ।
अदीर्घदर्शिनां क्लीब-कातराणां जडात्मनाम् ॥४८॥

महाव्रतात्मको भारो दुर्बाह्यः क्षुद्रदेहिनाम् ।
लीलोत्पाट्यः सुधीराणां ज्ञातमोक्ष-भवाध्वनाम् ॥४९॥

मृत्युभीतो हि कृपणः कोटिं दद्यान्नरेशितुः ।
भवभीतस्तथा ज्ञानी किं न कुर्यात् सदुष्करम् ? ॥५०॥

पित्रोरङ्कगतमपि क्रियमाणप्रतिक्रियम् ।
अपि बालं नयत्यन्तमवशं मृत्युकेशरी ॥५१॥

प्राप्ते ह्युपनतेऽकस्माज्जीवानां कर्मणः फले ।
नैक्षि कस्यापि सामर्थ्यं सुहृदो रटतोऽपि हि ॥५२॥

समुदायकृतं कर्म समुदायेन भुज्यते ।
चेद् युवामपि गृह्णीथो व्रतं तदतिसुन्दरम् ॥५३॥

एवं दृढाशयं ज्ञात्वा पितरौ तं **महाबलम्** ।
अकामावप्यनुज्ञातवन्तौ तद्व्रतहेतवे ॥५४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अथ क्षितीश्वरः कौटुम्बिकैः पुरमशोभयत् ।
केतनैर्नाटकैर्गीत-वादित्रैर्दान-तोरणैः ॥५५॥

सिंहासने निवेश्याभिप्राच्यीं प्रीत्या **महाबलम्** ।
सुवर्णकलशानीतैरभ्यषिञ्चज्जलोत्करैः ॥५६॥

सत्कृत्य समलङ्कृत्य प्राञ्जली चरणोन्मुखम् ।
पितरावाहतुः पुत्र ! प्रियं कुर्वः किमस्तु ते ? ॥५७॥

वेषो मे प्रिय इत्युक्ते नृपतिः कुत्रिकापणात् ।
आनाययल्लक्षमूल्यरजोहरण-पात्रके ॥५८॥

आह्वयच्च दिवाकीर्त्ति तन्मूल्येनैव पावनम् ।
अकर्तयत् स तत्केशांश्चतुरङ्गुलवर्जितान् ॥५९॥

तांश्च मुक्ताफलस्थूलाश्रुमुखी सूः **प्रभावती** ।
हंसपक्ष्मपटेनोच्चैः प्रतीच्छयोच्छीर्षकेऽमुचत् ॥६०॥

महाबलोऽथ गोशीर्षचन्दनागुरुलेपवान् ।
रुरोह शिबिकां प्रीत्या सहस्रजनवाहिनीम् ॥६१॥

छत्र-चामरविभ्राजी नैकलोकपुरस्कृतः ।
ददद् दानं दधद् ध्यानं प्रव्रज्याऽऽह्लादहेतुकम् ॥६२॥

स्वाधीनसम्पदाभोगो युवाऽसौ संयमस्पृहः ।
त्यक्त्वा कामगुणान् धन्यः आदत्ते जनुषः फलम् ॥६३॥

स्तूयमान इति प्राज्ञैर्वीक्ष्यमाणः स्वसज्जनैः ।
नम्यमानः क्रमात् प्राप वनं गुरुभिराश्रितम् ॥६४॥

पुरस्कृत्याथ पितरौ यानोत्तीर्णं **महाबलम्** ।
धर्मघोषगुरून् नत्वाऽऽख्यातामिति कृताञ्जली ॥६५॥

पुत्र एष भवोद्विग्नो व्रतमिच्छति वोऽन्तिके ।
शिष्यभिक्षां प्रयच्छावः पूज्या यूयं प्रतीच्छत ॥६६॥

यथासुखमिति प्रोक्ते गुरुणेशानकूणके ।
गत्वा **महाबलः** सर्वं वस्त्रालङ्कारमत्यजत् ॥६७॥

उत्तरीये प्रतीच्छ्यैतद् रुदन्त्याह **प्रभावती** ।
अक्षोभ्योऽसि कृतार्थोऽसि कुलीनोऽसि मनस्व्यसि ॥६८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

यतितव्यममुत्रार्थे न प्रमाद्यं मनागपि ।
इत्याख्याय गुरून् नत्वा पितरौ गेहमीयतुः ॥६९॥

पञ्चभिर्मुष्टिभिः केशान् समूलमुदपाटयत् ।
उपेत्य विज्ञप्य गुरून् स चारित्रं समाददे ॥७०॥

स स्वयं ग्राहितः शिक्षां गुरुणा पाठितः स्वयम् ।
महाबलोऽनगारोऽभूत् समित्यादिक्रियाऽद्भुतः ॥७१॥

द्वादशाङ्गीधरः षष्ठाष्टमादिसुमहत्तपाः ।
समा द्वादश चारित्रं निर्मलं प्रत्यपालयत् ॥७२॥

आलोचितप्रतिक्रान्तो मासं संलिख्य सुस्थितः ।
ब्रह्मकल्पेऽभवद् देवो दशपाथोनिधिस्थितिः ॥७३॥

तच्च्युतो **वणिजग्राम**नगरे श्रेष्ठिनोऽन्वये ।
सुदर्शन इति ख्यातनामा पुत्रोऽभवत् सुधीः ॥७४॥

युवाऽसौ **वर्धमानस्य** श्रुत्वा भगवतो वचः ।
प्रबुद्ध संयमं लात्वा केवली सिद्धिमासदत् ॥७५॥

प्रज्ञप्तिभणितस्तावदयमेको **महाबलः** ।
अपरोऽप्यवतार्यो वा श्रुतज्ञमतिगोचरः ॥७६॥

इति **महाबल**चरित्रम् ॥५१॥

इत्थं महापुरुषोदाहरणैर्ज्ञानपूर्वकक्रियामाहात्म्यमभिधायोपदेष्टुमाह—

कहं धीरो अहेऊहिं उम्मतो व्व महिं चरे ? ।
एए विसेसमादाय सूरा दढपरक्कमा ॥५२॥

व्याख्या—कथं केन प्रकारेण **धीरोऽहेतुभिः** क्रियावाद्यादिपरिकल्पितै**रुन्मत्तो** ग्रह-गृहीत **इव** तात्त्विकवस्त्वपलपनेन आलजालभाषितया **महीं** पृथ्वीं **चरेद्** भ्रमेद् ? नैव चरेद्, धीरस्य **भरता**दिवत् तत्त्वज्ञानितयानुत्तरत्वात् । अत एवाह—यत **एते भरता**दयो **विशेषं** वैशिष्ट्यमर्थान्मिथ्यादर्शनेभ्यो जिनशासनस्**यादाय शूराः[दृढप्राक्रमाः]** सन्तः 'एतदेवाश्रितवन्त इति शेषः' । अतो भवतापि विशेषज्ञेन धीरेण च सता जिनाज्ञायामेव निश्चितं चेतो विधेयमिति तात्पर्यम् ॥५२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

किञ्च—

अच्चंतनियाणखमा सच्चा मे भासिया वई ।
अतरिंसु तरिंतेगे तरिस्संति अणागया ॥५३॥

व्याख्या—अत्यन्तमतिशयेन **निदानं** कर्मलवनं तत्र **क्षमा सत्या** 'मे' **मया भाषिता वाक्** जिनशासनमेवाश्रयणीयमित्येवंरूपा । अनयाऽङ्गीकृतया **अतार्षुस्**तीर्णवन्त**स्तरन्त्येके** सम्प्रत्यपि 'महाविदेहादावित्यर्थः' **तरिष्यन्ति** च [**अनागता** भाविनो] 'भवोदधिमिति शेषः' ॥५३॥

यतश्चैवमतो निगमयन्नाह—

कहं धीरे अहेऊहिं अत्ताणं परियावसे ? ।
सव्वसंगविणिम्मुक्के सिद्धे हवइ नीरए ॥५४॥ त्ति बेमि ॥

व्याख्या—कथं धीरोऽहेतुभिः पूर्वोक्तै**रात्मानं पर्यावसये**त् ? कथमात्मानमहेत्वा-वासितं कुर्यादित्यर्थः । किं पुनरात्मनोऽहेतुवासनाया अकरणे फलम् ? इत्याह—सर्वे सङ्गा द्रव्यतो द्रविणादयो भावतस्तु मिथ्यारूपत्वादेत एव क्रियादिवादास्तैर्विनिर्मुक्तः **सर्वसङ्ग-विनिर्मुक्तः** सन् **सिद्धो भवति नीरजाः** कर्ममलहर्त्ता तदनेन अहेतुपरिहारस्य सम्यग्ज्ञान-हेतुत्वेन सिद्धिः फल**मिति ब्रवीमी**ति पूर्ववत् ॥५४॥ ग्रं० ११३२-२२॥

इति श्रीकमलसंयमोपाध्यायविरचितायां सर्वार्थसिद्धौ श्रीउत्तराध्ययनटीकायां संयतीयाख्यमष्टादशमध्ययनं समाप्तम् ॥१८॥

• • •

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एकोनविंशं मृगापुत्रीयमध्ययनम्

इहानन्तराध्ययने भोगर्धित्याग उक्तस्ततश्च श्रामण्यं तच्चाप्रतिकर्मतया श्लाध्यं स्यादिति तत्प्ररूपकमेकोनविंशमध्ययनमारभ्यते ।

सुग्गीवे नयरे रम्मे काणणुज्जाणसोहिए ।
राया बलभद्द त्ति मिया तस्सग्गमाहिसी ॥१॥

व्याख्या—सुग्रीवाख्ये नगरे रम्ये मनोहरे **काननै**र्बृहद्वृक्षाश्रयैर्वनै**रुद्यानै**रारामैः क्रीडावनैः **शोभिते** तत्र **राजा बलभद्र इति** नाम्नेति **मृगा तस्य** राज्ञो**ऽग्रमहिषी** पट्टराज्ञी ॥१॥

तेसिं पुत्ते बलसिरी मियापुत्ते त्ति विस्सुए ।
अम्मा-पिऊण दइए जुवराया दमीसरे ॥२॥

व्याख्या—तयो राज-राज्ञ्योः **पुत्रो** बालको **बलश्री**रिति मातृपितृदत्तनामा लोके च **मृगापुत्र इति विश्रुतः** ख्यातो मातृनाम्ना कृत्वा **अम्बापित्रोर्दयितो** वल्लभो विनीतत्वात् **युवराजः** । पुनर्**दमिन** उपशमिनस्तेषामीश्वर **इवेश्वरः** सहजोपशमभावतः स्वामी भाविकालापेक्षं चैतत् ॥२॥

नंदणे सो उ पासाए कीलए सह इत्थिहिं ।
देवो दोगुंदुगो चेव निच्चं मुइअमाणसो ॥३॥

व्याख्या—नन्दने लक्षणोपेततया समृद्धिजनके **स** मृगापुत्रः **पुनः प्रासादे क्रीडति** विलसति **सह स्त्रीभिः** । **दोगुन्दकदेव इव 'चः** पूरणे' दोगुन्दकाश्च त्रायस्त्रिंशाः, तथा चाऽऽहुः—"[१]**दोगुन्दुगा य देवा निच्चं भोगपरायणा । तायत्तिंस त्ति वुच्चंति**" इति **नित्यं मुदितमानसो** हृष्टचित्तः ॥३॥

---

१. दोगुन्दकाश्च देवा नित्यं भोगपरायणाः । त्रायस्त्रिंशा इत्युच्यन्ते ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मणि-रयण-कुट्टिमतले पासायालोयणे ठिओ ।
आलोएइ नगरस्स चउक्क-तिय-चच्चरे ॥४॥

व्याख्या—स चैव क्रीडन् कदाचिन्**मणयश्च**न्द्रकान्ताद्याः, **रत्नानि** गोमेयकादीनि तैरुपलक्षितं **कुट्टिमतलं यस्मिन्** एवंविधे **प्रासादालोक**ने सौधगवाक्षे **स्थितः आलोकते** कुतूहलतः पश्यति **नगरस्य** **सुग्रीव**नाम्न**श्चतुष्क—त्रिक—चत्वराणि** प्रतीतानि ॥४॥

अह तत्थ अइच्छंतं पासई समणसंजयं ।
तव-नियम-संजमधरं सीलड्ढं गुणआगरं ॥५॥

व्याख्या—अथानन्तरं तत्रेति तेषु चतुष्कादिषु 'अइच्छंतं'ति **अतिक्रामन्तं** गच्छन्तं **पश्यति श्रमणं संयतं** तपश्च प्रतीतं नियमश्च द्रव्याद्यभिग्रहात्मकः संयमश्च सप्तदशधा तान् धारयतीति **तपो—नियम—संयमधरस्तम**त एव **शीलाढ्यं गुणानां** ज्ञानादीना**माकरस्त**म् ॥५॥

तं देहई मियापुत्ते दिट्ठीए अणिमिसाए उ ।
कहिं मन्नेरिसं रूवं दिट्ठपुव्वं मए पुरा ॥६॥

व्याख्या—तं श्रमणं संयतं 'देहइ'त्ति **पश्यति मृगापुत्रो** युवराजो **दृष्ट्या** 'तुरेवार्थे' **अनिमिषयैव क्व मन्ये** जाने **ईदृशं रूप**मा**कारो दृष्टपूर्वं** पूर्वमप्यवलोकितं **मया पुरा** पूर्वजन्मनि ॥६॥

साहुस्स दरिसणे तस्स अज्झवसाणंमि सोहणे ।
मोहं गयस्स संतस्स जाईसरणं समुप्पन्नं ॥७॥

व्याख्या—साधोर्दर्शने तस्य मृगापुत्रस्याध्यवसानेऽन्तःकरणपरिणामे **शोभने** क्षायौपशमिकभाववर्तिनि **मोहं** क्वेदं मया दृष्टमिति चिन्तासङ्घट्टजमूर्च्छारूपं **गतस्य सतो जातिस्मरणमुत्पन्नम्** ।

''देवलोए[१] चुओ संतो माणुसं भवमागओ ।
सन्निनाणसमुप्पन्ने जाई सरइ पुराणियं'' ॥१॥ ॥७॥

जाईसरणे समुप्पन्ने मियापुत्ते महिड्ढिए ।
सरइ पोराणियं जाइं सामण्णं च पुराकयं ॥८॥

---

१. देवलोकाच्च्युतः सन् मानुषं भवमागतः ।
संज्ञिज्ञानसमुत्पन्नो जातिं स्मरति पौराणिकीम् ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या–सुगमं नवरं 'सरइ' त्ति **स्मरति पौराणिकीं जातिं** जन्म **श्रामण्यं च पुरा कृतं** जन्मान्तरानुष्ठितमिति ॥८॥

अथोत्पन्नजातिस्मरणोऽसौ यत् कृतवांस्तदाह–

विसएहिं अरज्जंतो रज्जंतो संजमंमि य ।
अम्मा-पियरं उवागम्म इमं वयणमब्बवी ॥९॥

व्याख्या–सुब्व्यत्ययाद् **विषयेषु** शब्दादिष्वरज्यन्नभिष्वङ्गमकुर्वन् **रज्यन्** रागं कुर्वन् क्व ? **संयमे चाम्बा-पितरावुपागत्येदं** वक्ष्यमाणं **वचनमब्रवीदिति** ॥९॥

तदेवाह–

सुयाणि मे पंच महव्वयाणि नरएसु दुक्खं च तिरिक्खजोणिसु ।
निव्विन्नकामो मि महन्नवाओ अणुजाणह पव्वइस्सामि अम्मो ! ॥१०॥

व्याख्या–**श्रुतान्या**कर्णितानि 'अन्यजन्मनीत्याशयः' । 'मे' **मया पञ्च महाव्रतानि** हिंसाविरत्यादीनि । तथा **नरकेषु दुःखं च तिर्यग्योनिषु** च दुःखं 'उपलक्षणत्वाद् देव-मनुष्यभवयोर्दुःखं' 'श्रुतमिति योज्यम्' । ततश्च **निर्विण्णकामो** निवृत्ताभिलाषो**ऽस्मि** अहं कुतः ? महार्णव इव **महार्णवः** संसारस्तस्मादतो**ऽनुजानीता**नुमन्यध्वं 'मामिति शेषः' **प्रव्रजिष्यामि** 'अम्मो' त्ति हे **अम्ब** ! 'पूज्यतरत्वान्मातुरामन्त्रणम्' ॥१०॥

प्रव्रज्याहेतुवैराग्यमाह–

अम्म ! ताय ! मए भोगा भुत्ता विसफलोवमा ।
पच्छा कडुयविवागा अणुबंधदुहावहा ॥११॥

व्याख्या–**हे अम्ब ! हे तात ! मया भोगा भुक्ता विषफलोपमाः** । यत एते **पश्चात् कटुकविपाका** अनिष्टपरिपाका आपातमधुरा इति भावः । **अनुबन्धदुःखावहा** अनवच्छिन्न-दुःखदायिनः, यथा हि विषफलमास्वाद्यमानमादौ मधुरं विपाके च कटुकं सातत्येन दुःखदायि चैवमेतेऽपीत्याशयः ॥११॥

इमं सरीरं अणिच्चं असुइं असुइसंभवं ।
असासयावासमिणं दुक्ख-केसाण भायणं ॥१२॥

व्याख्या–**इदं** प्रत्यक्षगतं **शरीरं** देहो**ऽनित्यमशुचि** स्वाभाविकशौचरहित**म-शुचिसम्भवम**शुचिरूपशुक्र-शोणितोत्पन्नम् । तथा अशाश्वतः कथञ्चिदवस्थित्वेऽप्यनित्य आवासः 'प्रक्रमाज्जीवावस्थानं' यस्मिन्नित्य**शाश्वतावासं पुनरिद**मित्यभिधानमत्यसारत्व-

Jain Education International 2010_02   For Private & Personal Use Only   www.jainelibrary.org

सूचकं **दुःखहेतूनां क्लेशानां** ज्वरादिरोगाणां **भाजनम्** ॥१२॥

यत एवमतः—

असासए सरीरंमि रइं नोवलभामहं ।
पच्छा पुरा य चइयव्वे फेणबुब्बुयसन्निभे ॥१३॥

व्याख्या—अशाश्वते विध्वंसनशीलिनि **शरीरे** देहे **रतिं** चित्तस्वास्थ्यं **नोपलभे** न प्राप्नोमि । **पश्चाद्** भुक्तभोगावस्थायां वार्धक्यादौ **पुरा**ऽभुक्तभोगितायां **वा** बाल्यादौ **त्यक्तव्ये**ऽवश्यत्याज्ये **फेनबुद्बुदसन्निभे** क्षणदृष्टनष्टतया ॥१३॥

संसारनिर्वेदस्य हेतुमाह—

माणुसत्ते असारंमि वाही-रोगाण आलए ।
जरा-मरणघत्थंमि खणं पि न रमामहं ॥१४॥

व्याख्या—मानुषत्वे असारे व्याधयः कुष्ठाद्या **रोगा** ज्वरादयः तेषा**मालये** गृहे **जरा-मरणग्रस्ते क्षणमपि न रमे** नाभिरतिं लभेय**मह**मिति ॥१४॥

मनुष्यभवस्य निर्वेदहेतुत्वमभिधाय चातुर्गतिकसंसारस्य तदाह—

जम्मं दुक्खं जरा दुक्खं रोगाणि मरणाणि य ।
अहो ! दुक्खो हु संसारो जत्थ कीसंति जंतुणो ॥१५॥

व्याख्या—अहो ! इति जीवसम्बोधनम् । 'दुक्खो हु'त्ति **दुःखहेतुरेव संसारो** जन्मादिनिबन्धनत्वात् तस्य । **येऽत्र** चातुर्गतिके संसारे **क्लिश्यन्ति** बाधामनुभवन्ति 'जन्मादिदुःखैरेवेति गम्यम्' **जन्तवः** प्राणिनः शेषं स्पष्टम् । नवरं **जरा** वृद्धावासः । **रोगा** आतङ्काः । **मरणं** मृतिः ॥१५॥

तथा—

खेत्तं वत्थुं हिरण्णं च पुत्त-दारं च बंधवा ।
चइत्ताणं इमं देहं गंतव्वमवसस्स मे ॥१६॥

व्याख्या—क्षेत्रं, वास्तु गृहं, **हिरण्यं** रुप्यमघटितसुवर्णं च, **पुत्रं, दारा** स्त्रियः, **बान्धवा** भ्रात्रादयः, एतत् सर्वं **त्यत्क्त्वा** [**इमं देहं**] **गन्तव्यमवशेन मया** । एतेनेष्टवियोगोऽशरणत्वं च संसारान्निर्वेदहेतुरुक्तः ॥१६॥

तथा—

जहा किंपागफलाणं परिणामो न सुंदरो ।
एवं भुत्ताण भोगाणं परिणामो न सुंदरो ॥१७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—यथा किम्पाको वृक्षविशेषस्तस्य फलान्यतीव स्वादिष्टानि मृत्युकराणि च स्युः । ततो **यथा किम्पाकफलानां परिणामः** परिपाको **न सुन्दरो** न भव्यः । **एवमिति** तथा **भुक्तानां भोगानां परिणाम** इति ॥१७॥

अद्धाणं जो महंतं तु अपाहिज्जो पवज्जई ।
गच्छंतो से दुही होइ छुहा-तण्हाइपीडिओ ॥१८॥

व्याख्या—अध्वानं मार्गं **यः** पुमान् **महान्तमपाथेयो**ऽशम्बलः **प्रपद्यते**ऽङ्गीकुरुते **गच्छन्** यथा **स दुःखी भवति क्षुधा-तृष्णादिपीडितः** सन् ॥१८॥

एवं धम्मं अकाऊणं जो गच्छइ परं भवं ।
गच्छंतो से दुही होइ वाही-रोगेहिं पीडिओ ॥१९॥

व्याख्या—एवमिति यथा पान्थोऽशम्बलस्तथा पाथेयोपमं **धर्ममकृत्वा यो गच्छति परं भवं । गच्छन् स दुःखी भवति व्याधि-रोगैः पीडितः** ॥१९॥

अद्धाणं जो महंतं तु सपाहिज्जो पवज्जई ।
गच्छंतो से सुही होइ छुहा-तण्हाविवज्जिओ ॥२०॥

एवं धम्मं पि काऊणं जो गच्छइ परं भवं ।
गच्छंतो से सुही होइ अप्पकम्मे अवेयणे ॥२१॥

व्याख्या—इदं गाथाद्वयं प्राग्गाथाद्वयव्यतिरेकेण व्याख्येयम् । नवरं 'सपाहिज्जो' **सपाथेय** इति **अल्पकर्मा अवेदनः** सन् ॥२०-२१॥

धर्मकारणाभिप्रायं द्रढयति—

जहा गेहे पलित्तंमि तस्स गेहस्स जो पहू ।
सारभंडाणि नीणेइ असारं अवउज्झई ॥२२॥

व्याख्या—यथा गेहे प्रदीप्ते प्रज्वलिते सति **तस्य गृहस्य यः प्रभुः** स्वामी स **सारभाण्डानि** महामूल्यवस्त्रादीनि 'नीणेइ' त्ति **निष्काशयति** । **असारं** जरद्वस्त्रादि 'अवउज्झइ' त्ति **अपोहते** त्यजति ॥२२॥

तथा—

एवं लोए पलित्तंमि जराए मरणेण य ।
अप्पाणे तारइस्सामि तुब्भेहिं अणुमन्निओ ॥२३॥

Jain Education International 2010_02   For Private & Personal Use Only   www.jainelibrary.org

व्याख्या–एवं लोके प्रदीप्ते व्याकुलीकृते **जरया मरणेन च । आत्मानं** सार-भाण्डतुल्यं **तारयिष्यामि** प्रदीप्तलोकपारं नेष्यामि 'धर्मकरणेनेति प्रक्रमः' । असारं काम-भोगादि त्यक्ष्यामीति भावः । **युष्माभिरनुमतो**ऽभ्यनुज्ञातः ॥२३॥

एवं च तेनोक्ते माता–पितरौ यथाऽऽहतुस्तथाऽऽह–

तं बिंति अम्मा-पियरो सामन्नं पुत्त ! दुच्चरं ।
गुणाणं तु सहस्साइं धारेयव्वाइं भिक्खुणो ॥२४॥

व्याख्या–तं बलश्रियं **मृगापुत्रा**परनामकं युवराजं 'बिंति' त्ति **ब्रूतो**ऽभिधत्तो-ऽ**म्बा–पितरौ श्रामण्यं** चारित्रं **हे पुत्र ! दुश्चरम्** । यतस्तत्र **गुणानां** श्रामण्योपकारक-शीलाङ्गरूपाणां **सहस्राणि** 'तुरेवार्थे' **धारयितव्यान्ये**वात्मनि स्थाप्यानि **भिक्षोरि**ति सुब्व्यत्ययाद् भिक्षुणा सता ॥२४॥

तथा

समया सव्वभूएसु सत्तु-मित्तेसु वा जगे ।
पाणाइवायविरई जावज्जीवाए दुक्करं ॥२५॥

व्याख्या–समता राग–द्वेषाकरणेन तुल्यता **सर्वभूतेषु** समस्तजन्तुषु **शत्रु–मित्रेषु वा जगति** लोकेषु त्रिषु । अनेन सामायिकमुक्तम् । **प्राणातिपातविरतिः** प्रथमव्रतरूपा **यावज्जीवं दुष्करं** दुरनुचरं 'एतदिति शेषः' ॥२५॥

तथा–

निच्चकालप्पमत्तेणं मुसावायविवज्जणं ।
भासियव्वं हियं सच्चं निच्चाउत्तेण दुक्करं ॥२६॥

व्याख्या–नित्यकालाप्रमत्तेनेत्यप्रमत्तग्रहणम्, निद्रादिप्रमादतो हि मृषाऽपि भाषेतेति **नित्यायुक्तेन** सदोपयुक्तेनानुपयुक्तस्यान्यथाऽपि भाषणसम्भवादेतच्च **दुष्करं** शेषं स्पष्टम् । यच्चान्वय–व्यतिरेकाभ्यामेकस्याप्यर्थस्याभिधानं तत् स्पष्टार्थमदुष्टमेवैवं सर्वत्र भावनीयम् ॥२६॥

तथा–

दंतसोहणमाइस्स अदत्तस्स विवज्जणं ।
अणवज्जेसणिज्जस्स गिण्हणा अवि दुक्करं ॥२७॥

व्याख्या–'मकारोऽलाक्षणिकोऽपिर्गम्यः' ततो **दन्तशोधनादेर**प्यतितुच्छस्यास्ता-मन्य**स्यादत्तस्य विवर्जनम्** । तथानवद्यस्यैषणीयस्य 'दत्तस्यापीति गम्यम्' । 'गिण्हण' त्ति **ग्रहणमिति** तृतीयव्रतं **दुष्करमिति** ॥२७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

विरई अबंभचेरस्स काम-भोगरसन्नुणा ।
उग्गं महव्वयं बंभं धारेयव्वं सुदुक्करं ॥२८॥

व्याख्या—विरतिर्निवृत्तिरब्रह्मचर्यस्य । काम-भोगाश्च रसाश्च **काम-भोग-रसा-स्तज्ज्ञेन** । तदज्ञस्य हि तदनवगमात् तद्विषयाभिलाष एव न भवेत् । तथा च सुकरत्वमपि स्यादित्याशयेनैतद्विशेषणम् । ततश्च **उग्रं महाव्रतं ब्रह्मचर्यरूपं धारयितव्यं सुदुष्कर**मिति ॥२८॥

तथा—

धण-धन्न-पेसवग्गेसु परिग्गहविवज्जणं ।
सव्वारंभपरिच्चाओ निम्ममत्तं सुदुक्करं ॥२९॥

व्याख्या—धन-धान्य-प्रेष्यवर्गेषु परिग्रहः सत्सु स्वीकारस्त**द्विवर्जनम्** । **सर्वे** ये **आरम्भा** द्रव्योत्पादनव्यापारा**स्तत्परित्यागः** । 'चस्य गम्यत्वाद्' **निर्ममत्वं च** सर्वत्र ममेति बुद्धिपरिहार इत्येतदपि **दुष्करम्** ॥२९॥

चउव्विहे वि आहारे राईभोयणवज्जणं ।
सन्निहीसंचओ चेव वज्जेयव्वो सुदुक्करं ॥३०॥

व्याख्या—चतुर्विधस्याप्याहारे रात्रिभोजनवर्जनम् । सन्निधिर्घृतादेरुचितकालातिक्रमेण स्थापनं स चासौ सञ्चयश्च **सन्निधिसञ्चयश्चैव वर्जयितव्य** एतत् **सुदुष्कर**मिति ॥३०॥

एतेन रात्रिभोजनषष्ठ—पञ्चमहाव्रतदुष्करतोक्ता, अथ परीषहादिदुष्करतामाह—

छुहा तण्हा य सीउण्हं दंस-मसगवेयणा ।
अक्कोसा दुक्खसिज्जा य तणफासा जल्लमेव य ॥३१॥
ताडणा तज्जणा चेव वह-बंध-परीसहा ।
दुक्खं भिक्खायरिया जायणा य अलाभ य ॥३२॥

अनयोर्व्याख्या—क्षुधा, तृषा, शीतोष्णे, दंश—मशकयोर्वेदना तद्भक्षणोत्था दुःखानुभवरूपा पीडा, **आक्रोशा** अधिक्षेपवचनानि, **दुःखशय्या** विषमोन्नतत्वादिना दुःखहेतुर्वसतिः, तृणानां स्पर्श**स्तृणस्पर्शः, जल्लो** देहमलः '**एव** निश्चयेन, **चः** पूरणे' **ताडना** करादिभिराहननम्, **तर्जना** अङ्गुलिभ्रमण—भ्रूविक्षेपादिरूपा, **वधः** शूल—लकुटादिप्रहारः, **बन्धो** मयूरादिबन्धनम्, **भिक्षाचर्या** भिक्षाटनं, **याञ्चा** प्रार्थना, **अलाभश्च** । एते परीषहाः '**च**शब्दोऽत्रानुक्तशेषपरीषहसङ्ग्रहार्थः' । **दुःख**शब्दश्चेह क्षुदुःखमित्यादि प्रत्येकं योज्यः ॥३१-३२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कावोया जा इमा वित्ती केसलोओ य दारुणो ।
दुक्खं बंभव्वयं घोरं धारेउं अहमप्पणो ॥३३॥

व्याख्या—कापोता: पक्षिविशेषास्तेषामियं **कापोती येयं वृत्ति**र्निर्वहणोपाय: । ते हि नित्यं शङ्किता: कण—कीटादिग्रहणे प्रवर्तन्ते, एवं भिक्षुरप्येषणादोषशङ्क्येव भिक्षादौ प्रवर्तते । **केशलोचश्च दारुण:** 'उपलक्षणं चैतत् समस्तोत्तरगुणानाम्' । अथ च **ब्रह्मव्रतं घोरं** रौद्रं **धारयितुं** पालयितु**ममहात्मना दु:ख**मिति दुष्करमेव । पुनर्ब्रह्मव्रतस्य दुष्करत्वाभिधानमतिदुर्धरत्वख्यापनार्थम् ॥३३॥

उपसंहारमाह—

सुहोईओ तुमं पुत्ता ! सुकुमालो य सुमज्जिओ ।
न हु सी पभू तुमं पुत्ता ! सामण्णमणुपालिउं ॥३४॥

व्याख्या—सुखस्योचितो योग्य: **सुखोचितस्त्वं पुत्र ! सुकुमारो**ऽकठिनदेह: 'सुमज्जिओ'त्ति **सुमज्जित:** सुष्ठुस्नापित: 'सर्वनेपथ्योपलक्षणमिदम्' । 'न हु सि' त्ति **नैवाऽसि** भवसि **प्रभु:** समर्थ**स्त्वं पुत्र ! श्रामण्यं** प्रागुक्तगुणरूपं **अनुपालयितुमि**ति ॥३४॥

एतदेव समर्थयति—

जावज्जीवमविस्सामो गुणाणं तु महब्भरो ।
गरुओ लोहभारु व्व जो पुत्ता ! होइ दुव्वहो ॥३५॥

व्याख्या—यावज्जीवमविश्रामो यत्रोद्धृते न विश्रम्यते । **गुणानां** यतिसम्बन्धिनां **तु** पुन**र्महाभरो** महासमूहो **गुरुको लोहभार इव य: पुत्र ! भवति दुर्वह:** 'स सोढव्य इति शेष:' ॥३५॥

आगासे गंगसोउ व्व पडिसोउ व्व दुत्तरो ।
बाहाहिं सागरो चेव तरियव्वो गुणोदही ॥३६॥

व्याख्या—आकाशे गङ्गास्त्रोतोवत् 'दुस्तर इति योज्यते' लोकरूढ्या चैतदुक्तम् । तथा **प्रतिस्त्रोतोवद्** यथा प्रतीपजलप्रवाहो **दुस्तरो** दु:खेन तीर्यते इति । तथा **बाहुभ्यां सागरवद् दुस्तरो** य: स **तरितव्य:** परपारगमनायावगाहयितव्य: । कोऽसौ ? गुणा ज्ञानादयस्ते उदधिरिव **गुणोदधि:** स **दुस्तर:** काय-वाग्-मनोनियन्त्रणेनैव तदुत्तरणात्, तस्य च दुष्करत्वात् ॥३६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

वालुयाकवले चेव निरस्साए उ संजमे ।
असिधारागमणं चेव दुक्करं चरिउं तवो ॥३७॥

व्याख्या—वालुकाकवल इव निरास्वादः संयमो विषयगृद्धानां वैरस्यहेतुत्वात् । **असिधारागमनमिव तपोऽपि चरितुं दुष्करम्** ॥३७॥

अहीवेगंतदिट्ठीए चरित्ते पुत्त ! दुच्चरे ।
जवा लोहमया चेव चावेयव्वा सुदुक्करं ॥३८॥

व्याख्या—अहिरिवैकान्ता चाऽसौ दृष्टिश्चै**कान्तदृष्टि**स्तयाऽनन्याक्षिप्तयाऽहिपक्षे दृशाऽन्यत्र तु बुद्ध्योपलक्षितमेकान्तदृष्टिकं **चारित्रं पुत्र ! दुश्चरं** विषयेभ्यो मनसो दुर्निवारत्वादिति भावः । **एव**कारस्योपमार्थत्वात् । **यवा लोहमया इव चर्वयितव्याः** लोहमययवचर्वणवत् **सुदुष्करं** चारित्रमिति ॥३८॥

जहा अग्गिसिहा दित्ता पाउं होइ सुदुक्करं ।
तह दुक्करं करेउं जे तारुण्णे समणत्तणं ॥३९॥

व्याख्या—यथाग्निशिखाग्निज्वाला **दीप्ता**त्युज्ज्वला **पातुं भवति सुदुष्करं** 'नृभिरिति गम्यम्' । 'सर्वधात्वर्थत्वात् करोतेः **सुदुःशका** आर्षत्वादनुस्वारो लिङ्गव्यत्ययश्च' । **तथा तारुण्ये श्रामण्यं कर्तुं दुष्कर**मिति ॥३९॥

जहा दुक्खं भरेउं जे होइ वायस्स कोत्थलो ।
तहा दुक्खं करेउं जे कीवेणं समणत्तणं ॥४०॥

व्याख्या—यथा दुःखं भर्तुं 'जे पादपूरणे' भवति 'वायस्स' त्ति विभक्तिव्यत्ययाद् **वातेन** 'कोत्थलो' **वस्त्र-कम्बलादिमयः**, चर्ममयो हि सुखेन भ्रियते इति । **तथा क्लीबेन** कातरेण पुरुषेण **श्रामण्यं** कर्तुं दुष्करमिति ॥४०॥

जहा तुलाए तोलेउं दुक्करं मंदरो गिरि ।
तहा निहुयं निस्संकं दुक्करं समणत्तणं ॥४१॥

व्याख्या—यथा 'मन्दरो' **मेरुगिरिस्तुलया तोलयितुं दुष्करः** । तथा **निभृतं** निश्चलं **निःशङ्कं** शङ्कादिदोषरहितं **दुष्करं श्रमणत्वमिति** ॥४१॥

जहा भुयाहिं तरिउं दुक्करं रयणागरो ।
तहा अणुवसंतेणं दुक्करं दमसायरो ॥४२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—**यथा भुजाभ्यां** बाहुभ्यां **तरीतुं रत्नाकरः** समुद्रो **दुष्करस्तथानुपशान्तेनो**त्कटकषायेण **दमसागर** इति पूर्वं सर्वगुणोदधेर्दुस्तरत्वमुक्तमिह तूपशमसागरस्येति न पौनरुक्त्यम् ॥४२॥

भुंज माणुस्सए भोए पंचलक्खणए तुमं ।
भुत्तभोगी तओ जाया ! पच्छा धम्मं चरिस्ससि ॥४३॥

व्याख्या—यतश्चैवं तारुण्ये दुष्करा प्रव्रज्यातो **भुङ्क्ष्व मानुष्यकान् भोगान् पञ्चलक्षणकान्** शब्दादिपञ्चस्वरूपान् । **ततो भोगभुक्तेर**नन्तरं **हे जात** ! पुत्र ! **पश्चा**दिति वार्धके **धर्मं** चारित्रं 'चरिस्ससि' त्ति **चरेः** इति ॥४३॥

अत्रेत्थं मात—पितृवचनमाकर्ण्य यथा मृगापुत्र उक्तवांस्तथाऽऽह—

सो बिंतम्मा-पियरो एवमेयं जहा फुडं ।
इह लोए निप्पिवासस्स नत्थि किंचि वि दुक्करं ॥४४॥

व्याख्या—**स मृगापुत्रः** 'बिंति' त्ति वचनव्यत्ययाद् **ब्रूतेऽम्बापितरौ एवमिति** यथोक्तं भवद्भ्यां **तथैतत्** प्रव्रज्यादुष्करत्वम् । **यथा स्फुटम**वितथं तथा**पीह लोके निष्पिपासस्य** निःस्पृहस्य **नास्ति किञ्चिद् दुष्कर**मिति दुरनुष्ठेयं व्रतादि, भोगादिसस्पृहतायामेवास्य दुष्करत्वादिति भावः ॥४४॥

निःस्पृहताहेतुमाह—

सारीर-माणसा चेव वेयणाओ अणंतसो ।
मए सोढाओ भीमाओ असइं दुक्ख-भयाणि य ॥४५॥

व्याख्या—**शारीरा मानस्यश्च वेदना अनन्तशो मया सोढा भीमा** रौद्राः । **असकृन्** निरन्तरं दुःखोत्पादकानि भयानि राजविड्वरादीनि **दुःख-भयानि** 'सोढानीति योज्यम्' ॥४५॥

तथा—

जरा-मरणकंतारे चाउरंते भयागरे ।
मए सोढाणि भीमाणि जम्माणि मरणाणि य ॥४६॥

व्याख्या—जरा-मरणाभ्यामतिगहनतया कान्तारमिव **जरा-मरणकान्तारं तस्मिंश्च**त्वारो देवादिभवा अन्ता अवयवा यस्याऽसौ **चतुरन्तः** संस्तारस्त**स्मिन् भयाकरे** भयानके तत्र **मया सोढानि भीमानि** नानादुःखजनकत्वेन रौद्राणि **जन्मानि मरणानि च** ॥४६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जहा इहं अगणी उण्हो इत्तोऽणंतगुणो तहिं ।
नरएसु वेयणा उण्हा अस्साया वेइया मए ॥४७॥

व्याख्या—यथेह मनुष्यलोके**ऽग्निरुष्णो**ऽनुभूयते । **अत** इत्यऽनुभूयमानाद-**ऽनन्तगुणः** । 'तर्हिं' ति **तेषु** येष्वहमुत्पन्न इति भावः । तत्र च बादराग्नेरभावात् पृथ्व्या एव तादृशः स्पर्श इति गम्यम् । अतश्चोष्णानुभवात्मकत्वे**नासाताद्**ःखरूपात्रत्याग्नेरनन्तगुणा **नरकेषूष्णा वेदना वेदिता मये**ति ॥४७॥

जहा इमं इहं सीयं इत्तोऽणंतगुणं तहिं ।
नरएसु वेयणा सीया अस्साया वेइया मए ॥४८॥

व्याख्या—यथैतदिह शीतं माघादौ शेषं प्राग्वत् ॥४८॥

कंदंतो कंदुकुंभीसु उड्ढपाओ अहोसिरो ।
हुयासणे जलंतंमि पक्कपुव्वो अणंतसो ॥४९॥

व्याख्या—क्रन्दन् कन्दकुम्भीषु पाकभाजनविशेषरूपासु लोहमयी**षूर्ध्वपादोऽधः-शिरा** देवमायाकृते **हुताशने**ऽग्नौ **ज्वलत्यनन्तशो**ऽहं **पक्कपूर्वः** ॥४९॥

महादवग्गिसंकासे मरुम्मि वइरवालुए ।
कलंब-वालुयाए य दड्ढपुव्वो अणंतसो ॥५०॥

व्याख्या—यद्यपीहत्याग्नेरऽनन्तगुण एव तत्रोष्णः पृथिव्यनुभावस्तथापीहान्यस्या-भावान्**महादवाग्निसङ्काशे** इत्युक्तम् । **मरा**विति 'तात्स्थ्यात् तद्व्यपदेशसम्भवात्' मरुवालुकासदृशे । तथा **वज्रवत्** कर्कशा **वालुका** यत्र नरकप्रदेशे **तस्मिन्** । तथा **कदम्बवालुका** नदीपुलिनवालुका तदुपमाने एवंविधे महादवाग्न्यादिसदृशे प्रदेशे-**ऽनन्तशो**ऽहं **दग्धपूर्वः** ॥५०॥

रसंतो कंदुकुंभीसु उड्ढं बद्धो अबंधवो ।
करवत्तकरकयाईहिं छिन्नपुव्वो अणंतसो ॥५१॥

व्याख्या—पूर्वं **कन्दुकुम्भीषु** पूर्वोक्तासु **रसन्**-आरटन् । तत **ऊर्ध्व**मुपरि वृक्ष-शाखादौ **बद्धो** माऽयमितोऽनङ्क्षीदिति **अबान्धवो**ऽशरणोऽहं **करपत्र—क्रकचादि-भिरनन्तशः छिन्नपूर्वः** ॥५१॥

अइतिक्खकंटकाइन्ने तुंगे सिंबलिपायवे ।
खवियं पासबद्धेणं कड्ढोकड्ढाहिं दुक्करं ॥५२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—अतितीक्ष्णकण्टकाकीर्णे तुङ्गे शाल्मलीपादपे पाशबद्धेन मया **क्षपितं** निजीर्णं 'पापमिति गम्यते' 'कड्ढोकड्ढाहिं' ति इतस्ततः **कर्षणाऽपकर्षणैः** परमाधार्मिककृतै**र्दुष्करमि**ति दुःसहम् ॥५२॥

महाजंतेसु उच्छू वा आरसंतो सुभेरवं ।
पीलिओ मि सकम्मेहिं पावकम्मो अणंतसो ॥५३॥

व्याख्या—महायन्त्रेषु 'उच्छू व' त्ति 'वा इवार्थे' **इक्षुरिवारसन्ना**ऽक्रन्दन् **सुभैरवं** भयानकं **पीलितोऽस्मि स्वकर्मभि**र्हिंसादिरूपैः **पापाकर्मा**हम**ऽनन्तशः** ॥५३॥

कूवंतो कोलसुणएहिं सामेहिं सबलेहि य ।
पाडिओ फालिओ छिन्नो विप्फुरंतो अणेगसो ॥५४॥

व्याख्या—कूजनातुरशब्दं कुर्वन् 'कोलसुणएहिं' ति **सूकरश्वरूपधारिभिः श्यामैः शबलैः** परमाधार्मिकैः **पातितो** भुवि, **पाटितो** जीर्णवस्त्रवत् **छिन्नो** वृक्षवदुभयदंष्ट्राभि**र्विस्फुरन्** इतस्ततश्चलन्न**ऽनेकशः** ॥५४॥

असीहिं अयसिवण्णाहिं भल्लीहिं पट्टिसेहि य ।
छिन्नो भिन्नो विभिन्नो य ओइन्नो पावकम्मुणा ॥५५॥

व्याख्या—असिभिर्खड्गैर**ऽतसीपुष्पवर्णभर्ल्लीभिः पट्टिशैश्च** प्रहरणविशेषै**श्छिन्नो** द्विधाकृत ऊर्ध्वं, **भिन्न**स्तिर्यक्, **विभिन्नः** श्लक्ष्णखण्डीकृतो**ऽवतीर्णो** 'नरके इति गम्यते' **पापकर्मणा** हेतुभूतेन ॥५५॥

अवसो लोहरहे जुत्तो जलंते समिलाजुए ।
चोइओ तोत्तजुत्तेहिं रोज्झो वा जह पाडिओ ॥५६॥

व्याख्या—अवशः परवशो **लोहरथे** लोहमयशकटे 'जुत्तो' त्ति युजेरन्तर्भूतेनार्थत्वाद् **योजितः** परमाधार्मिकै**र्ज्वलति** दीप्यमाने, कदाचिद् दाहभीत्या ततो नश्येदऽपीत्याऽह-**समिलो**पलक्षितं **युगं यस्मिन्** स तथा तस्मिन् 'चोइओ' त्ति **नोदितः** प्रेरित**स्तोत्रयोक्त्रैः** प्राजनकबन्धनविशेषैः 'मर्माहननादिनेति गम्यम्' । '**वा**शब्दः समुच्चये, **यथे**त्यौपम्ये' ततो 'रोज्झः' **पशुविशेष** इव **पातितो वा** 'लकुटादिपिट्टनेनेति गम्यते' ॥५६॥

हुयासणे जलंतंमि चियासु महिसो विव ।
दड्ढो पक्को अवसो पावकम्मेहिं पाविओ ॥५७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—**हुताशने ज्वलति** सति क्व ? इत्याह—**चितासु** परमाधार्मिकनिर्मितासु **महिष इव दग्धो** भस्मसात् कृतः, 'पक्को' **भटित्रीकृतः**, 'पावितो' त्ति पापमस्यास्तीति **पापिकः** ॥५७॥

बला संडासतुंडेहिं लोहतुंडेहिं पक्खिहिं ।
विलुत्तो विलवंतो हं ढंकगिद्धेहिंऽणंतसो ॥५८॥

व्याख्या—**बलात्** हठात् **सन्दंशाः** प्रतीतास्तदाकृतीनि **तुण्डानि** मुखानि येषां ते तथा **तैर्लोहवन्निष्ठुरतया तुण्डानि** येषां ते **तैः पक्षिभिर्ढङ्कगृद्धैरिति** योगः । **विलपन् विलुप्तो** विविधं छिन्नः । एते च वैक्रिया एव तत्र तिरश्चामभावात् ॥५८॥

तस्य चैवं कदर्थ्यमानस्य तृषोत्पत्तौ का वार्तेत्याह—

तण्हाकिलंतो धावंतो पत्तो वेतरणिं नइं ।
जलं पाहिंति चिंतंतो खुरधाराहिं विवाईओ ॥५९॥

व्याख्या—**तृष्णया क्लान्तो** ग्लानिं गतो **धावन् प्राप्तो वैतरणीं नदीं जलं पास्यामीति चिन्तयन्** क्षुरधाराभिरिव **क्षुरधाराभिः** 'जलोर्मिभिरिति शेषः' **विपादित** इत्यर्थः ॥५९॥

उण्हाभितत्तो संपत्तो असिपत्तं महावणं ।
असिपत्तेहिं पडंतेहिं छिन्नपुव्वो अणंतसो ॥६०॥

व्याख्या—**उष्णेन** वज्रवालुकादिसम्बन्धितापेनाऽ**भितप्तः सम्प्राप्तो**ऽसयः खड्गा-स्तद्वद् भेदकतया पत्राणि यस्मिंस्तदऽ**सिपत्रं महावनं** तत्र तादृशैर**सिपत्रैः पतद्भिश्छिन्न-पूर्वोऽनन्तशः** ॥६०॥

मुग्गरेहिं मुसंढीहिं सूलेहिं मुसलेहि य ।
गयासं भग्गगत्तेहिं पत्तं दुक्ख अणंतसो ॥६१॥

व्याख्या—**मुद्गरादिभिरायुधविशेषैः** । गता नष्टा आशा रक्षाविषया यत्र तद् **गताशं** यथा स्यादेवं 'भग्गगत्तेहिं' ति **भग्नगात्रेण** मया **प्राप्तं दुःखमनन्तश** इति ॥६१॥

खुरेहिं तिक्खधाराहिं छुरियाहिं कप्पणीहि य ।
कप्पिओ फालियो छिन्नो उक्कत्तो य अणेगसो ॥६२॥

व्याख्या—**क्षुरादिभिः कल्पितो** वस्त्रवत् **पाटित** ऊर्ध्वं द्विधाकृतः, **छिन्नस्तिर्यक्** खण्डितः, **उत्कृत्तस्त्वग्व्यपनयनेन** ॥६२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पासेहिं कूडजालेहिं मिओ वा अवसो अहं ।
वाहिओ बद्ध-रुद्धो य विवसो चेव विवाईओ ॥६३॥

व्याख्या—पाशैः कूटजालैः प्रतीतैर्बन्धनविशेषै**र्मृग** इवाऽवशः परवशो**ऽहं वाहितो** विप्रलब्धः, **बद्धो** बन्धनेन, **रुद्धो** बहिःप्रचारनिषेधेन, विशेषेण वशः परमाधार्मिकाणामित **विविश एवाहं विपादितो** विनाशितः ॥६३॥

गलेहिं मगरजालेहिं मच्छो वा अवसो अहं ।
उल्लिओ फालिओ गहिओ मारिओ य अणंतसो ॥६४॥

व्याख्या—गलैर्बडिशै**र्मकरै**र्मकररूपैः परमाधार्मिकै**र्जालै**स्तत्कृतैस्तयोर्द्वन्द्वः । ततो यथासङ्ख्यं **मत्स्य इवाऽवशोऽहं** परवशोऽहं 'उल्लिओ'त्ति **उल्लिखितः, पाटितः, गृहीतश्च, मारितश्च** सर्वैरपि ॥६४॥

विदंसएहिं जालेहिं लेप्पाहिं सउणो विव ।
गहिओ लग्गो य बद्धो य मारिओ य अणंतसो ॥६५॥

व्याख्या—विशेषेण दशन्तीति **विदंशकाः** श्येनादयस्तै**र्जालै**स्तादृग्बन्धनैः 'लेपाहिं'ति **लेपै**र्वज्रलेपादिभिः श्लेषद्रव्यैः 'सउणो विव'त्ति **शकुन इव** पक्षीव यथाक्रमं **गृहीतः, लग्नश्च, श्लिष्टश्च, मारितश्च** सर्वैरपि ॥६५॥

कुहाड-फरसुमाईहिं वड्ढइहिं दुमो विव ।
कुट्टिओ फालिओ छिन्नो तच्छिओ य अणंतसो ॥६६॥

व्याख्या—कुठार-पर्श्वादिभिः कृत्वा **वर्धकिभिर्द्रुम इव कुट्टितः** सूक्ष्मखण्डीकृतः, **पाटितः, छिन्नश्च** प्राग्वत्, **तक्षितश्च** त्वगपनयनतः ॥६६॥

चवेड-मुट्ठिमाईहिं कुमारेहिं अयं पिव ।
ताडिओ कुट्टिओ भिन्नो चुन्निओ य अणंतसो ॥६७॥

व्याख्या—चपेटा-मुष्ट्यादिभिः कुमारैररयस्कारैः 'अयं पिव'त्ति 'पिव मिव विव वा इवार्थे' इत्युक्तत्वात् **अय इव** 'घनादिभिरिति गम्यम्' । **ताडित** आहतः, **कुट्टितश्चि**पिटीकृतः, **भिन्नश्छिन्नश्चूर्णितः** श्लक्ष्णखण्डीकृतः 'प्रक्रमात् परमाधार्मिकैः' **अनन्तशः** ॥६७॥

तत्ताइं तंब-लोहाइं तउयाइं सीसगाणि य ।
पाइओ कलकलंताइं आरसंतो सुभेरवं ॥६८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—तप्तानि ताम्रादीनि वैक्रियाणि पृथिव्यनुभावभूतानि वा 'कलकलंताइं'ति **अतिक्वाथतः कलकलशब्दं कुर्वन्ति । आरसन्**-आरटन् **सुभैरवं** महाभयकारी अहं **पायितः** 'परमाधार्मिकैरिति प्रक्रमः' ॥६८॥

तुहं पियाइं मंसाइं खंडाइं सोल्लगाणि य ।
खाविओ मि समंसाइं अग्गिवन्नाइं णेगसो ॥६९॥

व्याख्या—तव प्रियाणि मांसानि खण्डानि खण्डरूपाणि 'सोल्लगाणि'त्ति **शूले दत्त्वा भटित्रीकृतानि** 'स्मारयित्वेति शेषः' **खादितोऽस्मि स्वमांसानि** मच्छरीरादेवोत्कृत्योत्कृत्य ढौकिता**न्यग्निवर्णान्य**ऽतितप्ततयाऽग्निच्छायानि परमाधार्मिकैर्विकृत्या**ऽनेकशो**ऽनेकवारानिति ॥६९॥

तुहं पिया सुरा सीहु मेरओ य महूणि य ।
पाइओ मि जलंतीउ वसाउ रुहिराणि य ॥७०॥

व्याख्या—तव प्रियाणि सुरादीनि मद्यविशेषरूपाणि 'स्मारयित्वेति गम्यम्' **पायितोऽस्मि** 'जलंतीउ' त्ति **ज्वलन्तीरत्युष्णतया वशा रुधिराणि च** ज्वलन्तीति लिङ्गव्यत्ययेन योजनीयमिति ॥७०॥

नरकवक्तव्योपसंहारमाह—

निच्चभीएण तत्थेण दुहिएण वहिएण य ।
परमा दुहसंबद्धा वेयणा वेइया मए ॥७१॥

व्याख्या—नित्यभीतेन त्रस्तेनोद्विग्नेन दुःखितेन व्यथितेन च कम्पमानसर्वाङ्गोपाङ्गतया चलितेन **परमा** प्रकृष्टा **दुःखसम्बद्धा वेदना वेदितानुभूता मयेति** ॥७१॥

तिव्वचंडप्पगाढाओ घोराओ अइदुस्सहा ।
महब्भयाओ भीमाओ नरएसुं वेइया मए ॥७२॥

व्याख्या—तीव्रा अनुभावतोऽत एव **चण्डा** उत्कटाः **प्रगाढा** गुरुस्थितिकास्तत एव **घोरा** रौद्रा **अतिदुःसहा** अत्यन्तदुरध्यवसाया अत एव **महाभया भीमा** श्रूयमाणा अपि भयप्रदा **नरकेषु वेदिता** अनुभूता 'वेदना इति प्रक्रमः' [**मयेति**] ॥७२॥

कथं तासां तीव्रादिरूपत्वमित्याह—

जारिसा माणुसे लोए ताया ! दीसंति वेयणा ।
इत्तो अणंतगुणिया नरएसु दुक्खवेयणा ॥७३॥

Jain Education International 2010_02	For Private & Personal Use Only	www.jainelibrary.org

व्याख्या–यादृश्यो मानुषे लोके हे तात ! दृश्यन्ते वेदनास्ताभ्योऽनन्तगुणिता नरकेषु दुःखवेदना ।।७३।।

अथ सर्वगतिवेदनानुभवमाह–

सव्वभवेसु असाया वेयणा वेइया मए ।
निमिसंतरमित्तं पि जं साया नत्थि वेयणा ।।७४।।

व्याख्या–सर्वभवेष्वसाता वेदना दुःखवेदना **वेदिता मया निमेषो**ऽक्षिमीलनं **तस्यान्तरं** व्यवधानं यावता कालेनासौ भूत्वा पुनर्भवति तावत्कालमपि । **यद्** यस्मात् **साता** सुखरूपा नास्ति **वेदना** वैषयिकसुखस्याऽपीर्ष्याद्यनेकदुःखानुविद्धत्वाद् विपाकदारुणत्वाच्च । अयमाशयो योऽहं निमेषमात्रमपि सुखं न लब्धवान् , स तत्त्वतः कथं सुखोचितः सुकुमालो वेति ? कथं वा तस्य दुष्करा प्रव्रज्या ? अतोऽसौ मया ग्राह्यैवेति ।।७४।।

ततः पितरौ यथाऽऽहतुस्तथाऽऽह–

तं बिंतम्मा-पियरो छंदेण पुत्त ! पव्वया ।
नवरं पुण सामन्ने दुक्खं निप्पडिकम्मया ।।७५।।

व्याख्या–तं मृगापुत्रं **ब्रूतोऽम्बा-पितरौ छन्दसा** स्वकीयाभिप्रायेण **हे पुत्र ! प्रव्रज** दीक्षितो भव । **नवरं पुनः श्रामण्ये दुःखं** दुःखहेतु**र्निष्प्रतिकर्मता** रोगादौ चिकित्सा-ऽकरणरूपेति ।।७५।।

पुनः पुत्रवचनं ससम्बन्धं प्राह–

सो बिंतम्मा-पियरो एवमेयं जहा फुडं ।
पडिकम्मं को कुणई अरण्णे मिय-पक्खिणं ? ।।७६।।

व्याख्या–स मृगापुत्रोऽम्बा-पितरौ ब्रूते । यथैवमेतन्निष्प्रतिकर्मताया यद् दुःखरूपत्वमुक्तं युवाभ्यां तत् **स्फुटं** प्रगटमवितथं परं परिभाव्यतामिदम् । **परिकर्म** रोगचिकित्सारूपं **कः करोति** ? न कश्चिदित्यर्थः । क्व ? **अरण्ये** केषां ? **मृगपक्षिणाम्** अथ चैतेऽपि जीवन्ति विचरन्ति च । ततः किमस्या दुःखरूपत्वमिति भावः ।।७६।।

यतश्चैवमतः–

एगभूओ अरण्णे वा जहा उ चरई मिगो ।
एवं धम्मं चरिस्सामि संजमेण तवेण य ।।७७।।

व्याख्या–एकभूत एकत्वं प्राप्तोऽरण्ये **'वा** पूरणे' 'जहा उ' त्ति **यथैव**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मृगश्चरति । एवमित्येकभूतः **संयमेन तपसा** हेतुभूतेन **धर्मं चरिष्यामि** ॥७७॥

जया मियस्स आयंको महरन्नंमि जायई ।
अच्छंतं रुक्खमूलंमि को णं ताहे विगच्छई ॥७८॥

व्याख्या–यदा मृगस्यातङ्क आशुघाती रोगो **महारण्ये जायते** । 'अच्छंतं' ति **तिष्ठन्तं वृक्षमूले क एतं तदा**तङ्कोत्पत्तिकाले **चिकित्सत्यौ**षधादिना नीरोगं कुरुते ? न कश्चिदित्यर्थः । महारण्य इत्यऽत्र महाग्रहणं लघुन्यरण्ये कदाचित् कश्चित् कृपातस्तिरश्च-श्चिकित्सेदपीत्यत्र दृष्टान्तः–

सन्माकन्दवसन्तश्रीश्री**वसन्तपुरे**ऽभवत् ।
चिकित्साकर्मनिष्णातो **धनञ्जय**भिषग्वरः ॥१॥

युग्मिनौ तस्य जज्ञाते **सीता-पाता**ऽभिधौ सुतौ ।
पाल्यमानौ क्रमात् पञ्चवर्षीयांसौ बभूवतुः ॥२॥

पितर्युपरते दैवान्निर्विद्यौ चिन्तयाऽञ्चितौ ।
मातुर्वचनतः काश्यां गतौ तौ मातुलान्तिके ॥३॥

वाग्भट-सुश्रुत-चरकप्रमुखग्रन्थानऽधीत्य तत्पार्श्वे ।
कृतकृत्यौ तं पृष्ट्वा प्रस्थितवन्तौ निजं गेहं ॥४॥

मार्गमतिक्रममाणौ क्रमशः प्राप्तावरण्यकं तौ तु ।
चक्षुर्विकलं सिंहं दृष्ट्वाऽन्योऽन्यं च वार्तयतः ॥५॥

"कनीयानूचिवान् ज्येष्ठं भ्रातरेतस्य चक्षुषी ।
उद्घाट्ये विद्याप्रमाण्यादुपकारः कृतो भवेत् ॥६॥

परोपकारः पुण्याय यतो हि श्रूयते श्रुतौ ।
ज्यायानाऽहोपकारोऽपि कृतः पात्रे शुभप्रदः ॥७॥

पयः सर्पमुखे क्षिप्तं विषं स्यान्मृत्युदं यथा ।
उपकारः कृतोऽपात्रे स्यात् तथाऽनर्थदायकः ॥८॥

पुनः कनिष्ठ आचष्ट भ्रातरौदार्यधीभृताम् ।
पात्रापात्रविचारो हि नौचितीमञ्चति स्फुटम्" ॥९॥

उक्तं हि–

अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानां तु वसुधैव कुटुम्बकम् ॥१०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सीताकस्तु महावृक्षं चटित्वा लघु तस्थिवान् ।
पाताको भेषजेनाऽश्वाऽनञ्ज हर्यक्षचक्षुषी ॥११॥
सज्जाक्षो हरिरुत्तस्थौ क्षुत्-पिपासाऽर्दितो भृशम् ।
पाताकं पातयित्वोर्व्यां फालेनात्तुं प्रवृत्तवान् ॥१२॥
स लघुर्निर्विचारत्वात् सञ्जातो दुःखभाजनम् ।
वृद्धस्तु दीर्घदर्शित्वात् सौख्येनाऽस्थाद् गृहं गतः ॥१३॥
एवममहत्यऽरण्ये तिर्यग्रोगप्रतिक्रियाकर्ता ।
सम्भाव्यतेऽपि कश्चिन्न पुनर्विजने महाऽरण्ये ॥१४॥

इति कथा ॥७८॥

को वा से ओसहं देइ को वा से पुच्छई सुहं ? ।
को से भत्तं व पाणं वा आहरित्तु पणामए ? ॥७९॥

व्याख्या—चिकित्सके चासति **को वा** 'से' **तस्य** मृगादे**रौषधं ददाती**त्यादि-रुत्तरोत्तराप्राप्तिर्दर्शनीया 'आहरित्तु' त्ति **आहृत्य** 'पणामए'त्ति **प्रणामयेद**र्पयेत् 'अर्पेः 'पणाम' इत्यादेशः प्राकृते' ॥७९॥

कथं तस्य निर्वाह इत्याह—

जया य से सुही होइ तया गच्छइ गोयरं ।
भत्त-पाणस्स अट्ठाए वल्लराणि सराणि य ॥८०॥

व्याख्या—यदा च स मृगः **सुखी भवति** 'स्वत एव रोगाभावादिति गम्यम्' । **तदा** गोरिव परिचितेतरभूभागे चरणं भ्रमणं **गोचरस्तं भक्तं** च तृणादि **पानं** च पानीयं **तस्यार्थाय** निमित्तं **वल्लराणि** गहनानि **सरांसि** सरोवराणि **च** गच्छति ॥८०॥

खाइत्ता पाणियं पाउं वल्लरेहिं सरेहि य ।
मिगचारियं चरित्ता णं गच्छई मिगचारियं ॥८१॥

व्याख्या—खादित्वा 'निजभक्ष्यमिति गम्यते' । **पानीयं** च **पीत्वा** 'सुब्व्यत्ययात्' **वल्लरेषु सरस्सु** च । तथा मृगाणां चर्या-इतश्चेतश्चोत्प्लवनात्मकं चरणं **मृगचर्या तां चरित्वाऽऽसेव्य गच्छति** । **मृगाणां चर्या** चेष्टा स्वातन्त्र्योपवेशनादिका यस्यां **सा** तथा मृगाश्रयभू**स्ताम्** ॥८१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

दृष्टान्तमभिधायोपसंहारमाह—

एवं समुट्ठिए भिक्खू एवमेव अणेगगो ।
मिगचारियं चरित्ता णं उड्ढं पक्कमई दिसं ॥८२॥

व्याख्या—एवमिति मृगवत् **समुत्थितः** संयमानुष्ठानं प्रत्युद्यतः । तथाविधातङ्कोत्पत्तावपि न चिकित्साभिमुख इति भावः । **भिक्षुः एवमेव** मृगवदेवाऽ**नेकगो** यथा ह्यसौ नैकस्मिन् वृक्षे आस्ते, किन्तु कदाचित् क्वचिदेवमेषोऽपि भिक्षुरनियतस्थानस्थितयाऽनेकगः । स चैवं **मृगचर्यां चरित्वा** मृगवदातङ्काभावेन भक्त—पानगोचरं गत्वा तदुपष्टम्भतो विशिष्टज्ञानावाप्त्याऽपगताशेषकर्मांश **ऊर्ध्वं प्रक्रामति** प्रकर्षेण गच्छति **दिशं** । मृगः पुष्ट उच्छलति, भिक्षुस्तु सर्वोपरिस्थानस्थो भवति निर्वृतिं मोक्षं यातीत्यर्थः ॥८२॥

मृगचर्यामेव स्पष्टयति—

जहा मिए एगे अणेगचारी अणेगवासे धुवगोयरे य ।
एवं मुणी गोयरियं पविट्ठो नो हीलए नो वि य खिंसएज्जा ॥८३॥

व्याख्या—यथा मृग एकोऽद्वितीयो**ऽनेकचारी** नैकत्र भक्त—पानार्थं चरतीत्येवंशीलो**ऽनेकवासो** विविधाश्रयवासी **ध्रुवगोचरश्च** सदा गोचरलब्धमेवाहारयती**त्येवं** मृगवदेकत्वादिविशेषणविशिष्टो **मुनिर्गोचर्यां** भिक्षाऽटनं **प्रविष्टो न हीलयेद**वजानीयात् 'कदशनादीति गम्यते' **नापि च खिंसयेदा**हाराप्राप्तौ स्वं परं वा निन्देत् । अत्र च मृगस्योपशमप्राधान्यादुपमानत्वमिति ॥८३॥

अथ यत् पुत्रवचनं यच्च तत्र पितृवचनम्, ततश्च यत् पुत्रः कृतवांस्तदाह—

मिगचारियं चरिस्सामि एवं पुत्ता ! जहासुहं ।
अम्मापिईहिंऽणुन्नाओ जहाइ उवहिं तओ ॥८४॥

व्याख्या—मृगस्य चर्यां चेष्टां निष्प्रतिकर्मतारूपां **चरिष्यामी**ति बलश्रिया युवराजेनोक्ते **पितृभ्याम**भाणि । **एवं हे पुत्र** ! यथा भवतोऽभिरुचितं तथा **यथासुखं** 'तेऽस्त्विति शेषः' एवं **चानुज्ञातो जहाति** त्यजत्**युपधिं** द्रव्यत आभरणादि, भावतश्छद्मादि, यदनेनात्मा नरके उपधीयत इति । **ततश्च** प्रव्रजित इत्युक्तं स्यादिति ॥८४॥

उक्तमेवार्थं सविस्तरमाह—

मिगचारियं चरिस्सामि सव्वदुक्खविमुक्खणिं ।
तुब्भेहिं अंब ! ऽणुन्नाओ गच्छ पुत्त ! जहासुहं ॥८५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—'तुब्भेहिं' ति **युवाभ्यां हे अम्ब** ! 'उपलक्षणात् हे पितश्च' **अनुज्ञातः** सन्। तावाहतुर्हे **पुत्र ! गच्छ** 'मृगचर्ययेति प्रक्रमः' । पुत्र ! **यथासुखं** सुखानतिक्रमेण । शेषं स्पष्टम् ॥८५॥

एवं सो अम्मा-पियरो अणुमाणित्ताण बहुविहं ।
ममत्तं छिंदई ताहे महानागु व्व कंचुअं ॥८६॥

व्याख्या—**एवं** अमुना प्रकारेण **सोऽम्बापितरौ अनुमान्या**नुज्ञाप्य [**बहुविधं**] **ममत्वं** प्रतिबन्धं **छिनत्ति महानाग इव कञ्चुकं** यथासावतिजरठतया चिरप्ररूढमपि कञ्चुकमपनयत्येवमसावपि ममत्वं मायादींश्चेति ॥८६॥

तथा—

इड्ढी वित्तं च मित्ते य पुत्त-दारं च नायओ ।
रेणुयं व पडे लग्गं निद्धुणित्ता ण निग्गओ ॥८७॥

व्याख्या—**ऋद्धिम**श्वादिसम्पदं **वित्तं** द्रव्यं **ज्ञातीन्** सोदरादीन् **रेणुमिव पटलग्नं** 'निद्धुणित्त' त्ति **निर्धूय** त्यक्त्वा **निर्गतो** निष्क्रान्तः 'गृहादिति गम्यम्' प्रव्रजति इत्यर्थः ॥८७॥

ततोऽसौ कीदृग् जात इत्याह—

पंचमहव्वयजुत्तो पंचसमिओ तिगुत्तिगुत्तो य ।
सब्भिंतर-बाहिरए तवोकम्मंमि उज्जुओ ॥८८॥

निम्ममो निरहंकारो निस्संगो चत्तगारवो ।
समो य सव्वभूएसु तसेसु थावरेसु य ॥८९॥

अनयोर्व्याख्या—**पञ्चमहाव्रतसहितः पञ्चसमितिभिः समितः** । **त्रिगुप्तिभिर्गुप्तः**। **सहाभ्यन्तरैः** प्रायश्चित्तादिभि**र्बाह्यै**रनशनादिभिर्भेदैर्वर्तते इति तत् तथा **तस्मिन् तपःकर्मण्युद्यतः** ॥ निर्गता ममता अस्याऽसौ **निर्ममः** । नितरां गतोऽहंकारो यस्मात् स **निरहङ्कारः** । **निःसङ्गः** सङ्गहेतुधनादित्यागात् । **त्यक्तगारवत्रिकः** । **समश्च** न रागद्वेषवान् **सर्वभूतेषु त्रसेषु स्थावरेषु च** निर्ममत्वादेरेवेति गाथाद्वयार्थः ॥८८-८९॥

तथा—

लाभालाभे सुहे दुक्खे जीविए मरणे तहा ।
समो निंदा-पसंसासु तहा माणावमाणओ ॥९०॥

व्याख्या—**समो** न **लाभादौ** चित्तोत्कर्षवान् । नाप्य**लाभादौ** दैन्यवान् । **जीविते**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

च **मरणे** च **समो** नैकत्राप्याकाङ्क्षावान् । तथा **निंदा–प्रशंसयोः समः । मानापमानयोः समः** । शेषं व्यक्तम् ॥९०॥

गारवेसु कसाएसुं दंड-सल्ल-भएसु य ।
नियत्तो हास-सोगाओ अनियाणो अबंधणो ॥९१॥

व्याख्या–गौरवेभ्यः त्रिभ्यः, **कषायेभ्यः** चतुर्भ्यः, **दण्डा** मनोदण्डादयः त्रयः, **शल्यानि** मायादीनि त्रीणि, **भयानि** चेहलोकभयादीनि सप्त, **तेभ्यो निवृत्तः** । 'प्राकृतत्वात् पञ्चम्यर्थे सप्तमी' । तथा **हास्य–शोकान्निवृत्तोऽनिदानो** भोगप्रार्थनारहितोऽ**बन्धनो** राग–द्वेषात्मकबन्धनविकलः ॥९१॥

अत एवाह–

अणिस्सिओ इहं लोए परलोए अणिस्सिओ ।
वासी-चंदणकप्पो य असणे अणसणे तहा ॥९२॥

व्याख्या–अनिश्रितो निश्रारहितः **नेहलोकार्थं परलोकार्थं वानुष्ठानवान्** । यदाह–"[1]**नो इहलोगट्ठयाए तवमहिट्ठिज्जा, नो परलोगट्ठयाए तवमहिट्ठिज्जा**" इत्यागमात् । **वासी–चन्दनकल्प** इत्यनेन समताविशेषमाह–वासी–चन्दनव्यापारकयोः कल्पस्तुल्यः । को भावः ? यदि कोऽपि वास्या वंसोल्या तक्ष्णोति, अन्यश्च, चन्दनेनाऽऽलिम्पति, तथापि राग–द्वेषाभावतो द्वयोरपि तुल्य इति । तथा **अशने** आहारे विशिष्टे मनोहरे 'नञः कुत्साऽर्थत्वात्' **अनशने** कदाहारे च तथा कल्पस्तुल्य इत्यर्थः ॥९२॥

अपसत्थेहिं दारेहिं सव्वओ पिहियासवे ।
अज्झप्पज्झाणजोगेहिं पसत्थदमसासणो ॥९३॥

व्याख्या–अप्रशस्तेभ्यः प्रशंसानास्पदेभ्यो **द्वारेभ्यः** कर्मोपार्जनोपायेभ्यो हिंसादिभ्यः **सर्वतः** सर्वेभ्यो 'निवृत्त इति गम्यते' । अत एव **पिहिताश्रवो** निरुद्धकर्मप्रवेशः । कैः पुनरयमेवंविधः ? आत्मन्यधि–अध्यात्मं तत्र ध्यानयोगाशुभध्यानव्यापारा **अध्यात्म–ध्यानयोगास्तैः प्रशस्तो दम** उपशमः **शासनं** च सर्वज्ञागमात्मकं **यस्य स** तथा ॥९३॥

अथ तत्फलोपदर्शनायाह–

एवं नाणेण चरणेण दंसणेण तवेण य ।
भावणाहिं विसुद्धाहिं सम्मं भावित्तु अप्पयं ॥९४॥

---

१. नो इहलोकार्थं तपोऽधितिष्ठेत्, नो परलोकार्थं तपोऽधितिष्ठेत् ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

बहुयाणि उ वासाणि सामन्नमणुपालिया ।
मासिएण उ भत्तेणं सिद्धिं पत्तो अणुत्तरं ॥९५॥

अनयोर्व्याख्या—ज्ञान-दर्शन-चारित्र-तपोभिः भावनाभिर्महाव्रतसम्बन्धिनी-भिर्वक्ष्यमाणाभिरनित्यत्वादिभिर्वा **शुद्धाभिर्**निदानादिदोषरहिताभिः **सम्यग् भावयित्वा** तन्मयतां नीत्वा 'अप्पयं' ति **आत्मानम्** ॥ **मासिकेन** भक्तेन मासोपवासेनेत्यर्थः । **सिद्धिं** निष्ठितार्थतामनुत्तरां सकलकर्मांशक्षयलक्षणां प्राप्तः । शेषं सुगममिति गाथाद्वयार्थः ॥९४-९५॥

अध्ययनोपसंहारमाह—

एवं करंति संपन्ना पंडिआ पवियक्खणा ।
विणियट्टंति भोगेसु मियापुत्ते जहामिसी ॥९६॥

व्याख्या—एवं पूर्वोक्तरीत्या कथनेन 'संपन्न' त्ति सङ्गता प्रज्ञा येषां ते **संप्रज्ञाः** । पुनः **पण्डिता** बुद्धिमन्तः । **प्रविचक्षणाः** चतुराः । **विनिवर्तन्ते** निवर्तन्ते **भोगेभ्यः** 'जहामिसी' त्ति मकारोऽलाक्षणिको **यथा मृगापुत्रऋषिरि**ति । शेषं व्यक्तम् ॥९६॥

भङ्ग्यन्तरेणोपदिशन्नाह—

महापभावस्स महाजसस्स मियाएपुत्तस्स निसम्म भासियं ।
तवप्पहाणं चरियं च उत्तमं गइप्पहाणं च तिलोयविस्सुयं ॥९७॥

वियाणिया दुक्खविवद्धणं धणं ममत्तबंधं च महाभयावहं ।
सुहावहं धम्मधुरं अणुत्तरं धारेह निव्वाणगुणावहं महं ॥९८॥ ति बेमि ॥

अनयोर्व्याख्या—महान् प्रभावोऽस्य स **महाप्रभावस्तस्य** पुन**र्महायशस** एतादृशस्य **मृगापुत्रस्य भाषितं** संसारदुःखरूपताऽऽवेदकं यत् तेन पित्रोः पुरत उक्तम् । प्रधानं तपो यत्र चरिते तत् **प्रधानतपः चरितं** चेष्टितम् । 'गइप्पहाणं च' त्ति प्रधाना गतिर्मोक्षलक्षणा यत्र तत् **प्रधानगति** 'उभयत्र व्यत्ययनिर्देशः प्राकृतत्वात्' । **त्रिलोकविश्रुतं** जगद्विख्यातम् ॥ एतन्निशमनाच्च **विज्ञाय** ज्ञात्वा **दुःखविवर्धनं धनं** तथा **ममत्वबन्धं** सत्प्रवृत्तिघातितया **महाभयावहम्** । धर्मो धूरिव महासत्त्वैरुह्यमानतया **धर्मधुरा** महाव्रतपञ्चकात्मिका **तां** तथा **निर्वाणगुणा** अनन्तज्ञानदर्शन-चारित्र-वीर्य-**सुखदायस्तदावहां** तत्प्रापिकां **धर्मधुरां धारयत महतीं** अपरिमितमाहात्म्याम् । शेषं निगदसिद्धमिति वृत्तद्वयार्थः । **इति ब्रवीमी**ति प्राग्वत् ॥९७-९८॥ ग्रं० ३२०॥

इति श्रीकमलसंयमोपाध्यायविरचितायां सर्वार्थसिद्धौ श्रीउत्तराध्ययनटीकायां
एकोनविंशं मृगापुत्रीयाध्ययनं समाप्तम् ॥१९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

विंशतितमं महानिर्ग्रन्थीयमध्ययनम्

अनन्तराध्ययने निष्प्रतिकर्मताभिहिता, सा चानाथत्वपरिभावनयैव पालयितुं शक्येति महानिर्ग्रन्थहितमभिधातुमनाथत्वमनेनोच्यते । इति विंशतितमं महानिर्ग्रन्थीयमध्ययन-मारभ्यते ।

सिद्धाणं नमो किच्चा संजयाणं च भावओ ।
अत्थ-धम्मगइं तच्चं अणुसट्ठिं सुणेह मे ॥१॥

व्याख्या—सिद्धेभ्यस्तीर्थकरादिसिद्धेभ्यो **नमस्कृत्य संयतेभ्यश्चा**चार्योपाध्याय-साधुभ्यो भावतो भक्त्येति पञ्चपरमेष्ठिस्तवमुक्त्वाभिधेयादित्रयमाह । अर्थश्च धर्मश्चार्थ—धर्मौ तयोर्गतिर्गत्यर्थानां ज्ञानार्थत्वाद् हिताहितलक्षणस्वरूपज्ञानं यस्यां साऽ**र्थ-धर्मगतिस्तां** 'तच्चं' ति **तथ्यां** सत्या**मनुशिष्टिं** हितोपदेशरूपां शिक्षां **शृणुत** 'मे'इति **मम** 'कथयत इति शेषः' स्थविरवचनमेतदिति । इह चानुशिष्टिरभिधेया । अर्थ-धर्मगतिः प्रयोजनम् । अनयोश्च परस्परमुपायोपेयभावलक्षणः सम्बन्धः सामर्थ्यादुक्त इति ॥१॥

यथाप्रतिज्ञातं धर्मकथारूपतयाऽऽह—

पभूयरयणो राया सेणिओ मगहाहिवो ।
विहारजत्तं निज्जाओ मंडिकुच्छिंसि चेइए ॥२॥

व्याख्या—प्रभूतानि रत्नानि मरकतादीनि गजाश्वादिरूपाणि वा **यस्य स** तथा । **मगधाधिपः श्रेणिकः** 'विहारजत्तं' ति सुब्व्यत्ययाद् **विहारयात्रायाः** क्रीडार्थमश्ववाह-निकादिरूपाया **निर्यातो** निर्गतो 'नगरादिति गम्यते' क्व गतः ? इत्याह—'मंडिकुच्छंसि' त्ति **मण्डिकुक्षिनाम्नि चैत्ये** उद्याने ॥२॥

तदेव विशिनष्टि—

नाणादुमलयाइन्नं नाणापक्खिनिसेवियं ।
नाणाकुसुमसंछन्नं उज्जाणं नंदणोवमं ॥३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या–तदुद्यानं 'वर्तते इत्युपस्कारः' । स्पष्टमऽन्यत् ॥३॥

तत्थ सो पासई साहुं संजयं सुसमाहियं ।
निसन्नं रुक्खमूलंमि सुकुमालं सुहोइयं ॥४॥

व्याख्या–तत्र वने **स श्रेणिकः पश्यति** कं ? **साधुम्** । साधुः सर्वोऽपि शिष्ट उच्यते, तद्व्यवच्छेदार्थं **संयतमित्युक्तम्** । सोऽपि च बहिःसंयमवान् निह्नवादिरपि स्यादिति **सुसमाहितं** मनःसमाधानवन्तमित्युक्तम् । **निषण्णमु**पविष्टं क्व ? **वृक्षमूले** । **सुकुमालं** सुकोमलाङ्गावयवम् । 'सुहोइयं' ति **सुखोचितं** शुभोचितं वा ॥४॥

तस्स रूवं तु पासित्ता राइणो तंमि संजए ।
अच्चंतं परमो आसी अउलो रूवविम्हओ ॥५॥

व्याख्या–तस्य साधो **रूपं दृष्ट्वा राज्ञस्तस्मिन् संयते**ऽत्यन्तं **परमो**ऽतिशय-प्रधानोऽतुल्योऽनन्यसदृशो **रूपविषयो विस्मय आसीदि**ति ॥५॥

कथमित्याह–

अहो ! वण्णो अहो ! रूवं अहो ! अज्जस्स सोमया ।
अहो ! खंती अहो ! मुत्ती अहो ! भोगे असंगया ॥६॥

व्याख्या–'अहो ! इत्याश्चर्ये' सर्वत्र । **वर्णो** गौरतादिः । **रूपमा**कारः । **आर्यस्य** पूज्यस्य **सौम्यता** चन्द्रस्येवानन्ददायिता । **अहो** ! इति **क्षान्तिः** क्षमा । **मुक्ति**र्निर्लोभता । पुनः **भोगे असङ्गता** निःस्पृहता ॥६॥

ततः किमकार्षीदित्याह–

तस्स पाए उ वंदित्ता काऊण य पयाहिणं ।
नाइदूरमणासन्ने पंजली पडिपुच्छई ॥७॥

व्याख्या–तस्य मुनेः **पादौ** चरणौ **नत्वा प्रदक्षिणां च कृत्वा नातिदूरो नात्यासन्नो** योग्यस्थानवर्तीत्यर्थः । **प्राञ्जलि**र्योजितकरः सन् **प्रतिपृच्छति** । इह च वन्दनानन्तरं प्रदक्षिणाऽभिधानं पूज्यनामालोके एव प्रणामः क्रियते इति ज्ञापनार्थम् । तथा चागमः–"[१]**आलोए जिणपडिमाणं पणामं करेइ**"त्ति ॥७॥

---

१. आलोके जिनप्रतिमानां प्रणामं करोतीति ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

किं पृच्छतीत्याह—

तरुणो सि अज्जो ! पव्वईओ भोगकालंमि संजया ! ।
उवट्ठिओ सि सामन्ने एयमट्ठं सुणामि ता ॥८॥

व्याख्या—तरुणोऽसि युवास्यार्य ! [**संयत !**] यद् **भोगकाले** भोगोचितसमये **प्रव्रजितस्**तारुण्यस्य भोगकालत्वात् । त्वं पुन**रुपस्थितश्च** कृतोद्यमश्च **श्रामण्ये** चारित्रे **एतमर्थं** निमित्तं येनार्थेन त्वमीदृश्यामवस्थायां प्रव्रजितः । **शृणोमि** 'ता' इति **तावत्** पश्चात् तु यत् त्वं भणिष्यसि, तदपि श्रोष्यामीति भावः ॥८॥

इत्थं राज्ञोक्ते मुनिराह—

अणाहो मि महाराय ! नाहो मज्झ न विज्जई ।
अणुकंपगं सुहिं वावि कंची नाभिसमेमहं ॥९॥

व्याख्या—अनाथोस्वामिको**ऽस्मी**त्यह **महाराज** ! । कुतः ? इत्याह—यतो **नाथो** योग—क्षेमकर्ता **मम न विद्यते** । अलब्धस्य लाभो योगः, लब्धस्य परिपालनं क्षेमः । तथा**ऽनुकम्पकम**नुकम्पाकर्तारं 'सुहिं' ति **सुहृदं वा** मित्रं वा **कञ्चिदपि नाभिसमेमि** नाभिसङ्गच्छाम्**यहं** न केनचिदऽनुकम्पकेन सुहृदा वा सङ्गतोऽहमित्यादिनार्थेन तारुण्येऽपि प्रव्रजति इति भावः ॥९॥

एवं च मुनिनोक्ते—

तउ सो पहसिओ राया सेणिओ मगहाहिवो ।
एवं ते इड्ढिमंतस्स कहं नाहो न विज्जई ? ॥१०॥
होमि नाहो भयंताणं भोगे भुंजाहि संजया ! ।
मित्त-नाइपरिवुडो माणुस्सं खु सुदुल्लहं ॥११॥

अनयोर्व्याख्या—ततः स प्रहसितः-अनाथत्वासम्भावनया विस्मितो **राजा** नृपः **श्रेणिको मगधाधिपः** 'कथितवानिति शेषः' । **एवमि**ति दृश्यमानप्रकारेण **ऋद्धिमतो** विस्मयनीयवर्णादिसम्पत्तिमतः **कथं नाथो न विद्यते** ? । यतः—

"यत्राकृतिस्तत्र गुणा गुणाढ्ये च स्थिरं धनम् ।
तत्र श्रीः श्रीमतश्चाज्ञा तस्यां राज्यमियं स्थितिः" ॥१॥ इति

तथा च न कथञ्चिदनाथत्वं भवतः सम्भवतीति भावः ॥ यदि चानाथतैव प्रव्रज्या-प्रतिपत्तिहेतुः ? ततः 'होमि' त्ति **भवाम्यहं भदन्तानां** पूज्यानां **नाथस्**ततश्च मयि नाथे

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मित्राणि सुहृदो **ज्ञातयः** स्वजनाः सुप्रापा एवेत्यऽतस्तैः **परिवृतो भुङ्क्ष्व भोगान्** भोः ! **संयतेति** । यतो **मानुष्यं खलु दुर्लभमिति** हेत्वभिधानमिति गाथाद्वयार्थः ॥१०-११॥

मुनिराह—

अप्पणा वि अणाहो सि सेणिया मगहाहिवा ! ।
अप्पणा अणाहो संतो कहं नाहो भविस्ससि ? ॥१२॥

व्याख्या—आत्मनापि स्वयमपि **अनाथोऽसि** भोः **श्रेणिक ! मगधाधिप !** । ततश्चाऽऽ**त्मना** स्वयं **अनाथः सन् कथम्** 'अन्येषामिति गम्यते' **नाथो भविष्यसि** त्वमिति ? ॥१२॥

एवं च मुनिनोक्ते—

एवं वुत्तो नरिंदो सो सुसंभंतो सुविम्हिओ ।
वयणं अस्सुयपुव्वं साहुणा विम्हयन्निओ ॥१३॥

अत्यन्तविशेषणादस्य व्याख्या—विस्मयान्वितः प्रागपि मुनिगतरूपादिविलोकनप्रभूताश्चर्यवान् **स** श्रेणिकनामा **नरेन्द्र एवमुक्त**प्रकारेण **वचनं** आत्मनैव त्वमनाथोऽसीत्यादिरूप**मश्रुतपूर्वं साधुना उक्तः** सन् **सुसम्भ्रान्तः** संशयादत्याकुलः **सुविस्मितोऽ**घटमानार्थोपदेशादतीवविस्मयोपेतो भूत्वा 'उक्तवानिति शेषः' ॥१३॥

यदुक्तवांस्तदाह—

आसा हत्थी मणुस्सा मे पुरमंतेउरं च मे ।
भुंजामि माणुसे भोए आणाइस्सरियं च मे ॥१४॥

एरिसे संपयग्गंमि सव्वकामसमप्पिए ।
कहं अणाहो भवई ? मा हु भंते ! मुसं वए ॥१५॥

अनयोर्व्याख्या—अश्वादयो मे 'सन्तीति क्रियाऽत्राध्याहार्या' । अत एव **भुनज्मि मानुष्यकान् भोगान्** यत **आज्ञाया ऐश्वर्यं** प्रभुत्वं च 'मे' **ममेति** ॥ **तथेदृशे**ऽनन्तरोक्तरूपे सम्पदामग्रं **सम्पदग्रं** समृद्धिप्रकर्ष**स्तस्मिन्** सति 'सव्वकामसमप्पिए' त्ति प्राकृतत्वात् **समर्पितसर्वकामे कथमनाथो**ऽस्वामी 'भवइ'त्ति पुरुषव्यत्ययेन **भवामि** ? 'हुस्तस्मादर्थे' यत एवं **तस्मान्मा भदन्त ! मृषा** 'वए' त्ति **वादीरिति** सूत्रद्वयार्थः ॥१४-१५॥

यतिस्तमाह—

न तुमं जाणे अणाहस्स अत्थं पुत्थं व पत्थिवा ! ।
जहा अणाहो हवई सणाहो वा नराहिवा ! ॥१६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सुणेह मे महाराय ! अव्वक्खित्तेण चेयसा ।
जहा अणाहो हवई जहा मे य पवत्तियं ॥१७॥

अनयोर्व्याख्या—न 'तुमं' ति **न त्वं जानीषे**ऽवबुध्यसे**ऽनाथस्ये**त्यनाथशब्दस्य **अर्थम**भिधेयं **प्रोत्थां** प्रकृष्टोत्थानरूपां **हे पार्थिव** नृप ! अत एव **यथा अनाथो भवति सनाथो वा,** [हे नराधिप !] तथा च न जानीषे इति योगः ॥ **शृणु** 'मे' **मम** 'कथयत इति शेषः' हे **महाराज ! अव्याक्षिप्तेन चेतसो**पलक्षितः सन् । किं तद् ? इत्याह—**यथा अनाथो भवती**त्यनाथशब्दस्याभिधेयः पुरुषो भवति, **यथा** 'मे य' त्ति **मया च प्रवर्तितमि**तिप्ररूपितं 'अनाथत्वमिति प्रक्रमः' एतेनोत्थानमुक्तम् ॥१६-१७॥

कोसंबी नाम नयरी पुराणपुरभेयणी ।
तत्थ आसी पिया मज्झं पभूयधणसंचओ ॥१८॥

व्याख्या—कौशाम्बी नाम नगरी । 'पुराणपुरभेयणि' त्ति पुराणपुराणि भिनत्ति स्वगुणैरसाधारणत्वाद् भेदेन व्यवस्थापयतीति **पुराणपुरभेदिनी** प्रधाननगरीत्यर्थः । **तत्रासीत् पिता मम प्रभूतधनसञ्चयो** यस्य सः ॥१८॥

पढमे वए महाराय ! अउला मे अच्छिवेयणा ।
अहोत्था विउलो डाहो सव्वगत्तेसु य पत्थिवा ! ॥१९॥

व्याख्या—प्रथमे वयसि प्रक्रमाद् यौवने**ऽतुला**ऽनुपमा **मेऽक्षिवेदना** चक्षूरोगजा व्यथा 'अहोत्था'त्ति **अभूत्** । तथा **विपुलो** विस्तीर्णो **दाहो** दाघज्वरः **सर्वगात्रेषु** सर्वाङ्गोपाङ्गेषु **हे पार्थिव** ! ॥१९॥

सत्थं जहा परमतिक्खं सरीरविवरंतरे ।
आवीलिज्ज अरी कुद्धो एवं मे अच्छिवेयणा ॥२०॥

व्याख्या—शस्त्रं यथा परमतीक्ष्णं 'सरीरविवरंतरे' त्ति **शरीरविवराणि** कर्णरन्ध्रादीनि **तेषामन्तरे** मध्ये 'आवीलिज्ज'त्ति **आपीडयेद्** गाढमवगाहयेदरिर्वैरी **क्रुद्ध एव**-मित्यापीड्यमानशस्त्रवन्**ममाक्षिवेदना** । यथा तदत्यन्तबाधाकारि तथैषाऽपीति भावः ॥२०॥

तियं मे अंतरिच्छं च उत्तमंगं च पीडई ।
इंदासणिसमा घोरा वेयणा परमदारुणा ॥२१॥

व्याख्या—त्रिकं कटिभागं 'मे' **मम अन्तरा** मध्ये **इच्छां** चाभिमतवस्त्वभिलाषं, न केवलं बहिस्त्रीकाद्येवेति भावः, **उत्तमाङ्गं** शिरश्च **पीडयति** बाधते । कीदृशी का ?

इत्याह—**इन्द्राशनिरिन्द्रवज्रं तत्समा** तुल्याऽतिदाहोत्पादकत्वात् । **घोरा** परेषामपि भयोत्पादिनी **वेदना**ऽत एव **परमदारुणा**तीवरौद्रा दुःखदायिनीत्यर्थः ॥२१॥

कश्चित् तां किं न प्रतिकृतवान् ? इत्याह—

उवट्ठिया मे आयरिया विज्जा-मंतचिगिच्छगा ।
अबीया सत्थकुसला मंत-मूलविसारया ॥२२॥

व्याख्या—उपस्थिता वेदनाप्रतीकारं प्रत्युद्यता 'मे' **ममाचार्याः** प्राणाचार्या वैद्या इति यावत् । **विद्या-मन्त्रचिकित्सका** विद्या-मन्त्राभ्यां व्याधिप्रतिकर्तारः । **अद्वितीया** अनन्यसामान्यतया तादृग्द्वितीयाभावात् । **शस्त्रेषु शास्त्रेषु वा कुशलाः । मन्त्राणि** प्रणवपूर्वकानि, **मूलानि** चौषधय**स्तेषु विशारदा** विज्ञा मन्त्रविशारदत्वेन विना मन्त्र-चिकित्सकत्वं न भवतीति न पौनरुक्त्यम् ॥२२॥

न चौपस्थानमात्रेणैव ते स्थिताः, किन्तु—

ते मे चिगिच्छं कुव्वंति चाउप्पायं जहाहियं ।
न य दुक्खा विमोयंति एसा मज्झ अणाहया ॥२३॥

व्याख्या—ते मे प्राणाचार्या वैद्या**श्चिकित्सां** उपचारं **कुर्वन्ति** । 'चाउप्पायं'ति **चतुष्पादां** भिषग्—भेषजातुर—प्रतिचारकात्मकभागचतुष्टयात्मिकां 'जहाहियं' ति **यथाहितं** हितानतिक्रमेण । ततः किम् ? इत्याह—**न चैवं** कुर्वन्तोऽपि **दुःखा**देवंविधरोगजनिताद् **विमोचयन्ति** विशेषेण मुत्कलयन्ति । **एषा** दुःखाविमोचनरूपा ममानाथता ॥२३॥

अन्यच्च—

पिया मे सव्वसारं पि दिज्जाहि मम कारणा ।
न य दुक्खा विमोयंति एसा मज्झ अणाहया ॥२४॥

व्याख्या—पिता मे सर्वसारमपि निःशेषप्रधानवस्तुरूपं 'दिज्जाहि' त्ति **दद्यान्मम कारणा**न्मोहादिहेतोः । **न चैव**मादरवानपि **दुःखाद्** 'विमोयंति' त्ति वचनव्यत्ययाद् **विमोचयति** । एवं सर्वत्र ॥२४॥

माया वि मे महाराय ! पुत्तसोग-दुहट्टिया ।
न य दुक्खा विमोयंति एसा मज्झ अणाहया ॥२५॥

व्याख्या—माताऽपि मे पुत्रविषयः शोकः **पुत्रशोको** हा ! कथमित्थं मत्सुतो दुःखी जात इत्यादिरूपस्ततो **दुःखं तेन** 'अट्टिय' त्ति **आर्ता** पीडिता इत्यर्थः । उत्तरार्धं प्राग्वत् ॥२५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तथा–

भायरो मे महाराय ! सगा जेट्ठ-कणिट्ठगा ।
न य दुक्खा विमोयंति एसा मज्झ अणाहया ॥२६॥

व्याख्या–भ्रातारो मे 'सग' त्ति **सौदर्याः** स्वका वा आत्मीया **ज्येष्ठा** अग्रजाः **कनिष्ठा** अनुजाः । शेषं स्पष्टम् ॥२६॥

भयणीओ मे महाराय ! सगा जेट्ठ-कणिट्ठिगा ।
न य दुक्खा विमोयंति एसा मज्झ अणाहया ॥२७॥

व्याख्या–'भयणि' त्ति **भगिन्यः** । शेषं सुगमम् ॥२७॥

भारिया मे महाराय ! अणुरत्ता अणुव्वया ।
अंसुपुन्नेहिं नयणेहिं उरं मे परिसिंचई ॥२८॥

व्याख्या–भार्या पत्नी **अनुरक्ता**नुरागवती अन्विति कुलानुरूपं व्रतमाचारोऽस्याः साऽ**नुव्रता** पतिव्रतेत्यर्थः । **अश्रुपूर्णैर्नयनैरुरो** वक्षो **मे परिषिञ्चति** समन्तात् प्लावयति ॥२८॥

तथा–

अन्नं पाणं च न्हाणं च गंध-मल्ल-विलेवणं ।
मए नायमनायं वा सा बाला नोवभुंजई ॥२९॥

व्याख्या–अन्नं चतुर्विंशतिधान्यात्मकं, **पानं** पानीयं, **स्नानं च**, गंधं च माल्यं च विलेपनं च कर्पूरादि **गन्धमाल्यविलेपनं** एतन्**मया ज्ञातमज्ञातं वा** सद्भावसारमित्यर्थः । **सा** भार्या **बाला** नवयौवना **नोपभुङ्क्ते** नासेवते मम विरहदुःखदुःखिता सतीति ॥२९॥

खणं पि मे महाराय ! पासओ वि न फिट्टई ।
न य दुक्खा विमोयंति एसा मज्झ अणाहया ॥३०॥

व्याख्या–क्षणमात्रमपि महाराज ! 'पासाओ वि न फिट्टई' त्ति 'अपिश्चार्थे' **मम पार्श्वाच्च** नापयाति न दूरे याति । किन्तु सा सदा सन्निहितैवास्तेऽतिवत्सलत्वेन । **न च दुःखाद् विमोचयति । एषा मेऽनाथता** ॥३०॥

तओ हं एवमाहंसु दुक्खमा हु पुणो पुणो ।
वेयणा अणुभविउं जे संसारंमि अणंतए ॥३१॥

व्याख्या–ततो रोगाप्रतिकार्यतानन्तर**महमेवम्** 'आहंसु' त्ति **उक्तवान्** । यथा

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

'दुक्खमा हु' त्ति 'हुरेवार्थे' ततो **दुःक्षमैव** दुःसहैव **पुनः पुनर्वेदना**ऽक्षिरोगप्रमुखा व्यथाऽ**नुभवितुं** 'जे पूरणे' **अनन्तके संसारे**ऽक्षीणकर्मणो हि मम प्रतिभवं जायमाना वेदना दुःसहा । अतस्तद्बीजभूतकर्मक्षयार्थमेव यतिष्ये इत्यर्थः ॥३१॥

अत एवाह—

सइं च जइ मुच्चिज्जा वेयणा विउला इओ ।
खंतो दंतो निरारंभो पव्वए अणगारियं ॥३२॥

व्याख्या—'चशब्दोऽप्यर्थः' ततः **सकृदप्ये**कदाऽपि **यदि मुच्येय** 'अहमिति गम्यते,' कुतः ? **वेदनाया विपुलाया** विस्तीर्णाया **इतो**ऽस्या अनुभूयमानायास्ततः किम् ? इत्याह—**क्षान्तः** क्षमावान्, **दान्त** इन्द्रिय-नोइन्द्रियदमेन, **निरारम्भः, प्रव्रजेयं** प्रतिपद्येयम**नगारिताम्,** येन संसारोच्छित्त्या वेदनाऽभावः स्यादिति भावः ॥३२॥

एवं च चिंतइत्ताणं पसुत्तो मि नराहिवा ! ।
परियत्तंतीइ राईए वेयणा मे खयं गया ॥३३॥

व्याख्या—एवं न केवलमुक्त्वा **चिन्तयित्वा च प्रसुप्तोऽस्मि** । 'परियत्तंतीइ' इति **परिवर्तमानाया**मतिक्रामन्त्यां **रात्रौ वेदना मे क्षयं गता** ॥३३॥

तओ कल्ले पभायंमि आपुच्छित्ताण बंधवे ।
खंतो दंतो निरारंभो पव्वईओ अणगारियं ॥३४॥

व्याख्या—ततो वेदनोपशमानन्तरं **कल्यो** नीरोगः सन् **प्रभाते आपृच्छ्य** **मातृपितृ-बान्धवप्रमुखान् क्षान्तो दान्तो निरारम्भः सन् प्रव्रजितः** । कोऽर्थः ? प्रतिपन्नवान-नगारितां साधुतामिति ॥३४॥

तओ हं नाहो जाओ अप्पणो य परस्स य ।
सव्वेसिं चेव भूयाणं तसाणं थावराण य ॥३५॥

व्याख्या—ततः प्रव्रज्याप्रतिपत्तेर**हं नाथो जातो** योग-क्षेमकरणक्षम इति भावः । **आत्मनः** स्वस्य **परस्य वा**ऽन्यस्य पुरुषादेः **सर्वेषां चैव भूतानां** जीवानां त्रस्यन्तीति त्रसास्तेषां **त्रसानां** तिष्ठन्तीति स्थावरास्तेषां **स्थावराणां च** ॥३५॥

किमिति प्रव्रजितानन्तरं नाथत्वं जातम् ? पुरा नेत्याह—

अप्पा नई वेयरणी अप्पा मे कूडसामली ।
अप्पा कामदुहा धेणू अप्पा मे नंदणं वणं ॥३६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अप्पा कत्ता विकत्ता य दुहाण य सुहाण य ।
अप्पा मित्तममित्तं च दुप्पट्ठिय सुपट्ठिओ ॥३७॥

अनयोर्व्याख्या—'व्यवच्छेदफलत्वाद् वाक्यस्य' **आत्मैव** नान्यः कश्चित् किम् ? इत्याह—**नदी वैतरिणी** महाऽनर्थहेतुतया नरकनदीवाऽत **एवात्मैव कूटमिव** जन्तुयातनाहेतुत्वा**च्छाल्मली** नरकोद्भवा । त**थात्मैव कामदुघा धेनु**रिववाञ्छितस्वर्गापवर्गप्राप्तिहेतुत्वादियं तु रूढ्योक्ता । **आत्मैव मे नन्दनं वनं** चित्तप्रह्लत्तिहेतुत्वात् ॥ तथा **आत्मैव कर्ता दुःखानां सुखानां चे**ति सम्बन्धः 'प्रक्रमात् स्वात्मन एव' **विकिरिता** विक्षेपक**श्चात्मैव** तेषामेव । तत**श्चात्मैव मित्रमु**पकारित्वात्, **अमित्रश्चा**पकारित्वात् । कीदृग् सन् ? **दुःप्रस्थितो** दुराचारप्रवृत्तो वैतरण्यादिरूपः । **सुप्रस्थितश्च** सदनुष्ठानकर्ता कामधेन्वादिकल्पः । तथा च प्रव्रज्यायामेव सुप्रस्थितत्वेनात्मनोऽन्येषां च योग—क्षेमकारित्वान्नाथत्वमिति सूत्रद्वयार्थः ॥३६-३७॥

अन्यथा पुनरनाथत्वमाह—

इमा हु अन्ना वि अणाहया निवा ! तमेगचित्तो निहुओ सुणेहिं ।
नियंठधम्मं लहियाण वि जहा सीयंति एगे बहुकायरा नरा ॥३८॥

व्याख्या—इयं वक्ष्यमाणा 'हुः पूरणे' **अन्याऽप्यनाथता** यदभावादहं नाथो जात इति भावः । 'निव' त्ति **हे नृप ! तामनाथतामेकचित्त** एकाग्रमना **निभृतः** स्थिरः **शृणु**। काऽसौ ? इत्याह—**निर्ग्रन्थानां धर्म** आचारस्तं 'लहियाण वि'त्ति **लब्ध्वाऽपि यथा सीदन्ति** तदनुष्ठानं प्रति शिथिलीभव**न्त्येके** केचन **बहुकातरनरा** निःसत्त्वाः पुरुषाः । इतीयं सीदनलक्षणापरानाथतेति भावः ॥३८॥

जो पव्वइत्ताण महव्वयाइं सम्मं च नो फासयई पमाया ।
अणिग्गहप्पा य रसेसु गिद्धे न मूलओ छिंदइ बंधणं से ॥३९॥

व्याख्या—यः प्रव्रज्य महाव्रतानि सम्यग् न स्पृशति नासेवते **प्रमादात्** । **अनिग्रहात्मा** विषयाऽनियन्त्रितात्माऽत एव **रसेषु** मधुरादिषु **गृद्धो न मूलतश्छिनत्ति बन्धनं** राग-द्वेषात्मकं 'से' इति **सः** ॥३९॥

आउत्तया जस्स य नत्थि काई इरियाइ भासाइ तहेसणाए ।
आयाण-निक्खेव-दुगंछणाए न वीरजायं अणुजाइ मग्गं ॥४०॥

व्याख्या—आयुक्तता सावधानता **यस्य नास्ति काचि**दतिस्वल्पाऽपि **ईर्यायां**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भाषायां तथैषणायां आदान—निक्षेपयोरुपकरणग्रहण—न्यासयोः । **जुगुप्सनायां** इहोच्चारादीनां संयमाऽनुपयोगितया जुगुप्सनीयत्वेनैव परिष्ठापनात् परिष्ठापनैव जुगुप्सनोक्ता । स ईदृक् किम्? इत्याह—**न** वीरैर्धीरैर्यातो **वीरयातस्तमनुयात्य**ऽनुगच्छति **मार्गं** मुक्तिपथमल्पसत्त्वतयेति भावः ॥४०॥

तथा—

चिरं पि से मुंडरुई भवित्ता अथिरव्वए तव-नियमेहिं भट्ठे ।
चिरं पि अप्पाणं किलेसइत्ता न पारए होइ हु संपराए ॥४१॥

व्याख्या—चिरमपि प्रभूतकालमपि **स** मुण्ड एव 'मुण्डनं मुण्डः' केशापनय-नात्मकः तस्मिन्नेव शेषानुष्ठानपराङ्मुखतया रुचिर्यस्य स **मुण्डरुचिर्भूत्वा** । **अस्थिरव्रतो** गृहीतमुक्तत्वात् **तपो—नियमेभ्यो भ्रष्टश्चिरमप्यात्मानं क्लेशयित्वा** 'लोचनादिनात्मनैवेति गम्यते' । **न पारगः** पर्यन्तगामी भवति । 'हुरलङ्कारे' सम्परायस्य संसारस्य 'सुब्व्यत्ययात् सूत्रे सप्तमी' ॥४१॥

स चैवंविधः—

पोल्लेव मुट्ठी जह से असारे अयंतिए कूडकहावणे वा ।
राढामणी वेरुलियप्पगासे अमहग्घए होइ हु जाणएसु ॥४२॥

व्याख्या—पोल्लैवात्यन्तशुषिरैव न मनागपि निबिडा **मुष्टिः** प्रतीता । **यथा साऽसारा**। 'अयंतिए' त्ति **अयन्त्रितः कूटकार्षापण इव** 'वा इवार्थे' । यथा ह्यसौ न केनचित् कूटतया नियन्त्र्यते । तथैषोऽपि निर्गुणत्वादुपेक्षणीयः, **राढामणिः** काचमणि-**वैडूर्यप्रकाशी** वैडूर्यमणिसदृशः **अमहार्घको**ऽल्पमूल्यक **एव भवति** 'हुरेवार्थे' 'जाणएसु' त्ति **ज्ञेषु** मुग्धजनविप्रतारकत्वात् तस्य ॥४२॥

कुसीललिंगं इह धारइत्ता इसिज्झयं जीविय वूहइत्ता ।
असंजए संजय लप्पमाणे विणिघायमागच्छइ से चिरं पि ॥४३॥

व्याख्या—कुशीललिङ्गं पार्श्वस्थादिवेष**मिह** जन्मनि **धारयित्वा ऋषिध्वजं** मुनिचिह्नं रजोहररणादि, 'जीविय' त्ति 'आर्षत्वाद् बिन्दुलोपे' **जीवितम**संयमजीवितं जीविकां वा निर्वहणोपायरूपां **बृंहयित्वा** पोषयित्वाऽत एवा**ऽसंयतः** सन् 'संजय लप्पमाणे' त्ति 'सोपस्कारत्वात्' **संयतमात्मानं लपन् विनिघातं** विविधाभिघातरूप-**मागच्छत्यायाति स चिरमप्या**स्तामल्पकालं नरकादाविति भावः ॥४३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इहैव हेतुमाह—

विसं तु पीयं जह कालकूडं हणाइ सत्थं जह कुग्गहीयं ।
एसेव धम्मो विसओववन्नो हणाइ वेयाल इवाविवन्नो ॥४४॥

व्याख्या—विषं तु पीतं यथा कालकूटं 'हणाइ' त्ति **हन्ति** 'चस्य गम्यत्वात्' **शस्त्रं च यथा कुत्सितं गृहीतं** हन्तीति योगः । **एष एवं** विषादिवद् धर्मो यतिधर्मो **विषयैः** शब्दादिभि**रुपपन्नो** युक्तो **हन्ति** दुर्गतिपातहेतुत्वेन 'चस्य गम्यत्वाद्' **वेताल इव** 'अविवन्नो' त्ति **अविपन्नो**ऽप्राप्तविपद् मन्त्रादिभिरनियन्त्रित इति भावः ॥४४॥

जे लक्खणं सुविण पउंजमाणे निमित्त-कोऊहलसंपगाढे ।
कुहेडविज्जासवदारजीवी न गच्छई सरणं तंमि काले ॥४५॥

व्याख्या—यो लक्षणं पुरुषादीनां **स्वप्नं** च प्रतीतं **प्रयुञ्जानो** व्यापारयन्, **निमित्तं** भौमादि **कौतुकम**पत्याद्यर्थं स्नानादि **तयोः सम्प्रगाढो**ऽतिशयासक्तः । कुहेटकविद्या अलीकाश्चर्यकारिमन्त्राद्यात्मिकास्ता एव कर्मबन्धहेतुत्वाद् आश्रवद्वाराणि तैर्जीवितुं शील-मस्येति **कुहेटकविद्याश्रवद्वारजीवी न गच्छति** न प्राप्नोति **शरणं** त्राणं दुष्कृतरक्षाक्षमं **तस्मिन्** फलोपभोगकाले ॥४५॥

अमुमेवार्थं भावयति—

तमंतमेणेव उ से असीले सया दुही विप्परियासुवेइ ।
संधावई नरग-तिरिक्खजोणिं मोणं विराहित्तु असाहुरूवे ॥४६॥

व्याख्या—अतिमिथ्यात्वोपहततया **तमस्तमसैव** प्रकृष्टाज्ञानेनैव '**तुः** पूरणे' **स** द्रव्ययति**रशीलः सदा दुःखी** विराधनाजनितदुःखेनैव 'विप्परियासुवेइ' त्ति **विपर्यासं** तत्त्वादिषु वैपरीत्यमुपैत्**युपगच्छति** । ततश्च **संधावति** सततं गच्छति **नरक-तिर्यग्योनीः मौनं** चारित्रं **विराध्याऽसाधुरूप**स्तत्त्वतोऽयतिस्वभावः सन् ॥४६॥

कथं स तद्गती संधावतीत्याह—

उद्देसियं कीयगडं नियागं न मुंचई किंचि अणेसणिज्जं ।
अग्गी विवा सव्वभक्खी भवित्ता इओ चुओ गच्छइ कट्टु पावं ॥४७॥

व्याख्या—उद्देशिकं प्रतीतं, क्रयणं क्रीतं तेन कृतं **क्रीतकृतं, नियागं** नित्यपिण्डं **न मुञ्चति किञ्चिदप्यनेषणीयम् । अग्निरिव** 'विवेतीवार्थे' 'प्राकृतत्वादाकारः' सर्वं प्रासुकाऽप्रासुकादि भक्षयतीत्येवंशीलः **सर्वभक्षी भूत्वा इतश्च्युतो गच्छति** 'कुगतिमिति शेषः' **कृत्वा पापमिति** ॥४७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

यतश्चैवमतः—

न तं अरी कंठछित्ता करेइ जं से करे अप्पणिया दुरप्पा ।
से नाहिई मच्चुमुहं तु पत्ते पच्छाणुतावेण दयाविहूणे ॥४८॥

व्याख्या—न **नैव 'तमिति** प्रस्तावादनर्थम्' **अरिः कण्ठच्छेत्ता** प्राणहर्ता **करोति** । **यत्** 'से' **तस्य करोत्यात्मीया दुरात्मा** दुष्टाचारप्रवृत्तिरूपा । न चैनामाचरन्नपि जन्तुरमूढतया वेत्ति । परं **स** दुरात्मताकर्ता **ज्ञास्यति** दुरात्मतां **मृत्युमुखं तु प्राप्तः । पश्चादनुतापेन** हा ! दुष्टं मयाऽनुष्ठितमित्येवंरूपेण **दया** संयमोऽहिंसा वा 'सत्याद्युपलक्षणमिदं' **तद्विहीनः** सन् । अतो महाऽनर्थहेतुः पश्चात्तापहेतुश्च दुरात्मता त्याज्यैवेति भावः ॥४८॥

यस्त्वन्तेऽपि तां न वेत्स्यति तस्य किम् ? इत्याह—

निरट्ठिया नग्गरुई उ तस्स जे उत्तमट्ठे विवज्जासमेइ ।
इमे वि से नत्थि परे वि लोए दुहओ वि से झिज्झइ तत्थ लोए ॥४९॥

व्याख्या—'तुरवधारणे' **निरर्थिकैव** निष्फलैव नाग्न्ये श्रामण्ये रुचिरिच्छा **नाग्न्यरुचिस्तस्य यः** 'उत्तमट्ठे' त्ति 'अपेर्गम्यत्वाद्' **उत्तमार्थेऽपि** पर्यन्तसमयाराधनरूपेऽपि **विपर्यासं** दुरात्मतायामपि सुन्दरात्मतापरिज्ञानरूप**मेति** गच्छति । अन्यस्य तु स्यादपि किञ्चित् फलमिति भावः । यतो**ऽयमपि** प्रत्यक्षो लोकः 'से' **तस्य नास्ति** देहक्लेशहेतुलोचादिसेवनात् । तथा **परोऽपि** भवान्तररूपोऽपि **लोकः** कुगतिगमनादनेकदुःखसम्भवाच्च । तथा च 'दुहओ वि' त्ति **द्विधाप्यैहिक**—पारत्रिकार्थाभावेन 'से झिज्झइ' त्ति **स** उभयलोकार्थसम्पत्तिमतो जनानवलोक्य धिग् मां निष्पुण्यकमुभयभ्रष्टतयेति चिन्तया **क्षीयते तत्रे**त्युभयरूपे **लोके** ॥४९॥

उक्तार्थोपसंहारमाह—

एमेवहाछंदकुसीलरूवे मग्गं विराहेत्तु जिणुत्तमाणं ।
कुररी विवा भोगरसाणुगिद्धा निरट्ठसोया परियावमेइ ॥५०॥

व्याख्या—एवमेव महाव्रतास्पर्शादिना प्रकारेण **यथाच्छन्दाः** स्वरुचिविरचिताचाराः **कुशीलाश्च** प्रतीतास्**तद्रूप**स्तत्स्वभावो **मार्गं विराध्य जिनोत्तमानां कुररीव** पक्षिणीव **भोगरसानुगृद्धा निरर्थो** निष्प्रयोजनः **शोको** यस्याः **सा** तथा **परितापं** पश्चात्तापरूप**मेति** गच्छति । यथा चैषामिषगृद्धा पक्ष्यन्तरेभ्यो विपत्प्राप्तौ शोचते न च ततः प्रतीकार एवमसावपि भोगरसगृद्धो लोकद्वयानर्थप्राप्तौ । ततोऽस्य स्व—परपरित्राणासमर्थत्वेनानाथत्वमिति भावः ॥५०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कृत्योपदेशमाह—

सुच्चाण मेहावि ! सुभासियं इमं अणुसासणं नाणगुणोववेयं ।
मग्गं कुसीलाण जहाय सव्वं महानियंठाण वए पहेणं ॥५१॥

व्याख्या—श्रुत्वा मेधाविन् ! सुष्ठु शोभनप्रकारेण भाषितं **सुभाषितमिदम**नन्तरोक्त**मनुशासनं** शिक्षणं **ज्ञानेन गुणेन** च विरतिरूपे**णोपपेतं** युक्तं । किं ? **मार्गं कुशीलानां हित्वा सर्वं महानिर्ग्रन्थानां व्रजेस्त्वं पथे**ति ॥५१॥

ततः किं फलम् ? इत्याह—

चरित्तमायारगुणन्निए तओ अणुत्तरं संजम पालियाणं ।
निरासवे संखवियाण कम्मं उवेइ ठाणं विउलुत्तमं धुवं ॥५२॥

व्याख्या—चरित्रस्याचार आसेवनं **गुणो** ज्ञानं **ताभ्यामन्वितो** 'मोऽलाक्षणिकः' महानिर्ग्रन्थमार्गगमना**दनुत्तरं** प्रधानं **संयमं** यथाख्यातचारित्ररूपं **पालयित्वा निराश्रवो** हिंसाद्याश्रवरहितः 'संखवियाण' त्ति **संक्षिपय्य** संक्षयं नीत्वा **कर्म** ज्ञानावरणादि **उपैत्यु**पगच्छति **स्थानं विपुलम**नन्तानां तत्रावस्थितेरत **उत्तमं ध्रुवं** नित्यं मुक्तिपदमित्यर्थः ॥५२॥

सर्वोपसंहारमाह—

एवुग्गदंते वि महातवोहणे महामुणी महापइन्ने महायसे ।
महानियंठिज्जमिणं महासुयं से काहए महया वित्थरेणं ॥५३॥

व्याख्या—एवमुक्तप्रकारेण 'से काहए' त्ति **स श्रेणिकपृष्टो महामुनि**रकथयदिति सम्बन्धः । स कीदृग् ? **उग्र** उत्कटः कर्मशत्रुं प्रति, **दान्तः** प्राग्वत् । '**अपिः** पूरणे' **महातपोधनो महाप्रतिज्ञ** इति दृढव्रताभ्युपगमोऽत एव **महायशाः** । किमकथयद् ? इत्याह—महानिर्ग्रन्थेभ्यो हितं **महानिर्ग्रन्थीयमिदम**नन्तरोक्तं **महाश्रुतं महाविस्तरेण** ॥५३॥

ततश्च—

तुट्ठो य सेणिओ राया इणमुदाहु कयंजली ।
अणाहत्तं जहाभूयं सुट्ठु मे उवदंसियं ॥५४॥

व्याख्या—तुष्टश्च श्रेणिको राजा इदं 'वच इति शेषः' 'उदाहु' त्ति-**उक्तवान् कृताञ्जलिः** । तदेवाह—**अनाथत्वं यथाभूतं** यथावस्थितं **सुष्ठु** यथास्यान्मे **उपदर्शितं** 'त्वयेति प्रक्रमः' ॥५४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तथा—

तुज्झं सुलद्धं खु मणुस्सजम्मं लाभा सुलद्धा य तुमे महेसी ।
तुब्भे सणाहा य सबंधवा य जं भे ठिया मग्गि जिणुत्तमाणं ॥५५॥

व्याख्या—तव सुलब्धं मनुष्यजन्म । लाभा वर्ण—रूपाद्यऽवाप्तिरूपाः **सुलब्धास्तव महर्षे ! यूयं सनाथाः सबान्धवाश्च** 'तत्त्वत इति गम्यम्' । **यद्** यस्माद् 'भे' **भवन्तः स्थिता मार्गे जिनोत्तमानाम्** ॥५५॥

किञ्च—

तं सि नाहो अनाहाणं सव्वभूयाण संजया ! ।
खामेमि ते महाभाग ! इच्छामि अणुसासिउं ॥५६॥

व्याख्या—त्वमसि नाथोऽनाथानां सर्वभूतानां हे संयत ! क्षामयामि 'ते' त्ति **त्वां हे महाभाग ! इच्छामि अनुशासयितुं** शिक्षयितुमात्मानं 'भवतेति गम्यते' ॥५६॥

पुनः क्षामणमेवाह—

पुच्छिऊण मए तुब्भं झाणविग्घो उ जो कओ ।
निमंतिया य भोगेहिं तं सव्वं मरिसेहि मे ॥५७॥

व्याख्या—पृष्ट्वा कथं प्रथमवयसि प्रव्रजितः ? इति पर्यनुयुज्य **मया तव ध्यानविघ्नस्तु यः कृतो निमन्त्रिताश्चा**ऽगृहीता **यूयं भोगैस्तत् सर्वं** 'मरिसेहि' त्ति **क्षमस्व** 'मे' **ममेति** ॥५७॥

अध्ययनोपसंहारमाह—

एवं थुणित्ताण स रायसीहो अणगारसीहं परमाइ भत्तीए ।
सओरोहो य सबंधवो य धम्माणुरत्तो विमलेण चेयसा ॥५८॥

ऊससियरोमकूवो काऊण य पयाहिणं ।
अभिवंदिऊण सिरसा अइयाओ नराहिवो ॥५९॥

अनयोर्व्याख्या—एवं स्तुत्वा स राजसिंहः श्रेणिकोऽनगारसिंहं 'उभयत्र सिंहशब्दः प्रकृष्टवाचकः' 'सओरोहो'त्ति **सावरोधः** सान्तःपुरः **सबान्धवश्च विमलेना**-पगतमिथ्यात्वमलेन **चेतसो**पलक्षितः ॥ उच्छ्वसिता उद्भिन्ना रोमकूपा रोमरन्ध्राणि यस्यासा-**वुच्छ्वसितरोमकूपः कृत्वा प्रदक्षिणामभिवन्द्य** च **शिरसा** 'अइयाओ' त्ति **अतियातो** गतः 'स्वस्थानमिति गम्यते' इति पद्यद्वयार्थः ॥५८-५९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

साधुः किं कृतवान् ? इत्याह–

इयरो वि गुणसमिद्धो तिगुत्तिगुत्तो तिदंडविरओ य ।
विहग इव विप्पमुक्को विहरइ वसुहं विगयमोहो ॥६०॥ त्ति बेमि ॥

व्याख्या–इतरः संयतोऽ**पि गुणसमृद्धस्त्रिगुप्तिगुप्तस्त्रिदण्डविरतश्च विहग इव** पक्षीव **विप्रमुक्तः** क्वचिदपि प्रतिबन्धरहितो **विहरति वसुधां विगतमोहः । इति ब्रवीमी**ति प्राग्वत् ॥६०॥ ग्रं० २४५-१६॥

इति श्रीकमलसंयमोपाध्यायविरचितायां सर्वार्थसिद्धौ श्रीउत्तराध्ययनटीकायां विंशतितमं महानिर्ग्रन्थीयमध्ययनं समाप्तम् ॥२०॥

● ● ●

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एकविंशं समुद्रपालीयमध्ययनम्

अनन्तराध्ययनेऽनाथत्वमुक्तमिह तदालोचनाद् विविक्तचर्ययैव चरितव्यमिति तामभिधातुमाह—

चंपाए पालिए नामं सावए आसि वाणिए ।
महावीरस्स भगवओ सीसो सो उ महप्पणो ॥१॥

व्याख्या—चम्पायां पुरि **पालितनामा** सार्थवाहः **श्रावक आसीदभूद् वाणिजो** वणिग्जातिः । **महावीरस्य भगवतः शिष्यः स** 'तुर्विशेषणे' महात्मनः प्रशस्यात्मनः ॥१॥

स च कीदृग् ? इत्याह—

निग्गंथे पावयणे सावए से विकोविए ।
पोएण ववहरंते पिहुंडं नगरमागए ॥२॥

व्याख्या—नैर्ग्रन्थे निर्ग्रन्थसम्बन्धिनि **प्रवचने श्रावकः स** विशेषेण **कोविदो** जीवादिपदार्थज्ञाता **पोतेन व्यवहरन्** प्रवहणवाणिज्यं कुर्वन् **पिहुण्डं नगरमागतः** प्राप्तः ॥२॥

तत्र च—

पिहुंडे ववहरंतस्स वाणिओ देइ धूयरं ।
तं ससत्तं पईगिज्झ सदेसमह पत्थिओ ॥३॥

व्याख्या—पिहुण्डे व्यवहरतस्तस्य तद्गुणाकृष्टचेताः कश्चिद् **वणिग् ददाति** 'धूयरं' ति **दुहितरं** पुत्रीं 'तां चोदूढवान्, स्थित्वा च तत्र कियत्कालमित्यध्याहारः' । तत**स्तां ससत्त्वां** सगर्भां **प्रतिगृह्या**ऽऽदाय **स्वदेशं** प्रत्य**थ प्रस्थित**श्चलितः ॥३॥

तत्रागच्छतः किमजनि ? इत्याह—

अह पालियस्स घरणी समुद्दंमि पसवई ।
अह बालए तहिं जाए समुद्दपालि त्ति नामए ॥४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—अथ पालितस्य गृहिणी भार्या **समुद्रे प्रसूतेऽथ बालकः** सुतस्तस्मिन् प्रसवने **जातः समुद्रपाल इति नामकः** ॥४॥

ततश्च—

खेमेण आगए चंपं सावए वाणिए घरं ।
संवड्ढई घरे तस्स दारए से सुहोईए ॥५॥

व्याख्या—क्षेमेण कुशलेनागत**श्चम्पां श्रावकः** 'घरं' ति **गृहं** 'चस्य गम्यत्वात्' स्वकीयं गृहं चागतः । कृतं च तत्र वर्धापनकादि । **संवर्धते गृहे तस्य पालितस्य दारकः स** सुखैरुचितः **सुखोचितः** सुकुमारोऽकर्कशः ॥५॥

बावत्तरी कलाओ य सिक्खिए नीइकोविए ।
जुव्वणेण य संपन्ने सुरूवे पियदंसणे ॥६॥

व्याख्या—ततः कलाग्रहणयोग्यतां प्राप्तः स **द्वासप्ततिकलाः शिक्षितो नीतिकोविदो** न्यायाभिज्ञो **यौवनेन च सम्पन्नो** युक्तोऽत एव **सुरूपः प्रियदर्शनः** सर्वेषामानन्दकः ॥६॥

तस्स रूववइं भज्जं पिया आणेइ रूविणिं ।
पासाए कीलए रम्मे देवो दोगुंदगो जहा ॥७॥

व्याख्या—विवाहयोग्यतां च **तस्य** ज्ञात्वा **रूपवतीं भार्यां पिता पालितो** वणि**गानयति रूपिणीं** रूपिणिनाम्नीम् । परिणायितश्च तामसौ **प्रासादे क्रीडति रमते** 'तया सहेति शेषः' **रम्ये** मनोहरे **देवो दोगुन्दको यथा** ॥७॥

अह अन्नया कयाई पासायालोयणे ट्ठिओ ।
वज्झमंडणसोभागं वज्झं पासइ वज्झगं ॥८॥

व्याख्या—अथान्यदा कदाचित् प्रासादालोकने सौधगवाक्षे **स्थितः** सन् वध्यमण्डनानि रक्तचन्दन—करवीरादीनि तैः शोभा यस्याऽसौ **वध्यमण्डनशोभाकस्तं** तादृशं **वध्यं** वधार्हं कञ्चनाकार्यकारिणं नरं **पश्यति बाह्यगं** बहिर्नीयमानं वध्यभूमिगतं वा ॥८॥

तं पासिऊण संवेगं समुद्दपालो इणमब्बवी ।
अहो ! असुहाण कम्माणं निज्जाणं पावगं इमं ॥९॥

व्याख्या—तं तथाविधं वध्यं **दृष्ट्वा** संवेगः संसारवैमुख्यतो मुक्त्यभिलाषस्तद्धेतुत्वात् सोऽपि **संवेगस्तं** संवेगजनकमित्यर्थस्ततश्च **समुद्रपाल इदमब्रवीत्** । यथा—

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अहो ! अशुभानां कर्मणां निर्याणमवसानं **पापकमशुभमिदं** प्रत्यक्षम्, यदसौ वराको वधार्थमित्थं नीयते इति भावः ॥९॥

संबुद्धो सो तहिं भगवं परं संवेगमागओ ।
आपुच्छम्मा-पियरो पव्वए अणगारियं ॥१०॥

व्याख्या—एवं च भावयन् **सम्बुद्धो** ज्ञाततत्त्वः **स** वणिक्पुत्रस्**तत्**रेति प्रासादालोकने **भगवान्** माहात्म्यवान् परं प्रकृष्टं **संवेगमागतश्चापृच्छ्य माता-पितरौ** 'पव्वए' त्ति **प्राव्राजीत्** प्रकर्षेण गतवा**ननगारितां** दीक्षां प्रतिपन्नवानित्यर्थः ॥१०॥

प्रव्रज्य च यदसौ कृतवांस्तदाह—

जहित्तु संगं थ महाकिलेसं महंतमोहं कसिणं भयावहं ।
परियायधम्मं चऽभिरोयएज्जा वयाणि सीलाणि परीसहे य ॥११॥

व्याख्या—हित्वा त्यक्त्वा **सङ्गं** स्वजनादिप्रतिबन्धं '**थः** पूरणे निपातः' **महान् क्लेशो** यस्मात् यस्मिन् वा स तथा **तम्** । **महान् मोहो**ऽभिष्वङ्गो यस्मिन् स तथा **तम्** । **कृत्स्नं** सर्वं कृष्णं वा कृष्णलेश्यापरिणामहेतुत्वेनात एव **भयावहं** विवेकिनाम् । ततः 'परियाय' त्ति पर्यायः प्रक्रमात् प्रव्रज्यापर्यायस्तत्र धर्मः **पर्यायधर्मस्तं** '**च**: पादपूर्तौ' 'अभिरोयएज्ज' त्ति 'आर्षत्वात् ह्यस्तन्यर्थे सप्तमी' ततो**ऽभिरोचितवां**स्तदनुष्ठाने प्रीतिं कृतवान् । एवमुत्तरक्रियास्वपि यथासम्भवं भावनीयम् । पर्यायधर्ममेव विशेषेणाह—**व्रतानि** महाव्रतानि, **शीलानि** पिण्डविशुद्ध्याद्युत्तरगुणरूपाणि, **परीषहानि**ति 'भीमो भीमसेनेति न्यायेन' परीषहसहनानि **च** ॥११॥

एतदभिरुच्यनन्तरं यत् कृतवांस्तदाह—

अहिंस-सच्चं च अतेणगं च तत्तो य बंभं अपरिग्गहं च ।
पडिवज्जिया पंच महव्वयाइं चरिज्ज धम्मं जिणदेसियं विऊ ॥१२॥

व्याख्या—अहिंसां सत्यमस्तैन्यकं ततश्च ब्रह्मचर्यमपरिग्रहं च प्रतिपद्य पञ्च महाव्रतानि 'चरिज्ज'त्ति प्राग्व**दचरत्** नाङ्गीकृत्यैवाऽतिष्ठदिति भावः । **धर्मं** श्रुत-चारित्ररूपं **जिनदेशितं** 'विऊ' त्ति **विद्वान्** जानानः ॥१२॥

सव्वेहिं भूएहिं दयाणुकंपे खंतिक्खमे संजयबंभयारी ।
सावज्जजोगं परिवज्जयंतो चरिज्ज भिक्खू सुसमाहिइंदिए ॥१३॥

व्याख्या—'सुब्व्यत्ययात्' **सर्वेषु भूतेषु** प्राणिषु दयया रक्षोपदेशरूपयाऽनुमकम्पत

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इति **दयाऽनुकम्पी** । क्षान्त्या न त्वशक्त्या क्षमते-प्रत्यनीकदुर्वचनानि सहते इति **क्षान्तिक्षमः** । **संयतश्चासौ ब्रह्मचारी** च स तथा । ब्रह्मचर्यस्य दुरनुचरत्वख्यापनार्थं पुनस्तद्ग्रहणम् । **सावद्ययोगं परिवर्जयन्नचरद् भिक्षुः सुसमाहितेन्द्रियः** ॥१३॥

कालेण कालं विहरेज्ज रट्ठे बलाबलं जाणिय अप्पणो उ ।
सीहो व सद्देण न संतसिज्जा वयजोग सुच्चा न असब्भमाहु ॥१४॥

व्याख्या–कालेन पादोनपौरुष्यादिना **कालमि**ति कालोचितं प्रत्युपेक्षणादि 'कुर्वन्निति शेषः' **व्यहरद् राष्ट्रे** मण्डले **बलाबलं** सहिष्णुत्वासहिष्णुत्वलक्षणं **ज्ञात्वाऽऽत्मनः** स्वस्य । यथा यथा संयमयोगहानिर्न स्यात् तथा तथेति भावः । अन्यच्च **सिंहवच्छब्देन** भयोत्पादकेन **न समत्रस्यन्नै**व सत्त्वाच्चलितवानत एव च **वाग्योगम**र्थाद् दुःखजनकं **श्रुत्वा न** नैवा**ऽसभ्यम**श्लीलरूपं 'आहु'त्ति **उक्तवान्** ॥१४॥

तर्हि किमऽयमकरोद् ? इत्याह—

उवेहमाणो उ परिव्वइज्जा पियमप्पियं सव्व तितिक्खएज्जा ।
न सव्व सव्वत्थऽभिरोयइज्जा न यावि पूयं गरहं च संजए ॥१५॥

व्याख्या–उपेक्षमाणस्तमश्लीलवचनादिकमवधीरयन्नेव **पर्यव्रजत्** । तथा **प्रियमप्रियं सर्वं** 'तितिक्खएज्ज'त्ति **अतितिक्षत** सोढवान् । किञ्च **न सर्वं** वस्तु **सर्वत्र** स्थाने**ऽभ्यरोचयत** न यथादृष्टाभिलाषुकोऽभूदिति भावो **न चापि पूजां गर्हां च** परापवादरूपां चाभ्यरोचयतेति योज्यम् ॥१५॥

ननु भिक्षोरप्यन्यथाभावः किं सम्भवति ? येनेत्थमित्थं तद्गुणाभिधानमित्याह—

अणेगछंदा इह माणवेहिं जे भावओ संपकरेइ भिक्खू ।
भय-भेरवा तत्थ उइंति भीमा दिव्वा मणुस्सा अदुवा तिरिच्छा ॥१६॥

व्याख्या–अनेके च्छन्दा अभिप्रायाः 'सम्भवन्तीति गम्यम्' **इह** जगति 'सुब्यत्ययात्' **मानवेषु** 'जे' इति **यान्** छन्दान् **भावत**स्तत्त्वत औदयिकादिभावतो वा **संप्रकरोति** भृशं विधत्ते **भिक्षुरपि** 'अपेरत्र गम्यमानत्वात्' अत इत्थमित्थं तद्गुणाभिधानमिति भावः । अपरं च **भयभैरवा** भयोत्पादकत्वेन भीषणास्**तत्र**-व्रताङ्गीकारे 'उइंति'त्ति **उद्यान्ति** उदयं यान्ति । भैरवा इत्युक्तेऽपि पुन**र्भीमा** इति ग्रहणमतिरौद्रताख्यापनार्थम् । **दिव्या मानुष्याः** 'अदुव' त्ति **अथवा तैरश्चाः** 'उपसर्गा इति गम्यते' ॥१६॥

Jain Education International 2010_02   For Private & Personal Use Only   www.jainelibrary.org

तथा—

परीसहा दुव्विसहा अणेगे सीयंति जत्था बहुकायरा नरा ।
से तत्थ पत्ते न वहिज्ज भिक्खू संगामसीसे इव नागराया ॥१७॥

व्याख्या—परीषहाः क्षुधादयो **दुर्विषहा** दुःसहा 'उद्यान्तीति सम्बन्धः' । **सीदन्ति** संयमं प्रति शिथिलीभवन्ति । 'जत्था' इति **यत्र** येषूपसर्गेषु परीषहेषु च सत्सु **बहुकातरा नराः** 'से' इति **स तत्र** तेषु 'पत्ते' त्ति वचनव्यत्ययात् **प्राप्तेषु नाव्यथत** न चलितो वा सत्त्वाद् **भिक्षुः** सन् **सङ्ग्रामशीर्ष इव नागराजो** गजेन्द्रः ॥१७॥

सीओसणा दंस-मसा य फासा आयंका विविहा फुसंति देहं ।
अकुक्कुओ तत्थऽहियासइज्जा रयाइं खेविज्ज पुरा कडाइं ॥१८॥

व्याख्या—शीतोष्णे दंश—मशकाश्च प्रतीताः, **स्पर्शास्तृणादीनाम्, आतङ्का** रोगा **विविधाः स्पृशन्त्युपतापयन्ति देहं** 'तथापीति गम्यम्' । 'अकुक्कुओ'त्ति आर्षत्वान्न कुत्सितं कूजति पीडितः सन्नाक्रन्दतीत्य**कुकूजस्तत्र** शीतादि**ष्वध्यसहत** । एवंविधश्च **रजांसि** जीवमालिन्यहेतुतया कर्मणा 'खेविज्ज'त्ति **अक्षिपत** परीषहसहनादिभिः क्षिप्तवान् ॥१८॥

पहाय रागं च तहेव दोसं मोहं च भिक्खू सययं वियक्खणो ।
मेरु व्व वाएण अकंपमाणो परीसहे आयगुत्ते सहिज्जा ॥१९॥

व्याख्या—प्रहाय त्यक्त्वा **रागं द्वेषं च तथैव मोहं** मिथ्यात्वादिरूपमज्ञानं वा **भिक्षुः सततं विचक्षणो मेरुवद् वातेनाकम्पमानः परीषहान्** आत्मना गुप्त **आत्मगुप्तः** कूर्मवत् संकुचिताङ्गः 'सहिज्ज'त्ति **असहत** ॥१९॥

अणुन्नए नावणए महेसी न यावि पूयं गरहं च संजए ।
से उज्जुभावं पडिवज्ज संजए निव्वाणमग्गं विरए उवेइ ॥२०॥

व्याख्या—अनुन्नतो नावनतश्च महर्षिर्न चापि पूजां गर्हां च 'प्रतीति शेषः' 'संजए'त्ति **असजत्** सङ्गं कृतवान् तत्र चानुन्नतत्वमनवनतत्वं च हेतुः, भावत उन्नतो हि पूजां प्रति, अवनतश्च गर्हां प्रति, सङ्गं कुर्यान्नत्वन्यथेति भावः । 'से' इति **स** एवं गुणवान् **ऋजुभावमार्जवं प्रतिपद्याङ्गीकृत्य संयतो निर्वाणमार्गं विरतः सन्नुपैति** प्राप्नोति ॥२०॥

तदा स कीदृक् किं करोति ? इत्याह—

अरइ-रइसहे पहीणसंथवे विरए आयहिए पहाणवं ।
परमट्ठपएहिं चिट्ठई छिन्नसोए अममो अकिंचणो ॥२१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—अरति-रती संयमासंयमविषये सहते ताभ्यां न बाध्यते इत्य**रति-रतिसहः**। **प्रहीणः** प्रक्षीणः **संस्तवः** पूर्व—पश्चात्परिचयरूपो गृहिभिः सह यस्य **स** तथा। **विरतः आत्महितः**। प्रधानः सर्वसंयमो मुक्तिहेतुत्वादस्यास्त्यऽसौ **प्रधानवान्**। परमश्चासावर्थश्च **परमार्थो** मोक्ष**स्तस्य पदानि** सम्यग्दर्शनादीनि **तेषु तिष्ठति**। छिन्नानि स्रोतांसि मिथ्यादर्शनादीनि येनासौ **छिन्नस्रोताः छिन्नशोको** वाऽत **एवाममोऽकिञ्चनः**। इह च संयमविशेषाणामानन्त्यात् तदभिधायिपदानां पुनः पुनरभिधानेऽपि न पौनरुक्त्यम् ॥२१॥

विवित्तलयणाइ भएज्ज ताई निरोवलेवाइं असंथडाइं।
इसीहि चिन्नाइ महायसेहि काएण फासेज्ज परीसहाइं ॥२२॥

व्याख्या—विविक्तानि लयनानि स्त्र्यादिरहितोपाश्रयरूपाण्यत एव **निरुपलेपानि** भावतोऽभिष्वङ्गरूपोपलेपवर्जितानि द्रव्यतस्तदर्थं नोपलिप्तानि। **असंस्तृतानि** बीजादिभिरव्याप्तानि। अत एव निर्दोषतया **ऋषिभिर्**मुनिभि**श्चीर्णान्या**सेवितानि **महायशोभिः** 'भएज्ज'त्ति **अभजदि**ति सम्बन्धः। तथा **कायेनास्पृशत्** सोढवानित्यर्थः 'चस्याध्याहारात्' **परीषहांश्च**। पुनः पुनः परीषहस्पर्शनाभिधानमतिशयख्यापनार्थम् ॥२२॥

ततः स कीदृगऽभूद् ? इत्याह—

स नाण-नाणोवगए महेसी अणुत्तरं चरिउं धम्मसंचयं।
अणुत्तरे नाणधरे जसंसी ओभासई सूरिए वंतलिक्खे ॥२३॥

व्याख्या—स समुद्रपालनामा मुनिर्ज्ञानं श्रुतज्ञानं तेन ज्ञानमवगमः 'प्रक्रमाद् यथावत् क्रियाकलापस्य' तेनोपगतो युक्तो **ज्ञान-ज्ञानोपगतो महर्षिर**नुत्तरं **चरित्वा धर्मसंचयं** क्षान्त्यादिधर्मसमूहम्। **अनुत्तरमुत्कृष्टं** य**ज्ज्ञानं** केवलाख्यं **तद्धरो यशस्वी** 'ओभासइ'त्ति **अवभासते** प्रकाशते **सूर्यवदन्तरिक्षे**, यथाकाशे सूर्योऽवभासते तथाऽसावप्युत्पन्नकेवल इति ॥२३॥

अध्ययनोपसंहारमाह—

दुविहं खवेऊण य पुन्न-पावं निरंगणे सव्वओ विप्पमुक्के।
तरित्ता समुद्दं व महाभवोहं समुद्दपाले अपुणागमं गए ॥२४॥

त्ति बेमि ॥

व्याख्या—द्विविधं घात्यघातिकर्मभेदेन **पुण्य-पापं** शुभाशुभप्रकृतिरूपं अर्थात् कर्म **क्षपयित्वा** 'अगेर्गत्यर्थत्वात्' **निरङ्गनः** 'प्रस्तावात् संयमे' निश्चलः शैलेश्यवस्थां प्राप्त

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इत्यर्थः । **सर्वतो** बाह्यादान्तराच्च 'प्रक्रमादभिष्वङ्गहेतोः' **विप्रमुक्तः** । **तीर्त्वोल्लङ्घ्य** समुद्रमिवातिदुस्तरतया **महांश्चासौ भवौघश्च** देवादिभवसमूहस्तं **समुद्रपालो** मुनि-**रपुनरागमां गतिं** सिद्धिलक्षणां **गतः** प्राप्तः । **इति ब्रवीमीति** प्राग्वात् ॥२४॥ ग्रं० ११७-१६॥

इति श्रीकमलसंयमोपाध्यायविरचितायां सर्वार्थसिद्धौ श्रीउत्तराध्ययनटीकायां

एकविंशं समुद्रपालीयमध्ययनं समाप्तम् ॥२१॥

• • •

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

द्वाविंशं रथनेमीयमध्ययनम्

इहानन्तराध्ययने विविक्तचर्योक्ता, सा च चारित्रिणा धृतिमता च कर्तुं शक्यतेऽतः कथञ्चिदुत्पन्नविस्रोतसिकेनापि **रथनेमि**वच्चरणे चारित्रे धृतिराधेयेत्यनेन सम्बन्धेनायातस्यास्य रथनेमीयाख्यस्य द्वाविंशाध्ययनस्य प्रस्तावनार्थं श्री**नेमि**चरितं किञ्चिल्लिख्यते । तथाहि—

रम्ये कस्मिंश्चिदेकस्मिन् सन्निवेशे श्रियाऽऽश्रिते ।
कुलपुत्रो **धना**भिख्यो ग्रामाध्यक्षोद्वहोऽभवत् ॥१॥

तन्मातुलसुता तस्य जज्ञे **धनवती** प्रिया ।
ग्रीष्मर्तावन्यदा सोऽगादरण्यानीं सतन्त्रकः ॥२॥

प्रयोजनवशात् तत्र भ्रमन् सोऽपश्यदेककम् ।
साधुं सार्थपरिभ्रष्टं भूगतं धमनीकृशम् ॥३॥

क्षुत्-तृषाऽऽर्ति-पथश्रान्ति-संशुष्यद्गल-तालुकम् ।
कृच्छ्राज्जिगमिषुप्राणं विनिमीलितलोचनम् ॥४॥ **युग्मम्**

धनोऽथ दध्यिवानेष सुतपस्वी महामुनिः ।
कुतोऽपि हेतोः सम्प्राप्तः कश्चिदेतादृशीं दशाम् ॥५॥

ततः सञ्जातकरुणो भक्त्याऽम्भोभिः सिषेच तम् ।
चेलाञ्चलसमीरेण देहसंवाहनेन च ॥६॥

सुस्थं कृत्वा पुरं नीत्वा प्रत्यचारीत् सदौषधैः ।
साधुरप्युचितं धर्मोपदेशं ददिवान् मुदा ॥७॥ **युग्मम्**

"[१]संसारे दुहपउरे परलोगहियं बुहेण कायव्वं ।
ता मंस-मज्ज-पारद्धिमाइ ण करेज्ज कइया वि ॥१॥

---

१. संसारे दुःखप्रचुरे परलोकहितं बुधेन कर्तव्यम् ।
तत् मांस-मद्य-पापर्द्ध्यादि न कुर्यात् कदाऽपि ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

[१]पंचिंदियवहभूयं मंसं दुग्गंधमसुइ बीभच्छं ।
मज्जं च कुगइमूलं सिरि-हिरि-मइ-धम्मनासकरं ॥२॥
सपरोवघायजणया नारय-तिरिदुहकरा य पारद्धी ।
आयहियएणं तिन्नि वि वज्जेयव्वाणि बहुदोसा" ॥३॥

एवमाकर्ण्य संविग्नः स ऊचे भगवन्नहो ! ।
गृहस्थोचितमादेश्यं धर्मकृत्यं कृपालुना ॥८॥

साधुराह—

"[२]सो धम्मो जत्थ दया, दसट्ठदोसा न जस्स सो देवो ।
सो सुगुरू जो नाणी आरम्भ-परिग्गहोवरओ ॥१॥

अन्नं च—

देव-गुरूण तिसंझं करेज्ज तह परमवंदणं विहिणा ।
तह पुप्फ-वत्थमाईहिं पूयणं सव्वकालंमि ॥२॥
भोयणसमए सयणे विबोहणे पवसणे भए वसणे ।
पंचनमोक्कारं खलु सुमरेज्जा सव्वकज्जेसु" ॥३॥

एवमाद्युपदेशेन ग्राहितः शुभभावतः ।
सम्यक्त्वमूलसुश्राद्धधर्मं तेन स साधुना ॥९॥

धन्यम्मन्यो धनः साधूपदिष्टं धर्ममाचरत् ।
महत् तपस्विवात्सल्यात् शुभकर्मानुबद्धवान् ॥१०॥

साधुर्धर्मे स्थिरीकृत्य तमापृच्छ्य च संयमी ।
भव्यान् सम्बोधयन् पृथ्वीं विजहार यथासुखम् ॥११॥

---

१. पञ्चेन्द्रियवधभूतं मांसं दुर्गन्धमशुचि बीभत्सम् ।
मद्यं च कुगतिमूलं श्री-ह्री-मति-धर्मनाशकरम् ॥२॥
स्व-परोपघातजनका नरक-तिर्यग्-दुःखकरा च पापर्द्धिः ।
आत्महितकेन त्रीण्यपि वर्जितव्यानि बहुदोषानि ॥३॥

२. स धर्मो यत्र दया, दशाष्टदोषा न यस्य स देवः ।
स सुगुरुर्यो ज्ञानी आरम्भ-परिग्रहोपरतः ॥१॥
अन्यच्च-देव-गुरूणां त्रिसन्ध्यं कुर्यात् तथा परमवन्दनं विधिना ।
तथा पुष्प-वस्त्रादिभिः पूजनं सर्वकाले ॥२॥
भोजनसमये शयने विबोधने प्रवसने भये व्यसने ।
पञ्चनमस्कारं खलु स्मरेत् सर्वकार्येषु ॥३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

धनः स्वीकृत्य चारित्रं समये सकलत्रकः ।
तदाराध्य च **सौधर्मे** सोऽभूत् सामानिकः सुरः ॥१२॥
धनवत्यपि तत्रैव तन्मित्रत्वेन चाऽजनि ।
तत्र दिव्यं महासौख्यं तौ द्वावनुबभूवतुः ॥१३॥
ततश्च्युतो **धनो** जज्ञे **वैताढ्ये सूरतेजसः** ।
राज्ञः पुत्र**श्चित्रगति**नामा विद्याधरेश्वरः ॥१४॥
सुता **सूर**नरेन्द्रस्य भूत्वा सा **धनवत्यपि** ।
तस्य **चित्रगते** राज्ञो जाया जाताऽतिवल्लभा ॥१५॥
प्रान्ते प्रव्रज्ययाऽभूतां तौ **माहेन्द्रे** सुरोत्तमौ ।
धनः सामानिकस्तत्र तन्मित्रमपराऽभवत् ॥१६॥
ततो**ऽपराजितो** भूपो **धनः प्रीतिमती** प्रिया ।
अन्या तस्यारणे कल्पे तावास्तां सुहृदौ ततः ॥१७॥
ततश्च्युतो **धनः शङ्ख**नृपोऽन्या च **यशोमती** ।
तत्कान्ताऽजनि वैराग्याद् व्रतं जगृहतुस्तकौ ॥१८॥
शङ्खर्षिविंशतिस्थानान्यर्हद्भक्त्यादिकानि च ।
आराध्य विधिना सम्यक् तीर्थकृत्कर्म बद्धवान् ॥१९॥
ततो**ऽपराजिता**भिख्ये विमाने त्रिदशो **धनः** ।
यशोमत्यपि चारित्रं चरित्वा तत्र सोऽभवत् ॥२०॥
इतः **शौर्यपुरद्रङ्गे समुद्रविजयो** नृपः ।
दशानां च दशार्हाणां ज्यायान् राज्यं पिपर्ति यः ॥२१॥
तद्वल्लभा **शिवा**देवी तत्कुक्षाववतीर्णवान् ।
धनजीवोऽङ्गजत्वेन विमाना**दपराजितात्** ॥२२॥
सुयोगे कार्तिके मासि श्यामायां द्वादशीतिथौ ।
निशीथे तत्र साऽद्राक्षीच्छुभस्वप्नांश्चतुर्दशं ॥२३॥
श्रावणिक्यां च पञ्चम्यां शुद्धायां विश्वशर्मदम् ।
द्योतयन्तं दिशः सर्वाः साऽसूत समये सुतम् ॥२४॥
तदा तत्रागता दिक्कुमार्यो निजनिजाश्रयात् ।
षट्पञ्चाशन्मुदा सूतिकर्मशुद्धिं व्यधुस्तराम् ॥२५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अर्हज्जन्मावधेर्मत्वा चतुःषष्टिः सुरेश्वराः ।
सुमेरुशिखरे स्नात्रं चक्रिरे सपरिच्छदाः ॥२६॥

समुद्रविजयो राजा पुरालङ्करणादिभिः ।
पारितोषिकदानाद्यैर्वर्धापनमहो व्यधात् ॥२७॥

देवीदृष्टारिष्टरत्नचत्नचक्रस्वप्नानुसारतः ।
अरिष्टनेमिरित्याख्यां स चकार महोत्सवैः ॥२८॥

लाल्यमानः पाल्यमानो धात्रीभिः प्रेमपूर्वकम् ।
प्रभुर्जातोऽष्टवर्षीयान् वर्धमानः कलादिभिः ॥२९॥

तथाऽ**पराजिता**च्च्युत्वो**ग्रसेन**नृपतेस्तदा ।
देवो **यशोमती**जीवो **राजीमत्य**भवत् सुता ॥३०॥

इतश्च—

हरिहत**कंस**व्यतिकर**जीवयशा**वचनतो **जरासन्धे** ।
भूपे कुपितेऽपाचीं भीतास्ते यादवा भेजुः ॥३१॥

केशवभक्त्याऽऽराधितधनदकृतायां महाम्बुदेस्तीरे ।
जात्याष्टापदमय्यां ते तस्थु**र्द्वारिकापुर्याम्** ॥३२॥

कालेन निहत्य हरी रामोपेतो नृपं **जरासन्धम्** ।
समरे हेलासाधित**भरता**र्धाधीश्वरो जातः ॥३३॥

तत्रेच्छया **नेमि**कुमारधीरस्तारुण्यमाप्तो विषयेष्वरक्तः ।
दीव्यन्ननेकैः सवयःकुमारैः स यादवेष्टो विचरत्यधृष्यः ॥३४॥

शेषं चरित्रं सूत्रकृदेवाह—

सोरियपुरंमि नयरे आसि राया महिड्ढिओ ।
वसुदेवि त्ति नामेणं रायलक्खणसंजुए ॥१॥

तस्स भज्जा दुवे आसि रोहिणी देवई तहा ।
तासिं दोण्हं पि दो पुत्ता इट्ठा राम-केसवा ॥२॥

अनयोर्व्याख्या—शौर्यपुरे नाम्नि पूर्वोक्ते नगरे **आसीद् राजा महर्द्धिको वसुदेव इति नाम्ना** राज्ञो लक्षणानि चक्र—स्वस्तिकाङ्कुशादीनि तैः संयुतो **राजलक्षणसंयुतः** ॥ **तस्य भार्ये द्वे** 'आसि' त्ति **अभूताम्** । 'तासिं' ति **तयो रोहिणी—देवक्योर्द्वौ पुत्राविष्टौ**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

वल्लभौ **राम-केशवौ**-बलभद्र-वासुदेवौ 'अभूतामित्यत्रापि योज्यम्' । तत्र **रोहिण्या रामो देवक्याश्च केशवो** वासुदेवो नवम इति गाथाद्वयार्थः ॥१-२॥

सोरियपुरंमि नयरे आसि राया महिड्ढिए ।
समुद्दविजए नामं रायलक्खणसंजुए ॥३॥

तस्स भज्जा सिवा नाम तीसे पुत्ते महायसे ।
भयवं अरिट्ठनेमि त्ति लोगनाहे दमीसरे ॥४॥

अनयोर्व्याख्या—शौर्यपुरे नाम्नि पूर्वोक्ते नगरे **आसीद् राजा महर्द्धिकः** समुद्रविजय इति नाम यस्य स **समुद्रविजयनामा** 'प्राकृतत्वादनुस्वारः', किं लक्षणः ? **राजलक्षणानि** छत्र-चामर-सिंहासनादीनि **तैः संयुतः** । पुनः **शौर्यपुरा**भिधानं **समुद्रविजय-वसुदेवयो**रेकत्र स्थितिदर्शनार्थम् । तथा भगवद्विवाहोपयोगित्वेन प्रथमोत्पन्नत्वेन च **केशवस्य** पूर्वमभिधानम्, तत्सहचरत्वाद् **रामस्येति** । दमिनामुपशमिनामीश्वरो **दमीश्वरः** कौमार एव जितकामवीर्यत्वात् तस्येति गाथाद्वयार्थः ॥३-४॥

स भगवान् कीदृग् ? इत्याह—

सोऽरिट्ठनेमिनामो उ लक्खण-स्सरसंजुओ ।
अट्ठसहस्सलक्खणधरो गोयमो कालगच्छवी ॥५॥

व्याख्या—सोऽरिष्टनेमिनामा 'प्राकृतत्वेन पूर्वनिपातात्' स्वरस्य लक्षणानि सुस्वरत्व-गम्भीरत्वादीनि तैः संयुतः **स्वर-लक्षणसंयुतः** । **अष्टोत्तरसहस्रलक्षणधरः**-अष्टोत्तर-सहस्रसङ्ख्यशुभसूचककरादिरेखाद्यात्मकचक्रादिलक्षणधारको **गौतमो** गोत्रेण, **कालकच्छविः** कृष्णकान्तिः ॥५॥

वज्जरिसहसंघयणो समचउरंसो झसोयरो ।
तस्स रायमइं कन्नं भज्जं जायइ केसवो ॥६॥

व्याख्या—वज्रऋषभनाराचसंहननधरः, समचतुरस्रः, 'झसोयरो' त्ति झषो मत्स्यस्तदुदरमिव तदाकारतयोदरं यस्याऽसौ **झषोदरः** 'मध्यपदलोपी समासः' । इतश्च द्वारिकायां राज्यं भुञ्जानः **केशवो** यौवनस्थे**ऽरिष्टनेमिनि समुद्रविजया**देशतो यदचेष्टत तदाह—'तस्स' त्ति **तस्यारिष्टनेमिनो राजीमतीं** कन्यां **भार्यां** 'कर्तुमिति शेषः' **याचते केशवः** 'तज्जनकमिति प्रक्रमः' ॥६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सा च कीदृशी ? इत्याह—

अह सा रायवरकन्ना सुसीला चारुपेहिणी ।
सव्वलक्खणसंपुन्ना विज्जुसोयामणिप्पहा ॥७॥

व्याख्या—अथ सा राजवरस्योग्रसेनस्य कन्या **राजवरकन्या राजीमती**त्यर्थः । **सुशीला** चारु मनोहरं प्रेक्षितुमवलोकितुं शीलमस्याः सा **चारुप्रेक्षी** नाधोदृष्टितादि-दोषदुष्टा। **सर्वलक्षणसम्पूर्णा** लक्षणानि मषीतिलकादीनि ताभिः सम्पूर्णा । पुनः किम्भूता ? 'विज्जुसोयामणिप्पह'त्ति विशेषेण द्योत्यते दीप्यते इति विद्युद् दीप्ता सा चासौ सौदामिनी च **विद्युत्सौदामिनी** तद्वत् **प्रभा** यस्याः **सा** तथा ॥७॥

अहाह जणओ तीसे वासुदेवं महिड्ढियं ।
इहागच्छउ कुमारो जा से कन्नं दलामहं ॥८॥

व्याख्या—अथ याञ्चानन्तर**माहो**क्तवान् **जनक उग्रसेनस्तस्या राजीमत्या वासुदेवं महर्धिकं** सप्ताङ्गराज्यादिऋद्धियुक्तम् । **इहागच्छतु कुमारः** 'जा से' त्ति 'सुब्व्यत्ययाद्' **येन तस्मै** कुमाराय **कन्यां ददामि** विवाहविधिनोपढौकयाम्य**हम्** ॥८॥

एवं च प्रतिपन्नाया**मुग्रसेनेन राजीमत्या**मासन्ने क्रोष्टुक्यादिष्टे विवाहलग्ने यदभूत् तदाह—

सव्वोसहीहिं ण्हविओ कयकोउयमंगलो ।
दिव्वजुयलपरिहिओ आहरणेहिं विभूसिओ ॥९॥

व्याख्या—सर्वाश्च ता जया-विजयर्द्धि-वृद्ध्यादयः **सर्वौषधयस्ताभिः स्नपितो**-ऽभिषिक्तः, कृतानि कौतुकानि ललाटमुशलस्पर्शनादीनि मङ्गलानि दध्यक्षत-दूर्वा-चन्दन-वन्दनादीनि यस्य स **कृतकौतुकमङ्गलः** । 'दिव्वजुयलपरिहिओ'त्ति प्राकृत्वात् **परिहितं दिव्ययुगलं** प्रस्तावाद् **दूष्ययुगलं** येन **स** तथा । **आभरणैर्विभूषितः** ॥९॥

मत्तं च गंधहत्थिं वासुदेवस्स जिट्ठगं ।
आरूढो सोहए अहियं सिरे चूडामणी जहा ॥१०॥

व्याख्या—मत्तं च गन्धहस्तिनं वासुदेवस्य ज्येष्ठकं पट्टहस्तिन**मारूढः शोभते**ऽधिकं **शिरसि चूडामणिः** शिरोऽलङ्काररत्नं **यथा** ॥१०॥

अह ऊसिएण छत्तेण चामराहि य सोहिओ ।
दसारचक्केण य सो सव्वओ परिवारिओ ॥११॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या–अथो**च्छ्रिते**नोपरि धृतेन **च्छत्रेण चामराभ्यां** चाधिक**शोभितः**। **दशार्हचक्रेण** यदुसमूहेन **सर्वतः परिवारितः** ॥११॥

चउरंगिणीए सेणाए रइयाए जहक्कमं ।
तुरियाण सन्निनाएण दिव्वेण गयणं फुसे ॥१२॥

व्याख्या–चतुरङ्गिण्या गजाश्व-रथ-पदातिरूपाङ्गचतुष्टयया **सेनया रचितया** न्यस्तया **यथाक्रमं** यथापरिपाटि। **तूर्याणां** मृदङ्ग-पटहादीनां **संनिनादे**नातिगाढध्वनिना **दिव्येन** प्रधानेन देवकृतेन वा 'गयणं फुसे' त्ति आर्षत्वाद् **गगनस्पृशा** अतिप्रबलतया नभोव्यापिना उपलक्षितः ॥१२॥

एयारिसीए इड्ढीए जुईए उत्तिमाई य ।
नियगाओ भवणाओ निज्जाओ वण्हिपुंगवो ॥१३॥

व्याख्या–एतादृश्यानन्तराभिहितया **ऋद्ध्या** विभूत्या **द्युत्या** दीप्त्या **चोत्तम-योप**लक्षितः सन्। **निजकाद् भवनाद् निर्यातो** निर्गतो **वृष्णिपुङ्गवो** यादवप्रदानो भगवान**ऽरिष्टनेमि**रिति ॥१३॥

अह सो तत्थ निज्जंतो दिस्स पाणे भयदुए ।
वाडेहिं पंजरेहिं च संनिरुद्धे सुदुक्खिए ॥१४॥

व्याख्या–अथ गृहान्निर्गमनानन्तरं **स** भगवां**स्तत्र** मण्डपासन्ने **निर्यन्न**धिकं गच्छन् 'दिस्स' त्ति **दृष्ट्वा प्राणान्** प्राणिनो मृग-लावकादीन् **भयद्रुतान्** भयत्रस्तान् **वाटैरिति** वाटकैर्वृति-भित्त्यादिरूपैः, **पञ्जरैश्च** बन्धनविशेषैः **संनिरुद्धान्** बाढं नियन्त्रितान् अत एव **सुदुःखितान्** ॥१४॥

तथा–

जीवितंतं तु संपत्ते मंसट्ठा भक्खियव्वए ।
पासित्ता से महापन्ने सारहिं इणमब्बवी ॥१५॥

व्याख्या–जीवितान्तं मरणं सम्प्राप्तानिव **सम्प्राप्तान्** सम्भावितासन्नमरणत्वात् तेषां, **मांसार्थं भक्षयितव्यान्** 'अविवेकिभिरिति शेषः'। **दृष्ट्वा** तादृशान् हृदि निधाय **सोऽरिष्ट-नेमिर्महाप्रज्ञो** मत्यादिज्ञानत्रयात्मकः **सारथिं** गन्धहस्तिनो हस्तिपक**मिदं** वचो**ऽब्रवीदि**ति ॥१५॥

कस्स अट्ठा इमे पाणा एए सव्वे सुहेसिणो ।
वाडेहिं पंजरेहिं च संनिरुद्धा य अच्छहिं ? ॥१६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—कस्यार्थाद् हेतोरिमे प्रत्यक्षाः **प्राणा** प्राणिन **एते** समीपस्थाः **सर्वे सुखैषिणो वाटैः पञ्जरैश्च सन्निरुद्धाः** 'अच्छहिं' ति **आसते** ॥१६॥

अह सारही तओ भणइ एए भद्दा उ पाणिणो ।
तुब्भं विवाहकज्जंमि भोयावेउं बहुं जणं ॥१७॥

व्याख्या—अथ भगवतैवं पृष्टे **सारथिर्भणति** 'भद्दा उ' त्ति **भद्रा एव** भव्या एव, न तु श्व—शृगालादिवत् कुत्सिता निरपराधित्वाद् वा । शेषं स्पष्टम् ॥१७॥

सारथिनैवमुक्ते यद् भगवान् कृतवांस्तदाह—

सोऊण तस्स वयणं बहुपाणिविणासणं ।
चिंतेइ से महापन्ने साणुक्कोसे जिए हिओ ॥१८॥

व्याख्या—श्रुत्वा तस्य सारथेर्**वचनं** बहूनां प्राणिनां विनाशनमभिधेयं यस्मिंस्तद् **बहुप्राणिविनाशनं । चिन्तयति स नेमिर्महाप्राज्ञः** प्राग्वत् । **सानुक्रोशः** सदयो **जीवेषु हितः** ॥१८॥

जइ मज्झ कारणा एए हम्मंति सुबहू जिया ।
न मे एयं तु निस्सेसं परलोए भविस्सई ॥१९॥

व्याख्या—यदि मम कारणान्मम विवाहहेतोरे**ते हन्यन्ते सुबहवो जीवाः** 'भोज-नार्थममीषामिति भावः' । **न मे ममैत**ज्जीवहननं **निःश्रेयसं** कल्याणं **परलोके भविष्यति** पापहेतुत्वादस्येति भावः ॥१९॥

एवं च विदितभगवदाकूतेन सारथिना मोचितेषु प्राणिषु परितुष्टोऽसौ यत् कृत-वांस्तदाऽह—

सो कुंडलाण जुयलं सुत्तगं च महायसो ।
आभरणाणि य सव्वाणि सारहिस्स पणामए ॥२०॥

व्याख्या—स महायशा भगवान् **कुण्डलयोर्युगलं सूत्रकं** कटीसूत्रं **च** । किमेतदेव ? इत्याह—**आभरणानि सर्वाणि सारथये** 'पणामए' त्ति **अर्पयति** ॥२०॥

ततश्च—

मणपरिणामे य कओ देवा य जहोइयं समोइन्ना ।
सव्विड्ढीइ सपरिसा निक्खमणं तस्स काउं जे ॥२१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—मनःपरिणामश्चाभिप्रायः **कृतः** 'निष्क्रमणं प्रतीति गम्यम्' । **देवाश्चतु**र्निकाया **यथोचितमौ**चित्यानतिक्रमेण **समवतीर्णाः** सम्प्राप्ताः 'द्वाभ्यां चकाराभ्यां मनःपरिणाम—देवागमनयोस्तुल्यकालता सूचिता' । **सर्वर्द्ध्या सपरिषदो** बाह्य—मध्या-भ्यन्तरपर्षदुपेताः । **निष्क्रमणं** प्रक्मान्निष्क्रमणमहिमानं **तस्य** भगवतः **कर्तुं** 'जे इति पादपूरणे' ॥२१॥

देव-मणुस्सपरिवुडो सीयारयणं तओ समारूढो ।
निक्खमिय बारगाओ रेवययंमि ठिओ भयवं ॥२२॥

व्याख्या—शिबिकारत्नं देवकृतम् 'उत्तरकुरुनामकमिति गम्यते' । **ततः समारूढोऽ**ध्यासीनो **निष्क्रम्य** निर्गत्य **द्वारिकातो रैवतके-उज्जयन्ता**चले **स्थितो** गमनान्निवृत्तो **भगवान्** ॥२२॥

उज्जाणं संपत्तो ओइन्नो उत्तमाओ सीयाओ ।
साहस्सीए परिवुडो अह निक्खमई उ चित्ताहिं ॥२३॥

व्याख्या—उद्यानं सहस्राम्रवणाख्यं **सम्प्राप्तः** । तत्र **चावतीर्णः शिबिकातः** । 'साहस्सीए' त्ति **सहस्रेण** प्रधानपुंसां **परिवृतोऽ**थानन्तरं **निष्क्रामति** प्रव्रजति '**तुः** पूरणे' 'चित्ताहिं' ति **चित्रानक्षत्रे** ॥२३॥

कथम् ? इत्याह—

अह सो सुगंधगंधिए तुरियं मउयकुंचिए ।
सयमेव लुंचई केसे पंचमुट्ठीहिं समाहिओ ॥२४॥

व्याख्या—अथ स नेमिः सुगन्धिगन्धिकान् सुरभिगन्धान् स्वभावत एव, **त्वरितं** शीघ्रं, **मृदुककुञ्चितान्** कोमलकुटिलान् **स्वयमेव लुञ्चत्य**पनयति **केशान् पञ्चमुष्टिभिः समाहितः** समाधिमान्, सर्वं सावद्यं ममाकर्तव्यमिति प्रतिज्ञारोपणोपलक्षणमिदम् ॥२४॥

एवं च प्रव्रजिते भगवति—

वासुदेवो य णं भणइ लुत्तकेसं जिइंदियं ।
इच्छियमणोरहे तुरियं पावसू तं दमीसरा ! ॥२५॥

व्याख्या—वासुदेवश्च 'चशब्दात् **समुद्रविजयादयः**' णमितीमं **नेमिं भणति** कथयति **लुप्तकेशं** लुञ्चितकेशं **जितेन्द्रियं** जितहृषीकं । **ईप्सितोऽ**भिलषितो **मनोरथः** सिद्धिविषयो मुक्त्यभिलाषुक**स्तं त्वरितं** 'पावसु' त्ति **प्राप्नुहि** 'आशीर्वचनत्वादस्य' तमिति **त्वं** हे दमीनामीश्वर दमीश्वर ! ॥२५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

नाणेणं दंसणेणं च चरित्तेणं तहेव य ।
खंतीए मुत्तीए वड्ढमाणो भवाहि य ॥२६॥

व्याख्या—ज्ञानादिभिर्वर्धमानो वृद्धिभाक् 'भवाहि य' त्ति **भव** ॥२६॥

एवं ते राम-केसवा दसारा य बहुजणा ।
अरिट्ठनेमिं वंदित्ता अइगया वारगापुरिं ॥२७॥

व्याख्या—एवमुक्तप्रकारेण वन्दित्वा स्तुत्वेति योगः । **राम-केशवौ** 'दसारा य' त्ति **दशार्हाश्च बहवो जनाश्चातिगताः** प्रविष्टा **द्वारिकां पुरीम्** ॥२७॥

तदा च **राजीमती** किमचेष्टत ? इत्याह—

सोऊण रायकन्ना पव्वज्जं सा जिणस्स उ ।
नीहासा य निराणंदा सोगेण उ समुच्छया ॥२८॥

व्याख्या—श्रुत्वा राजकन्या राजीमती प्रव्रज्यां जिनस्यारिष्टनेमेः । निष्क्रान्ता हास्यान्**निर्हासा निरानन्दा च शोकेन समवसृता**वष्टब्धा ॥२८॥

राईमई विचिंतेई धिरत्थु मम जीवियं ।
जा हं तेणं परिचत्ता सेयं पव्वइउं मम ॥२९॥

व्याख्या—धिगस्तु मम जीवितमिति स्वजीवितनिन्दोद्भावकम् । **यथाहं तेन नेमि**ना **परित्यक्ते**ति खेदहेतुदर्शकम् । ततश्च **श्रेयो**ऽतिप्रशस्यं **प्रव्रजितुं** प्रव्रज्यामङ्गीकर्तुं **मम,** येनान्यजन्मनि नैवं दुःखभागिनी भवेयमिति ॥२९॥

इत्थं च तावत् स्थिता सा यावच्छद्मस्थतयान्यत्र विहृत्योत्पन्नेकवलो भगवान् पुनस्तत्रैवाजगाम । ततः प्रभुदेशनां श्रुत्वोत्पन्नवैराग्या किं कृतवती ? इत्याह—

अह सा भमरसंनिभे कुच्चफणगपसाहिए ।
सयमेव लुंचई केसे धिइमंता ववस्सिया ॥३०॥

व्याख्या—अथानन्तरं **सा राजीमती भ्रमरसंनिभान्** कृष्णतया, **कुर्चो** गूढकेशोन्मोचको वंशमयः, **फनकः** कङ्कतकश्च ताभ्यां **प्रसाधितान्** संस्कृतानाकुञ्चिततया । **स्वयमेव लुञ्चति केशान्** 'स्वाम्यनुज्ञयेति गम्यम्' **धृतिमती व्यवसिता** धर्मं कर्तुमध्यवसिता ॥३०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ततश्च—

वासुदेवो य णं भणइ लुत्तकेसं जिइंदियं ।
संसारसागरं घोरं तर कन्ने ! लहुं लहुं ॥३१॥

व्याख्या—वासुदेवो 'णं' इति **इमां राजीमतीं भणति लुप्तकेशां जितेन्द्रियाम्** । किं भणति ? इत्याह—**संसारसागरं घोरं तरे**त्युल्लङ्घ्य **कन्ये ! लघु लघु** त्वरितं त्वरितं 'सम्भ्रमे द्विर्वचनम्' ॥३१॥

ततः किम् ? इत्याह—

सा पव्वइया संती पव्वावेसी तहिं बहुं ।
सयणं परियणं चेव सीलवंता बहुस्सुया ॥३२॥

व्याख्या—सा राजीमती प्रव्रजिता सती 'पव्वावेसि' त्ति **प्राविव्रजत्** प्रव्राजितवती 'तहिं' ति **तत्र द्वारिकायां बहुं स्वजनं परिजनं चैव शीलवती बहुश्रुता** ॥३२॥

गिरिं रेवययं जंती वासेणुल्ला उ अंतरा ।
वासंते अंधयारंमि अंतो लयणस्स सा ठिया ॥३३॥

व्याख्या—गिरिं नगं **रैवतकमुज्जयन्तं यान्ती** गच्छन्ती 'प्रभुं वन्दितुमिति गम्यते' **वर्षेण** वृष्ट्या 'उल्ल' त्ति **आर्द्रा** स्तीमितसर्वचीवरेत्यर्थः । **अन्तरे**त्यन्तरालेऽर्धमार्गे 'वासंते' त्ति **वर्षति** 'मेघे इति गम्यम्' **अन्धकारे**ऽपगतप्रकाशे क्व ? **अन्त**र्मध्ये **लयनस्य** गुहायां **सा राजीमती स्थिता** 'असंयमभीरुतयेति गम्यते' ॥३३॥

तत्र च—

चीवराइं विसारंती जहाजाय त्ति पासिया ।
रहनेमी भग्गचित्तो पच्छा दिट्ठो य तीइ वि ॥३४॥

व्याख्या—चीवराणि सङ्घाट्यादिवस्त्राणि **विसारयन्ती** विस्तारयन्ती । तत एव **यथाजाता**—अनाच्छादिताङ्गोपाङ्गतया जन्मावस्थोपमा **इती**त्येवंविधा 'पासिय' त्ति **दृष्ट्वा** । ततो **रथनेमिमुनिर्भग्नचित्तः** 'संयमेऽभूदिति गम्यम्' स हि तामुदाररूपामवेक्ष्योत्पन्नतद-भिलाषः कामातुरोऽजनीति भावः । **पश्चाद् दृष्टश्च स तया राजीमत्यापि** 'अपेः पुनरर्थत्वात्' तयाऽन्धकारे पूर्वं न दृष्टोऽन्यथैकाकिनी तत्र न प्रविशेदित्यर्थः ॥३४॥

भीया य सा तहिं दट्ठुं एगंते संजयं तयं ।
बाहाहिं काउं संगोफं वेवमाणी निसीयई ॥३५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—भीता च सा 'कदाचिदसौ मम शीलभङ्गं करोतीति'। 'तहिं' ति **तस्मिन्** लयने **दृष्ट्वा** एकान्ते **संयतं तकं रथनेमिम्**। किं कृतवती ? इत्याह—'बाहाहिं' ति **बाहुभ्यां कृत्वा संगोफम**न्योन्यं बाहुसंगुम्फनं स्तनोपरि मर्कटबन्धमित्यर्थः। **वेपमाना** शीलभङ्गभयात् कम्पमाना **निषीदत्यु**पविशति तदाश्लेषादिपरिहारार्थमिति भावः ॥३५॥

स च किं कृतवान् ? इत्याह—

अह सो वि रायपुत्तो समुद्दविजयंगओ ।
भीयं पवेइयं दट्ठुं इमं वक्कमुदाहरे ॥३६॥

व्याख्या—अथ सोऽपि राजपुत्रो रथनेमिः समुद्रविजयाङ्गजो भीतां प्रवेपितां कम्पमानां 'प्रक्रमाद् **राजीमतीं' दृष्ट्वा इदं** वक्ष्यमाणं **वाक्यं** वचन**मुदाहर**दुक्तवान् ॥३६॥

तदेवाह—

रहनेमि अहं भद्दे ! सुरूवे ! चारुभासिणि ! ।
ममं भयाहि सुतणू न ते पीला भविस्सई ॥३७॥

व्याख्या—रथनेमिरहं भद्रे ! भद्रकारिणि ! **सुरूपे** ! **चारुभाषिणि ! मां भजस्व** अङ्गीकुरुष्व पतित्वेन **हे सुतनु ! न 'ते' तव पीडा भविष्यति** । सुखहेतुत्वाद् विषयसेवनस्येति भावः ॥३७॥

एहि ता भुंजिमो भोए माणुस्सं खु सुदुल्लहं ।
भुत्तभोगी तओ पच्छा जिणमग्गं चरिस्समो ॥३८॥

व्याख्या—एह्यागच्छ 'ता' इति **तस्मात् तावद्** वा, **मानुष्यं खु** निश्चितं **सुदुर्लभं ततो भुञ्जावो भोगान्**। **भुक्तभोगौ ततः पश्चाद्** वार्धक्ये **जिनमार्गं** मुक्तिपथं **चरिष्यावः** ॥३८॥

दट्ठूण रहनेमिं तं भग्गुज्जोयपराइयं ।
राईमई असंभंता अप्पाणं संवरे तहिं ॥३९॥

व्याख्या—दृष्ट्वा तं रथनेमिं 'भग्गुज्जोयपराइयं' ति भग्नोद्योगो गतोत्साहः 'प्रस्तावात् संयमे' **पराजितो**ऽभिभूतः स्त्रपरीषहेण ततो द्वन्द्वे **भग्नोद्योगपराजितस्तं राजीमती असम्भ्रान्ता** 'नाऽयं मां बलादकार्ये प्रवर्तयितेत्याशयेनात्रस्ता' **आत्मानं** स्वं 'संवरे' त्ति **समवारीदा**च्छादितवती 'चीवरैरिति गम्यते' 'तहिं' ति **तस्मिन्** लयनमध्ये गुफामध्ये ॥३९॥

अह सा रायवरकन्ना सुट्ठिया नियमव्वए ।
जाई कुलं च सीलं च रक्खमाणी तयं वए ॥४०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—अथ सा सुस्थिता निश्चला **नियमव्रते**-इन्द्रियनोइन्द्रियनियमे प्रव्रज्यायां च। **जातिं कुलं च शीलं च रक्षन्ती तकं रथनेमिं वदेत्** ॥४०॥

जइ सि रूवेण वेसमणो ललिएण नलकूबरो ।
तहा वि ते न इच्छामि जइ सि सक्खं पुरंदरो ॥४१॥

व्याख्या—यद्यसि भवसि **रूपेण वैश्रमणो** धनदः, **ललितेन** सविलासचेष्टितेन **नलकूबरो** देवविशेषः । **तथापि** ते' इति **त्वां नेच्छामि** यद्यसि **साक्षात् पुरन्दर इन्द्रो** रूपाद्यनेकगुणाश्रय इति भावः ॥४१॥

अपरं च—

धिरत्थु तेऽजसोकामी ! जो तं जीवियकारणा ।
वंतं इच्छसि आवेउं सेयं ते मरणं भवे ॥४२॥

व्याख्या—धिगस्तु 'ते' **तव** 'पौरुषमिति गम्यते' । **हे ! अयशः कामिन्न**-कीर्त्यभिलाषिन् ! तज्जनकदुराचारवाञ्छकत्वेन, यद्वा ते **तव यशो** महाकुलसम्भवोद्भूतं **धिगस्तु हे कामिन्** ! भोगाभिलाषिन् ! **यस्त्वं जीवितकारणाद**संयमजीवितहेतो**र्वान्त**-मुद्गीर्ण**मापातुमिच्छसि** । यथा हि कश्चिद् वान्तमापातुमिच्छत्येवं भवानपि प्रव्रज्या-ग्रहणतस्त्यक्तान् भोगान् पुनरापातुमुपभोक्तुमित्यतः **श्रेयः** कल्याणं 'ते' **तव** मरणं **भवेन्न** तु वान्ताऽऽपानं ततो मरणस्यैवाल्पदोषत्वात् । उक्तं च—

"विज्ञाय वस्तु निन्द्यं त्यक्त्वा गृह्णन्ति किं क्वचित् पुरुषाः ? ।
वान्तं पुनरपि भुङ्क्ते न च सर्वः सारमेयोऽपि" ॥१॥ ४२॥

अहं च भोगरायस्स तं च सि अंधगवण्हिणो ।
मा कुले गंधणा होमो संजमं निहुओ चर ॥४३॥

व्याख्या—अहं च भोगराजस्योग्रसेनस्य त्वं चासि भवस्य**न्धकवृष्णेः** 'कुले जात इत्युभयत्र योज्यम्' । अतो **मा** निषेधे, **कुले गन्धनानां** सर्पजातिविशेषां 'होमो' त्ति **भूव** तच्चेष्टितानाकारितयेति भावः । ते हि वान्तमपि विषं मन्त्राकृष्टा ज्वलदग्निपात-भीरुतया पुनरप्यापिबन्ति न त्वगन्धना इति । ततः **संयमं** चरित्रं **निभृतः** स्थिरचित्त-**श्च**रासेवस्व ॥४३॥

जइ तं काहिसि भावं जा जा दिच्छसि नारिओ ।
वायाइद्धु व्व हढो अट्ठिअप्पा भविस्ससि ॥४४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—यदि त्वं करिष्यसि भावं भोगाभिलाषरूपं **या या द्रक्ष्यसि नारीः** 'तासु तास्विति गम्यते' ततो **वाताविद्धो** वायुना विद्धः समन्तात् ताडितो भ्रामित इत्यर्थः, इतस्ततो **हढ इव** वनस्पतिविशेषः सेवाल **इवास्थितात्मा** चञ्चलचित्ततयाऽस्थिरभावो **भविष्यसि** ॥४४॥

गोवालो भंडवालो वा जहा तद्दव्वनिस्सरो ।
एवं अणिस्सरो तं पि सामन्नस्स भविस्ससि ॥४५॥

व्याख्या—गोपालो यो गां पालयति, **भाण्डपालो** यः परकीयभाण्डानि भाटकादिना पालयति । **यथा** स **तद्द्रव्यस्य** गवादेर**नीश्वरो**ऽप्रभुर्विशिष्टतत्फलोपभोगाभावादे**वमनीश्वरस्त्वमपि श्रामण्यस्य भविष्यसि** भोगाभिलाषतो विशिष्टतत्फलभोगाभावादिति भावः ॥४५॥

एवं तयोक्ते **रथनेमिः** किं कृतवान् ? इत्याह

तीसे सो वयणं सोच्चा संजयाए सुभासियं ।
अंकुसेण जहा नागो धम्मे संपडिवाइओ ॥४६॥

व्याख्या—तस्या राजीमत्याः साध्व्याः स **रथनेमि**र्वचनमनुशिष्टरूपं **श्रुत्वा संयतायाः** प्रव्रजितायाः **सुभाषितं** सुष्ठु संवेगजनकत्वेनोक्त**मङ्कुशेन यथा नागो** हस्ती 'पथीति शेषः' । एवं **धर्मे** चारित्रधर्मे 'संपडिवाइओ' त्ति **सम्प्रतिपतितः** संस्थितः 'तद्वचसैवेति गम्यम्' । अत्रार्थे दृष्टान्तः—

स्वस्तिराजगृहं श्रीमत् स्वस्ति **राजगृहं** पुरम् ।
जितशत्रुमहाराजो जितशत्रुमहायशाः ॥१॥

सोऽन्तःपुरपुरन्ध्रीभिः क्रीडन् लीलाविलासवान् ।
बुभुजे तत्र साम्राज्यं चतुरङ्गचमूचणः ॥२॥ युग्मम्

निद्राविरहितं कञ्चित् स्वर्णकारं नृपोऽन्यदा ।
सर्वान्तःपुररक्षायै तद्द्वार्यस्थापयत् सदा ॥३॥

राजाङ्गनैकदा काचिन्निर्गताऽन्यरिरंसया ।
जागरन्तं तमालोक्य ववले द्विस्त्रिरञ्जसा ॥४॥

सोऽपि तां स्वैरिणीं मत्वा सुप्तः कपटनिद्रया ।
सा तु तं तादृशं दृष्ट्वा रूढा वातायनं लघु ॥५॥

ततः सङ्केतिकरिणा करेणाकृष्य साऽवनौ ।
मुक्ता मेण्ठेन कामान्धा रन्तुं लग्ना यथेच्छया ॥६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

प्रातस्तेन तथेभेन गवाक्षेऽमोचि सा पुनः ।
शुद्धान्तेऽगात् सुखं तस्थौ निःशङ्का हृष्टमानसा ॥७॥

भूपसद्मनि यद्येवं रक्षपालेषु सत्स्वपि ।
पुंश्चलीत्वं नृपस्त्रीणां का कथाऽपरवेश्मसु ? ॥८॥

ध्यात्वेति स्वर्णकृत् सुप्तः सप्ताहं निश्चलोच्चलः ।
राजोत्थाप्य ततोऽपृच्छत् तं बहुस्वापकारणम् ॥९॥

राज्ञोऽग्रे सकलोदन्तं लात्वाऽभयमुवाच सः ।
ततो मेण्ठेभ-पत्नीषु चुकोप समकं नृपः ॥१०॥

वैभारभूधरं गत्वा भूपोऽथ बहुलोकयुक् ।
पत्नीमानाय्य तां पट्टहस्तिनं चाह मेण्ठकम् ॥११॥

गजाजीव ! गजे राज्ञीमारोह्यानार्य ! तां जवात् ।
सद्यः सगज-देवीकः शैलशृङ्गादधः पत ॥१२॥

नभस्येकक्रमश्चक्रे तेन भूमौ त्रिपाद् गजः ।
निरागा मार्यते तिर्यग् हा ! कथं पूत्कृतं जनैः ॥१३॥

भूपेन पुनरादिष्टं तेऽद्यापि पतिता न किम् ? ।
ततो हस्तिपकः सद्योऽधारयद् द्विपदं द्विपम् ॥१४॥

पौरमुख्यैः पुनः प्रोक्तं कृताञ्जलिभिरादरात् ।
राज्यशोभाकरं रक्ष राजकुञ्जर ! कुञ्जरम् ॥१५॥

तूष्णीके रुषिते राज्ञ्याधोरणश्चरणत्रयम् ।
व्योम्नि भूस्थैकपादेनानेकपेनोदचिक्षिपत् ॥१६॥

विज्ञप्तो मन्त्रि-सामन्तैरत्यर्थं पार्थिवः प्रभो ! ।
तृणादा नैव हन्यन्ते क्षत्रधर्मो ह्ययं खलु ॥१७॥

तदाऽऽख्यद् नीतिविद् राजा भोः ! वदन्त्विभपालकम् ।
शैलाग्राद् वारणममुं यत् त्वमुत्तारयाशु भोः ! ॥१८॥

सोऽवग् भो धीसखा ! भूपश्चेद् ददात्यभयं मम ।
सराज्ञीकस्य तर्हीभं क्षेमेणातो निवर्तये ॥१९॥

तैः तस्मिन् स्वीकृते मेण्ठो विज्ञानेन सुशिक्षितम् ।
अङ्कुशेन ततो नागं शुभंयुमुदतारयत् ॥२०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

आलानस्तम्भगं कृत्वा हस्तिनं मेदिनीपतिः ।
राज्ञी-हस्तिपकौ क्रुद्धः स्वदेशान्निरसारयत् ॥२१॥

तौ नवं जन्म मन्वानौ ततो यातौ ससम्मदौ ।
तद्देशात् तु बहिर्ग्रामे सुखं तस्थतुरुच्चकैः ॥२२॥

यथा ईदृगवस्थो गजोऽङ्कुशेन पथि संस्थित एवमयमप्युत्पन्नविस्रोतसिकस्तद्वचनेनाहित-प्रवृत्तिनिवर्तकतयाऽङ्कुशप्रायेण धर्मे इत्यभिप्रायः ॥४६॥

ततश्च—

मणगुत्तो वयगुत्तो कायगुत्तो जिइंदिओ ।
सामन्नं निच्चलं फासे जावज्जीवं दढव्वओ ॥४७॥

व्याख्या—श्रामण्यं निश्चलं स्थिरं 'फासे' त्ति **अस्प्राक्षी**दासेवितवान् **यावज्जीवं दृढव्रतः** सन् । शेषं स्पष्टम् ॥४७॥

द्वयोरपि यदभूत् तदाह—

उग्गं तवं चरित्ताणं जाया दोन्नि वि केवली ।
सव्वं कम्मं खवित्ताणं सिद्धिं पत्ता अणुत्तरं ॥४८॥

व्याख्या—उग्रं कर्मरिपुदारुणतया **तपो**ऽनशनादि **चरित्वा जातौ द्वावपि रथनेमि-राजीमत्यौ केवलिनौ सर्वं कर्म क्षपयित्वा सिद्धिं प्राप्तावनुत्तरा**मुत्कृष्टाम् । किञ्च **रथनेमिः** प्रत्येकबुद्धो भूत्वा वर्षशतचतुष्टयं गृहस्थत्वेन, वर्षमेकं छद्मस्थत्वेन, वर्षशतपञ्चकं च केवलिपर्यायत्वेनैवं नववर्षशतान्येकवर्षाधिकानि सर्वायुः प्रतिपाल्य सिद्ध इति ॥४८॥

अध्ययनोपसंहारमाह—

एवं करेंति संबुद्धा पंडिया पवियक्खणा ।
विणियट्टंति भोगेसु जहा से पुरिसुत्तमो ॥४९॥ त्ति बेमि ॥

व्याख्या—एवं कुर्वन्ति सम्बुद्धा बोधिलाभतः, **पण्डिता**स्तत्त्वानुगामिबुद्धिमन्तः, **प्रविचक्षणाः** प्रकर्षेण शास्त्रज्ञाः, विशेषेण कथञ्चिद् विस्रोतसिकोत्पत्तावपि तन्निरोध-लक्षणेन निवर्तन्ते **विनिवर्तन्ते भोगेभ्यो यथा स पुरुषोत्तमो रथनेमि**रिति । **इति ब्रवीमी**ति पूर्ववत् ॥४९॥ ग्रं० २५१-२॥

इति श्रीकमलसंयमोपाध्यायविरचितायां सर्वार्थसिद्धौ श्रीउत्तराध्ययनटीकायां द्वाविंशं रथनेमीयमध्ययनं समाप्तम् ॥२२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

त्रयोविंशं केशि-गौतमीयमध्ययनम्

इहानन्तराध्ययने कथञ्चिदुत्पन्नविस्रोतसिकेन **रथनेमिवद्** वृत्तिश्चरणे कार्येत्युक्तम्, इह तु परेषामपि चित्तविप्लुतिमुपलभ्य **केशि—गौतमवत्** तदपनोदाय यतितवव्यय-मित्युच्यते। तद् यथा—

जिणे पासे त्ति नामेणं अरहा लोगपूइए ।
संबुद्धप्पा य सव्वन्नू धम्मतित्थयरे जिणे ॥१॥

व्याख्या—जिनः परीषहोपसर्गजेता **पार्श्व इति नाम्ना** 'अभूदिति शेषः' **अर्हंस्तीर्थ-**कृदत एव लोकपूजितः। सम्बुद्धस्तत्त्वावबोधवानात्माऽस्येति **सम्बुद्धात्मा 'चः** समुच्चये' स च छाद्मस्थ्येऽपि स्यादित्याह—**सर्वज्ञः** सर्वद्रव्यपर्यायवेत्ता। **धर्म** एव भवाम्भोधि-तारकत्वात् **तीर्थं तत्करः। जिनो** जितसकलकर्मा मुक्त्यवस्थापेक्षया ॥१॥

ततः किम् ? इत्याह—

तस्स लोगप्पईवस्स आसि सीसे महायसे ।
केसीकुमारसमणे विज्जा-चरणपारगे ॥२॥

व्याख्या—तस्य पार्श्वस्याऽर्हतो लोके प्रदीपस्येव समस्तवस्तुप्रकाशकतया **लोकप्रदीपस्य आसीच्छिष्यो महायशाः केशी** कुमारोऽपरिणीततया, **श्रमण**स्तपस्वितया, **विद्या-चरणयो**र्ज्ञान-चारित्रयोः **पारगः** पर्यन्तगामी ॥२॥

ओहिनाणसुए बुद्धे सीससंघसमाउले ।
गामाणुगामं रीयंते सावत्थिं नगरिमागए ॥३॥

व्याख्या—'सुब्व्यत्ययाद्' **अवधिज्ञान—श्रुताभ्यां** 'मइपुव्वं[1] जेण सुयं' इत्या-गमाच्छ्रुतस्य मतिपूर्वकतया मत्या च **बुद्धो**ऽवगततत्त्वः। **शिष्याणां सङ्घेन** समूहेन

---

१. मतिपूर्वं येन श्रुतम्।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

समाकुल आकीर्णः परिवृत इत्यर्थः । **ग्रामानुग्रामं** 'रीयंते' त्ति **रीयमाणो** विहरन् **श्रावस्तीं नगरीमागतः** 'स इति शेषः' ॥३॥

तिंदुयं नाम उज्जाणं तम्मि नगरमंडले ।
फासुए सिज्जसंथारे तत्थ वासमुवागए ॥४॥

व्याख्या–तिन्दुकं नामोद्यानं 'तम्मि' त्ति **तस्याः श्रावस्त्या नगरमण्डले** पुरपरिसरे । **प्रासुके** स्वाभाविकागन्तुकसत्त्वरहिते क्व ? इत्याह–शय्या वसतिस्तस्यां संस्तारकः शिला–फलकादिः **शय्यासंस्तारकस्तस्मिन् तत्रे**त्युद्याने **वासमव**स्थान**मुपागतः** प्राप्तः 'स इति गम्यम्' ॥४॥

अत्रान्तरे यदभूत् तदाह–

अह तेणेव कालेणं धम्मतित्थयरे जिणे ।
भयवं वद्धमाणु त्ति सव्वलोगंमि विस्सुए ॥५॥

व्याख्या–'अथेति वक्तव्यान्तरोपन्यासे' 'तेणेव कालेणं' ति **तस्मिन्नेव काले** 'सूत्रत्वात् सप्तम्यर्थे तृतीया' **वर्धमान** इति **भगवांस्तीर्थकरो धर्मतीर्थकरत्वादि**-विशेषणवान् 'अभूदिति शेषः' । **सर्वलोके विश्रुतो** विख्यातः ॥५॥

तस्स लोगप्पईवस्स आसि सीसे महायसे ।
भयवं गोयमे नामं विज्जा-चरणपारगे ॥६॥

व्याख्या–तस्य भगवतो **महावीरस्य लोकप्रदीपस्यासीत् शिष्यो महायशा भगवान्** चतुर्ज्ञानयुक्तो **गौतमो नामे**ति गोत्रनामतोऽन्यथा **हीन्द्रभूत्य**भिधानोऽसौ । शेषं व्याख्यातमेव ॥६॥

बारसंगविऊ बुद्धे सीससंघसमाउले ।
गामाणुगामं रीयंते से वि सावत्थिमागए ॥७॥

व्याख्या–किं विशिष्टः ? **आचाराङ्गादिद्वादशाङ्गवित्, बुद्धो** ज्ञाततत्त्वः, **शिष्याणां सङ्घः** शिष्यसङ्घः **तेन समाकुलः** संयुक्तः, पुनः एकस्माद् ग्रामादन्यो ग्रामो **ग्रामान्तरं** 'रीयंते' त्ति **विचरन्** 'से वि' त्ति **सोऽपि गौतमो**ऽपि 'सावत्थि'त्ति **श्रावस्तिं** नगरी**मागतः** ॥७॥

कोट्ठगं नाम उज्जाणं तम्मि नगरमंडले ।
फासुए सिज्जसंथारे तत्थ वासमुवागए ॥८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—कोष्ठकं नामोद्यानं 'तम्मि' त्ति इहापि **तस्याः श्रावस्त्या** नगर्या **नगरमण्डले** नगरकैभागे ईशानकूणे । तत्र **प्रासुके शय्यासंस्तारके तत्र** 'वासं' ति **वासार्थमुपागतः** समागतः ॥८॥

ततः किमजनि ? इत्याह—

केसीकुमारसमणे गोयमे य महायसे ।
उभओ वि तत्थ विहरंसु अल्लीणा सुमाहिया ॥९॥

व्याख्या—केशिकुमारश्रमणो गौतमश्च महायशाः 'उभओ वि' त्ति **उभावपि** द्वावपि **केशि—गौतमौ तत्र श्रावस्त्यां** नगर्यां 'विहरंसु' त्ति 'वचनव्यत्ययाद्' **व्यहार्ष्टां** विहृतवन्तौ 'अल्लीणा' त्ति **आलीनौ** त्रिगुप्तिगुप्तौ यद्वा **अलीनौ** पृथगवस्थानेनान्योन्यमाश्लिष्टावमिलितौ पुनः **सुसमाहितौ** ज्ञानादिसमाधिं गतौ ॥९॥

उभओ सीससंघाणं संजयाणं तवस्सिणं ।
तत्थ चिंता समुप्पन्ना गुणवंताण ताइणं ॥१०॥

व्याख्या—उभयोर्द्वयोः केशि—गौतमयोः शिष्यसङ्घानां शिष्यसमूहानां **संयतानां** संयमिनां **तपस्विनां** तपोधनयुक्तानां **तत्र श्रावस्त्यां** नगर्यां **चिन्ता** वक्ष्यमाणविकल्पात्मिका **समुत्पन्ना । गुणा** ज्ञानादयस्तद्वतां **त्रायिणां** रक्षकानाम् ॥१०॥

चिन्तामेवाह—

केरिसो वा इमो धम्मो इमो धम्मो व केरिसो ? ।
आयारधम्मपणिही इमा वा सा व केरिसी ? ॥११॥

व्याख्या—कीदृशः किंस्वरूपः ? **'वा** विकल्पे' 'इमो' त्ति **अयम**स्मत्सम्बन्धी **धर्मो** महाव्रतात्मकोऽ**यं वा** दृश्यमानगणभृच्छिष्यसम्बन्धी **धर्मः कीदृशः** ? । आचारो वेषधारणादिको बाह्यक्रियाकलापः स एव सुगतिधारणाद् धर्मो बाह्यक्रियातोऽपि हि नवमग्रैवेयकोत्पत्तेः तस्य प्रणिधिर्व्यवस्थापन**माचारधर्मप्रणिधिः** 'इमा व' त्ति प्राकृतत्वा**दयं वा**ऽस्मत्सम्बन्धी 'सा व' त्ति **स वा** द्वितीययतिसत्कः **कीदृशः** ? । ततोऽस्माकमऽमीषां च सर्वज्ञोक्तत्वेऽपि धर्मस्य तत्साधनानां च भेदं ज्ञातुमिच्छाम इति भावः ॥११॥

तामेव चिन्तां व्यक्तीकर्तुमाह—

चाउज्जामो य जो धम्मो जो इमो पंचसिक्खिओ ।
देसिओ वद्धमाणेणं पासेण य महामुणी ॥१२॥

Jain Education International 2010_02	For Private & Personal Use Only	www.jainelibrary.org

व्याख्या—चातुर्यामो महाव्रतचतुष्टयात्मको **यो** देशितः कथितः **पार्श्वेन पार्श्वनाथेना**र्हतेति सम्बन्धः । 'जो इमो' त्ति 'प्राक्चकारस्यात्र योजनाद्' **यश्चायं** पञ्च शिक्षाः प्राणातिपात—मृषावादादत्तादान—मैथुन—परिग्रहादिविरत्युपदेशरूपा यस्मिन्नऽसौ **पञ्चशिक्षितो वर्धमानेन महावीरेण देशितः** कथित इति योगः । 'विभक्तिव्यत्ययाद्' महामुनिनेति द्वयोरपि विशेषणम् ॥१२॥

तथा—

अचेलगो य जो धम्मो जो इमो संतरुत्तरो ।
एगकज्जपवन्नाणं विसेसे किं नु कारणं ? ॥१३॥

व्याख्या—अचेलकश्चाविद्यमानचेलकोऽवस्त्रकः '**परिजुन्नमप्पमुल्लं**[1]' इत्यागमात् नञः कुत्सार्थत्वाच्च कुत्सितचेलको वा **यो धर्मः** 'वर्धमानेन देशित इत्यपेक्ष्यते' । 'जो इमो' त्ति **यश्चायं** सान्तराणि वर्धमानशिष्यवस्त्रापेक्षया कस्यचित् कदाचिन्मान—वर्णविशेषितानि, उत्तराणि च बहुमूल्यतया प्रधानानि वस्त्राणि यस्मिन्नऽऽसौ **सान्तरोत्तरो** धर्मः '**पार्श्वेन** देशित इतीहापि योज्यम्' **एकं कार्यं** मुक्तिलक्षणं तदर्थं **प्रवृत्तयोः** प्रक्रमात् **पार्श्व—वर्धमान**योर्धर्माचारप्रणिधिविषये विशेषे **किं** 'नुर्वितर्के' **कारणम्** ? । कारणभेदेन हि कार्यभेद इति भावः ॥१३॥

अह ते तत्थ सीसाणं विन्नाय पवितक्कियं ।
समागमे कयमई उभओ केसि-गोयमा ॥१४॥

व्याख्या—अथानन्तरं 'ते' इति **तौ** प्रक्रान्तौ **केशि-गौतमौ तत्र श्रावस्त्यां शिष्याणां प्रकर्षेण वितर्कितं** मिथः संशयेन विकल्पितं विज्ञाय **समागमे** मीलके **कृतमती** कृताभिप्रायावभूतामुभौ ॥१४॥

गोयमे पडिरूवन्नू सीससंघसमाउले ।
जेट्ठं कुलमविक्खंतो तिंदुयं वणमागओ ॥१५॥

व्याख्या—गौतमः 'पडिरूवन्नू' त्ति प्रतिरूपविनयो यथोचितप्रतिपत्तिरूपस्तं जानातीति **प्रतिरूपज्ञः शिष्यसङ्घसमाकुलः** शिष्यसमूहयुक् । **ज्येष्ठं** प्राग्भावितया पूर्वं भूतं वृद्धं **कुलं पार्श्व**सन्तान**मपेक्षमाणो** विगणयन् **तिन्दुकं** तिन्दुकनामानं **वनमु**द्यानं **केशिकुमारा**धिष्ठितमागतः ॥१५॥

---

१. परिजीर्णमल्पमूल्यम् ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

केसीकुमारसमणे गोयमं दिस्समागयं ।
पडिरूवं पडिवत्तिं सम्मं संपडिवज्जई ॥१६॥

व्याख्या—केशिकुमारश्रमणः श्रीपार्श्वनाथसंतानीयो **गौतममिन्द्रभूतिं** 'दिस्स' त्ति दृष्ट्वाऽऽगतं **प्रतिरूपा**मुचितां **प्रतिपत्तिम**भ्यागतकर्तव्यरूपां **सम्यक् समि**ति साम्मुख्येन **प्रतिपद्यते**ऽङ्गीकरोति ॥१६॥

प्रतिपत्तिमेवाह—

पलालं फासुयं तत्थ पंचमं कुस-तणाणि य ।
गोयमस्स निसिज्जाए खिप्पं संपणामए ॥१७॥

व्याख्या—पलालं व्रीहिसत्कं **प्रासुकं** निर्जीवं **तत्र तिन्दुको**द्याने 'पंचमं' ति वचनव्यत्ययात् **पञ्चमानि** पञ्चसङ्ख्यापूरणानि **कुश—तृणानि च**शब्दादन्यान्यपि साधुयोग्यानि तृणानि । पञ्चमत्वं चैषां पलालभेदापेक्षम् । ते चाऽमी—'[1]**साली वीहि कोद्दव रालग रन्ने तणाइं च' गौतमस्य निषिद्यायै**-उपवेशनार्थं 'संपणामए' त्ति **सम्प्रणामयति** समर्पयति ॥१७॥

तौ तत्र कीदृशौ जातावित्याह—

केसीकुमारसमणो गोयमे य महायसे ।
उभओ निसन्ना सोहंति चंद-सूरसमप्पहा ॥१८॥

व्याख्या—केशीकुमारश्रमणो गौतमश्चेत्युभावपि 'सोहंति' त्ति **शोभेते चन्द्र—सूर्यसमा प्रभा** ययोस्तौ तथा चन्द्र—सूर्योपमावित्यर्थः ॥१८॥

ततसङ्गमे यदभूत् तदाह—

समागया बहू तत्थ पासंडा कोउगा मिया ।
गिहत्थाण अणेगाओ साहस्सीओ समागया ॥१९॥

व्याख्या—सं सम्यक्प्रकारेणागताः **समागता** मिलिताः **पाखण्डाः** शेषव्रतिनः **कौतुका**श्रिता मृगा इव **मृगा** अज्ञत्वात् । **गृहस्थानामनेकानि सहस्राणि** सहस्रसङ्ख्या-कानि **समागताः** ॥१९॥

---

१. शालिर्व्रीहिः कोद्रवो रालकोऽरण्यतृणानि च ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पुनः—

देव-दाणव-गंधव्वा जक्ख-रक्खस-किन्नरा ।
अदिस्साण य भूयाणं आसि तत्थ समागमो ॥२०॥

व्याख्या—देवाद्याः 'समागता इति योज्यम्' । तत्र **देवा** ज्योतिष्कवैमानिकाः, **दानवा** भवनपतयः, **गन्धर्वादयस्तु** व्यन्तरविशेषा देवगायना वा, **यक्षा** गुह्यकाः, **राक्षसा** नृमांसाशिनः, **किन्नरा** एतेऽपि देवविशेषाः । अग्रेऽदृश्यविशेषणादेते दृश्यरूपाः । **अदृश्यानां च भूतानां** केलीकिलव्यन्तरविशेषाणा**मासीत् समागमस्तत्र** ॥२०॥

अथ तयोर्जल्पमाह—

पुच्छामि ते महाभाग ! केसी गोयममब्बवी ।
तओ केसिं बुवंतं तु गोयमो इणमब्बवी ॥२१॥

व्याख्या—पृच्छामि ते इति **त्वां** हे **महाभाग** ! अचिन्त्यशक्ते ! इति **केशिः केशिकुमारो गौतमं महावीर**प्रथमगणधर**मब्रवीत्** । **ततस्तदनन्तरं केशिं ब्रुवन्तं** ब्रूवाणं 'तु' **पुनर्गौतमोऽब्रवीत्** ॥२१॥

पुच्छ भंते ! जहिच्छं ते केसिं गोयममब्बवी ।
तओ केसी अणुन्नाओ गोयमं इणमब्बवी ॥२२॥

व्याख्या—पृच्छ हे भदन्त ! हे पूज्य ! 'जहिच्छं'ति **यथेच्छमि**च्छाया अनतिक्रमेण यदवभासते इत्यर्थः । **केशिं** केशिकुमारं 'गोयमं'ति सुब्व्यत्ययाद् **गौतमोऽब्रवीत्** । **ततः केशिरनुज्ञातः** 'प्रक्रमाद् **गौतमेन' गौतममिदमब्रवीत्** ॥२२॥

यदसौ पृष्टवांस्तदाह—

चाउज्जामो य जो धम्मो जो इमो पंचसिक्खिओ ।
देसिओ वद्धमाणेणं पासेण य महामुणी ॥२३॥
एगकज्जपवन्नाणं विसेसे किं नु कारणं ? ।
धम्मे दुविहे मेहावी कहं विप्पच्चओ न ते ? ॥२४॥

अनयोर्व्याख्या—चातुर्यामो हिंसाऽनृतस्तेयपरिग्रहोपरमात्मकव्रतचुष्टयरूपः । **पञ्चशिक्षितः** स एव मैथुनविरतिरूपपञ्चमव्रतसहितः ॥ इत्थं च **धर्मे** साधुधर्मे **द्विविधे** द्विप्रकारे हे **मेधाविन्** ! अवधारणशक्त्यन्वित ! **कथं विप्रत्ययो**ऽनाश्वासो **न** 'ते' **तव** ? । तुल्ये हि सर्वज्ञत्वे किं कृतोऽसौ मतभेद इत्याशयः । शेषं प्रकटार्थमेवेति गाथाद्वयार्थः ॥२३-२४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एवं **केशिनोक्ते**—

तओ केसिं बुवंतं तु गोयमो इणमब्बवी ।
पन्ना समिक्खए धम्मंतत्तं तत्तविणिच्छियं ॥२५॥

व्याख्या—ततः 'तुरवधारणे' **केशिं ब्रुवन्तमेव** जल्पादनुपरतमेवाऽनेनादरातिशयमाह । **गौतम इदमब्रवीत्** । किमब्रवीद् ? इत्याह—**प्रज्ञा** बुद्धिः **समीक्षते** सम्यक् पश्यति **धर्मतत्त्वं** 'बिन्दुरलाक्षणिकः' धर्मपरमार्थं तत्त्वानां जीवादीनां विनिश्चयो यस्मिस्तत् तथा । न हि वाक्यश्रवणमात्रादेव वाक्यार्थनिर्णयः, किन्तु प्रज्ञावशादिति भावः ॥२५॥

ततश्च—

पुरिमा उज्जुजडा उ वक्कजड्डा य पच्छिमा ।
मज्झिमा उज्जुपन्ना उ तेण धम्मो दुहा कए ॥२६॥

व्याख्या—पूर्वे प्रथमतीर्थकृत्साधवः 'उज्जुजड'त्ति ऋजवः सरलतया, जडाश्च दुष्प्रतिबोध्यतया **ऋजुजडास्तु**र्यस्मात् 'वक्कजडा य'त्ति वक्राश्च वक्रबोधतया, जडाश्चानेककुविकल्पतो विवक्षितार्थावबोधाक्षमतया **वक्रजडाः 'चः** समुच्चये' **पश्चिमाः** पश्चिमतीर्थकृद्यतयः, **मध्यमा** मध्यमतीर्थकृन्मुनय ऋजुप्रज्ञा ऋजवश्च ते प्रकर्षेण जानन्तीति प्रज्ञाश्च सुखेनैव विवक्षितार्थग्रहणक्षमा **ऋजुप्रज्ञास्तेन** हेतुना धर्मो **द्विभेदः कृतः** 'एककार्यप्रपन्नत्वेऽपीति प्रक्रमः' ॥२६॥

पूर्वादीनामेवंविधत्वेऽपि कुतस्तद् वैविध्यमित्याह—

पुरिमाणं दुव्विसोज्झो उ चरिमाणं दुरणुपालओ ।
कप्पो मज्झिमगाणं तु सुविसोज्झो सुपालओ ॥२७॥

व्याख्या—पूर्वेषां यतीनां **दुर्विशोध्यो** दुःखेन विशोधयितुं निर्मलतां नेतुं शक्यः 'कल्प इति सम्बध्यते' ते ह्यतिऋजुतया जडतया च सम्यगपि गुर्वनुशासनं यथावन्न प्रतिपत्तुं क्षमा इति निर्मलावबोधाभावात् तेषामसौ दुर्विशोध्यः । **'तुर्विशेषार्थे' चरमाणां** दुःखेनानुपाल्यते इति **दुरनुपालको** वक्रजडत्वात् **कल्पो** यतिक्रियाकल्पः, ते हि वक्रत्वेन कुविकल्पाकुलितचित्ततया कथञ्चिज्जानाना अपि न यथावदनुष्ठातुं शक्ताः । **मध्यमकानां तु सुविशोध्यः सुपालकश्च** ऋजुप्रज्ञत्वात् **'कल्प** इहापि योज्यः' ते हि ऋजुप्रज्ञतया चतुर्यामोक्तावपि पञ्चममपि यामं गुरूक्तं सुखेनैव यथावदवबुध्यन्ते पालयन्ति चातस्तदपेक्षया **पार्श्वेन** चतुर्याम उक्तः । प्रथमान्त्यार्हद्भ्यां तत्तद्धेतोः पञ्चमं व्रतं भिन्नतयोक्तमिति धर्मस्य द्वैविध्यं देशितम् । वस्तुतो व्रतपञ्चकमेव सर्वतीर्थकृताम्, भेदाभिधानं तु

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

बोध्यापेक्षयेति प्रसङ्गतश्चाद्यजिनाभिधानमिति ॥२७॥

केशिराह—

साहु गोयम ! पन्ना ते छिन्नो मे संसओ इमो ।
अन्नो वि संसओ मज्झं तं मे कहसु गोयमा ! ॥२८॥

व्याख्या—साधु शोभना **गौतम** ! **प्रज्ञा** बुद्धिस्ते **तव** यत**श्छिन्नो** मे **मम संशयः** सन्देहः 'इमो' त्ति **अयं** 'त्वयेति गम्यम्' विनयापेक्षं चेत्थमुक्तमन्यथा तस्य ज्ञानत्रयवतः कुत एवंविधसंशयसम्भव इति । तथा**ऽन्योऽपि** वक्ष्यमाणः **संशयो मम तं मे कथय गौतम** ! तद्विषयमप्यर्थं यथावत् प्रतिपादयेति भावः ॥२८॥

अचेलगो य जो धम्मो जो इमो संतरुत्तरो ।
देसिओ वद्धमाणेणं पासेण य महायसा ॥२९॥

व्याख्या—'महायस'त्ति **महायशसा** शेषं व्याख्यातमेव ॥२९॥

एगकज्जपवन्नाणं विसेसे किं नु कारणं ? ।
लिंगे दुविहे मेहावी कहं विप्पच्चओ न ते ? ॥३०॥

व्याख्या—लिङ्गे वर्षाकल्पादिरूपे वेषे **द्विविधे** अचेलकतया वस्त्रधारकतया च द्विभेदे इति शेषं स्पष्टम् ॥३०॥

गौतमः प्राह—

केसिं एवं बुवाणं तु गोयमो इणमब्बवी ।
विन्नाणेण समागम्म धम्मसाहणमिच्छियं ॥३१॥

व्याख्या—विशिष्टं ज्ञानं **विज्ञानं** केवलाख्यं तेन **समागम्य** यद् यस्योचितं तत् तथैव ज्ञात्वा **धर्मसाधनं** धर्मोपकरणं वर्षाकल्पादिकं 'इच्छियं'ति **दृष्टम**नुमतं **'पार्श्व-वीरा**भ्यामिति प्रक्रमः**'** । श्री**वीर**शिष्याणां हि रक्तादिवस्त्रानुज्ञाते वक्रजडत्वेन वस्त्ररञ्जनादि-प्रवृत्तिर्दुर्निवारा स्यादतस्तेन नानुज्ञातम्, **पार्श्व**शिष्यास्तु न तथेति तेन रक्तादीनामप्यनुज्ञातं कृतमिति भावः ॥३१॥

किञ्च—

पच्चयत्थं च लोयस्स नाणाविहविगप्पणं ।
जत्तत्थं गहणत्थं च लोगे लिंगपओयणं ॥३२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या–प्रत्ययार्थं चामी व्रतिन इति प्रतीतिनिमित्तं **लोकस्य,** अन्यथा हि यथाऽभिरुचितं वेषमादाय पूजाद्यर्थं विडम्बकादयोऽपि वयं व्रतिन इत्यभिहितवन्तः, ततो व्रतिष्वपि न लोकस्य व्रतिन इति प्रतीतिः स्यात् । किं तद् ? इत्याह–**नानाविधविकल्पनं** 'प्रक्रमान्नानाविधोपकरणपरिकल्पनं' नानाविधवर्षाकल्पाद्युपकरणं हि यथावद् यतिष्वेव सम्भवतीति कथं तत्प्रत्ययहेतुर्न स्यात् ? । तथा **यात्रा** संयमनिर्वाह**स्तदर्थं,** वर्षाकल्पादिकं विना हि वृष्ट्यादौ संयमे बाधैव स्यात् । **ग्रहणं** ज्ञानं **तदर्थं च,** कथञ्चिच्चित्तविप्लवोत्पत्तावपि यथाहं व्रतीत्येतदर्थं **लोके** लिङ्गस्य वेषधारणस्य प्रयोजनमिति प्रवर्तनं **लिङ्गप्रयोजनम्** ॥३२॥

अह भवे पइन्ना उ मुक्खसब्भूयसाहणा ।
नाणं च दंसणं चेव चरित्तं चेव निच्छए ॥३३॥

व्याख्या–अथ 'भवे पइन्ना उ'त्ति 'तुरेवकारार्थे भिन्नक्रमश्च' ततो **भवेदेव प्रतिज्ञा**ऽभ्युपगमः 'प्रक्रमात् **पार्श्व–वीरयोः**' सा का ? इत्याह–मोक्षस्य सद्भूतानि तात्त्विकत्वात् साधनानि हेतुत्वा**न्मोक्षसद्भूतसाधनानि** । कानि ? इत्याह–**ज्ञानं च दर्शनं च चारित्रं च 'एव**कारोऽवधारणे' स च लिङ्गस्य मुक्तिसाधनतां व्यवच्छिनत्ति यतो ज्ञानाद्येव मुक्तिसाधनं, न तु लिङ्गं, श्रूयते हि भरतादीनां लिङ्गं विनाऽपि केवलोत्पत्तिः, **निश्चये** निश्चयनये विचार्ये । एष च लिङ्गं प्रत्याद्रियत एव न, व्यवहार एव तूक्तहेतुभिस्तदिच्छतीति तद्भेदस्य तत्त्वतोऽकिञ्चित्करत्वान्न विदुषां विप्रत्ययहेतुतेत्याशयः ॥३३॥

केशिराह–

साहु गोयम ! पन्ना ते छिन्नो मे संसओ इमो ।
अन्नो वि संसओ मज्झं तं मे कहसु गोयमा ! ॥३४॥

प्राग्वत् ॥३४॥

अणेगाण सहस्साणं मज्झे चिट्ठसि गोयमा ! ।
ते य ते अभिगच्छंति कहं ते निज्जिया तुमे ? ॥३५॥

व्याख्या–अनेकानां सहस्राणां 'प्रक्रमाच्छत्रुसम्बन्धिनां' **मध्ये तिष्ठस्या**स्से हे **गौतम** ! 'ते य'त्ति **ते च** शत्रवस्ते इति **त्वामभि**लक्षीकृत्य **गच्छन्ति** धावन्त्यर्थाज्जेतुमिच्छन्ति । तत् **कथं ते** इत्युक्तरूपाः शत्रवो **निर्जितास्त्वया** भूयस्त्वात् तेषामिति भावः ॥३५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

गौतम आह—

एगे जिए जिया पंच पंच जिए जिया दस ।
दसहा उ जिणित्ता णं सव्वसत्तू जिणाम हं ॥३६॥

व्याख्या—एकस्मिन् सर्वभावशत्रुप्रधाने आत्मनि **जिते जिताः पञ्च,** कथम् ? एकः स एवान्ये चत्वारः कषायाः । 'पंच जिए'त्ति सूत्रत्वात् **पञ्चसु जितेषु जिता दश,** अत्रापि पञ्चोक्ता एवापराणि च पञ्चेन्द्रियाणि ततो **दशधा** दश प्रकारानुक्तरूपांस्तु पुनः शत्रून् **जित्वा 'णमित्यलङ्कारे' सर्वशत्रून्** नोकषायादींस्तदुत्तरोत्तरभेदांश्चानेकसहस्र-सङ्ख्यान् **जयाम्यहम्** ॥३६॥

ततश्च—

सत्तू य इइ के वुत्ते केसी गोयममब्बवी ।
तओ केसिं बुवंतं तु गोयमो इणमब्बवी ॥३७॥

व्याख्या—शत्रुश्च क उक्तः ? इति केशिगौतममब्रवीत् । शेषं स्पष्टम् ॥३७॥

एगप्पा अजिए सत्तू कसाया इंदियाणि य ।
ते जिणित्तू जहानायं विहरामि अहं मुणी ॥३८॥

व्याख्या—एक आत्मेति जीवश्चित्तं वा, अतति गच्छति तांस्तान् भावानर्थांश्चेति व्युत्पत्तेः । अथवा आत्मैव चित्तं तदभेदोपचारात् । **अजितो**ऽवशीकृतोऽनेकानर्थ-हेतुत्वाच्छत्रुरिव **शत्रु**स्तत एव हेतोः **कषाया इन्द्रियाणि** '**च**शब्दान्नोकषायादयः कषाया-द्युत्तरभेदाश्च' 'अजिताः शत्रव इति योज्यम्' । **तान्** शत्रून् **जित्वा यथान्यायं** यथोक्तनीत्या **विहरामि** 'तन्मध्येऽपि तिष्ठन्, अप्रतिबद्धविहारितयेति गम्यम्' **अहं हे मुने !** ॥३८॥

पुनः **केशि**राह—

साहु गोयम ! पन्ना ते छिन्नो मे संसओ इमो ।
अन्नो वि संसओ मज्झं तं मे कहसु गोयमा ! ॥३९॥

प्राग्वत् ॥३९॥

तथा—

दीसंति बहवे लोए पासबद्धा सरीरिणो ।
मुक्कपासो लहुब्भूओ कहं तं विहरसि मुणी ? ॥४०॥

व्याख्या—दृश्यन्ते बहवोऽनेके **लोके** जगति पाशैर्बद्धा नियन्त्रिताः **पाशबद्धाः**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

शरीरिणो जीवाः । **मुक्तपाशो लघुभूतो** वायुस्ततश्च लघुभूत इव **लघुभूतः** सर्वत्राप्रति-बद्धत्वात् **कथं त्वं विहरसि हे मुने** ! ॥४०॥

गौतम आह–

ते पासे सव्वसो छित्ता निहंतूण उवायओ ।
मुक्कपासो लहुब्भूओ विहरामि अहं मुणी ॥४१॥

व्याख्या–तान् पाशान् लोकबन्धकान् 'सव्वसो'त्ति सूत्रत्वात् **सर्वान् छित्त्वा** त्रोटयित्वा **निहत्य** पुनर्बन्धाभावेन विनाश्य**ोपायतः** सद्भूतभावनाभ्यासात् । **मुक्तपाशो लघुभूतः** सन् **विचराम्यहं हे मुने** ! ॥४१॥

ततः–

पासा य इइ के वुत्ता ? केसी गोयममब्बवी ।
केसिं एवं बुवंतं तु गोयमो इणमब्बवी ॥४२॥

व्याख्या–पाशाश्च 'के वुत्ता' त्ति **उक्ताः** ? । शेषं प्राग्वत् ॥४२॥

राग-द्दोसादओ तिव्वा नेहपासा भयंकरा ।
ते छिंदित्तु जहानायं विहरामि जहक्कमं ॥४३॥

व्याख्या–राग-द्वेषादयः '**आदि**शब्दान्मोहादिग्रहः' **तीव्रा** गाढास्तथा **स्नेहाः** पुत्रादिसम्बन्धास्ते पाशा इव पारवश्यहेतुत्वात् **पाशा भयङ्करा**स्त्रासोत्पादका अनर्थहेतुततया । **तान् छित्त्वा यथान्यायं विहरामि** विचरामि **यथाक्रमं** क्रमो यत्याचारस्तदनतिक्रमेण ॥४३॥

केशिः प्राह–

साहु गोयम ! पन्ना ते छिन्नो मे संसओ इमो ।
अन्नो वि संसओ मज्झं तं मे कहसु गोयमा ! ॥४४॥

पूर्ववत् ॥४४॥

अंतोहिययसंभूया लया चिट्ठइ गोयमा ।
फलेइ विसभक्खीणि सा उ उद्धरिया कहं ? ॥४५॥

व्याख्या–हृदयस्यान्तरन्त**र्हृदयं** मनस्तत्र **सम्भूता लता तिष्ठति भो गौतम** ! **फलति** विषवद् भक्ष्यन्त इति **विषभक्षीणि** पर्यन्तदारुणतया विषोपमानि 'फलानीति गम्यम्' **सा पुनरुद्धृतो**त्पाटिता **कथं** ? 'त्वयेति योज्यम्' ॥४५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

गौतम आह–

तं लयं सव्वसो छित्ता उद्धरित्ता समूलियं ।
विहरामि जहानायं मुक्को मि विसभक्खणं ॥४६॥

व्याख्या–तां लतां 'सव्वसो'त्ति **सर्वां छित्त्वोद्धृत्योत्पाट्य** समूलामेव **समूलिकां** मूलसहितां राग-द्वेषलक्षणमूलनिर्मूलनेन **विहरामि यथान्यायं मुक्तोऽस्मि** 'विसभक्खणं'ति सुब्व्यत्ययाद् **विषभक्षणाद्** विषफलास्वादोपमात् क्लिष्टकर्मण: ॥४६॥

लया य इइ का वुत्ता ? केसी गोयममब्बवी ।
तओ केसिं बुवंतं तु गोयमो इणमब्बवी ॥४७॥

लतेति का उक्ता ? इत्यादि सुगमम् ॥४७॥

भवतण्हा लया वुत्ता भीमा भीमफलोदया ।
तमुच्छित्तु जहानायं विहरामि महामुणी ॥४८॥

व्याख्या–भव: संसारस्**तस्मिंस्तृष्णा** लोभात्मिका **लतोक्ता भीमा** भयदा स्वरूपत:, कार्यतश्च **भीमो** दु:खहेतुतया **फलानामर्थात्** क्लिष्कर्मणा**मुदय:** परिपाको यस्या: सा तथा। **तामुद्धृत्योत्पाट्य यथाज्ञातं** तथा **विहरामि महामुने** ! ॥४८॥

पुन: **केशिराह**–

साहु गोयम ! पन्ना ते छिन्नो मे संसओ इमो ।
अन्नो वि संसओ मज्झं तं मे कहसु गोयमा ! ॥४९॥

गतार्था ॥४९॥

संपज्जलिया घोरा अग्गी चिट्ठई गोयमा ।
जे डहंति सरीरत्था कहं विज्झाविया तुमे ? ॥५०॥

व्याख्या–समन्तात् प्रकर्षेण ज्वलिता: **सम्प्रज्वलिता** अत एव **घोरा** रौद्रा: 'अग्गी चिट्ठई'त्ति वचनव्यत्यया**दग्नयस्तिष्ठन्ति हे गौतम** ! ये दहन्तीव **दहन्ति** परितापकारितया **शरीरस्था** देहस्था न बहिर्वर्तिन: । देहात्मनोरभेदोपचारादात्मस्था इत्यर्थ: । ते **कथं विध्यापिता** निर्वापिता**स्त्वया** ? ॥५०॥

गौतम: प्राह–

महामेहप्पसूयाओ गिज्झ वारि जलुत्तमं ।
सिंचामि सययं ते उ सित्ता नो व डहंति मे ॥५१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—महामेघात् प्रसूतमुत्पन्नं **महामेघप्रसूतं** तस्मान्महास्रोतस इति गम्यम् । 'गिज्झ' त्ति **गृहीत्वा वारि** पानीयं **जलोत्तमं** शेषजलेषु प्रधानं तेन **सिञ्चामि** विध्यापमायि **सततम**नवरतं 'ते उ' त्ति **तानग्नीन्** ततः **सिक्तास्तु** 'नो व' त्ति **नैव दहन्ति** 'मे' त्ति **माम्** ॥५१॥

अग्गी य इइ के वुत्ते केसी गोयममब्बवी ।
तओ केसिं बुवंतं तु गोयमो इणमब्बवी ॥५२॥

व्याख्या—सुगमा, नवर**मग्नि**प्रश्ने महामेघादिप्रश्नोपलक्षणम् ॥५२॥

गौतम आह—

कसाया अग्गिणो वुत्ता सुय-सील-तवो जलं ।
सुयधाराभिहया संता भिन्ना हु न डहंति मे ॥५३॥

व्याख्या—कषायाः क्रोधादयश्चत्वारः परितापकतया **चाग्नय उक्ताः** 'तीर्थकृद्भिरिति गम्यम्' श्रुतं च 'उपचारात् कषायोपशमकास्तद्गतोपदेशाः' शीलं महाव्रतानि, तपो द्वादशभेदं ततो द्वन्द्वे **श्रुत—शील—तपस्**तदेव **जलं** 'उपलक्षणान्महामेघस्तीर्थकृन्महास्रोतश्च तदुत्पन्न आगमः' ततश्च श्रुतस्य 'उपलक्षणत्वाच्छील—तपसोश्च' धारा इव धारा आक्रोश—हनन—तर्जन—धर्मभ्रंशादिषूत्तरोत्तराभावस्य लाभरूपतादिभावनास्ताभिरऽभिहतास्ताडिताः **श्रुतधाराभिहताः सन्त** उक्तरूपा अग्नयो **भिन्ना** विदारितास्तदभिघातेन लवमात्रीकृता इत्यर्थः । 'हुः' **यस्मान्न दहन्ति माम्** ॥५३॥

पुनः **केशि**राह—

साहु गोयम ! पन्ना ते छिन्नो मे संसओ इमो ।
अन्नो वि संसओ मज्झं तं मे कहसु गोयमा ! ॥५४॥

स्पष्टम् ॥५४॥

अयं साहसिओ भीमो दुट्ठस्सो परिधावई ।
जंसि गोयममारूढो कहं तेण न हीरसी ? ॥५५॥

व्याख्या—अयं प्रत्यक्षः सहसाऽसमीक्ष्य प्रवर्तते इति **साहसिको भीमः** प्राग्वत् । दुष्टश्चासावकार्यप्रवृत्त्याश्वश्च **दुष्टाश्वः परिधावति** समन्ताद् गच्छति । 'जंसि'त्ति **यस्मिन्** हे **गौतमारूढ**श्चटितः सन् **कथं तेन** दुष्टाश्वेन **न ह्रियसे** प्रस्तावान्नोन्मार्गं नीयसे ? ॥५५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

गौतम आह—

पहावंतं निगिण्हामि सुयरस्सीसमाहियं ।
न मे गच्छइ उम्मग्गं मग्गं च पडिवज्जई ॥५६॥

व्याख्या—प्रधावन्तमुन्मार्गाभिमुखं गच्छन्तं **निगृह्णामि** निरुणध्मि 'तमश्वमिति शेषः' कीदृशं सन्तम् ? इत्याह—श्रुतमागमो नियन्त्रकतया रश्मिमरिव रश्मिर्बला **श्रुत-रश्मिस्तेन समाहितो** बद्धस्त**म्** । अतो **न** मे **मम** दुष्टाश्वो **गच्छत्युन्मार्गं** ततो न मम तेन हरणमिति भावः । **मार्गं** सत्पथं पुनः **प्रतिपद्यते**ऽङ्गीकुरुते ॥५६॥

अस्से य इइ के वुत्ते केसी गोयममब्बवी ।
तओ केसिं बुवंतं तु गोयमो इणमब्बवी ॥५७॥

व्याख्या—सोऽ**श्व इति क** उक्तोऽभिप्रेतो भवतेत्यादि स्पष्टम् ॥५७॥

गौतम आह—

मणो साहसिओ भीमो दुट्ठस्सो परिधावई ।
तं सम्मं तु निगिण्हामि धम्मसिक्खाए कंथगं ॥५८॥

व्याख्या—मनश्चित्तं **साहसिको भीम**श्च प्राग्वत् । **दुष्टाश्वः परिधावति तं सम्यग् निगृह्णामि धर्मशिक्षायै** धर्माभ्यासनिमित्तं **कन्थक**मिव जात्याश्वमिव । कोऽर्थः ? दुष्टाश्वोऽपि निग्रहणयोग्यो जात्याश्वप्राय एव ॥५८॥

केशिराह—

साहु गोयम ! पन्ना ते छिन्नो मे संसओ इमो ।
अन्नो वि संसओ मज्झं तं मे कहसु गोयमा ! ॥५९॥

सूत्रं तथैव ॥५९॥

कुप्पहा बहवो लोए जेसिं नासंति जंतवो ।
अद्धाणे कह वट्टंतो तं न नस्ससि गोयमा ! ॥६०॥

व्याख्या—कुत्सिताः पन्थानः कुपथा अशोभनमार्गा **बहवो लोके यैः** कुपथै**र्नश्यन्ति** सन्मार्गाद् भ्रश्यन्ति **जन्तवस्ततश्चाध्वनि** प्रस्तावात् सन्मार्गे 'कह'त्ति **कथं वर्तमानं त्वं न नश्यसि** न सत्पथाच्च्यवसे ? **हे गौतम** ! ॥६०॥

ततो **गौतम** आह—

जे य मग्गेण गच्छंति जे य उम्मग्गपट्ठिया ।
ते सव्वे विइया मज्झं तो न नस्सामहं मुणी ! ॥६१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या–ये केच**न्मार्गेण** प्रस्तावात् सन्मार्गेण गच्छन्ति, **ये चोन्मार्गप्रस्थिता** उत्पथप्रवृत्ता**स्ते सर्वे विदिताः** प्रतीता **मम ततः** पथाऽपथपरिज्ञाना**न्न नश्याम्यहं मुने !** । ये हि पथापथस्वरूपानभिज्ञास्ते हि कुपथभ्रान्ता नश्येयुरहं न तथेति भावः ॥६१॥

केशिराह–

> **मग्गे य इइ के वुत्ते केसी गोयममब्बवी ।**
> **केसिमेवं बुवंतं तु गोयमो इणमब्बवी ॥६२॥**

व्याख्या–मार्गः सन्मार्गः 'उपलक्षणात् कुमार्गश्च' **क उक्तः** ? । शेषं स्पष्टम् ॥६२॥

गौतम आह–

> **कुप्पवयणपासंडी सव्वे उम्मग्गपट्ठिया ।**
> **सम्मग्गं तु जिणक्खायं एस मग्गो हि उत्तमो ॥६३॥**

व्याख्या–कुप्रवचनेषु कपिलाद्युपदिष्टकुमतेषु पाखण्डिनो व्रतिनः **कुप्रवचन-पाखण्डिनः सर्वे उन्मार्गं प्रस्थिताः** । 'अनेन कुप्रवचनानि कुपथा इत्युक्तं स्यात्' **सन्मार्गं तु** पुनः 'जानीयादिति शेषः' **जिनाख्यातम् । एष मार्गो हि**र्यस्मा**दुत्तमो**ऽन्यमार्गेभ्यः प्रधानस्तस्मादयमेव सन्मार्ग इति भावः । उत्तमत्वं चास्य प्रणेतृणां रागादिविकलत्वेनेति भावनीयम् ॥६३॥

केशिराह–

> **साहु गोयम ! पन्ना ते छिन्नो मे संसओ इमो ।**
> **अन्नो वि संसओ मज्झं तं मे कहसु गोयमा ! ॥६४॥**

पूर्ववत् ॥६४॥

> **महाउदगवेगेणं वुज्झमाणाण पाणिणं ।**
> **सरणं गई पइट्ठा य दीवं कं मन्नसी मुणी ? ॥६५॥**

व्याख्या–महदुदकं पानीयं यत्र तन्महोदकं प्रक्रमान्महास्रोतस्तस्य वेगो रयो **महोदकवेगस्तेनोह्यमानानां** नीयमानानां **प्राणिनां शरणं** तन्निवारणक्षममत एव गम्य-मानत्वाद् **गतिः** स्थिरावस्थानहेतुं च **प्रतिष्ठां द्वीपं च कं मन्यसे मुने !** नास्त्येव कश्चन तादृशो द्वीप इति प्रश्नयितुराशयः ॥६५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

गौतम आह—

अत्थि एगो महादीवो वारिमज्झे महालओ ।
महाउदगवेगस्स गई तत्थ न विज्जई ॥६६॥

व्याख्या—अस्त्येको महांश्चासौ द्वीपश्च **महाद्वीपो वारिमध्ये** जलस्यान्तः समुद्रान्तर्वर्त्यन्तर्द्वीप इत्यर्थः । 'महालओ'त्ति महानुच्चैस्त्वेन विस्तीर्णतया चालयः स्थानं यस्य स **महालयो**ऽत एव **महोदकवेगस्य** क्षुभितपातालकलशवातेरितप्रवृद्धजलमहास्रोतोवेगस्य **गतिर्गमनं तत्र** द्वीपे **न विद्यते** ॥६६॥

दीवे य इइ के वुत्ते केसी गोयममब्बवी ।
केसिमेवं बुवंतं तु गोयमो इणमब्बवी ॥६७॥

व्याख्या—द्वीपः क उक्तः ? इत्यादि गतार्था ॥६७॥

गौतम आह—

जरा-मरणवेगेणं वुज्झमाणाण पाणिणं ।
धम्मो दीवो पइट्ठा य गई सरणमुत्तमं ॥६८॥

व्याख्या—जरा-मरणे एव निरन्तरप्रवाहप्रवृत्ततया वेगः 'प्रक्रमादुदकमहास्रोतसः' **जरा-मरणवेगस्तेनोह्यमानानाम**परापरपर्यायनयनेन **प्राणिनां धर्मः** श्रुतादिः द्वीप इव **द्वीप** उक्तः । स हि भवोदधिमध्यवर्ती मुक्तिपदहेतुतया जरा-मरणवेगस्यागम्योऽत एव तमाश्रित्य विवेकिनस्तिष्ठन्तीति **प्रतिष्ठा, गतिः, शरणं चोत्तममि**ति । इह द्वीपमात्रप्रश्ने यदुदकवेगप्रश्नस्याभिधानं तत् प्रक्रमोपलक्षणम् ॥६८॥

केशिराह—

साहु गोयम ! पन्ना ते छिन्नो मे संसओ इमो ।
अन्नो वि संसओ मज्झं तं मे कहसु गोयमा ! ॥६९॥

उक्तार्था ॥६९॥

अण्णवंसि महोहंसि नावा विपरिधावई ।
जंसि गोयममारूढो कहं पारं गमिस्ससि ? ॥७०॥

व्याख्या—अर्णवे समुद्रे **महौघे** बृहज्जलप्रवाहे नौर्द्रोणी कष्टाम्बुवाहिनी **विपरिधावति** विशेषेण समन्ताद् गच्छति 'जंसि' त्ति **यस्यां** नावि वेडायां **हे गौतम ! आरूढ**श्चटितः 'त्वमिति गम्यम्' । ततः **कथं पारं** पर्यन्तं 'प्रक्रमादर्णवस्य' **गमिष्यसि** ? न कथञ्चिदित्यर्थः ॥७०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

गौतम आह—

जा उ अस्साविणी नावा न सा पारस्स गामिणी ।
जा निरस्साविणी नावा सा उ पारस्स गामिणी ॥७१॥

व्याख्या—**या** 'तुः पूरणे' आस्रवते सन्धिभ्यो जलमित्य**ास्राविणी** जलसङ्ग्राहिणी **नौर्न सा पारस्य** प्रस्तावात् समुद्रपर्यन्तस्य **गामिन्य**वश्यंयायिनी । **या** पुनर्निष्क्रान्तः सन्धिभ्य आस्रावो जलसङ्ग्रहो यस्याः सा **निरास्राविणी** जलासङ्ग्राहिणीत्यर्थो **नौ**र्द्रोणी **सा पारस्य गामिनी** पारप्रापिका । ततोऽहं निरास्राविणीं नावमारूढ उपायतः पारगाम्येव भविष्यामीति भावः ॥७१॥

नावा य इइ का वुत्ते केसी गोयममब्बवी ।
केसिमेवं बुवंतं तु गोयमो इणमब्बवी ॥७२॥

व्याख्या—**नौः के**त्यादि स्पष्टा, नवरं नावस्तारणत्वात् तत्प्रश्ने तरिता तार्यं च पृष्टमेवातस्तदुत्तरमाह **गौतमः** ॥७२॥

सरीरमाहु नाव त्ति जीवो वुच्चइ नाविओ ।
संसारो अण्णवो वुत्तो जं तरंति महेसिणो ॥७३॥

व्याख्या—**शरीरमाहु**र्ब्रुवते **नौरिति** तस्यैव सदनुष्ठानहेतुतया भवाब्धितारकत्वात्, **जीव उच्यते**ऽर्हद्भि**र्नाविकः** सद्युक्तरूपया नावा भवोदधिं तरतीति, **संसारोऽर्णवः** समुद्र **उक्त**स्तस्यैव तत्त्वतस्तार्यत्वात्, **यं** संसारं महार्णवप्रायं **तरन्ति महर्षय** इति ॥७३॥

केशिराह—

साहु गोयम ! पन्ना ते छिन्नो मे संसओ इमो ।
अन्नो वि संसओ मज्झं तंमे कहसु गोयमा ! ॥७४॥

गतार्था ॥७४॥

अंधयारे तमे घोरे चिट्ठंति पाणिणो बहू ।
को करिस्सइ उज्जोयं सव्वलोगंमि पाणिणं ? ॥७५॥

व्याख्या—अन्धमिवान्धं चक्षुःप्रवृत्तिनिवर्तकत्वेनार्थाज्जनं करोतीत्य**न्धकार**-**स्तस्मिन् तमसि** प्रतीते **घोरे** भयानके **तिष्ठन्ति** प्राणिनो जीवा **बहवः कः करिष्यत्युद्योतं सर्वलोके प्राणिनां** ? न किञ्चित् तादृशं पश्याम इति भावः ॥७५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

गौतम आह—

उग्गओ विमलो भाणू सव्वलोगप्पभंकरो ।
सो करिस्सइ उज्जोयं सव्वलोगंमि पाणिणं ॥७६॥

व्याख्या—उद्गत उदितो **विमलो** निर्मलो **भानुः** सूर्यः **सर्वलोकप्रभाकरः** सर्वजगत्प्रकाशविधाता **स करिष्यत्युद्द्योतम्** । **सर्वस्मिन् लोके प्राणिनां** प्राणाः सन्ति येषां ते प्राणिनस्तेषां जीवानां ॥७६॥

भाणू य इइ के वुत्ते केसी गोयममब्बवी ।
केसिमेवं बुवंतं तु गोयमो इणमब्बवी ॥७७॥

व्याख्या—भानुः रविः **क उक्तो** य उद्द्योतं करिष्यतीति प्रक्रमः ॥७७॥

गौतम आह—

उग्गओ खीणसंसारो सव्वण्णू जिणभक्खरो ।
सो करिस्सइ उज्जोयं सव्वलोगंमि पाणिणं ॥७८॥

व्याख्या—उद्गत उदयं प्राप्तः **क्षीणसंसारः सर्वज्ञो जिनभास्करो**ऽर्हदादित्यः । **उद्द्योतं** समस्तवस्तुप्रकाशनं **करिष्यति** । शेषं स्पष्टम् ॥७८॥

केशिराह—

साहु गोयम ! पन्ना ते छिन्नो मे संसओ इमो ।
अन्नो वि संसओ मज्झं तं मे कहसु गोयमा ! ॥७९॥

विदितार्था ॥७९॥

सारीर-माणसे दुक्खे बज्झमाणाण पाणिणं ।
खेमं सिवं अणाबाहं ठाणं किं मन्नसी मुणी ? ॥८०॥

व्याख्या—शारीर—मानसैर्दुःखैः 'सूत्रत्वात् तृतीया' **बाध्यमानानां** पीड्यमानानां **प्राणिनां क्षेमं** व्याधिरहिततया, **शिवं** सकलोपद्रवाभावतः, **अनाबाधं** स्वाभाविक-बाधाऽपगमात्, **स्थानमा**श्रयस्तदेवंविधं किं **मन्यसे** प्रतिजानीषे ? न किञ्चिदीदृशं निश्चिनुम इति भावः ॥८०॥

गौतम आह—

अत्थि एगं धुवं ठाणं लोगग्गंमि दुरारुहं ।
जत्थ नत्थि जरा मच्चू वाहिणो वेयणा तहा ॥८१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—अस्त्येकमद्वितीयं **ध्रुवं** शाश्वतं **स्थानं लोकाग्रे** 'दुरारुहं' ति दुःखेना-रुह्यतेऽध्यास्यते इति **दुरारोहम्**। दुरापेणैव सम्यग्दर्शनादित्रयेण तस्य प्राप्यत्वात्। **यत्र न सन्ति जरादीनि** प्रतीतानि, वेदना शारीरादिपीडा ततश्च व्याध्यभावतः क्षेमत्वं, जरा-मरणाभावतः शिवत्वं, वेदनाऽभावतोऽनाबाधत्वमुक्तमिति यथायोगं भावनीयम् ॥८१॥

ठाणे य इइ के वुत्ते केसी गोयममब्बवी ।
एवं केसिं बुवंतं तु गोयमो इणमब्बवी ॥८२॥

व्याख्या—स्थानं किमुक्तं ध्रुवादिविशेषणविशिष्टमिति प्रक्रमः ॥८२॥

गौतम आह—

निव्वाणं ति अबाहं ति सिद्धी लोगग्गमेव य ।
खेमं सिवं अणाबाहं जं तरंति महेसिणो ॥८३॥

व्याख्या—निर्वाति-कर्माग्निविध्यापनाच्छीतीभवन्त्यस्मिन्निति **निर्वाणं** 'इतिशब्दः स्वरूपप्रदर्शको यत्रापि नास्ति तत्राप्यध्याहार्यः' ततः 'उच्यत इत्यध्याहृत्य' **निर्वाणमिति** यदुच्यते, **अबाधमिति** यदुच्यते, **सिद्धिरिति** यदुच्यते, **लोकाग्रमिति** यदुच्यत इति व्याख्येयं। **क्षेमं शिवमनाबाधमि**ति च प्राग्वत्। **यदि**ति यत् स्थानं 'विभक्तिव्यत्ययाद्' **यत्र** स्थाने वा **तरन्ति** प्लवन्ते गच्छन्तीत्यर्थो **महर्षयो** महामुनयः ॥८३॥

एवंविधं किं तद् ? इत्याह—

तं ठाणं सासयंवासं लोगग्गंमि दुरारुहं ।
जं संपत्ता न सोयंति भवोहंतकरा मुणी ॥८४॥

व्याख्या—तत् स्थानं 'उक्तमिति प्रक्रमः'। 'बिन्दोरलाक्षणिकत्वात्' **शाश्वतवासं** नित्यावस्थितं ध्रुवमिति यावत्। **लोकाग्रे दुरारोहम्** 'उपलक्षणत्वाज्जराद्यभाववच्च' **यत् सम्प्राप्ता न शोचन्ते** कीदृशाः सन्तः ? इत्याह—भवा नारकादयस्तेषामोघः पुनः पुनर्भावरूपः प्रवाहस्तस्यान्तकराः पर्यन्तविधायिनो **भवौघान्तकरा मुनय** इति ॥८४॥

केशिराह—

साहु गोयम ! पन्ना ते छिन्नो मे संसओ इमो ।
नमो ते संसयातीत ! सव्वसुत्तमहोयही ! ॥८५॥

व्याख्या—नमः 'अस्त्विति शेषः' 'ते' **तुभ्यं संशयातीत** ! सन्देहातिक्रान्त !

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सर्वसूत्राणां श्रुतानां महोदधिरिव महोदधिः समुद्रः सामस्त्येन तदाधारतया तत्सम्बोधनं **सर्वसूत्रमहोदधे** ! अनेनोपबृंहणागर्भं स्तवनमाह ॥८५॥

पुनस्तद्वक्तव्यतामेवाह—

एवं तु संसए छिन्ने केसी घोरपरक्कमे ।
अभिवंदित्ता सिरसा गोयमं तु महायसं ॥८६॥

व्याख्या—एवमऽमुना क्रमेण द्वादशानां प्रश्नानां **केशिना** कृतानां **संशये** उक्तरूपे **छिन्ने** 'उभयत्र जातावेकवचनम्' **केशिर्घोरपराक्रम** उत्कटवीर्य **अभिवन्द्य शिरसा** मस्तकेन **गौतमं पुनर्महायशसम्** ॥८६॥

किं कृतवान् ? इत्याह—

पंचमहव्वयधम्मं पडिवज्जइ भावओ ।
पुरिमस्स पच्छिमंमी मग्गे तत्थ सुहावहे ॥८७॥

व्याख्या—पञ्चमहाव्रतरूपं धर्मं प्रतिपद्यते 'केशिरिति गम्यम्' **भावत** इत्यभिप्रायतः । पूर्वं हि चतुर्याम एव धर्मः प्रतिपत्तव्य इत्यभिप्राय आसीदधुना तु पञ्चयाम इति । क्व पुनरयं पञ्चयामः ? इत्याह—'पुरिमस्स' **पूर्वस्या**द्यस्यार्हतोऽभिमते, **पश्चिमे** पश्चिमार्हत्सम्बन्धिनि **मार्गे, तत्र** प्रक्रान्ते **तिन्दुको**द्याने वा **शुभावहे** कल्याणप्रापके ॥८७॥

सम्प्रत्यध्ययनोपसंहारमाह—

केसीगोयमओ निच्चं तम्मि आसी समागमे ।
सुय-सीलसमुक्करिसो महत्थत्थविणिच्छओ ॥८८॥

व्याख्या—केशिगौतमत इति **केशि—गौतमावाश्रित्य** 'क्यब्लोपे पञ्चमी' **नित्यं** 'तम्मि' त्ति **तस्मिन्** प्रक्रान्ते स्थाने **आसीत् समागमे** मीलके । किमासीद् ? इत्याह—श्रुत—शीलयोर्ज्ञान—चरणयोः समुत्कर्षः प्रकर्षः **श्रुत—शीलसमुत्कर्षः** । **महार्था**—महाप्रयोजना मुक्तिसाधकत्वेन येऽर्थाः शिक्षाव्रतादयस्तेषां विनिश्चयो निर्णयो **महार्थार्थविनिश्चयः** 'तच्छिष्याणामिति गम्यते' ॥८८॥

शेषपर्षदो यदभूत् तदाह—

तोसिया परिसा सव्वा सम्मग्गं समुवट्ठिया ।
संथुया ते पसीयंतु भयवं केसीगोयमे ॥८९॥ त्ति बेमि ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—तोषिता परितोषं नीता, **परिषत्** सदेव—मनुजासुरा सभा, **सर्वा, सन्मार्गं** मुक्तिपथं 'अनुष्ठातुमिति गम्यते' **समुपस्थिता**—उद्यता। प्रणिधानमाह—'संथुय' त्ति **संस्तुतौ** सम्यगभिवन्दितौ **तावुक्तरूपौ प्रसीदतां** प्रसादपरौ **भवतां** भगवत्**केशि—गौतमा**विति। **इति ब्रवीमी**ति पूर्ववत् ॥८९॥ ग्रं० ३०६ अ० २८॥

इति श्रीकमलसंयमोपाध्यायविरचितायां सर्वार्थसिद्धौ श्रीउत्तराध्ययनटीकायां त्रयोविंशं केशि—गौतमीयमध्ययनं समाप्तम् ॥२३॥

● ● ●

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

चतुर्विंशं प्रवचनमात्रीयमध्ययनम्

अनन्तराध्ययने परेषां चित्तविप्लुतिः **केशि—गौतम**वदपनेयेत्युक्तमिह तदपनयनं च सम्यग्वाग्योगत एव, स च प्रवचनमातृस्वरूपपरिज्ञानादिति तत्स्वरूपाभिधायकं चतुर्विंशमध्ययनमारभ्यते—

अट्ठ प्पवयणमायाओ समिई गुत्ती तहेव य ।
पंचेव य समिईओ तओ गुत्तीओ आहिया ॥१॥

व्याख्या—अष्टौ प्रवचनमातरः, समिति सम्यगर्हन्मतानुसारितया इतिरात्मचेष्टा **समितिरी**र्यादिचेष्टासु पञ्चसु तान्त्रिकीयं संज्ञा, गोपनं **गुप्तिः** सम्यग्योगनिग्रहः '**तथैव चेति** समुच्चये' एताः प्रवचनमातरः । अष्टसङ्ख्यात्वमेव स्पष्टयति 'पंच'त्ति **पञ्चैव समितयस्तिस्रो गुप्तयः** 'आहिय'त्ति **आख्याताः** कथिताः 'तीर्थकृदादाभिरिति गम्यते' ॥१॥

ता एव नामत आह—

इरियाभासेसणादाणे उच्चारे समिई इय ।
मणगुत्ती वइगुत्ती कायगुत्ती य अट्ठमा ॥२॥

व्याख्या—ईरणं गमनं **ईर्या** गतिः । भाषणं **भाषा । एषणा** उद्गमैषणाऽऽद्या गवेषणाऽऽहारादेः । **आदानं** ग्रहणं पात्रादेर्निक्षेपोपलक्षणमिदम्, ततो द्वन्द्वस्तस्मिन् । **उच्चार**शब्देन सूचकत्वादुच्चारादिपरिष्ठापनायां च । **समिति**रस्य च प्रत्येकसम्बन्धादीर्यासमितिरित्याद्यभिलापः कार्यः, इतिशब्देनैतावत्य एव समितयस्तथा मनसो गुप्ति**र्मनोगुप्तिरि**ति तत्पुरुषः, एवमुत्तरयोरपि **कायगुप्तेश्च** गुप्त्यपेक्षया तृतीयात्वेऽपि **अष्टमी**त्वं प्रवचनमात्रपेक्षया ॥२॥

निगमयन्नाह—

एयाओ अट्ठ समिईओ समासेण वियाहिया ।
दुवालसंगं जिणक्खायं मायं जत्थ उ पवयणं ॥३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या–एता अनन्तरोक्ता **अष्ट समितयो** गुप्तीनामपि प्रवचनविधिना सन्मार्ग-व्यवस्थापनोन्मार्गगमनविनिवारकत्वादात्मनः सच्चेष्टात्मकत्वाच्च समितिशब्दवाच्य-त्वमस्त्येवेति । यत् तु भेदेनोपादानं तत् समितीनां प्रवीचारात्मकत्वे, गुप्तीनां तु प्रवीचारा-प्रवीचाररूपत्वेनान्योन्यं कथञ्चिद् भेदात् । तथा चागमः–

"[1]समितो नियमा गुत्तो गुत्तो समियत्तणंमि भइयव्वो ।
कुसलवइमुदीरंतो जं वइगुत्तो व समिओ वि" ॥१॥

ततः **समासेन** सर्वश्रुतसङ्ग्रहणे **व्याख्याताः** । अत एव **द्वादशाङ्गं जिनाख्यातं** मातं 'तुशब्दस्यैवार्थत्वात्' **मातमेवान्त**र्भूतमेवेति **यासु** समित्यादिषु **प्रवचन**मागम इति । किञ्च सर्वा अप्यमूश्चारित्ररूपा, ज्ञान–दर्शनाविनाभावि च चारित्रं, न चैतत्त्रयातिरिक्तमन्यदर्थतो द्वादशाङ्गमिति सर्वमप्येतासु प्रवचनं मातमुच्यते इति ॥३॥

तत्रेर्यासमितिस्वरूपमाह–

आलंबणेण कालेण मग्गेणं जयणाइ य ।
चउकारणपरिसुद्धं संजए इरियं रिए ॥४॥

व्याख्या–आलम्बनेन कालेन मार्गेण यतनया च चतुःकारणैरेभिरालम्बनादिभिरेव **परिशुद्धां** निर्दोषां **संयतो** यतिरी**र्यां** गतिं 'रीए'त्ति **रीयेता**नुष्ठानविषयतया प्राप्नुयात् ॥४॥

आलम्बनादीन्येव व्याचष्टे–

तत्थ आलंबणं नाणं दंसणं चरणं तहा ।
काले य दिवसे वुत्ते मग्गे उप्पहवज्जिए ॥५॥

दव्वओ खित्तओ चेव कालओ भावओ तहा ।
जयणा चउव्विहा वुत्ता तं मे कित्तयओ सुण ॥६॥

दव्वओ चक्खुसा पेहे जुगमित्तं च खित्तओ ।
कालओ जाव रीएज्जा उवउत्ते य भावओ ॥७॥

इंदियत्थे विवज्जित्ता सज्झायं चेव पंचहा ।
तम्मुत्ती तप्पुरक्कारे उवउत्ते रियं रिए ॥८॥

आसां व्याख्या–तत्र तेष्वालम्बनादिषु मध्ये यदालम्ब्य गम्यते **तदालम्बनं,**

---

१. समितो नियमाद् गुप्तो गुप्तः समितत्वे भक्तव्यः ।
कुशलवच उदीरयन् यद् वचोगुप्तोऽपि समितोऽपि ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

निरालम्बनस्य हि गमनं नानुज्ञातमेव । तत् किम् ? इत्याह—ज्ञानं सूत्रार्थोभयावबोधरूपं, **दर्शनं** तत्त्वार्थश्रद्धानरूपं, **चरणं** चारित्रं, **तथा**शब्देन ज्ञानादीन्याश्रित्य प्रत्येकं द्विकादिसंयोगे गमनालम्बनमनुज्ञातम् । **कालश्चेर्याया** दिवस उक्तोऽर्हदादिभिः, रात्रौ ह्यचक्षुर्विषयत्वेन पुष्टालम्बनेनैव गतेरनुज्ञातत्वात् । **मार्ग** उत्पथेनोन्मार्गेण वर्जितः, **उत्पथे** हि **व्रजतः** संयमात्मनि विराधना स्यात् ॥ **यतनां** वुवूर्षुराह—'दव्व०' त्ति स्पष्टा, नवरं **तां** चतुर्विधां यतनां **मे कीर्तयतः** सम्यक् स्वरूपेण कथयतः **शृणु** 'हे शिष्य ! इति गम्यम्' ॥ तामेवाह—'दव्व०' त्ति **द्रव्यतो** जीवादिद्रव्याण्याश्रित्यैवं यतना **यच्चक्षुषा** तानि **प्रेक्षेत** पश्येत्, **युगमात्रं च** चतुर्हस्तप्रमाणं क्षेत्रं प्रेक्षेतेति **क्षेत्रतः, कालतो** यतना 'जाव'त्ति **यावन्तं** कालं 'रीएज्ज' त्ति **रीयते** भ्रमति 'तावत्कालमानेति गम्यते,' **उपयुक्तश्च** सावधानो यद् रीयेत सा **भावतो** यतना ॥ उपयुक्तत्वमेवाह—'इंदियत्थे०' त्ति **इन्द्रियार्थान्** शब्दादीन् **विवर्ज्य** तदध्यवसायं त्यक्त्वा 'एवोऽप्यर्थः' ततः **स्वाध्यायं चापि पञ्चधेति** वाचनादिभेदतः पञ्चप्रकारं गत्युपयोगोपघातित्वात् 'त्यक्त्वेति योज्यम्' । तस्यामेवेर्यायां मूर्तिः शरीरं 'अर्थाद् व्याप्रियमाणा' यस्यासौ **तन्मूर्त्तिः** । तथा तामेव पुरस्करोति-तत्रोपयुक्ततया प्राधान्येनाङ्गीकरोतीति **तत्पुरस्कारो**ऽनेन काय—मानसोस्तत्परतोक्ता । वचसो हि तत्र व्यापार एव नास्ति एव**मुपयुक्तः** सन्नी**र्यां रीयते** 'यतिरिति शेषः' इति गाथाचतुष्टयार्थः ॥५-६-७-८॥

भाषासमितिमाह—

कोहे माणे य माया य लोभे य उवउत्तया ।
हासे भय-मोहरिए विगहासु तहेव य ॥९॥

एयाइं अट्ठ ठाणाइं परिवज्जित्तु संजए ।
असावज्जं मियं काले भासं भासिज्ज पन्नवं ॥१०॥

अनयोर्व्याख्या—क्रोधाद्युपयुक्तता हास्ये भये मौखर्ये वाचालतायां **विकथासु** राजादिचतुर्विधासत्कथासु **तथैवोपयुक्तता** ॥ 'एया०' त्ति **एतान्युक्त**रूपाण्यष्टौ **स्थानानि परिवर्ज्य संयतोऽसावद्यां** निर्दोषां तामपि **मितां** स्तोकां **काले** प्रस्तावे **भाषां** वाचं **भाषेत** वदेत् **प्रज्ञा** बुद्धिस्त**द्वा**निति गाथाद्वयार्थः ॥९-१०॥

एषणासमितिमाह—

गवेसणाए गहणे य परिभोगेसणा य जा ।
आहारोवहि-सेज्जाए एए तिन्नि विसोहए ॥११॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

उग्गमुप्पायणं पढमे बिइए सोहिज्ज एसणं ।
परिभोगंमि चउक्कं विसोहिज्ज जयं जई ॥१२॥

अनयोर्व्याख्या—गवेषणायां उद्गमोत्पादनालक्षणायां द्वात्रिंशद्विधायामन्वेषणायां, **ग्रहणे च** शङ्कितादिभेदभिन्ने दशविधे स्वीकरणे 'उभयत्रैषणेति सम्बध्यते' ततो गवेषणैषणा ग्रहणैषणा, परिभोगे ग्रासे एषणा पञ्चप्रकारा वक्ष्यमाणचतुःप्रकारा वा **परिभोगैषणा च या** 'आहार'त्ति वचनव्यत्ययादा**हारोपधि—शय्यासु** प्रतीतास्**वेताः** पूर्वोक्ता एषणाः **तिस्रो विशोधयेत्** निर्दोषा विदध्यात् ॥ कथम् ? इत्याह—**उद्गमोत्पादनं** शोधयेदिति सम्बन्धः । कोऽर्थः ? आधाकर्मादिदोषत्यागादुद्गमं, धात्र्यादिदोषत्यागादुत्पादनां, 'पढमे'त्ति **प्रथमायां** गवेषणैषणायां, 'बीइए' त्ति **द्वितीयायां** ग्रहमैषणायां **शोधेयच्**छङ्कितादिदोषत्यागत **एषणां** ग्रहणकालभाविग्राह्यदोषान्वेषणारूपाम् । **'परिभोगे'** इति परिभोगैषणायां चतुष्कं पिण्ड—शय्या—वस्त्र—पात्रात्मकं **विशोधयेत्** । कोऽर्थः ? उद्गमादिदोषत्यागतः शुद्धमेव परिभुञ्जीत। अथवा संयोजना—प्रमाणाङ्गार—धूमाकारणात्मकचतुष्कं शोधयेदङ्गार—धूमयोर्मोहनीयान्तर्गतत्वेनैकतया विवक्षितत्वात् । 'जयं' ति **यतमानो यतिरि**ति । द्विः क्रियाऽभिधानमतिशयख्यापनार्थमिति गाथाद्वयार्थः ॥११-१२॥

आदाननिक्षेपणासमितिमाह—

ओहोवहोवग्गहियं भंडगं दुविहं मुणी ।
गिण्हंतो निक्खिवंतो य पउंजिज्ज इमं विहिं ॥१३॥
चक्खुसा पडिलेहित्ता पमज्जिजज्ज जयं जई ।
आयए निक्खिविज्जा वा दुहओ वि समिए सया ॥१४॥

अनयोर्व्याख्या—'मध्यवर्त्युपधिशब्दो डमरुकमणिन्यायेनोभयत्र सम्बध्यते' तत **ओघोपधिमौपग्रहिकोपधिं** च **भाण्डकमु**पकरणं रजोहरण—दण्डकादि **द्विविधं** द्विभेदमुक्तनीत्या **मुनिर्गृह्णन् निक्षिपंश्च प्रयुञ्जीत** व्यापारये**दिमं विधिं** न्यायं वक्ष्यमाणं ॥ तमेवाह—**चक्षुषा** 'पडिलेहित्त'त्ति **प्रत्युपेक्ष्या**ऽवलोक्य **प्रमार्जयेद्** रजोहरणादिना विशोधयेत् । **यतमानो यति**स्ततः 'आयए'त्ति **आददीत** गृह्णीया**न्निक्षिपेद् वा** स्थापयेत् । 'दुहओ वि'त्ति **द्वावपि** प्रक्रमादौघिकौपग्रहिकोपधी यदि वा **द्विधापि** द्रव्यतो भावतश्च **समितः** प्रक्रमादादाननिक्षेपणासमितिमान् सन् **सदा** नित्यमिति गाथाद्वयार्थः ॥१३-१४॥

पारिष्ठापनासमितिमाह—

उच्चारं पासवणं खेलं सिंघाण जल्लियं ।
आहारं उवहिं देहं अन्नं वा वि तहाविहं ॥१५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अणावायमसंलोए अणावाए चेव होइ संलोए ।
आवायमसंलोए आवाए चेव संलोए ॥१६॥

अणावायमसंलोए परस्साणुवघाइए ।
समे अज्झुसिरे वावि अचिरकालकयंमि य ॥१७॥

विछिन्ने दूरमोगाढे नासन्ने बिलवज्जिए ।
तसपाण-बीयरहिए उच्चाराईणि वोसिरे ॥१८॥

आसां व्याख्या—उच्चारं पुरीषं गूथं, **प्रस्रवणं** मूत्रं, **खेलं** मुखनिर्गतं श्लेष्मादि, **सिङ्घानकं** नासिकानिःसृतं श्लेष्माणं, **जल्लो**ऽङ्गमलस्तम्, **आहारं** भोजनं, **उपधिं** वर्षाकल्पादि, **देहं** शरीर**मन्यद् वा** कारणतो **गृहीतं** गोमयादि '**अपिः** पूरणे' **तथाविधं** परिष्ठापनार्हं 'स्थण्डिले व्युत्सृजेदित्युत्तरेण सम्बन्धः' ॥ स्थण्डिलं च दशविशेषण-पदविशिष्टम् । तत्राद्यविशेषणपदयोर्भङ्गरचनामाह—न विद्यते आपातः स्व—परोभयपक्ष-पार्श्वागमनरूपोऽस्मिन्नि**त्यनापातम्** 'असंलोए' त्ति **न विद्यते संलोको** दूरस्थितस्यापि स्वपक्षादेरालोको दर्शनं **यस्मिंस्तत्** तथेति प्रथमो भङ्गः । **अनापातं च संलोकं भवती**ति द्वितीयः । **आपातमसंलोकं** च तृतीयः । **आपातं संलोकं च** चतुर्थः ॥ यादृशे स्थण्डिले व्युत्सृजेत् तदाह—**अनापाते असंलोके** कस्य ? इत्याह—**परस्य** स्वपक्षादेः १। **अनुपघातिके** संयमात्मप्रवचनोपघातरहिते २। **समे** निम्नोन्नतत्वरहिते ३। **अशुषिरे वाऽपि** तृण—पर्णाद्यनाकीर्णे ४। **अचिरकालकृते च** दाहादिनाऽल्पकालकृते, चिरकृते सम्मूर्च्छन्ति जीवाः ५। **विस्तीर्णे** जघन्यतोऽपि हस्तप्रमाणे ६। **दूरमवगाढे** जघन्यतोऽप्यधश्च-तुरङ्गुलमचित्तीभूते ७। **नासन्ने** ग्रामारामादेः ८। **बिलवर्जिते** मूषकादिरन्ध्ररहिते ९। **त्रसप्राण—बीजरहिते** त्रसप्राणा द्वीन्द्रियादयो बीजानि च शाल्यादीनि 'सर्वैकेन्द्रियोप-लक्षणमिदं' तै रहिते १०। एवंविधे स्थण्डिले **उच्चारादीनि** साधु**र्व्युत्सृजेत्** परिष्ठापयेत् पुनरुच्चारादीनीत्यभिधानं स्मरणार्थमदुष्टमिति गाथाचतुष्कार्थः ॥१५-१६-१७-१८॥

अथोक्तार्थमुपसंहरन् वक्तव्यार्थं वक्तुमाह—

एयाओ पंच समिईओ समासेण वियाहिया ।
इत्तो य तओ गुत्तीओ वुच्छामि अणुपुव्वसो ॥१९॥

व्याख्या—एताः पञ्च समितयः समासेन संक्षेपेण **व्याहृताः** । 'इत्तो'त्ति **अतश्च** पञ्चसमित्यनन्तरं 'तओ'त्ति **तिस्रो गुप्तीर्वक्ष्ये** । 'अणुपुव्वसो'त्ति आर्षत्वादानु-**पूर्व्या**नुक्रमेणेत्यर्थः ॥१९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तत्राद्यामाह—

सच्चा तहेव मोसा य सच्चामोसा तहेव य ।
चउत्थी असच्चमोसा य मणगुत्ती चउव्विहा ॥२०॥

संरंभ-समारंभे आरंभे य तहेव य ।
मणं पवत्तमाणं तु नियत्तिज्ज जयं जई ॥२१॥

अनयोर्व्याख्या—सद्भ्योऽर्थात् पदार्थेभ्यो हितो यथावद् विकल्पेन सत्यो मनोयोगस्तद्विषया मनोगुप्तिरपि **सत्या** १। **तथैव मृषा च** तद्विपरीतमनोयोगविषया २। **सत्यामृषा** उभयात्मकमनोयोगगोचरा ३। '**तथैव चे**ति समुच्चये' **असत्यामृषा** उभयस्वभावविकलमनोयोगगोचरा मनोगुप्ति**श्चतुर्थी** ४। एवं **मनोगुप्तिश्चतुर्विधा** ॥ अस्या एव स्वरूपं निरूपयन्नाह—संरम्भश्चित्तसङ्कल्पस्तथाहं ध्यास्यामि यथाऽसौ मरिष्यतीत्येवंविधः । समारम्भः परपीडाकरोच्चाटनादिहेतुध्यानम् 'अनयोर्द्वन्द्वे' **संरम्भ—समारम्भं तस्मिन्** । **आरम्भो**ऽत्यन्तसंक्लेशतः परप्राणापहारक्षममशुभध्यानमेव **तस्मिन्** '**च**ः समुच्चये' । **तथैवे**ति तेनैवाशुभसङ्कल्पनप्रकारेण **मनः प्रवर्तमानं** 'तुर्विशेषणे' **निवर्तयेत् यतमानो यतिरि**ति गाथाद्वयार्थः ॥२०-२१॥

वाग्गुप्तिमाह—

सच्चा तहेव मोसा य सच्चामोसा तहेव य ।
चउत्थी असच्चमोसा य वयगुत्ती चउव्विहा ॥२२॥

संरंभ-समारंभे आरंभे य तहेव य ।
वयं पवत्तमाणं तु नियत्तिज्ज जयं जई ॥२३॥

अनयोर्व्याख्या—सत्या वाक् जीवं जीवमिति वदतः, **असत्या** जीवमजीवमिति, **सत्यामृषा** क्वचित् समये मनुष्यशतमुत्पन्नमुपरतं चेति, **असत्यामृषा** विधेहि स्वाध्यायं नैतत्सममन्यत् तपोऽस्तीत्यादि ॥ **वाचिकः संरम्भः** परव्यापादनक्षमक्षुद्रविद्यादिपरावर्तनासङ्कल्पसूचको ध्वनिरेव । **समारम्भः** परपरितापकमन्त्रादिपरावर्तनम् । **आरम्भो**ऽतिसङ्क्लेशतः प्राणिव्यपरोपणक्षममन्त्रादिजपनम् । **तस्मिन् प्रवर्तमानं** वाचो **निवर्तयेद् यतमानो यतिरि**ति पूर्ववत् ॥२२-२३॥

कायगुप्तिमाह—

ठाणे निसीयणे चेव तहेव य तुयट्टणे ।
उल्लंघण पल्लंघण इंदियाण य जुंजणे ॥२४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

संरंभ-समारंभे आरंभे य तहेव य ।
कायं पवत्तमाणं तु नियत्तिज्ज जयं जई ॥२५॥

अनयोर्व्याख्या—स्थाने-ऊर्ध्वस्थाने, **निषीदने चोपवेशने, तथैव** च **त्वग्वर्तने** स्वापे, **उल्लङ्घने** कुतोऽपि हेतोर्गर्ताऽऽदेरुत्क्रमणे, **प्रलङ्घने** सामान्येन गमने 'उभयत्र सुब्लोपः', **इन्द्रियाणां च योजने** शब्दादिविषयेषु व्यापारणे सर्वत्र 'वर्तमान इति शेषः' ततः स्थानादिषु वर्तमानः । किम् ? इत्याह—इह **संरम्भो**ऽभिघातसङ्कल्पसूचकं दृष्टि-मुष्ट्यादिसंस्थानमेव उपचारात् सङ्कल्पार्थं संरम्भशब्दवाच्यम्, **समारम्भः** परितापकरो मुष्ट्याद्यभिघातस्ततो द्वन्द्वः तस्मिन् । **आरम्भे** प्राणिवधात्मनि कायं प्रवर्तमानं निवर्तयेत् शेषं पूर्ववत् । इति गाथाद्वयार्थः ॥२४-२५॥

समिति-गुप्त्योर्विशेषमाह—

एयाओ पंच समिईओ चरणस्स य पवत्तणे ।
गुत्ती नियत्तणेऽवुत्ता असुभत्थेसु सव्वसो ॥२६॥

व्याख्या—एताः पूर्वोक्ताः **पञ्च समितयश्च**रणं चारित्रं सच्चेष्टेति यावत् तस्य प्रवर्तने 'चस्यावधारणार्थत्वात्' **प्रवर्तने एव** । को भावः ? सच्चेष्टासु प्रवृत्तावेव समितयः । तथा **गुप्तयो निवर्तनेऽप्युक्ता, अशुभार्थेभ्यो**ऽशोभनमनोयोगादिभ्यः 'सूत्रत्वात् पञ्चम्यर्थे सप्तमी' 'सव्वसो'त्ति **सर्वेभ्यः**, अपिशब्दाच्चरणप्रवर्तने च 'उपलक्षणमेतत् **शुभार्थेभ्योऽपि निवृत्तेः**' वाक्—काययोर्निर्व्यापारताया अपि गुप्तिरूपत्वात् । को भावः ? रक्तद्विष्टस्य वाक्—काय—मनोव्यापाराव्यापाररूपा गुप्तिरिति ॥२६॥

अध्ययनार्थोपसंहारेणैतदाचरणफलमाह—

एया पवयणमाया जे सम्मं आयरे मुणी ।
सो खिप्पं सव्वसंसारा विप्पमुच्चइ पंडिए ॥२७॥ त्ति बेमि ॥

व्याख्या—एताः प्रवचनमातृर्यः सम्यगवैपरीत्येन, न तु दम्भादिनाऽऽ**चरेन्मुनिः स क्षिप्रं सर्वसंसाराद् विप्रमुच्यते पण्डित इति ब्रवीमीति** प्राग्वत् ॥ अत्रार्थे **पुण्यसार**दृष्टान्तः—

गोपाचलश्रियाकीर्णे श्री**गोपाचल**पत्तने ।
भूपः **समरसिंहो**ऽभूद्, द्विषत्समरसिंहतः ॥१॥

समरश्रीरभूत् कान्ता स्मरश्रीरिव पण्डिता ।
स वागीशोऽप्यवागीशो यद्रूपादिगुणस्तुतौ ॥२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

धनसारो **धनसार**श्रेष्ठी श्रेष्ठोऽस्ति तत्र हि ।
धनश्रीस्तस्य जायास्ते धन्या श्रीर्मूर्त्तिमत्यहो ! ॥३॥

तयोर्भुञ्जानयोर्भोगान् प्रीत्यैकीभूतयोरिव ।
अनेहा व्यतिचक्राम कियानपि यथासुखम् ॥४॥

अभूतामन्यदाऽपत्यचिन्तान्यञ्चितचेतसौ ।
तथाथाराद्धया गोत्रदेव्योचे धर्मतो हि तत् ॥५॥

यदाशाविषयं नैव लोकेऽस्मिन् यच्च दुर्घटम् ।
हस्तसात् कुरुते क्षिप्रं प्राक्पुण्यं प्राणिनां हि तत् ॥६॥

ततः श्रीदेव-गुर्वर्चाऽभयदानादितत्परौ ।
समधार्मिकवात्सल्योपकारकरणोद्यतौ ॥७॥

तस्थतुस्तौ तयोः पुण्यप्रभावनादभवत् सुतः ।
स **पुण्यसार** इत्याख्यां लब्धवान् लब्धवर्णतः ॥८॥

पितुः प्रमोदेन समं वर्धमानोऽष्टवार्षिकः ।
जज्ञे पित्रा स विद्यार्थं प्रैषि पाठकसन्निधौ ॥९॥

सोऽधीयानोऽपि दुस्सङ्गाद् द्यूतादिव्यसनोऽजनि ।
यथाऽऽम्रोऽरिष्टसंसर्गादनिष्टरसभाग् भवेत् ॥१०॥

पुण्यसारो दिवा रात्रौ विटपेटकसङ्गतः ।
वसन् क्रीडन् हसन्नशनन् बम्भ्रमीति स सर्वतः ॥११॥

द्यूतव्यसनिनाऽनेन जह्रे मातुर्महाऽर्थकः ।
मुक्ताहार सहस्रेण दीनारेण सहाऽन्यदा ॥१२॥

वृत्तान्तमेतं मत्वाऽभूद् **धनसारो**ऽतिदुःखभाक् ।
तत्क्षणात् पुत्रमाह्वाय्याऽनुशासितुमिदं जगौ ॥१३॥

कलाऽभ्यासे समारब्धे चौर्याभ्यासं करोषि रे ! ।
सुतव्याजाद् रिपुर्जातो विटैः साकं परिभ्रमन् ॥१४॥

पूज्यायाः स्वजनन्याः किं हरन् हारं न लज्जितः ? ।
हारे दत्ते त्वयैतव्यं मम वेश्मनि नान्यथा ॥१५॥

दध्यावनुतपन् सोऽथ पितृवैर्यहमङ्गजः ।
अथ देशान्तरं गत्वा दास्येऽस्मै हारमर्जितम् ॥१६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ततोऽकथितहृद्भावोऽभिमानी गुरुसाहसी ।
प्रतीचीमपराह्ने स प्रतस्थे **पुण्यसारकः** ॥१७॥

द्विगव्यूतीं गते तस्मिन् रविरस्तं गतः क्षणात् ।
ध्वान्ते प्रसृमरे विष्वक् स तस्थौ वटकोटरे ॥१८॥

इतस्तत्र वटे काऽपि **कामाक्षा**ऽऽख्याऽस्ति यक्षिणी ।
सङ्गन्तुमेतया देवी **कमलाक्षा**ऽऽगताऽन्यतः ॥१९॥

अप्राक्षीत् तां च **कामाक्षा** त्वं कुतः कथमागमः ? ।
सख्याख्याहि यदद्राक्षीः कुतुकं तन्मदग्रतः ॥२०॥

स्वर्णद्वीपादहं व्योम्नाऽत्रागमं त्वद्दिदृक्षया ।
सुराष्ट्रायां यदद्राक्षं **वलभी**पुरि तच्छृणु ॥२१॥

तत्रास्ते कामदेवाभः **कामदेवा**भिधो धनी ।
श्रेष्ठी तस्य प्रिया **लक्ष्मी**र्लक्ष्मीरिव हरेः प्रिया ॥२२॥

सदा वैषयिकं सौख्यं तयोरासेवमानयोः ।
अष्टाभीष्टाः सुता जाता नामतस्तु क्रमादिमाः ॥२३॥

धनश्रीश्च स्मरश्रीश्च नागश्री–विमलश्रियौ ।
सोमश्रीः कमलश्रीश्च सुन्दरश्री-गुणश्रियौ ॥२४॥

कलाकमलिनीहंस्यो रूपेणास्तामराङ्गनाः ।
लसल्लावण्यतारुण्यास्ता अवर्धन्त सुभ्रुवः ॥२५॥

कामदेवोऽथ कन्याऽनुरूपोत्तमवरार्थिकः ।
सम्यगाराधयामास **गणेशं** गुरुगौरवात् ॥२६॥

प्रत्यक्षीभूय सोऽभाणीत् तुष्टोऽस्मीष्टं हि मार्गय ।
श्रेष्ठ्यूचे मेऽष्टपुत्रीणां समादिश वरान् वरान् ॥२७॥

यक्षः स ऊचिवान् भद्र ! श्रेष्ठिसूनुर्वरोत्तमः ।
अष्टानां पुत्रिकाणां ते एक एव भविष्यति ॥२८॥

पूर्वं विवाहसामग्रीं त्वं विदेहि यथाविधि ।
स्मररूपं वरं लग्ने आनयिष्येऽहमागते ॥२९॥

कामदेवस्ततः प्रेष्यैर्नव्यं वैवाहमण्डपम् ।
खाद्याद्यष्टादशप्रष्ठभेदभक्ष्याण्यचीकरत् ॥३०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

हारार्धहार-केयूरमुख्यान्याभरणानि च ।
चीनांशुकदुकूलानि नेपथ्यानि व्यदीधपत् ॥३१॥

यवाङ्कुरेषु चोप्तेषु माङ्गल्यध्वनिपूर्वकम् ।
तेन चिक्षिपिरे कन्याः सर्वास्ता वर्णके मुदा ॥३२॥

संस्थाप्य सर्वाः सम्भूष्य बद्ध्वा पाणौ च कङ्कणम् ।
श्रेष्ठी तु मण्डपद्वारे वरमार्गं विलोकते ॥३३॥

वरं विनाऽपि वैवाहसामग्री क्रियतेऽमुना ।
वलभ्यामेतदाश्चर्यं दृष्ट्वाऽऽगामत्र सत्यवाक् ॥३४॥

कामाक्षाऽऽख्यत् सखीदं तद् वीक्षेऽहमपि कौतुकम् ।
प्रत्याह साऽपि यद्येवं तर्ह्यागच्छ मया सह ॥३५॥

पुण्यसारस्तदाकर्ण्य तं वटं दृढमऽग्रहीत् ।
ततो देव्यौ वटेन द्राक् जग्मतु**र्वलभीपुरीम्** ॥३६॥

तदुद्याने वटं मुक्त्वा देव्यौ कौतुकमीक्षितुम् ।
विवाहमण्डपेऽगातां **पुण्यसारो**ऽपि चाऽन्वगात् ॥३७॥

लग्नक्षणे **गणेशेन** **पुण्यसारो**ऽथ दर्शितः ।
कामदेवाय योग्योऽयं वरस्तेऽङ्गभुवामिति ॥३८॥

श्रेष्ठी संस्नाप्य तं भद्रं कङ्कणाभरणान्वितम् ।
विधाप्य कन्याधिष्ठानं मातृमन्दिरमानयत् ॥३९॥

तं कुमारं कुमाराभं श्रेष्ठ्याद्याः कन्यका अपि ।
निरीक्ष्याङ्गेन दीव्यं तं स्वं स्वं धन्यममंसत ॥४०॥

अचिन्त्यंश्च ताः सर्वा महद्भाग्यादयं पतिः ।
प्राप्तोऽस्माभिरपुण्यैः किं कामकुम्भो ह्यवाप्यते ? ॥४१॥

कुमारस्ताः कनीऽष्टौ यथानीति व्यवाहयत् ।
कामदेवस्तदा तस्मै भूरि रत्नादिकं ददौ ॥४२॥

वधूभिरष्टभिः सोऽथ भुञ्जानः शर्म तस्थिवान् ।
तत्र सिद्धिभिऽष्टाभिर्महासिद्धः पुमानिव ॥४३॥

अन्यदोषान्तयामे स प्रबुद्ध इति दध्यिवान् ।
एकाकी निरगां निःस्वो गेहात् पित्राऽपमानितः ॥४४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

क्व स **गोप**गिरिः क्वाहं वटयोगः क्व दिव्यकः ? ।
क्वैषा च **वलभी** श्रेष्ठिकन्यका यद् व्यवाहयम् ॥४५॥

एताभिः सह यद् भुञ्जे स्वर्ण-रत्नादिसम्पदः ।
तत् सर्वं कटरे ! पुण्यमाहात्म्यं बलवद्धि तत् ॥४६॥

इतोऽम्बा **पुण्यसार**स्य पित्रा निर्भर्त्सितं सुतम् ।
मत्वा चक्रन्द सा मन्दं पतिं चाह सगद्गदा ॥४७॥

स्वामिस्तवेयं का बुद्धिर्यत् पुत्रः प्राणवल्लभः ।
गृहान्निर्वास्यते किं तत् सन्ततिः किल दुर्लभा ॥४८॥

किं च नश्वरवित्तार्थे पुत्ररत्नं हि कस्त्यजेत् ? ।
न मन्दोऽप्यारकूटार्थे काञ्चनं त्यजति क्वचित् ॥४९॥

हारापहारकृद् बालः शिक्ष्यः स्यात् त्याज्य एव न ।
तद् याह्यानय तं सद्यो भोक्ष्ये तन्मुखदर्शनात् ॥५०॥

धनसारः प्रगे श्रेष्ठी प्रेष्यान् प्रेष्य दिशो दिशम् ।
पुत्रं विलोकितुं स्वीयं बम्भ्रमीति पुरे स्वयम् ॥५१॥

ततस्तद्बान्धवाः सर्वे तद्भृत्याश्चापि सर्वतः ।
नष्टवस्त्विव निष्पुण्यास्तद्वार्तामपि नाप्नुवन् ॥५२॥

कियत्यपि गते काले तत्कुटुम्बे तु शोचति ।
वलभीतः पुमानेको दक्षस्तत्र समागमत् ॥५३॥

तेनोचे तत्र वैदेशी कश्चिदेकः पुमानगात् ।
श्रेष्ठिना **कामदेवेन** सोऽष्टपुत्रीर्विवाहितः ॥५४॥

धनसारस्तमप्राक्षीत् किमभिज्ञानवान् स तु ।
ततस्तदुक्तचिह्नेन निश्चिकाय तमात्मजम् ॥५५॥

श्रेष्ठी प्रैषीत् ततो वेगाद् दूतमाप्तं हितैषिणम् ।
पुत्रपार्श्वे **वलभ्यां** च तल्लेखेऽलिखदित्यसौ ॥५६॥

अतुच्छागच्छ वत्स ! त्वं स्वच्छधीः पितृवत्सल ! ।
नाश्नाति त्वत्प्रसूः शून्यमिवास्ते त्वां विना गृहम् ॥५७॥

दूतः प्राह पुनर्धीमन् ! स्वजनान् विरहस्तव ।
शरदादित्यवद् बाढं तापयत्युष्णतापतः ॥५८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सद्यस्तत्र त्वमागत्य कारुण्यैकनिधे ! ततः ।
उपशामय तत्तापं पुष्करावर्तमेघवत् ॥५९॥

ततः स **पुण्यसारो**ऽथ पितुरामन्त्रणं निजम् ।
श्रेष्ठिनः **कामदेवस्य** दूतेनाचीकथल्लघु ॥६०॥

तच्च श्रुतिकटु श्रुत्वा श्रेष्ठ्यसौ विव्यथेतराम् ।
इष्टप्रस्थानकालोक्तेः कस्याधिर्न भवेन्ननु ? ॥६१॥

रत्नखचितानि हैमाभरणानि सुनिर्मितानि विविधानि ।
वासांसि दुकूलानि च तेभ्यः स तु यौतकानि ददौ ॥६२॥

ततः प्रातिष्ठपच्छ्रेष्ठी स सत्कृत्य सुतापतिम् ।
अशिक्षयदिदं सम्यगऽभिष्टास्ताश्च नन्दिनीः ॥६३॥

"स्वप्रिये तात्त्विकी प्रीतिर्भक्तिः श्वशुरयोस्तथा ।
ननान्दरि विनीतत्वं स्नेहवृद्धि कुटुम्बके ॥६४॥

देव-गुर्वादिषूपास्तिः कुकर्मविरतिः सदा ।
दानादिषु रतिः क्षान्तिर्मार्दवं चाऽर्जवं पुनः ॥६५॥

त्रपा प्रियोक्तिः सर्वेषु सपत्नीष्वऽप्यदुष्टता ।
प्रवर्तितव्यमेतासु शिक्षास्वेव सुपुत्रिकाः ! ॥६६॥

एवं कुलवधूधर्मं विदधाना यथाविधि ।
पुत्र्यो भवित्र्यः शर्मिण्यः कीर्त्तिं चाऽप्यथ निर्मलाम्" ॥६७॥ चतुर्भिः कुलकम्

जामातरं मुत्कलाप्य कियद् दूरं तु सप्रियम् ।
प्रियंवदं ततः श्रेष्ठी न्यवर्तिष्ट कथञ्चन ॥६८॥

पुण्यसारः स्वकान्तास्ताः स्वपित्रादिवियोगिनीः ।
तत्तत्कथाविनोदेन प्रतस्थे प्रीणयन् पथि ॥६९॥

क्रमशः स **पुण्यसारः** सपरिकरः परिसरं पुरः ।
प्राप **गोपा**चलस्य मातापित्रोर्मुखदर्शनोत्कण्ठः ॥७०॥

श्रेष्ठिना **धनसारेण** महोत्सवपुरःसरम् ।
सुतः स्वसद्मन्यानिन्येऽगण्यनैपुण्यबन्धुरः ॥७१॥

मातुः क्रमं ववन्दे स तं साऽप्यालिङ्ग्य निर्भरम् ।
अभ्यनन्ददमन्दोद्यदानन्दस्रवदश्रुका ॥७२॥

Jain Education International 2010_02   For Private & Personal Use Only   www.jainelibrary.org

बह्वहर्विरहोत्तप्तं शश्वत् सिञ्चन् कुटम्बकम् ।
अकृत्रिमप्रेमरसैः स तस्थौ सुखमाश्रितः ॥७३॥

अन्यदा तत्पुरोद्याने केवली मुनिपुङ्गवः ।
साधुभिः साधुभिर्युक्तो बहुभिः समवासरत् ॥७४॥

तदाऽगुर्धार्मिकाः पौरास्तं विवन्दिषवो भृशम् ।
धनसारः सपुत्रोऽपि तत्र तं नन्तुमागमत् ॥७५॥

ततः सुधामुचा वाचा श्रीगुरुर्धर्मदेशनाम् ।
प्रारब्धवान् भवाम्भोधेस्तारिर्णीं सुखकारिणीम् ॥७६॥

व्याख्यान्ते श्रीगुरुं नत्वा **पुण्यसारो** व्यजिज्ञपत् ।
संयोजितकराम्भोजो भक्त्याऽवनतमस्तकः ॥७७॥

भदन्त ! केन पुण्येन दिव्यसाहाय्यतो ह्यहम् ।
समं प्रभूतया लक्ष्म्या पर्यणैषं प्रियाष्टकम् ॥७८॥

भगवानाह भो भद्र ! **भद्रकापुरि** भद्रकः ।
भानुभूपोद्भवो **भीमा**भिधोऽभूत् प्राग्भवे भवान् ॥७९॥

सकर्णो धर्ममाकर्ण्य जीर्णतार्णकुटीमिव ।
जहौ गेहं स निर्वेदात् करिकर्णचलां श्रियम् ॥८०॥

प्रव्रज्य तद्गुरोः पार्श्वे द्विधा शिक्षासु शिक्षितः ।
चारित्रमाचचारोच्चैः स वैराग्यतरङ्गितः ॥८१॥

अष्टप्रवचनमातृषु यतमानो निर्जितेन्द्रियग्रामः ।
दुर्जयभावारिजयी जातः स जगत्त्रये ख्यातः ॥८२॥

प्रवचनमातृभिरष्टनिशं शुशुभेतरां स माहात्म्यात् ।
परमेष्ठिनमस्कारसम्पद्भिरिवाष्टभिः शुद्धः ॥८३॥

एवं स **भीम**साधुर्विधिनाऽऽराध्य त्रिधा विशुद्ध्या ताः ।
प्रान्ते चाराधनया समाधिनाऽध्यास्त **सौधर्मम्** ॥८४॥

तत्र दिव्यसुखं भुक्त्वा च्युत्वा श्रेष्ठिकुलेऽमले ।
पुण्यानुभावतः पुण्यसारोऽत्र त्वमऽवातरः ॥८५॥

अष्टप्रवचनमात्राराधनसंशुद्धधर्मसाधनतः ।
युगपत् त्वमष्ट कन्याः सम्पदुपेताः परिणिनीषे ॥८६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

स निशम्य गुरोर्वाक्यमीहापोहान्मुमूर्छ च ।
जाते क्षणाच्च चैतन्ये स्वीयां प्राग्जातिमस्मरत् ॥८७॥

गुरूदितं तथाभूतं दृष्ट्वा हृष्टोऽतिविस्मितः ।
स उवाचोचितं पुण्यं प्रसद्यादिश मे प्रभो ! ॥८८॥

"केवल्याह भवे चातुर्गतिके जन्तवोऽखिलाः ।
एहिरेयाहिरां चक्रुररघट्टघटीनिभाः ॥८९॥

मनुष्यत्वादिसामग्रीमवाप्यात्महिते कुधीः ।
यः प्रमाद्यति पीयूषपाने स ह्यलसायते" ॥९०॥

ततः प्रबुद्धः पुण्यात्मा **पुण्यसारः** प्रमोदभाक् ।
संवेगतस्तस्य गुरोः पादान्ते व्रतमाददे ॥९१॥

स शिक्षाद्वयनिष्णातः सत्तपःशेषिताङ्गकः ।
शुद्धं चरणमाचर्य प्रान्ते चासेदिवान् दिवम् ॥९२॥

ततश्च्युतो विदेहेषु नृत्वं प्राप्यार्यवंशजम् ।
दीक्षया केवलं लब्ध्वा स गमिष्यति निर्वृतिम् ॥९३॥

एवं श्री**पुण्यसारः** प्रवचनजननीसम्यगाराधनेन,
सोऽध्यास्ताध्यात्मशुद्धो दलितकलिमलांशो यथा सिद्धिसौधम् ।
एतासूच्चैर्यतध्वं सुविहतयतयो भोस्तथा संयमश्री-
जुष्टा येनाऽक्षयं तत् परमपदसुखं यूयमप्याश्रयध्वम् ॥९४॥

इति अष्टप्रवचनमात्राराधनफले **पुण्यसार**कथा ॥२७॥ ग्रं० २६०॥

इति श्रीकमलसंयमोपाध्यायविरचितायां सर्वार्थसिद्धौ श्रीउत्तराध्ययनटीकायां चतुर्विंशं प्रवचनमात्रीयमध्ययनं समाप्तम् ॥२४॥

• • •

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पञ्चविंशं यज्ञीयाध्ययनम्

अनन्तराध्ययने प्रवचनमातर उक्तास्ताश्च ब्रह्मगुणस्थितस्यैव स्युरिति **जयघोष**चरित-वर्णनाद्वारेण ब्रह्मगुणाविधायकं पञ्चविंशमध्यनमारभ्यते । **जयघोष**चरितं च यथा—

वाराणसीनगर्यां जज्ञाते युग्मिनौ द्विजौ द्वौ तु ।
जयघोष-विजयघोषाभिधानकौ बान्धवौ प्रीतौ ॥१॥

अन्यदा **जयघोष**स्तु स्नातुं **सुरनदीं** गतः ।
तत्र प्रैक्षिष्ट सर्पेण गृहीतं दुर्दरं जवात् ॥२॥

मार्जारेण च सर्पोऽपि समाक्रान्तो हठादपि ।
तथाप्यहिस्तु मण्डूकं चीत्कुर्वाणं स खादति ॥३॥

मार्जारोऽपि च तं सर्पं तडत्फडन्तं तु खादितुं लग्नः ।
मिथ एवं ग्रसमानान् दृष्ट्वासौ दध्यिवान् जीवान् ॥४॥

अहो ! ह्यसारता नूनं संसारस्याप्यनित्यता ।
यो यं प्रभवितुं शक्तः स तकं ग्रसतेतराम् ॥५॥

कृतान्तः पुनरत्युच्चैर्ग्रसितुं प्रभविष्णुकः ।
विश्वं विश्वमतो धर्मो रक्षको ह्यस्त्यपायतः ॥६॥

ध्यात्वेति प्रतिबुद्धोऽसौ **जयघोष**द्विजोत्तमः ।
गङ्गामुत्तीर्य संवेगात् साधुपार्श्वे व्रतं ललौ ॥७॥

शेषचरितं सूत्रकृदेवाह—

माहणकुलसंभूओ आसि विप्पो महायसो ।
जायाई जमजन्नंमि जयघोसि त्ति नामओ ॥१॥

इंदियगामनिग्गाही मग्गगामी महामुणी ।
गामाणुगामं रीयंते पत्ते वाणारसिं पुरिं ॥२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

वाणारसीइ बहिया उज्जाणंमि मणोरमे ।
फासुए सिज्जसंथारे तत्थ वासमुवागए ॥३॥

आसां व्याख्या—ब्राह्मणकुलसम्भूत आसीदभूत्, ईदृशोऽपि जननीजात्यन्यथात्वे ब्राह्मणो न स्यादत आह **विप्रो** द्विजन्मा **महायशा** विख्यात इत्यर्थः । 'जायाई'त्ति **यायाजी**—अत्यर्थं यागकर्ता, क्व ? इत्याह—**यमाः** पञ्च प्राणातिपातविरत्यादिरूपास्त एव **यज्ञो** भावपूजात्मकत्वाद् भावयज्ञ**स्तस्मिन्,** हिंसात्मकं द्रव्ययज्ञं परित्यज्य महाव्रतात्मकभावयज्ञसुस्थित इत्यर्थो **जयघोष इति नामकः** ॥ स च कीदृशः किं कृतवान् ? इत्याह—'इंदिय'त्ति इन्द्रियग्रामं निगृह्णाति स्वस्वविषयनिवर्तनेन नियमयतीत्येवंशील **इन्द्रियग्रामनिग्राही मार्गगामी** मुक्तिपथयायी **महामुनिर्ग्रामानुग्रामं** 'रीयंत' त्ति **रीयमाणो** विहरन् **प्राप्तो वाराणसीं नगरीम्** ॥ ततश्च **वाराणस्या बहिर्यदुद्यानं मनोरमं तस्मिन् प्रासुके शय्यायां** वसतौ **संस्तारकः** शिलादिर्यत्र तादृशे **तत्र वासम**वस्थान**मुपागत** इति गाथात्रयार्थः ॥१-२-३॥

इतश्च—

अह तेणेव कालेणं पुरीए तत्थ माहणे ।
विजयघोसि त्ति नामेणं जन्नं जयइ वेयवी ॥४॥

व्याख्या—अथ 'सुब्व्यत्ययात्' **तस्मिन्नेव काले पुर्यां तत्र ब्राह्मणो विजयघोष इति नाम्ना जयघोष**भ्रातेत्यर्थः **यज्ञं** द्रव्ययज्ञं **यजति वेदवित्** ॥४॥

अह से तत्थ अणगारे मासक्खमणपारणे ।
विजयघोसस्स जन्नंमि भिक्खमट्ठा उवट्ठिए ॥५॥

व्याख्या—अथ 'से' इति **स जयघोषोऽनगारस्तत्र यागे** 'मकारस्यालाक्षणिकत्वाद्, दीर्घश्च प्राकृतत्वात्' **भिक्षार्थमुपस्थितः** प्राप्तः । शेषं स्पष्टम् ॥५॥

तदा च याजकः किं कृतवान् ? इत्याह—

समुवट्ठियं तहिं संतं जायगो पडिसेहए ।
न हु दाहामि ते भिक्खं भिक्खू ! जायाहि अन्नओ ॥६॥

व्याख्या—समुपस्थितमुपागतं भिक्षार्थं 'तहिं संतं' ति **तत्र सन्तं जयघोषमुनिं याजको** यागकारको **विजयघोषो** विप्रः **प्रतिषेधति** निराकुरुते । यथा 'न हु' **नैव दास्यामि** 'ते' **तुभ्यं भिक्षां भिक्षो !** 'जायाहि' त्ति **याचस्वान्यतो**ऽस्मद्व्यतिरिक्तात् ॥६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

किम् ? इत्यत आह—

जे य वेयविऊ विप्पा जन्नट्ठा य जे दिया ।
जोइसंगविऊ जे य जे य धम्माण पारगा ॥७॥

व्याख्या—ये च वेदविदो विप्रा जातितः, **यज्ञार्थाश्च** यज्ञप्रयोजना ये तत्र व्याप्रियन्ते **ये द्विजाः** संस्कारतो द्विजन्मानः । ज्योतिषं ज्योतिःशास्त्रमङ्गानि शिक्षादीनि तानि विदन्तीति **ज्योतिषाङ्गविदो ये,** ज्योतिषोऽप्यङ्गत्वे यत् पृथगुपादानं तद् विप्रेषु तत्प्राधान्यख्यापनार्थम् । **ये च धर्माणामर्था**द् धर्मशास्त्राणां **पारगाः,** चतुर्दशविद्यास्थानानां पारगामिन इत्यर्थः ॥७॥

जे समत्था समुद्धत्तुं परमप्पाणं एव य ।
तेसिं अन्नमिणं देयं भो भिक्खू ! सव्वकामियं ॥८॥

व्याख्या—ये समर्थाः समुद्धर्तुं 'भवाम्भोधेरिति गम्यते' **परमन्यमात्मानमपि च** 'तेसिं' ति 'सुब्व्यत्ययात्' **तेभ्यो** द्विजेभ्यो **देयं** दातव्य**मन्नमिदं भो भिक्षो ! सर्वकामिकं** षड्रसोपेतमित्यर्थः ॥८॥

स साधुः किं कृतवान् ?—

सो तत्थ एव पडिसिद्धो जायगेण महामुणी ।
न वि रुट्ठो न वि तुट्ठो उत्तमट्ठगवेसओ ॥९॥

व्याख्या—स जयघोषमुनिस्तत्र यज्ञे एवं **प्रतिषिद्धो याजकेन** यागकर्त्रा **विजयघोष**विप्रेण **महामुनिर्नापि रुष्टो नापि तुष्टः** 'किन्तु समतया स्थित इति भावः' यतोऽसौ **उत्तमार्थो** मोक्षस्त**द्गवेषको** मुक्तिं विनाऽन्यत्र निःस्पृह इत्यर्थः ॥९॥

नन्नट्ठं पाणहेउं वा न वि निव्वाहणाय वा ।
तेसिं विमोक्खणट्ठाए इमं वयणमब्बवी ॥१०॥

व्याख्या—न नैवाऽन्नार्थं, **नापि पानहेतुं वा, नापि निर्वाहणाय वा** वस्त्र—तैलाभ्यङ्गादिना यापनार्थं 'सर्वत्रात्मन इति गम्यते' तर्हि किमर्थम् ? इत्याह—**तेषां** याज्ञिकानां **विमोक्षणार्थाय** यथा कथममी मुक्तिमाप्नुयुरित्यर्थ**मिदं** वक्ष्यमाणं **वचनमब्रवी**दिति ॥१०॥

तदेवाह—

न वि जाणसि वेयमुहं न वि जन्नाण जं मुहं ।
नक्खत्ताण मुहं जं च जं च धम्माण वा मुहं ॥११॥

व्याख्या—अपेरेवार्थत्वान्**नैव जानासि वेदानां** मुखमिव **मुखं यत्** तेषु प्रधानम् । **नापि यज्ञानां मुखमु**पायः । **नक्षत्राणां मुखं** प्रधानं **यच्च धर्माणां मुख**मुपायस्तदनेन तस्य वेदाद्यनभिज्ञत्वमुक्तम् ॥११॥

पात्रानभिज्ञत्वमाह—

जे समत्था समुद्धत्तुं परं अप्पाणमेव य ।
न ते तुमं वियाणासि अह जाणसि तो भण ॥१२॥

व्याख्या—ये समर्थाः समुद्धर्तुं परमात्मानमेव च न तांस्त्वं विशेषेण जानासि । अथ जानासि ततो भणेत्याक्षेप उक्तः ॥१२॥

एवमाक्षिप्ते मुनौ स किं कृतवान् ? इत्याह—

तस्सक्खेवपमोक्खं च अचयंतो तहिं दिओ ।
सपरिसो पंजलिहोउं पुच्छई तं महामुणिं ॥१३॥

व्याख्या—तस्य जयघोषमुनेरा**क्षेपः** प्रश्नस्**तस्य प्रमोक्षः** प्रत्युत्तरं '**चः** पूरणे' 'अचयंतो' त्ति **अशक्नुवन्** 'दातुमिति गम्यते' **तस्मिन्** यज्ञे **द्विजः सपरिषत्** सभान्वितः **प्राञ्जलि**र्योजितकरसम्पुटो **भूत्वा पृच्छति तं महामुनिम्** ॥१३॥

किं पृष्टवान् ? इत्याह—

वेयाणं च मुहं बूहि बूहि जन्नाण जं मुहं ।
नक्खत्ताण मुहं बूहि बूहि धम्माण वा मुहं ॥१४॥

व्याख्या—वेदानां च मुखमङ्ग **ब्रूहि** व्यक्तमभिधेहि, **ब्रूहि** कथय **यज्ञानां यन्मुखं, नक्षत्राणां मुखं ब्रूहि, ब्रूहि धर्माणां वा मुखं** । पुनः पुनर्ब्रूहीति कथनमत्यादर-ख्यापनार्थम् ॥१४॥

जे समत्था समुद्धत्तुं परमप्पाणमेव य ।
एयं मे संसयं सव्वं साहू ! कहसु पुच्छिओ ॥१५॥

व्याख्या—गतार्था नवरमेतदुक्तरूपं मे **मम** संशयं वेदमुखादि **हे साधो ! कथय** पृष्टः सन् ॥१५॥

एवं पृष्टो मुनिराह—

अग्गिहोत्तमुहा वेया जन्नट्ठी वेयसां मुहं ।
नक्खत्ताण मुहं चंदो धम्माणं कासवो मुहं ॥१६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—अग्निहोत्रमग्निकारिका सा चेह—

"कर्मेन्धनं समाश्रित्य दृढा सद्भावनाहुतिः ।
धर्मध्यानाग्निना कार्या दीक्षितेनाग्निकारिका" ॥१॥

इत्यादिरूपा परिगृह्यते । तदेव मुखं प्रधानं येषां तेऽ**ग्निहोत्रमुखा वेदाः** । वेदानां हि दध्यादेरिव नवनीतमारण्यकमेव प्रधानम् । उक्तं च—

"नवनीतं यथा दध्नश्चन्दनं मलयादिव ।
औषधिभ्योऽमृतं यद्वद् वेदेष्वारण्यकं तथा" ॥१॥

तत्र च—

"सत्यं तपश्च सन्तोषः क्षमा चारित्रमार्जवम् ।
श्रद्धा धृतिरहिंसा च संवरश्च तथा परः" ॥२॥

इति दशप्रकारधर्मोऽग्निहोत्रं, तथा **यज्ञः** प्रस्तावाद् भावयज्ञः संयमरूपस्त**दर्थी** 'वेयस' त्ति वेदेन हेतुना अस्यन्ति क्षिपन्त्यऽशुभकर्माणीति निरुक्त्या **वेदसो** भावयागस्**तेषां मुख-मु**पायस्ते हि सत्येव यज्ञार्थिनि प्रवर्तन्ते, भावयागानां भावयागार्थी मुनिरेव मुखमित्यर्थः । **नक्षत्राणां मुखं** प्रधानं **चन्द्र**स्तस्यैव तदधिपतित्वात् । **धर्माणां काश्यपो** भगवान् **ऋषभदेवो मुख**मुपायस्तस्यैवादितस्तत्प्ररूपकत्वात्, तथा **चारण्यकम्**—**"ऋषभ एव भगवान् ब्रह्मा तेन भगवता ब्रह्मणा स्वयमेवाऽऽचीर्णानि प्रमीतानि ब्रह्माणि"** इत्यादि । किञ्च सकलपुराणमुख्यं **ब्रह्माण्डपुराणं** तत्राप्युक्तम्—**"इह हि इक्ष्वाकुकुलवंशोद्भवेन नाभिसुतेन मरुदेव्या नन्दनेन महादेवेन ऋषभेण दशप्रकारो धर्मः स्वयमेव चीर्णः केवल-ज्ञानलम्भाच्च निर्ग्रन्थादिमहर्षीणां प्रणीतस्त्रेतायामादौ"** इत्याह ॥१६॥

काश्यपस्यैव महात्म्यख्यापनतो धर्ममुखत्वमाह—

जहा चंदं गहाईया चिट्ठंती पंजलीउडा ।
वंदमाणा नमंसंता उत्तमं मणहारिणो ॥१७॥

व्याख्या—यथा चन्द्रं ग्रहादिकाः 'आदिशब्दान्नक्षत्रादिग्रहः' **प्राञ्जलयो** योजितकर**सम्पुटा वन्दमानाः** स्तुवन्तो **नमस्यन्तो** नमस्कुर्वन्त **उत्तमं** प्रधानं 'मणहारिणो' त्ति **मनोहारिणो** विनीततया प्रभुचित्ताक्षेपकारिणस्तिष्ठन्तीति सम्बन्धः 'तथैनमपि भगवन्तं देवेन्द्रप्रमुखा इत्युपस्कारः' ॥१७॥

चतुःप्रश्नोत्तरमभिधाय पञ्चममाह—

अजाणगा जन्नवाई विज्जामाहणसंपया ।
गूढा सज्झायतवसा भासच्छन्ना इवग्गिणो ॥१८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या–अज्ञा न तत्त्ववेदिनः के ते ? **यज्ञवादिनो** ये भवतः पात्रत्वेनाभिमताः। कासाम् ? इत्याह 'विज्जामाहणसंपय' त्ति 'सूत्रत्वात् सुब्व्यत्ययः' **विद्याब्राह्मणसम्पदां** विद्या**श्चारण्यकब्रह्माण्डपुराणा**ख्यधर्मशास्त्रात्मिकास्ता एव ब्राह्मणसम्पदस्तासां, तात्त्विक-ब्राह्मणानां हि निष्किञ्चनत्वेन विद्या एव सम्पदस्तद्विज्ञत्वे च कथमेते **बृहदारण्यकाद्युक्त**-दशविधधर्मवेदिनो द्रव्ययागमेवं कुर्युः । तथा **गूढा** बहिः संवृतिमन्तः **स्वाध्यायतपसा** वेदाध्ययनोपवासादिना **भस्मच्छन्ना अग्नय इव** बहिः शान्ता इवाभान्त्यन्तश्च कषायवत्तया ज्वलन्ति । एवं च न तत्त्वतो भवदभिमतं ब्राह्मण्यं तदभावाच्चात्मपरोद्धरणेन पात्रत्वं दूरापास्तमेवेति भावः ॥१८॥

तर्हि कस्य ब्राह्मणस्य पात्रत्वम् ? इत्याह–

जो लोए बंभणो वुत्तो अग्गी वा महिओ जहा ।
सया कुसलसंदिट्ठं तं वयं बूम माहणं ॥१९॥

व्याख्या–यो लोके ब्राह्मण उक्तः 'कुशलैरिति गम्यते' '**वे**ति पूरणे' 'यथेत्यौपम्ये भिन्नक्रमश्च' । ततो **यथाऽग्निः** 'यत्–तदोर्नित्याभिसम्बन्धात्' तथा **महितः** सन्, **सदा** कुशलैस्तत्त्वाभिज्ञैः सन्दिष्टः कथितः **कुशलसन्दिष्टस्तं, तं वयं ब्रूम ब्राह्मणम्**। यदेव हि लोके विज्ञोपदिष्टं तदेव वस्त्वङ्गीकारार्हमिति भावः ॥१९॥

कुशलसन्दिष्टस्वरूपब्राह्मणमाह–

जो न सज्जइ आगंतुं पव्वयंतो न सोयई ।
रमए अज्जवयणंमि तं वयं बूम माहणं ॥२०॥

व्याख्या–यो न स्वजते नाभिष्वङ्गं करोति **आगन्तुं** प्राप्तुं 'स्वजनादिस्थानमिति गम्यते' । आगतो वा तत एव **प्रव्रजन्** स्थानान्तरं गच्छन्न **शोचते** यथा–कथमहममुना विना भविष्यामि ? अत एव **रमते आर्याणाम**र्हतां **वचनमागमस्तस्मिन्**। को भावः ? सर्वत्र निःस्पृहत्वेनागमोक्तानुष्ठान एव रतिमान् भवति **तं वयं ब्रूमो ब्राह्मणम्** ॥२०॥

तथा–

जायरूवं जहामट्ठं निद्धंतमलपावगं ।
राग-द्दोस-भयाईयं तं वयं बूम माहणं ॥२१॥

व्याख्या–जातरूपं स्वर्णं 'जहामट्ठं' ति '**यथे**त्यौपम्ये' **आमृष्टं** तेजः प्रकर्षारोपणाय मनःशैलादिना परामृष्टं, अनेनाऽस्य बाह्यो गुण उक्तः । 'निद्धंत' त्ति 'सूत्रत्वात् पदव्यत्यये' पावकेन वह्निना निर्ध्मातं दग्धं मलं किट्टमस्येति **पावक**-

Jain Education International 2010_02   For Private & Personal Use Only   www.jainelibrary.org

निर्ध्मातमलमित्यनेन चाऽन्तरस्ततो जातरूपवद् बाह्याभ्यन्तरगुणान्वितोऽत एव **राग-द्वेष-भयातीतश्च यस्तं वयं ब्रूमो ब्राह्मणम्** ॥२१॥

किञ्च—

तसपाणे वियाणित्ता संगहेण य थावरे ।
जो न हिंसइ तिविहेणं तं वयं बूम माहणं ॥२२॥

व्याख्या—त्रसप्राणिनो विज्ञाय सङ्ग्रहेण सङ्क्षेपेण '**च**शब्दाद् विस्तरेण च' तथा **स्थावरान् यो न हिनस्ति** न व्यापादयति **त्रिविधेन** 'मनो-वाक्-काययोगेनेति गम्यम्' **तं वयं ब्रूमो ब्राह्मणम्** । यदुक्त**मारण्यके—**

"यदा न कुरुते पापं सर्वभूतेषु दारुणम् ।
कर्मणा मनसा वाचा ब्रह्म सम्पद्यते तदा" ॥१॥ ॥२२॥

तथा—

कोहा वा जइ वा हासा लोभा वा जइ वा भया ।
मुसं न वयई जो उ तं वयं बूम माहणं ॥२३॥

व्याख्या—क्रोधादिभ्यो मृषा न वदति यस्तं वयं ब्रूमो ब्राह्मणमिति । इह च मानस्य क्रोधो मायायाश्च लोभ उपलक्षणं प्रायस्तत्सहचरितत्वात् तयोः । इदम**प्यारण्यके**-ऽभिहितम्—

"यदा सर्वानृतत्यक्तं मिथ्याभाषाविवर्जितम् ।
अनवद्यं च भाषेत ब्रह्म सम्पद्यते तदा" ॥१॥ ॥२३॥

तथा—

चित्तमंतमचित्तं वा अप्पं वा जइ वा बहुं ।
न गिण्हइ अदत्तं जो तं वयं बूम माहणं ॥२४॥

व्याख्या—चित्तवद् द्विपदादि, **अचित्तं वा** सुवर्णादि, **अल्पं वा** सङ्ख्यया प्रमाणेन च स्तोकं **यदि वा बहु** ताभ्यामेव प्रचुरं न **गृह्णात्यऽदत्तं यस्तं वयं ब्रूमो ब्राह्मणम्** । इदमप्युक्त**मारण्यके—**

"परद्रव्यं यदा दृष्ट्वा आकुले ह्यथवा रहे ।
धर्मकामो न गृह्णाति ब्रह्म सम्पद्यते तदा" ॥१॥ ॥२४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तथा—

दिव्व-माणुस्स-तेरिच्छं जो न सेवइ मेहुणं ।
मणसा काय-वक्केणं तं वयं बूम माहणं ॥२५॥

व्याख्या—दिव्यविषयत्वाद् दिव्यं, मानुषं, तैरश्चम् 'एषां द्वन्द्वे' **दिव्य-मानुष-तैरश्चं यो न सेवेत मैथुनं मनः-काय-वाक्यैस्तं वयं ब्रूमो ब्राह्मणम्** । तथोक्तम्—

"देव-मानुष-तिर्यक्षु मैथुनं वर्जयेद् यदा ।
कामरागविरक्तश्च ब्रह्म सम्पद्यते तदा" ॥१॥ ॥२५॥

अपि च—

जहा पोमं जले जायं नोवलिप्पइ वारिणा ।
एवं अलित्तो कामेहिं तं वयं बूम माहणं ॥२६॥

व्याख्या—यथा पद्मं कमलं **जले जातमुत्पन्नं** तत्परित्यागेनोपरि व्यवस्थानतोऽपि **नोपलिप्यते** न श्लिष्यति **वारिणा** जलेन । **एवं** पद्मव**दलिप्तो**ऽश्लिष्टः **कामै**रेव शब्दादिभिस्तन्मध्योत्पन्नोऽपि तैरेव वृद्धिं नीतोऽपि **यस्तं वयं ब्रूमो ब्राह्मणम्** । तथा च तत्रोक्तम्—

"यदा सर्वं परित्यज्य निःसङ्गो निष्परिग्रहः ।
निश्चिन्तश्च चरेद् धर्मं ब्रह्म सम्पद्यते तदा" ॥१॥ ॥२६॥

इत्थं मूलगुणयोगात् तात्त्विकं ब्राह्मणमुक्त्वोत्तरगुणयोगतस्तमाह—

अलोलुयं मुहाजीवी अणगारं अकिंचणं ।
असंसत्तं गिहत्थेसु तं वयं बूम माहणं ॥२७॥

व्याख्या—अलोलुपमाहारादिष्वलम्पटं 'सुब्व्यत्ययात्' **मुधाजीविनम**ज्ञातोञ्छवृत्ति**मनगारमकिञ्चनमसंसक्तम**सम्बद्धं कैः ? **गृहस्थैः** 'तृतीयाऽर्थे सप्तमी' **तमे**वंविधमपि **वयं ब्रूमो ब्राह्मणम्** ॥२७॥

क्वचिदत्र पाठान्तरम्—

जहित्ता पुव्वसंजोगं नाइसंगे य बंधवे ।
जो न सज्जइ एएसु तं वयं बूम माहणं ॥२८॥

व्याख्या—त्यक्त्वा पूर्वसयोगं मात्रादिसम्बन्धं **ज्ञातिसंयोगान्** स्वस्रादिसम्बन्धांश्च तथा **बान्धवांश्च यो न सजति** नाभिष्वङ्गं करोति **यस्तमि**त्यादि स्पष्टम् । अनेन चातिनिःस्पृहतोक्तोत्तरगुणा अप्याक्षिप्ताः ॥२८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

वेदाध्ययन-यागादिकृतः पात्रत्व-ब्राह्मणत्वनिषेधमाह—

पसुबंधा सव्ववेया जट्ठं च पावकम्मुणा ।
न तं तायंति दुस्सीलं कम्माणि बलवंतिह ॥२९॥

व्याख्या—पशूनां छागानां बन्धो विनाशाय नियमनं यैर्हेतुभिस्तेऽमी **पशुबन्धाः** '**श्वेतं छागमालभेत वायव्यां भूतिकामः**' इत्यादिवाक्योपलक्षिताः, न तु ये '**आत्मा रे ज्ञातव्यो मन्तव्यो निदिध्यासितव्यः**' इत्यादिवाक्योपलक्षिताः । **सर्ववेदा ऋग्वेदादयः** 'जट्ठं' त्ति **इष्टं** यजनं '**चः** समुच्चये' **पापकर्मणा** पापहेतुभूतपशुबन्धाद्यनुष्ठानेन । **न** नैव **तं** वेदाध्यातारं यष्टारं वा **त्रायन्ते** रक्षन्ति 'भवादिति गम्यम्' । किं विशिष्टं ? **दुःशीलं** ताभ्यामेव हिंसादिप्रवर्तनेन दुराचारं यतः **कर्माणि बलवन्ति** दुर्गतिनयनं प्रति समर्था**नीह** भवदागमाभिहिते वेदाध्ययने यजने च 'भवन्तीति गम्यते' पशुबधप्रवर्तकत्वेन तयोः कर्मपोषकत्वादिति भावः । ततो नैतद्योगात् पात्रभूतो ब्राह्मणः किन्तु पूर्वोक्तगुण एवेति भावः ॥२९॥

किञ्च—

न वि मुंडिएण समणो न ॐकारेण बंभणो ।
न मुणी रन्नवासेणं कुसचीरेण न तावसो ॥३०॥

व्याख्या—नापि मुण्डितेन स्वकेशापनयनेन समं मनोऽस्येति निरुक्त्या **श्रमणो** निर्ग्रन्थः । **न चोङ्कारेण** 'उपलक्षणत्वात् 'ॐभूर्भुवस्वः' इत्याद्युच्चारणरूपेण **ब्राह्मणः** । तथा **न मुनिररण्यवासेन** । कुशो दर्भविशेषस्तन्मयं चीवरं **कुशचीवरं** 'वल्कलोपलक्षणमेतत्' **तेन न तापसो** 'भवतीति सर्वत्र योज्यम्' ॥३०॥

तर्हि ते कथं भवन्ति ? इत्याह—

समयाए समणो होइ बंभचेरेण बंभणो ।
नाणेण य मुणी होइ तवेण होइ तावसो ॥३१॥

व्याख्या—समतया राग-द्वेषाभावरूपया **श्रमणो भवति** । ब्रह्मणश्चरणं **ब्रह्मचर्यं** ब्रह्म च द्विधा । यदुक्तम्—

"द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् ।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति" ॥१॥

इह च प्रागुक्तहिंसाविरत्यादिरूपं परं ब्रह्म गृह्यते, **तेन ब्राह्मणः** । ज्ञानेन हितावबोधरूपेण **मुनिः** । **तपसा** बाह्याभ्यन्तरभेदभिन्नेन **भवति तापसः** ॥३१॥

Jain Education International 2010_02　　For Private & Personal Use Only　　www.jainelibrary.org

तथा—

कम्मुणा बंभणो होइ कम्मुणा होइ खत्तिओ ।
वइसो कम्मुणा होइ सुद्दो हवइ कम्मुणा ॥३२॥

व्याख्या—कर्मणा क्रियया भवति **ब्राह्मणः** । उक्तं हि—

"क्षमा दानं दमो ध्यानं सत्यं शौचं धृतिर्घृणा ।
ज्ञान-विज्ञानमास्तिक्यमेतद् ब्राह्मणलक्षणम्" ॥१॥

कर्मणा क्षतत्राणलक्षणेन **क्षत्रियः** । **वैश्यः कर्मणा** कृषि—पशुपाल्यादिना भवति । **शूद्रो भवति कर्मणा** शौचनादिहेतुप्रैषादिसम्पादनरूपेण । कर्माभावे हि ब्राह्मणव्यपदेशोऽसद्रूप एव । ब्राह्मणप्रक्रमेऽपि शेषाभिधानं व्याप्तिदर्शनार्थम् ॥३२॥

सर्वज्ञोपज्ञतामाह—

एए पाउकरे बुद्धे जेहिं होइ सिणायओ ।
सव्वकम्मविणिम्मुक्कं तं वयं बूम माहणं ॥३३॥

व्याख्या—एताननन्तरोक्तानहिंसाद्यर्थान् प्रादुरकार्षीत् प्रकटितवान् **बुद्धो**ऽवगत-तत्त्वो **यैर्भवति स्नातकः** केवली **सर्वकर्मविनिर्मुक्तः** प्रत्यासन्नमुक्तितया 'सुब्व्यत्ययादत्र प्रथमाऽर्थे द्वितीया' तत्त्वतः स्नातकं **तमुक्तगुणं** वा **वयं ब्रूमो ब्राह्मणम्** ॥३३॥

उपसंहर्तुमाह—

एवं गुणसमाउत्ता जे भवंति दिउत्तमा ।
ते समत्था उ उद्धत्तुं परं अप्पाणमेव य ॥३४॥

व्याख्या—एवं पूर्वोक्तप्रकारेण **गुणैरहिंसाऽऽदिभिः समायुक्ताः** सहिता **ये भवन्ति द्विजोत्तमास्ते समर्था उद्धर्तुं** 'भवादिति गम्यम्' अर्थान्मुक्तिपदे व्यवस्थापयितुं **परमन्यमात्मानमेव चेति** ॥३४॥

इत्युक्त्वा स्थिते मुनौ—

एवं तु संसए छिन्ने विजयघोसे य माहणे ।
समुदाय तओ तं तु जयघोसं महामुणिं ॥३५॥

व्याख्या—एवं पूर्वोक्तप्रकारेण 'तुर्वाक्यान्तरोपन्यासे' **संशये छिन्ने**ऽपनीते **विजयघोषो** ब्राह्मणः 'समुदाय'त्ति 'आर्षत्वात्' **समादाय** सम्यग् गृहीत्वाबधार्येत्यर्थः । 'तओ' त्ति **ततः** संशयच्छेदानन्तरं 'तं तु' त्ति **तं जयघोषं महामुनिं** एष मम भ्राता एष एव महामुनिरित्यवधार्येत्यर्थः ॥३५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

किं कृतवान् ? इत्याह—

तुट्ठे य विजयघोसे इणमुदाहु कयंजली ।
माहणत्तं जहाभूयं सुट्ठु मे उवदंसियं ॥३६॥

व्याख्या—तुष्टः परितोषवान् '**चः पूरणे**' **विजयघोष** इदं वक्ष्यमाणं 'उदाहु' त्ति **उदाह** ब्रूते **कृताञ्जलिः** । तदेवाह—**ब्राह्मणत्वं यथाभूतं** यथाऽवस्थितं **सुष्ठु** शोभनं यथा स्यान्मे **ममोपदर्शितं** प्रकटितम् ॥३६॥

किञ्च—

तुब्भे जईया जन्नाणं तुब्भे वेयविऊ विऊ ।
जोइसंगविऊ तुब्भे तुब्भे धम्माण पारगा ॥३७॥

व्याख्या—यूयं 'जईय'त्ति **यष्टारो यज्ञानाम्** । **यूयं वेदविदो** वेदज्ञाः 'विऊ' त्ति **विद्वांसः** । **ज्योतिषाङ्गविदो यूयम्** । **यूयं धर्माणां** सदाचाराणां **पारगाः** । भवतामेव निर्वाहितसदाचारत्वादिति भावः ॥३७॥

तथा—

तुब्भे समत्था उद्धत्तुं परं अप्पाणमेव य ।
तमणुग्गहं करेह म्हं भिक्खेणं भिक्खुउत्तमा ! ॥३८॥

व्याख्या—यूयं समर्था उद्धर्तुं परमात्मानमेव च युष्माकमेव तात्त्विक-गुणोपेतत्वात् । 'तं'ति **तस्मादनुग्रहमुपकारं कुरुतास्माकं** 'भिक्खेणं'ति **भिक्षाग्रहणेन** हे **भिक्षूत्तम** यतिप्रधान ! ॥३८॥

मुनिराह—

न कज्जं मज्झ भिक्खेणं खिप्पं निक्खमसू दिया ! ।
मा भमिहिसि भयावत्ते घोरे संसारसागरे ॥३९॥

व्याख्या—न कार्यं न प्रयोजनं **मम भिक्षया,** किन्तु **क्षिप्रं** शीघ्रं **निष्क्राम** प्रव्रज **द्विज** ! भवन्निष्क्रमणेनैव मम कार्यमिति भावः । किम् ? इत्यत आह—**मा भ्रमिष्यसि** भयानीहलोकभयादीन्यावर्ता **यस्मिन् स** तथा तत्र तथाविधे **घोरे संसारसमुद्रे** ॥३९॥

उवलेवो होइ भोगेसु अभोगी नोवलिप्पई ।
भोगी भमइ संसारे अभोगी विप्पमुच्चई ॥४०॥

व्याख्या—उपलेपः कर्मोपचयरूपो **भवति भोगेषु** शब्दादिषु 'भुज्यमानेष्विति

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

गम्यते'। **अभोगी** शब्दादिभोगनिर्मुक्तौ **नोपलिप्यते** कर्मणोपदिह्यते। अत एव **भोगी भ्रमति संसारे। अभोगी विप्रमुच्यते** मुक्तिं प्राप्नोतीत्यर्थः ॥४०॥

एतदेव दृष्टान्तद्वारेणाह–

उल्लो सुक्को य दो छूढा गोलया मट्टियामया।
दो वि आवडिया कुड्डे जो उल्लो सो त्थ लग्गई ॥४१॥

व्याख्या–'उल्ल'त्ति आर्द्रः, शुष्कश्चानार्द्रो **द्वावुभौ** 'छुढ'त्ति **क्षिप्तौ गोलकौ** पिण्डौ **मृत्तिकामयौ द्वाप्यापतितौ** प्राप्तौ **कुड्ये** भित्तौ। ततः किम्? इत्याह आह–**य आर्द्रः सोऽत्रेत्यनयोर्द्वयोर्मध्ये लगति** शिलष्यति 'प्रक्रमात् कुड्ये' ॥४१॥

दार्ष्टान्तिकयोजनामाह–

एवं लग्गंति दुम्मेहा जे नरा कामलालसा।
विरत्ता उ न लग्गंति जहा से सुक्कगोलए ॥४२॥

व्याख्या–एवं लगन्ति 'प्रस्तावात् कर्मणा' **दुर्मेधसो** दुर्बुद्धयो **ये नराः कामलालसा** विषयलम्पटाः, **विरक्तास्तु** पुनः कामभोगपराङ्मुखा **न लगन्ति** न कर्मणा शिलष्यन्ते **यथा शुष्को गोलक** इति ॥४२॥

इत्थमुक्तो यदसौ कृतवांस्तदाह–

एवं सो विजयघोसो जयघोसस्स अंतिए।
अणगारस्स निक्खंतो धम्मं सोच्चा अणुत्तरं ॥४३॥

व्याख्या–एवं स विजयघोषो ब्राह्मणो **जयघोषस्यान्तिके** समीपे **अनगारस्य** यते**र्निष्क्रान्तः** प्रव्रजितो **धर्म**महिंसादिरूपं **श्रुत्वा अनुत्तरं** प्रधानम् ॥४३॥

अध्ययनार्थोपसंहारेणानयोर्निष्क्रमणफलमाह–

खवित्ता पुव्वकम्माइं संजमेण तवेण य।
जयघोस-विजयघोसा सिद्धिं पत्ता अणुत्तरं ॥४४॥ त्ति बेमि॥

व्याख्या–क्षपयित्वा पूर्वकर्माणि संयमेन तपसा च जयघोष–विजयघोषौ सिद्धिं प्राप्तावनुत्तरमिति ब्रवीमीति पूर्ववत् ॥४४॥

इति श्रीकमलसंयमोपाध्यायविरचितायां सर्वार्थसिद्धौ श्रीउत्तराध्ययनटीकायां पञ्चविंशं यज्ञीयमध्ययनं समाप्तम् ॥२५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

षड्विंशं सामाचार्याख्यमध्ययनम्

प्रागध्ययने ब्रह्मगुणा उक्तास्तद्वांश्च यतिरेव । तेन चावश्यं सामाचारी कार्येति तदभिधायकं षड्विंशमध्ययनमारभ्यते । तस्यादिमां गाथामाह—

सामायारिं पव्वक्खामि सव्वदुक्खविमोक्खणिं ।
जं चरित्ता ण निग्गंथा तिन्ना संसारसागरं ॥१॥

व्याख्या—सामाचारीं यतीतिकर्तव्यतारूपां **प्रवक्ष्यामि** खयिष्यामि । किं लक्षणां ? **सर्वदुःखविमोक्षिणीं** शारीर—मानसानां सर्वदुःखानां विशेषेण मोचनीयां दूरीकरणयोग्यामत एव **यां** सामाचारीं **चरित्वासेव्य 'णमित्यलङ्कारे' निर्ग्रन्था** बाह्याभ्यन्तरभेदभिन्नग्रन्थान् छेत्तारः साधवः **संसारसागरं** भवसमुद्रं **तीर्णा** मुक्तिं प्राप्ता इत्यर्थः 'उपलक्षणत्वात् तरन्ति तरिष्यन्ति चेति' ॥१॥

पढमा आवस्सिया नामं बिइया य निसीहिया ।
आपुच्छणा य तइया चउत्थी पडिपुच्छणा ॥२॥

पंचमा छंदणा नाम इच्छाकारो य छट्ठओ ।
सत्तमो मिच्छकारो य तहक्कारो य अट्ठमो ॥३॥

अब्भुट्ठाणं नवमं दसमा उवसंपया ।
एसा दसंगा साहूणं सामायारी पवेइया ॥४॥

आसां व्याख्या—एषाऽनन्तरोक्ता **दशाङ्गा**वश्यिक्यादिदशावयवा दशधा सा **साधूनां सामाचारी** प्रकर्षेण वेदिता **प्रवेदिता** कथिताहंद्भिस्तीर्थंकरैर्गणधरैर्वा । तत्र **प्रथमावश्यिकी**, ततो **नैषेधिकी, आप्रच्छना, प्रतिप्रच्छना, छन्दना, इच्छाकारः, मिथ्याकारः, तथाकारः, अभ्युत्थानम्, उपसम्पच्चे**ति शेषं स्पष्टमिति गाथात्रयार्थः ॥२-३-४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एतामेव प्रत्यवयवं विषयप्रदर्शनपूर्वकं कर्तव्यतया वक्तुमाह–

गमणे आवस्सियं कुज्जा ठाणे कुज्जा निसीहियं ।
आपुच्छणा सयं करणे परकरणे पडिपुच्छणा ॥५॥

छंदणा दव्वजाएणं इच्छकारो य सारणे ।
मिच्छाकारो य निंदाए तहक्कारो य पडिस्सुए ॥६॥

अब्भुट्ठाणं गुरुपूया अच्छणे उवसंपया ।
एवं दुपंचसंजुत्ता सामायारी पवेइया ॥७॥

आसां व्याख्या–गमने तथाविधालम्बनत उपाश्रयात् गुर्ववग्रहाद् वा बहिर्निःसरणे, आवश्यकेष्ववश्यकर्तव्येषु **भवावश्यिकी तां कुर्यात्** । ततो निर्गत्य **स्थाने** पुनरुपाश्रयादौ 'प्रविशन्निति शेषः' **कुर्यात्** पापानुष्ठाननिषेधात्मिकां **नैषेधिकीमे**तां कृत्वैव प्रवेष्टव्यमिति । तत्र च तिष्ठतो भिक्षाटनादिकार्योत्पत्तावहमिदं कुर्यां ? नवेत्येवं गुर्वादेः 'आङिति' सर्वकृत्याभिव्याप्त्या प्रच्छना **आपृच्छना स्वयमि**त्यात्मनः **करणे** कार्यस्येति । गुर्वादिष्टेन **परस्यान्य**स्य कार्य**करणे** पुनः प्रवृत्तिकाले गुर्वादेः प्रच्छना **प्रतिप्रच्छना,** स हि कदाचित् कार्यान्तरमप्यादिशेदन्यतो वा कार्यं सिद्धं स्यादिति प्रतिपृच्छ्यते, किञ्चोच्छ्वास–निश्वासौ मुक्त्वा स्व–परसम्बन्धिषु कार्येषु पूर्वं प्रच्छना, प्रवृत्तिकाले पुनः प्रच्छनेति प्रतिप्रच्छना ॥ **छन्दना** शेषयतिनिमन्त्रणात्मिका निस्तितीर्षुणा कार्या । यदागमः–

"[१]साहवो तो चियत्तेणं निमंतिज्ज जहक्कमं ।
जइ मे अणुग्गहं कुज्जा साहू हुज्जामि तारिओ" ॥१॥ इति

केन ? इत्याह–**द्रव्यजातेना**शनादिना 'प्राग्गृहीतेति गम्यम्' । तस्यामपि प्रयोज्य इच्छाकार इच्छा स्वाभिप्रायस्तया करणं कार्य**स्येच्छाकारः, सारणे** स्वपरयोरौचित्येन कार्यप्रवर्तने, तत्र स्वसारणे यथेच्छाकारेण मद्भिक्षाटितलब्धमन्नं संविभजत भवच्चिकीर्षितं कार्यमहं करोमीत्यादि, परसारणे मम पात्रलेपादीच्छाकारेण कुरुत, न बलाभियोगादिनेति । **मिथ्याकारो** मिथ्येदमिति प्रतिपत्तिः, स चात्मनो **निन्दायां** वितथाचरणे हि धिगिदं मिथ्या मया कृतमिति । अस्मिन् कृतेऽपि बृहत्तरदोषसम्भवे गुर्वादिष्टालोचनायां तथाकरणं **तथाकार** इदमित्थमेवेत्यभ्युपगमः, क्व ? इत्याह–**प्रतिश्रवणे** गुरौ आलोचनं वाचनादिकं वा यच्छत्येवमेतदित्यभ्युपगम इति ॥ अभीत्याभिमुख्येनोत्थानमुद्यमन**मभ्युत्थानं** तच्च **गुरु**–

---

१. साधूंस्ततोऽपि यत्नेन निमन्त्रयेद् यथाक्रमम् ।
यदि मेऽनुग्रहं कुर्यात् साधुर्भवामि तारितः ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पूजायाम्, सा च गौरवार्हाणामाचार्यादीनामुचिताहारभेषजादिसम्पादनम्, अत्र चाभ्युत्थानं निमन्त्रणारूपमेव गृह्यते, अभ्युत्थानस्थाने निर्युक्तिकृता निमन्त्रणाया एवोक्तत्वात्, गृहीतेऽन्नादौ च्छन्दना, अगृहीते तु निमन्त्रणेत्यनयोर्भेदः । 'अच्छणे'त्ति **आसने** प्रक्रमादाचार्यान्तरादिपार्श्वावस्थाने, **उपसम्पत्** इयन्तं कालं मया भवदन्तिके आसितव्यमित्येवंरूपा ज्ञानाद्यर्थं गच्छान्तरे उपसम्पद् ग्राह्येति । **एवं** 'दुपंचसंजुत्त'त्ति आर्षत्वाद् **द्विपञ्चकसंयुक्ता** दशसङ्ख्यासहिता **सामाचारी प्रवेदितोप**दिष्टा 'गुरुभिः शिष्यायेति शेषः' इति गाथात्रयार्थः ॥५-६-७॥

'इच्छा-मिच्छा-तहक्कारो' इत्यादि सामाचारीक्रमप्रसिद्धावपि सूत्रे क्रमोल्लङ्घनं सामाचार्या यथाविषयं सर्वदा सर्वेषां कृत्यत्वेन पूर्वापरभावस्याभाव इति प्रदर्शनार्थमिति दशविधसामाचारीमभिधायौघसामाचारीं विवक्षुराह—

पुव्विल्लंमि चउब्भागे आइच्चंमि समुट्ठिए ।
भंडयं पडिलेहित्ता वंदित्ता य तओ गुरुं ॥८॥

पुच्छिज्जा पंजलिउडो किं कायव्वं मए इह ।
इच्छं निओइउं भंते ! वेयावच्चे व सज्झाए ॥९॥

वेयावच्चे निउत्तेणं कायव्वमगिलायओ ।
सज्झाए वा निउत्तेणं सव्वदुक्खविमोक्खणे ॥१०॥

आसां व्याख्या—'पुव्विल्लंमि'त्ति **पूर्वस्मिन्** प्रथमे बुद्ध्या विभक्तपूर्वदिक्सम्बद्धनभश्चतुर्थ**भागे सूर्ये समुद्गते** । यथा किल दशाविरहितोऽपि पटः पट एवोच्यते न त्वन्यः । तथा किञ्चिदूनचतुर्भागे पादोनपौरुष्यामित्यर्थः । **भाण्डकं** पात्रकाद्युपकरणं **प्रतिलिख्य** चक्षुषा निरीक्ष्य 'उपलक्षणात् प्रमृज्य च' **वन्दित्वा च ततो गुरुम्** ॥ किम् ? इत्याह—**पृच्छेत्** पर्यनुयुञ्जीत गुरुं यमग्रयायिनं कृत्वा याति तमेव **प्राञ्जलिपुटो** योजितकरपुटो भोः ! गुरो ! **किं कर्तव्यं मया इहा**स्मिन् समये ? **इच्छामि** वाञ्छामि 'निओइउं' त्ति 'अन्तर्भूतण्यर्थत्वात्' **नियोजयितुं** 'युष्माभिरात्मानमिति गम्यम्' **भदन्त ! वैयावृत्त्ये** ग्लानादीनां 'वाशब्दस्य भिन्नक्रमत्वात्' **स्वाध्याये वा** ॥ कृत्यमाह—**वैयावृत्त्ये नियुक्तेन** व्यापारितेन **कर्तव्यं** 'प्रक्रमाद् वैयावृत्यं' 'अगिलायओ'त्ति **अग्लान्यैव** शरीरश्रममविचिन्त्यैवेत्यर्थः । **स्वाध्याये वा** नियुक्तेन **सर्वदुःखविमोक्षणे** 'स्वाध्यायोऽग्लान्यैव कर्तव्य इति प्रक्रमः' इति गाथात्रयार्थः ॥८-९-१०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

औत्सर्गिकं दिनकृत्यमाह—

दिवसस्स चउरो भाए कुज्जा भिक्खू वियक्खणो ।
तओ उत्तरगुणे कुज्जा दिणभागेसु चउसु वि ॥११॥
पढमं पोरिसिं सज्झायं बीयं ज्झाणं ज्झियायई ।
तइयाए भिक्खायरियं पुणो चउत्थीइ सज्झायं ॥१२॥

अनयोर्व्याख्या—दिवसस्य चतुरो भागान् कुर्याद् 'बुद्ध्येति गम्यम्' **ततश्चतु-**र्भागकरणानन्तर**मुत्तरगुणान्** मूलगुणापेक्षया स्वाध्यायादीन् **कुर्याच्चतुर्ष्वपि दिनभागेषु** ॥ क्व दिनभागे कमुत्तरगुणं कुर्याद् ? इत्याह—**प्रथमां पौरुषीं** 'आश्रित्येति शेषः' **स्वाध्यायं** वाचनादिकं सूत्रपौरुषीत्वादस्याः 'कुर्यादिति क्रिया प्राक्तनाऽत्र योज्या' । **द्वितीयां** 'अर्थात् पौरुषीं' **ध्यानं** 'ज्झियायइ'त्ति **ध्यायेत्,** अर्थपौरुषीत्वादस्या ध्यानं चेहार्थविषय एव मनोव्यापारणं ध्यायेदिति च 'अनेकार्थत्वाद् धातूनां' कुर्यादित्यर्थः । इह च प्रतिलेखना-कालोऽल्पत्वान्न विवक्षितः 'उभयत्रापि 'कालाध्वनोरत्यन्तसंयोगे' इत्यनेन द्वितीया' । **तृतीयायां भिक्षाचर्याम्** 'उपलक्षणाद् भोजन—बहिर्गमनादि' । **चतुर्थ्यां स्वाध्यायम्** 'उपलक्षणात् प्रतिलेखना स्थण्डिलप्रत्युपेक्षादि' । कालापेक्षयैव सकलानुष्ठानस्य सफलत्वादिति गाथाद्वयार्थः ॥११-१२॥

प्रथमपौरुषीपरिज्ञानार्थमाह—

आसाढे मासे दुपया पोसे मासे चउप्पया ।
चित्तासोएसु मासेसु तिपया हवइ पोरिसी ॥१३॥
अंगुलं सत्तरत्तेणं पक्खेणं य दुअंगुलं ।
वड्ढए हायए वा वि मासेणं चउरंगुलं ॥१४॥

अनयोर्व्याख्या—आषाढे मासे पौरुषी प्रहरमानं **द्विपदा** भवति । **पौषे मासे चतुष्पदप्रमाणा** छाया भवति तदा पौरुषी । **चैत्रमासेऽथवाश्विनमासे त्रिपदा पौरुषी भवति** ॥ **सप्तरात्रेण** 'दिनाविनाभावित्वाद् रात्रीणां' सप्ताहोरात्रेण 'सार्धेनेति शेषः' **अङ्गुलं, पक्षेण च द्व्यङ्गुलं, मासेन च चतुरङ्गुलं वर्धते** दक्षिणायने, **हीयते** चोत्तरायणे । किञ्च यदा केषुचिन्मासेषु चतुर्दशदिनैः पक्षः स्यात् तदा सप्तरात्रेणाप्यङ्गुलवृद्धि—हान्या न कश्चिद् विरोधः ॥१३-१४॥

दिनचतुर्दशकपक्षसम्भवमाह—

आसाढबहुलपक्खे भद्दवए कत्तिए य पोसे य ।
फग्गुण-वइसाहेसु य नायव्वा ओमरत्ताओ ॥१५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—सुगमैव, नवरं **बहुलपक्षे** इति **भाद्रपदादिष्वपि** सम्बध्यते । 'ओम'त्ति **अवमा** न्यूना 'एकेन अहोरात्रेणेति शेषः' 'रत्त'त्ति पदैकदेशे पददर्शनाद**होरात्रा** एवं चैकैकदिनहान्या दिनचतुर्दशकेनैव कृष्णपक्ष एतेष्विति भावः ॥१५॥

पादोनपौरुष्याः प्रागुक्तायाः परिज्ञानोपायमाह—

जिट्ठामूले आसाढ-सावणे छहिं अंगुलेहिं पडिलेहा ।
अट्ठहिं बीयतइयंमि तइए दस अट्ठहिं चउत्थे ॥१६॥

व्याख्या—ज्येष्ठमूले इति ज्येष्ठे **आषाढे श्रावणे** च **षड्भिरङ्गुलैः** प्रत्यहं प्रागुक्तपौरुषीमाने 'प्रक्षिप्तैरिति चेहोत्तरत्र च गम्यते' 'पडिलेह' त्ति पादोनपौरुषी **प्रतिलेखना**काल एवमाद्यत्रिके । तथा**ऽष्टभिः** 'अङ्गुलैरिति सर्वत्रानुवर्तनीयम्' **द्वितीयत्रिके** भाद्रपदाश्वयुक्—कार्तिकलक्षणे । **तृतीये** त्रिके मार्गशीर्ष—पौष—माघात्मनि **दशभिः** । तथा **अष्टभिश्चतुर्थे** त्रिके फाल्गुन—चैत्र—वैशाखस्वरूपे 'प्रतिलेखनाकालः' इति सर्वत्र योज्यम् ॥१६॥

पौरुष्याः स्थापना चेयम्—		**पादोनपौरुष्याः स्थापना चेयम्—**	
ज्येष्ठे पद २ अं० ४	मार्गशीर्षे पद ३ अं० ८	ज्येष्ठे पद २ अं० १०	मार्गशीर्षे पद ४ अं० ६
आषाढे पद २	पौषे पद ४	आषाढे पद २ अं० ६	पौषे पद ४ अं० १०
श्रावणे पद २ अं० ४	माघे पद ३ अं० ८	श्रावणे पद २ अं० १०	माघे पद ४ अं० ६
भाद्रपदे पद २ अं० ८	फाल्गुने पद ३ अं० ४	भाद्रपदे पद ३ अं० ४	फाल्गुने पद ४
आश्विने पद ३	चैत्रे पद ३	आश्विने पद ३ अं० ८	चैत्रे पद ३ अं० ८
कार्तिके पद ३ अं० ४	वैशाखे पद २ अं० ८	कार्तिके पद ४	वैशाखे पद ३ अं० ४

दिनकृत्यमुक्त्वा रात्रिकृत्यमाह—

रत्तिं पि चउरो भाए भिक्खू कुज्जा वियक्खणो ।
तओ उत्तरगुणे कुज्जा राइभागेसु चउसु वि ॥१७॥
पढमं पोरिसि सज्झायं बिइयं ज्झाणं झियायई ।
तइयाए निद्दमुक्खं तु चउत्थी भुज्जो वि सज्झायं ॥१८॥

व्याख्या—गाथाद्वयमपि स्पष्टम्, नवरं **रात्रिमपि** न केवलं दिनमित्यपेरर्थः ॥ **द्वितीयां** पौरुषीमाश्रित्येति प्राग्वत् । **ध्यानं** सूक्ष्मसूत्रार्थलक्षणं क्षितिवलयद्वीप—सागरादि वा। 'झियायइ'त्ति **ध्यायेत्** चिन्तयेत् । **तृतीयायां** प्राग्निरुद्धाया निद्राया मोक्षो मुत्कलता **निद्रामोक्षः** स्वाप इत्यर्थः तं 'कुर्यादिति सर्वत्र योज्यम्' । **चतुर्थ्यां पुनः स्वाध्यायं** ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

वृषभापेक्षं चैतत् । सामस्त्येन तु प्रथम–चरमयामजागरणमेव सर्वेषाम् । यदागमः–

"सव्वेसि[1] पढमजामे दोण्णि उ वसभाण आदिमा जामा ।
तईओ होइ गुरूणं चउत्थओ होइ सव्वेसिं" ॥१॥

शयनविधिश्चागमादवसेयः ॥१७-१८॥

रात्रिचतुर्भागज्ञानोपायमाह–

जं नेइ जया रत्तिं नक्खत्तं तंमि नहचउब्भाए ।
संपत्ते विरमेज्जा सज्झायं पओसकालंमि ॥१९॥
तम्मेव य नक्खत्ते गयण चउब्भागसावसेसंमि ।
वेरत्तियं पि कालं पडिलेहित्ता मुणी कुज्जा ॥२०॥

अनयोर्व्याख्या–यन्नयति प्रापयति 'समाप्तिमिति गम्यम्' **यदा रात्रिं नक्षत्रं तस्मिन्नभश्चतुर्भागे सम्प्राप्ते विरमेन्निवर्तेत स्वाध्यायात् प्रदोषकाले** रजनीमुखे 'प्रारब्धादिति शेषः' ॥ **तस्मिन्नेव नक्षत्रे** 'प्रक्रमान्नीते' क्व ? इत्याह–'गयण' त्ति 'लुप्तविभक्तिकत्वात्' **गगने** कीदृशे ? चतुर्भागेन गन्तव्येन सावशेषं सोद्धरितं **चतुर्थभागसावशेषं तस्मिन्, वैरात्रिकं** तृतीय**मपि कालं प्रत्युपेक्ष्य** प्रतिजागर्य **मुनिः कुर्यात्** । अपिशब्दात् स्वस्वसमये प्रादोषिकादि च कालं कुर्यात् 'करोतेः तेः सर्वधात्वर्थत्वाद्' गृह्णीयात् । प्रथमादिषु नभश्चतुर्भागेषु सम्प्राप्ते नेतरि नक्षत्रे रात्रेः प्रथमादयः प्रहरा इति भाव इति गाथाद्वयार्थः ॥१९-२०॥

सामान्येन दिन-रजनिकृत्यमुक्त्वा विशेषतो दिनकृत्यमाह–

पुव्विल्लंमि चउब्भागे पडिलेहित्ताण भंडगं ।
गुरुं वंदित्तु सज्झायं कुज्जा दुक्खविमोक्खणं ॥२१॥

व्याख्या–पूर्वस्मिंश्चतुर्भागे प्रथमपौरुषीलक्षणे 'प्रक्रमाद् दिनस्य' **प्रत्युपेक्ष्य भाण्डकं** वर्षाकल्पाद्युपधिम् 'आदित्योदयसमये इति शेषः' **गुरुं वन्दित्वा स्वाध्यायं कुर्याद् दुःखविमोक्षणम्** ॥२१॥

तथा–

पोरिसीए चउब्भाए वंदित्ताण तओ गुरुं ।
अपडिक्कमित्ता कालस्स भायणं पडिलेहए ॥२२॥

---

१. सर्वेषां प्रथमयामो द्वौ तु वृषभाणामाद्यौ यामौ ।
तृतीयो भवति गुरूणां चतुर्थको भवति सर्वेषाम् ॥१॥

Jain Education International 2010_02   For Private & Personal Use Only   www.jainelibrary.org

व्याख्या–पौरुष्याः प्रथमपौरुष्या**श्चतुर्थभागे** 'अवशिष्यमाणे इति गम्यते' पादोनपौरुष्यामित्यर्थः । **गुरून् वन्दित्वा भाजनं प्रतिलेखयेदि**ति सम्बन्धः ॥२२॥

अथ प्रतिलेखनाविधिमाह–

मुहपोत्तिं पडिलेहित्ता पडिलेहिज्ज गोच्छयं ।
गोच्छगलइयंगुलिओ वत्थाइं पडिलेहए ॥२३॥

व्याख्या–मुखवस्त्रिकां प्रतिलेख्य प्रतिलेखयेत् गोच्छकं पात्रकोपरिवर्त्युपकरणम् । ततश्च 'गोच्छगलइयंगुलिओ'त्ति 'प्राकृतत्वात्' अङ्गुलिभिर्लातो गृहीतो गोच्छको येन सो**ऽङ्गुलिलातगोच्छको वस्त्राणि** पटलकरूपाणि **प्रतिलेखयेत्** प्रस्तावात् प्रमार्जयेदित्यर्थः ॥२३॥

इत्थं तथावस्थितान्येव पटलकानि गोच्छकेन प्रमृज्य पुनर्यत् कुर्यात्, तदाह–

उड्ढं थिरं अतुरियं पुव्वं ता वत्थमेव पडिलेहे ।
तो बिइयं पप्फोडे तइयं च पुणो पमज्जिजज्जा ॥२४॥

व्याख्या–उद्ध्वं कायतो वस्त्रतश्च तत्र कायत उत्कुटुकत्वेन स्थितो वस्त्रतश्च तिर्यक्प्रसारितवस्त्रः । **स्थिरं** दृढग्रहणेन । **अत्वरितम**द्रुतं यथा स्यादेवं **पूर्वं** प्रथमं 'ता' इति **तावद् वस्त्रं** पटलकरूपं **प्रत्युपेक्षेतैव,** आरतः परतश्च निरीक्षेतैव, न तु प्रस्फोटयेत् । वस्त्राभिधानेन वर्षाकल्पादिप्रत्युपेक्षणायामप्ययमेव विधिरिति ख्यापितम् । ततश्च यदि जन्तून् पश्यति, ततो यतनयाऽन्यत्र सङ्क्रमयति, तददर्शने च 'तो' इति **ततः** प्रत्युपेक्षणाऽनन्तरं **द्वितीयमिदं** कुर्याद् यदुत शुद्धं सत् **प्रस्फोटयेत् । तृतीयं च पुनरिदं** यदुत **प्रमृज्यात्**। कोऽर्थः ? प्रत्युपेक्ष्य प्रस्फोट्य च हस्तगतान् प्राणिनः प्रमृज्यादिति ॥२४॥

कथं पुनः प्रस्फोटयेत् प्रमृज्याद् वा ? इत्याह–

अणच्चावियं अवलियं अणाणुबंधिं अमोसलिं चेव ।
छप्पुरिमा नव खोडा पाणीपाणिविसोहणं ॥२५॥

व्याख्या–अनर्तितं प्रस्फोटनं प्रमार्जनं वा कुर्वतो वस्त्रं वपुर्वा यथा नर्तितं न स्यात् तथा । **अवलितं** यथात्मनो वस्त्रस्य च वलितमिति मोटनं न भवति । 'अणाणुबंधिं'ति **अननुबन्धि,** अनुबन्धेन नैरन्तर्यलक्षणेन युक्तमनुबन्धि न तथा अननुबन्धि कोऽर्थः ? लक्ष्यमाणविभागं यथा भवति । 'अमोसलिं'ति 'सूत्रत्वात्' वस्त्रादेरूर्ध्वाधस्तिर्यग्घट्टनं **मोसली तेन रहितमू**द्ध्र्वमधो वा कुड्यादिपरामर्शवद् यथा न स्यात् तथेत्यर्थः । एवं च किम् ? इत्याह–'छप्पुरिम'त्ति **षट् पूर्वाः** पूर्वं क्रियमाणतया तिर्यक्कृत–

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

वस्त्रप्रस्फोटनात्मकाः क्रियाविशेषा येषु ते षट्पूर्वाः 'नव' त्ति **नवसङ्ख्याः** 'खोड'त्ति **खोटकाः** श्रुतप्रतीताः स्फोटनात्मकाः 'कर्तव्या इति शेषः' । पाणौ पाणितले प्राणिनां कुन्थ्वादिसत्त्वानां विशोधनं प्रस्फोटनं त्रिकत्रिकोत्तरकालं त्रिकत्रिकसङ्ख्यं **पाणिप्राणि-विशोधनं** कर्तव्यम् ॥२५॥

प्रतिलेखनादोषत्यागमाह—

आरभडा संमद्दा वज्जेयव्वा य मोसली तइया ।
पप्फोडणा चउत्थी विक्खित्ता वेइया छट्ठी ॥२६॥
पसिढिल-पलंब-लोला एगामोसा अणेगरूवधुणा ।
कुणइ पमाणि पमायं संकिए गणणोवगं कुज्जा ॥२७॥

अनयोर्व्याख्या—आरभटा विपरीतकरणं त्वरितं वान्यान्यवस्त्रग्रहणेन । **संमर्द्दा** वस्त्रान्तकोणसञ्चलनमुपधेरुपरि निषदनं वा '**वर्जयितव्ये**ति सम्बद्ध्यते' । **मोसली** तिर्यगूर्ध्वमधो वा घट्टना **तृतीया** । **प्रस्फोटना** रेणुगुण्डितस्येव वस्त्रस्य प्रकर्षेण झाटना **चतुर्थी** । विक्षेपणं **विक्षिप्ता** 'पञ्चमीति गम्यते' सा च प्रत्युपेक्षितवस्त्रस्यान्यत्राप्रत्युपेक्षिते क्षेपणेन । **वेदिका षष्ठी,** अस्या भेदाः पञ्च, जानूपरि हस्तौ १, जान्वधः हस्तौ २, जानुमध्ये च हस्तौ ३, हस्तमध्ये जानुद्वयं ४, एकं जानु हस्तमध्येऽपरं बहिः ५। 'सर्वत्र स्त्रीलिङ्गता रूढत्वात्' एवमेते षड् दोषाः प्रतिलेखनायां त्याज्याः ॥ तथा **प्रशिथिल-मदृढमनिरायतं** वस्त्रग्रहणम् । **प्रलम्बो** विषमग्रहणेन प्रत्युपेक्ष्यमाणवस्त्रकोणानां लम्बनम् । **लोला** यद् भूमौ करे वा वस्त्रस्य लोलनम् । एतेऽपि त्रयो दोषा वर्जयितव्या इति योज्यम्। **एकामर्शा** मध्ये लात्वा ग्रहणदेशं यावदुभयतो वस्त्रस्य यदेककालं सङ्घर्षणमाकर्षणं 'रूढित्वात् स्त्रीत्वम्' । 'अणेगरूवधुण'त्ति अनेकरूपा सङ्ख्यात्रयातिक्रमणतो वा युगपदेनकवस्त्रग्रहणतो वा धुनना प्रकम्पना **अनेकरूपधुनना** । तथा यत् **कुरुते प्रमाणे** प्रस्फोटादिसङ्ख्यालक्षणे **प्रमादं** यच्च **शङ्किते** प्रमादतः प्रमाणशङ्कायां गणनां कराङ्गुलि-रेखास्पर्शादिनैकादिसङ्ख्यारूपामुपागच्छतीति **गणनोपगं** यथा स्यादेवं प्रस्फोटनादि **कुर्यात्** सोऽपि दोषः 'वर्जनक्रिया सर्वत्र पूर्वसूत्रादनुवर्त्या' एवं चोक्तदोषाभावे प्रत्युपेक्षणा निर्दोषेत्युक्तं भवतीति गाथाद्वयार्थः ॥२६-२७॥

एतामेव भङ्गकद्वारेण सदोषां निर्दोषां चाह—

अणूणाइरित्तपडिलेहा अविवच्चासा तहेव य ।
पढमं पयं पसत्थं सेसाणि उ अप्पसत्थाणि ॥२८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—अन्यूनातिरिक्ता न न्यूनाधिका **प्रतिलेखा,** इह च न्यूनताऽऽधिक्ये स्फोटना—प्रमार्जने वेलां चाश्रित्य वाच्ये । 'अविवच्चास'त्ति विविधो व्यत्यासो वैपरीत्यं यस्यां सा विव्यत्यासा न तथा **अविव्यत्यासा** पुरुषोपधिविपर्यासरहिता 'कर्तव्येति शेषः' । अत्र च त्रिभिर्विशेषणपदैरष्टौ भङ्गाः, सूचिताः । स्थापना चेयम्—

ऽ ऽ ऽ	। ऽ ऽ	ऽ । ऽ	। । ऽ	ऽ ऽ ।	। ऽ ।	ऽ । ।	। । ।

एतेषु च **प्रथमं पदमन्यू**ना अनतिरिक्ता अविपर्यासा इत्येवं प्रथमभङ्गरूपं **प्रशस्तं** निर्दोषतया शुद्धं **शेषाणि तु** पदानि द्वितीयादिभङ्गरूपा**ण्यप्रशस्तानि** तेषु न्यूनताद्यन्यतमदोषसम्भवात् । ततः प्रथमभङ्गानुपातिन्येव प्रतिलेखना कार्येति भावः ॥२८॥

एवंविधमप्येनां कुर्वता यत् त्याज्यं तदाह—

पडिलेहणं कुणंतो मिहो कहं कुणइ जणवयकहं वा ।
देइ व पच्चक्खाणं वाएइ सयं पडिच्छइ वा ॥२९॥

व्याख्या—प्रतिलेखनां कुर्वन्मिथः कथां परस्परसम्भाषणात्मिकां **करोति जनपदकथां वा** 'स्त्र्यादिकथोपलक्षणमिदम्' । **ददाति वा प्रत्याख्यानमन्यस्मै, वाचयति** पाठयत्यपरं, **स्वयं प्रतीच्छ**ति गृह्णात्यालापकादिकं 'य इति गम्यम्' ॥२९॥

स किम् ? इत्याह—

पुढवी आउक्काए तेऊ-वाऊ-वणस्सइ-तसाणं ।
पडिलेहणापमत्तो छण्हं पि विराहगो होइ ॥३०॥

व्याख्या—स्पष्टा । नवरं **पृथिव्यादीनां प्रतिलेखनाप्रमत्तो** मिथः कथादिना **षण्णामप्या**स्तामेकादीनामित्यपेरर्थः । **विराधकश्चै**वम्—प्रमत्तो हि कुम्भकारशालायां स्थितो जलघटादिकं प्रलोठयेत् । ततस्तज्जलेन मृदग्नि—बीज—कुन्थ्वादयः प्लाव्यन्ते, प्लावनातश्च विराध्यन्ते । यत्र चाग्निस्तत्रावश्यं वायुः '[1]**वाऊतेऊसहगया**' इत्युक्तत्वात् । एवं षण्णामपि द्रव्यतो विराधकत्वम् । भावतस्तु प्रमत्ततया अन्योऽपि विराधको भवति । जीवरक्षाहेतुत्वात् प्रतिलेखनायाः, हिंसाहेतुत्वान्मिथः कथादीनां त्याज्यतोक्तेति भावः । इत्थं प्रथम-पौरुषीकृत्यमुक्तम् । ततः '[2]**बीए झाणं झियायइ**' इति वचनेन ध्यानमप्युक्तमुभयं चैतदवश्यं कर्तव्यम् ॥३०॥

अथ तृतीयपौरुषीकृत्यमाह—

तइयाए पोरिसीए भत्तं-पाणं गवेसए ।
छण्हमण्णयरायंमि कारणंमि उवट्ठिए ॥३१॥

१. वायुतेजः सहगतौ । २. द्वितीये ध्यानं ध्यायति ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—सुगमा । नवरमौत्सर्गिकमेतदन्यथा स्थविरकल्पिकानां यथाकालमेव भक्तादिगवेषणम् । तथाह—'[१]**सइ काले चरे भिक्खू**'त्ति **षण्णां** कारणानां 'अण्णयरायंमि'त्ति **अन्यतरस्मिन् कारणे समुत्थिते** सञ्जाते, न तु कारणं विनेति भावः । इह कारणग्रहणं 'भोजनोपलक्षणम्' । गुर्वाद्यर्थं उक्तकारणव्यतिरेकेणापि तद्ग्रहणस्य सम्भवात् । किं चान्यत्र भोजने एवैतानि कारणान्युक्तानि ॥३१॥

तान्येव कारणान्याह—

वेयण-वेयावच्चे इरियट्ठाए य संजमट्ठाए ।
तह पाणवत्तियाए छट्ठं पुण धम्मचिंताए ॥३२॥

व्याख्या—वेदनायै क्षुत्—पिपासोत्पन्नवेदनोपशमनायेत्यर्थः । तथा क्षुत्—पिपासाभ्यां बाधितो गुरुवैयावृत्त्यादौ न क्षमः स्यादिति **वैयावृत्त्याय** । तथा **ईर्यायेर्यासमित्यर्थाय** तदाकुलितस्य निर्जरार्थिनोऽपि चक्षुर्भ्यामपश्यतः तस्याः पालयितुमशक्यत्वात् । तथा **संयमार्थाय** तदार्तत्वेन महाव्रतावश्यकादेर्दुःपाल्यत्वात् । तथा 'पाणवत्तिय'त्ति **प्राणप्रत्ययं** जीवितनिमित्तम् । अविधिना ह्यात्मनोऽपि प्राणोपक्रमे हिंसा स्यात् । उक्तं च—

"[२]**भावियजिणवयणाणं ममहत्तरहियाण णत्थि हु विसेसो ।**
अप्पाणंमि परंमि य तो वज्जे पीडमुभओ त्ति(वि)" ॥१॥

तथा **षष्ठं पुनरिदं** यदुत **धर्मचिन्तायै** धर्म्मध्यान—श्रुताभ्यासरूपायै 'भक्तपानं गवेषयेदिति सर्वत्रानुवर्तनीयम्' इयं च तदाकुलितचेतसो न स्यादार्तध्यानसम्भवात् । किञ्चैभिः कारणैर्यथा स्वार्थं तथा गुर्वाद्यर्थमपि भक्तपानं गवेषयेदिति भावः ॥२२॥

एभिः कारणैः किमवश्यं भक्तादि गवेषयेद् ? उत नेत्याह—

निग्गंथो धिइमंतो निग्गंथी वि न करिज्ज छहिं चेव ।
ठाणेहिं तु इमेहिं अणइक्कमणा य से होइ ॥३३॥

व्याख्या—निर्ग्रन्थो यति**र्धृतिमान्** धर्माचरणं प्रति तथा **निर्ग्रन्थ्यपि न कुर्याद्** 'भक्त—पानगवेषणामिति प्रक्रमः' **षड्भिश्चैव स्थानैस्तु** पुनरेभिर्वक्ष्यमाणैरेवं च किम् ? इत्याह—'अणइक्कमणा'त्ति **अनतिक्रमणं** संयमयोगानामनुल्लङ्घनं 'चशब्दो यस्मादर्थे' **यस्मात्** 'से' **तस्य तस्या वा** निर्ग्रन्थ्या **भवति** । अन्यथा तदतिक्रमणसम्भवात् ॥३३॥

---

१. सति काले चरेद् भिक्षुः ।

२. भवितजिनवचनानां ममत्वरहितानां नास्ति हु विशेषः ।
आत्मनि परस्मिश्च तद् वर्जयेत् पीडमुभय इति (अपि) ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

षट् स्थानान्येवाह—

आयंके उवसग्गे तितिक्खया बंभचेरगुत्तीसु ।
पाणिदया-तवहेउं सरीरवुच्छेयणट्ठाए ॥३४॥

व्याख्या—आतङ्के ज्वरादिरोगे, **उपसर्गे** 'उन्निष्क्रमणार्थं' स्वजनादिकृते दिव्यादौ चोभयत्र 'तन्निवारणार्थमिति गम्यम्' । तथा **तितिक्षा** सहनं **तया** हेतुभूतया क्व ? **ब्रह्मगुप्तिषु,** ता हि नान्यथा सोढुं शक्यते । **प्राणिदयाहेतोर्**वर्षादौ निपतदप्कायादि-जीवरक्षायै **तपश्चतुर्थादिरूपं तद्धेतोः** । तथा **शरीरस्य व्युच्छेदः** परिहार**स्तदर्थं** चोचितकाले संलेखनामनशनं वा कुर्वन् 'भक्तपानं न गवेषयेदिति सर्वत्र योज्यम्' ॥३४॥

तद्गवेषणायां विधिं क्षेत्रावधिं चाह—

अवसेसं भंडगं गिज्झा चक्खुसा पडिलेहए ।
परमद्धजोयणाओ विहारं विहरए मुणी ॥३५॥

व्याख्या—अवशेषं समस्तं **भाण्डमु**पकरणं **गृहीत्वा चक्षुषा प्रत्युपेक्षेत** 'उप-लक्षणत्वात् **प्रतिलेखयेच्च**' । ततस्तदादाय **परमुत्कृष्टमर्धयोजनाद**र्धयोजनमाश्रित्य 'क्यब्लोपे पञ्चमी' परतो हि क्षेत्रातीतमशनादि स्यात् । **विहारं विहरेद्** विचरेन्**मुनिः** ॥३५॥

इत्थं विहृत्योपाश्रयं चागत्य भुक्त्वा यत् कुर्यात् तदाह—

चउत्थीए पोरिसीए निक्खिवित्ताण भायणं ।
सज्झायं च तओ कुज्जा सव्वभावविभावणं ॥३६॥

व्याख्या—चतुर्थ्यां पौरुष्यां निक्षिप्य प्रत्युपेक्ष्य बद्ध्वा च **भाजनं** पात्रं **स्वाध्यायं ततः कुर्यात् सर्वे भावा** जीवादय**स्तेषां विभावनं** प्रकाशकम् ॥३६॥

पोरिसीए चउब्भाए वंदित्ता ण तओ गुरुं ।
पडिक्कमित्ता कालस्स सिज्जं तु पडिलेहए ॥३७॥

व्याख्या—पौरुष्याः 'प्रक्रमाच्चतुर्थ्याः' **चतुर्भागे** 'शेषे इति गम्यते', **वन्दित्वा ततः** स्वाध्यायादनन्तरं **गुरुं, प्रतिक्रम्य कालस्य, शय्यां** वसतिं '**तुः** पूरणे' **प्रतिलेखयेत्** ॥३७॥

ततश्च—

पासवणुच्चारभूमिं च पडिलेहिज्ज जयं जई ।
काउस्सग्गं तओ कुज्जा सव्वदुक्खविमुक्खणं ॥३८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—भूमिशब्दस्य प्रत्येकमभिसम्बन्धात् **प्रस्रवणभूमिमुच्चारभूमिं च** प्रत्येकं द्वादशस्थण्डिलात्मिकां 'चशब्दात् **कालभूमिं च** स्थण्डिलत्रयात्मिकां' **प्रतिलेखयेत्** । 'जयं'ति **यतमानो यतिरेवं** सप्तविंशतिः स्थण्डिलानीत्थं विशेषतो दिनकृत्यमुक्त्वोत्तरार्धेन रात्रिकृत्यमारभते । **कायोत्सर्गं ततो** भूमिप्रतिलेखनानन्तरं **कुर्यात् सर्वदुःखविमोक्षणम्** । तथात्वं चास्य कर्मापचयहेतुत्वात् । यतः—

"[1]काउस्सग्गे जह सुट्ठियस्स भज्जंति अंगमंगाइं ।
तह भिंदंति सुविहिया अट्ठविहं कम्मसंघायं" ॥१॥

किञ्च कायोत्सर्गस्य फलं द्विधा ऐहिकमामुष्मिकं च । तत्रैहिकं यशः—सुराकुष्ट्यादि, आमुष्मिकं च स्वर्गादि, परम्परया सिद्धिश्च । तत्रैहिकफले दृष्टान्तः—

चम्पायां गतकम्पायामनन्ताद्भुतसम्पदि ।
आसीत् **सुदर्शन**श्रेष्ठी सुदर्शने सुदर्शनः ॥१॥

सर्वज्ञोपज्ञधर्मज्ञा शीलप्रोल्लसदुज्ज्वला ।
मनोरमा गुणैस्तस्या जाया जाता मनोरमा ॥२॥

कायोत्सर्गं सदाऽऽदत्ते श्रेष्ठी सद्ध्यानलीनहृत् ।
शून्यगेह—स्मशानादौ चतुर्दश्यादिपर्वसु ॥३॥

दधिवाहनराज्ञस्तं पट्टदेव्य**भया**ऽऽह्वया ।
शुद्धान्ते प्रतिमाव्याजाद् दूत्याऽऽनाययदन्यदा ॥४॥

ततो**ऽभया**ऽभणच्छ्रेष्ठिन् ! मत्संसर्गं करोषि चेत् ।
करोमि राज्यसर्वस्वस्वामिनं त्वां तु निश्चितम् ॥५॥

तथापि नाङ्गीचक्रेऽसौ तद्वचो दृढमानसः ।
सा पुनः क्षोभयामास हाव-भावादिभिस्तकम् ॥६॥

सुदर्शनो न चुक्षोभ **स्वयम्भूरमणा**ब्धिवत् ।
पूच्चकाराथ सा बाढं क्षणाद् भृत्यास्ततोऽमिलन् ॥७॥

राज्ञः सोऽदर्शि तैस्तेनाचिन्ति शीलकलङ्ककृत् ।
नायं कदापि दान्तात्मा सर्वदा स्ववशेन्द्रियः ॥८॥

श्रेष्ठिन्नत्रासमे स्थाने केनानीतस्त्वमै कथम् ? ।
इति पृष्टोऽपि भूपेन स क्षमी मौनमाश्रयत् ॥९॥

---

१. कायोत्सर्गे यथा सुस्थितस्य भज्यन्तेऽङ्गोपाङ्गानि ।
तथा भिन्दन्ति सुविहिता अष्टविधं कर्मसङ्घातम् ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

दुष्टोऽयमिति रुष्टेनादिष्टो वध्यः स भूभुजा ।
वध्यभूमौ समानिन्ये तलारक्षैर्विडम्बितम् ॥१०॥

मा कुप्य क्वाप्यरे जीव ! दैन्यं मेहि क्षमां भज ।
स्वकर्मोपार्जितं ह्येतत् स शुद्धात्मेत्यभावयत् ॥११॥

इतश्च तत्प्रिया श्रुत्वा प्रियोदन्तं श्रवःकटुम् ।
निदध्याविति दुःखार्ता कलङ्को मत्प्रिये न हि ॥१२॥

विधोर्यदि ज्वलज्ज्वाला वह्नेर्ज्वालाश्च शीतलाः ।
जायन्ते तर्हि मे भर्ता स्वीयं शीलं स दूषयेत् ॥१३॥

ततः सार्हन्तमभ्यर्च्य कायोत्सर्गेण तस्थुषी ।
पतिव्यसनशान्त्यर्थं स्मृत्वा शासनदेवताम् ॥१४॥

सा चागत्यावदद् वत्से ! किं कुर्वेऽहं त्वदीप्सितम् ? ।
तयोचे मत्प्रियालीककलङ्कं त्वमपाकुरु ॥१५॥

चकार तत्र गत्वा द्राक् शूलं सौवर्णविष्टरम् ।
प्रहारान् हार–केयूराद्यलङ्कारांश्च तस्य सा ॥१६॥

कैश्चिदुक्तं नृपस्याग्रे दृष्ट्वा तं सोऽपि तादृशम् ।
विस्मितः क्षमयामास स्वागोऽज्ञानविजृम्भितम् ॥१७॥

सन्तोऽर्हद्धर्ममाहात्म्यसाक्षात्फलचमत्कृताः ।
धर्मो जयति नाधर्म इत्युज्जुघुषुरुच्चकैः ॥१८॥

एवं शुभायतेः कायोत्सर्गस्योदर्कमद्भुतम् ।
मत्वैतस्य घनाः पौरा आदृता धर्ममार्हतम् ॥१९॥

ततः पट्टेभमारोह्य वस्त्राद्यैरतिसत्कृतः ।
ध्रियमाणातपत्रः स भूपेन प्रापितो गृहम् ॥२०॥

ततो **मनोरमा** हृष्टा प्रिये निर्दोषमागते ।
कायोत्सर्गं पारयित्वा वर्धापनमहो व्यधात् ॥२१॥

यथा सुदर्शनश्रेष्ठी कायोत्सर्गप्रभावतः ।
निष्कलङ्को यशः सौख्यं चाप्तवानिह निर्भरम् ॥२२॥

तथा भवत भो भव्याः ! कायोत्सर्गे तु सादराः ।
यथेह प्राप्य कीर्त्यादि क्रमात् सिद्धिमवाप्नुत ॥२३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इति कायोत्सर्गस्यैहिकफले **सुदर्शन–मनोरमो**दाहरणम् ॥३८॥

तत्र कायोत्सर्गे यच्चिन्तयेत्, तदाह–

देसियं च अईयारं चिंतिज्ज अणुपुव्वसो ।
नाणंमि दंसणे चेव चरित्तंमि तहेव य ॥३९॥

व्याख्या–'देसियं' ति 'प्राकृतत्वाद् वकारलोपे' **दैवसिकं** च सकलदिवसकृतं '**च**: पूरणे' **अतिचारम**तिक्रमं **चिन्तयेद्** ध्यायेत । 'अणुपुव्वसो' त्ति **आनुपूर्व्या** क्रमेण । किं विषयं तं चिन्तयेद् ? इत्याह–**ज्ञाने दर्शने चारित्रे तथैव च** ॥३९॥

पारियकाउस्सग्गो वंदित्ताण तओ गुरुं ।
देसियं तु अईयारं आलोइज्ज जहक्कमं ॥४०॥

व्याख्या–पारित: समापित: **कायोत्सर्गो** येन **स** तथा । **वन्दित्वा** 'प्रस्तावाद् द्वादशावर्तवन्दनेन' **ततो**ऽतीचारचिन्तनानन्तरं **गुरुम्** । 'देसियं' ति प्राग्वद् **दैवसिकमती-चारमालोचयेत्** प्रकाशयेद् गुरूणामेव **यथाक्रममा**लोचनाऽऽसेवनक्रमानतिक्रमेण ॥४०॥

पडिक्कमित्ता निस्सल्लो वंदित्ताण तओ गुरुं ।
काउस्सग्गं तओ कुज्जा सव्वदुक्खविमुक्खणं ॥४१॥

व्याख्या–प्रतिक्रम्यापराधस्थानेभ्य: प्रतीपं निवृत्य **नि:शल्यो** मायादिशल्यरहित: 'सूचकत्वात् सूत्रस्य' वन्दनकपूर्वकं क्षमयित्वा, **वन्दित्वा** द्वादशावर्तवन्दनेन **तत** इत्युक्त-विधेरनन्तरं **गुरुमा**चार्यादिकम् । **कायोत्सर्गं** 'जातावेकवचनम्' चारित्र–दर्शन–ज्ञान-विशुद्ध्यर्थं व्युत्सर्गत्रयरूपं **ततो** गुरुवन्दनानन्तरं **कुर्यात् सर्वदु:खविमोक्षणं** प्राग्वत् ॥४१॥

पारियकाउस्सग्गो वंदित्ताण तओ गुरुं ।
थुइमंगलं च काउं कालं संपडिलेहए ॥४२॥

व्याख्या–पूर्वार्धं स्पष्टम् । **स्तुतिमङ्गलं च** स्तुतित्रयात्मकसिद्धस्तवरूपं **कृत्वा कालं सम्प्रत्युपेक्षेत** कोऽर्थ: ? प्रतिजागर्ति 'उपलक्षणाद् गृह्णाति च' कालविधिश्चा-गमादवसेय: ॥४२॥

पढमं पोरिसि सज्झायं बिइयं झाणं झियायई ।
तइयाए निद्दमोक्खं तु सज्झायं तु चउत्थीए ॥४३॥

व्याख्या–प्राग् व्याख्यातैव । नवरमयमर्थो गुरुभि: पुन: पुनरुपदेष्टव्य एव, न प्रयासो मन्तव्य इति पुनरस्याभिधानमिति ॥४३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कथं चतुर्थपौरुषीकृत्यं कर्तव्यम् ? इत्याह—

पोरिसीए चउत्थीए कालं तु पडिलेहिया ।
सज्झायं तु तओ कुज्जा अबोहंतो असंजए ॥४४॥

व्याख्या—पौरुष्यां चतुर्थ्यां कालं वैरात्रिकं '**तुः** पूरणे' **प्रत्युप्रेक्ष्य** प्रतिजागर्य प्राग्वद् गृहीत्वा च **स्वाध्यायं ततः कुर्यात्** । **अबोधयन्**नुत्थापयन्**नसंयतान्** गृहिणस्तदुत्थापने तेषां तत्तत्पापस्थानप्रवृत्तिसम्भवात् ॥४४॥

पोरिसीए चउब्भाए वंदिऊण तओ गुरुं ।
पडिक्कमित्तु कालस्स कालं तु पडिलेहए ॥४५॥

व्याख्या—पौरुष्याश्चतुर्थ्याश्चतुर्थभागे 'अवशिष्यमाणे इति शेषः' । तत्र हि कालवेलासम्भवान्न कालस्य ग्रहणम् । **वन्दित्वा ततो गुरुं, प्रतिक्रम्य कालस्य** वैरात्रिकस्य, **कालं** प्राभातिकं '**तु**र्विशेषार्थे' 'पडिलेहए' त्ति **प्रत्युपेक्षेत** गृह्णीयाच्च, मध्यमप्रक्रमापेक्षं च कालत्रयग्रहणमुक्तमन्यथा ह्युत्सर्गत उत्कर्षेण चत्वारो जघन्येन त्रयोऽपवादतस्तु द्वावुत्कर्षतो जघन्यतस्त्वेक इति ॥४५॥

आगए कायवुस्सग्गे सव्वदुक्खविमोक्खणे ।
काउस्सग्गं तओ कुज्जा सव्वदुक्खविमुक्खणं ॥४६॥

व्याख्या—आगते कायव्युत्सर्गे प्राप्ते कायोत्सर्गसमये इत्यर्थः । **सर्वदुःखविमोक्षणे** । शेषं प्राग्वत् । यच्चेह पुनः पुनः सर्वदुःखविमोक्षणविशेषणाभिधानं तत् कायोत्सर्गस्यात्यन्तनिर्जराहेतुत्वख्यापनार्थम् । तथेह कायोत्सर्गग्रहणेन चारित्र-दर्शन-ज्ञानशुद्ध्यर्थं कायोत्सर्गत्रयं ग्राह्यम् । तत्र च तृतीये कायोत्सर्गे रात्रिकोऽतीचारश्चिन्त्यः ॥४६॥

एतदेवाह—

राइयं च अइयारं चिंतिज्ज अणुपुव्वसो ।
नाणंमि दंसणंमि चरित्तंमि तवंमि य ॥४७॥

व्याख्या—रात्रौ भवं **रात्रिकं** '**च**ः पूरणे' **अतीचारं चिन्तयेत् आनुपूर्व्या** क्रमेण । **ज्ञाने दर्शने चारित्रे तपसि 'चशब्दाद् वीर्ये च'** शेषं कायोत्सर्गेषु च चतुर्विंशतिस्तवश्चिन्त्यतया प्रतीतः साधारणश्चेति नोक्तः ॥४७॥

ततश्च—

पारियकाउस्सग्गो वंदित्ताण तओ गुरुं ।
राईयं तु अईयारं आलोएज्ज जहक्कमं ॥४८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पडिक्कमित्तु निस्सल्लो वंदित्ताण तओ गुरुं ।
काउस्सग्गं तओ कुज्जा सव्वदुक्खविमोक्खणं ॥४९॥

गाथाद्वयमपि व्याख्यातप्रायमेव ॥४८-४९॥

कायोत्सर्गे स्थितः किं चिन्तयेद् ? इत्याह—

किं तवं पडिवज्जामि एवं तत्थ विचिंतए ।
काउस्सग्गं तु पारित्ता वंदई य तओ गुरुं ॥५०॥

व्याख्या—किमिति किंरूपं **तपो** नमस्कारसहितादि **प्रतिपद्येऽहमेवं तत्र विचिन्तयेत्**। भगवान् श्री**वीरः** षण्मासं यावन्निरशनो विहृतवान् तत् किमहमपि स्थातुं शक्तो न वेति ?। एवं पञ्चमासाद्यपि यावन्नमस्कारसहितं तावत् परिभावयेत्। उत्तरार्धं स्पष्टम् ॥५०॥

पारियकाउस्सग्गो वंदित्ताण तओ गुरुं ।
तवं संपडिवज्जित्ता करिज्ज सिद्धाण संथवं ॥५१॥

व्याख्या—सुगमम् । नवरं **तपो** यथाशक्ति चिन्तितमुपवासादि **सम्प्रतिपद्या**ङ्गीकृत्य **कुर्यात् सिद्धानां संस्तवं** स्तुतित्रयरूपं तदनु चैत्यसद्भावे तद्वन्दनं कार्यम् ॥५१॥

अध्ययनोपसंहारमाह—

एसा सामायारी समासेन वियाहिया ।
जं चरित्ता बहू जीवा तिन्ना संसारसागरं ॥५२॥ त्ति बेमि ॥

व्याख्या—एषा सामाचारी दशविधौघरूपा च **संक्षेपेण** 'वियाहिया' त्ति **व्याख्याता**। पदविभागसामाचारी त्विह नोक्ता धर्मकथानुयोगत्वादस्य ग्रन्थस्य, च्छेद-सूत्रान्तर्गतत्वाच्च तस्याः । अत्रास्याः फलमाह—**यां सामाचारीं चरित्वासेव्य बहवोऽनेके जीवास्तीर्णाः संसारसागरम् । इति ब्रवीमी**ति प्राग्वदिति ॥५२॥ ग्रं० १३१॥

इति श्रीकमलसंयमोपाध्यायविरचितायां सर्वार्थसिद्धौ श्रीउत्तराध्ययनटीकायां षड्विंशं सामाचार्याख्यमध्ययनं समाप्तम् ॥२६॥

●●●

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सप्तविंशं खलुङ्कीयमध्ययनम्

इह पूर्वाध्ययने सामाचार्युक्ता, सा चाशठतयैव पालयितुं शक्या, विपक्षभूत-शठताज्ञानत एवासौ जायत इति दृष्टान्तेन शठतास्वरूपनिरूपणेनाशठताभिधायकमिदं सप्तविंशमध्ययनमारभ्यते–

थेरे गणहरे गग्गे मुणी आसी विसारए ।
आइन्ने गणिभावंमि समाहिं पडिसंधए ॥१॥

व्याख्या–स्थविरो धर्मे स्थिरीकरणात्, गणं गुणसमूहं धारयतीति **गणधरो गार्ग्यो** गर्गगोत्रो **मुनिरासीद् विशारदः** सर्वशास्त्रवेत्ता । **आकीर्ण** आचार–श्रुतसम्पदादिभिरा-चार्यगुणैर्व्याप्तो **गणिभावे** आचार्यत्वे 'स्थित इति गम्यम्' **समाधिं** ज्ञानाद्युपयोगभाव-समाधिं **प्रतिसन्धत्ते** कर्मोदयात् त्रुटितमपि सङ्घट्टयति 'पर्यन्ते परित्यागतः तथाविध-शिष्याणामिति गम्यते' ॥१॥

स च समाधिं सन्दधद् यथा शिष्येभ्य उपदिशति, तथाऽऽह–

वहणे वहमाणस्स कंतारं अइवत्तई ।
जोए वहमाणस्स संसारं अइवत्तई ॥२॥

व्याख्या–उह्यतेऽनेनेति **वहनं** शकटादि **तस्मिन्** 'योक्त्रितस्य इति गम्यते' वहमानस्य अन्तर्भूतणिगर्थतया तं च सम्यक् प्रवर्तयमानस्य 'उत्तरत्र खलुङ्कग्रहणादिह विनीतगवादेरिति गम्यते' अस्य च वाहकाविनाभूतत्वात् वाहकस्य च पामरादेः **कान्तार-मरण्यमतिवर्तते** सुखातिवर्त्यतया स्वयमेवातिक्रामतीति । उपनयमाह–**योगे** संयमव्यापारे 'नियुक्तस्य इति शेषः' **वहमानस्य** 'अन्तर्भूतणिगर्थतया' तं च सम्यक् प्रवर्तयमानस्य शिष्यादेः प्रवर्तकस्य चाचार्यादेः **संसारोऽतिवर्तते** प्राग्वत् स्वयमेवातिक्रामति । इह च योगवहनमशठतेति ॥२॥

अथाशठतया किल समाधिरतस्तद्विपक्षभूतशठतादोषदुष्टासमाधिजनककुशिष्याणां स्वरूपं गुरुनिर्वेदकत्वं च दृष्टान्तेमाह–

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

खलुंके जो उ जोएइ विहम्माणो किलिस्सई ।
असमाहिं च वेएइ तोत्तओ य से भज्जई ॥३॥

व्याख्या—खलुङ्कान् गलिवृषभान् **यो**ऽनिर्दिष्टस्वरूपः 'तुर्विशेषणे' **योजयति** योक्त्रयति 'वहने' इति प्रक्रमः । स किम् ? इत्याह—'विहम्माणो' त्ति **विशेषण घ्नंस्ताडयन्** **क्लिश्यत** **एवासमाधिं च** चित्तोद्वेगं **वेदयते**ऽनुभवति **तोत्रकः** प्राजनकः 'से' **तस्य** खलुङ्कयोजयितु**र्भज्यते**ऽतिताडनाद् भङ्गमाप्नोति ॥३॥

ततश्चातिरुष्टः स यत् कुरुते, तदाह—

एगं डसइ पुच्छंमि एगं विंधइऽभिक्खणं ।
एगो भंजइ समिलं एगो उप्पहपट्ठिओ ॥४॥

व्याख्या—एकं दशति दशनैर्भक्षयति **पुच्छे, एकमन्यं** गलिं **विध्यति** प्राजनकारया तुदति 'उपलक्षणादश्लीलमशोभनं भाषते, क्रुध्यति च' **अभीक्ष्णं** पुनः पुनः । अथ किमेते कुर्वन्ति ? येन योजयितुरेवं निर्वेदहेतव इत्याह—**एकः** कश्चित् खलुङ्को गौ**र्भनक्ति समिलां** युगरन्ध्रकीलिका**मेको**ऽन्य **उत्पथमु**न्मार्गं **प्रस्थितो** 'भवतीति गम्यते' ॥४॥

तथा—

एगो पडइ पासेणं निवेसइ निवज्जई ।
उक्कुद्दइ उप्फिडई सढे बालगवी वए ॥५॥
माई मुद्धेण पडइ कुद्धे गच्छइ पडिपहं ।
मयलक्खेण चिट्ठाई वेगेण य पहावई ॥६॥
छिन्नाले छिंदई सिल्लिं दुद्दंते भंजई जुगं ।
से वि य सुस्सुयाइत्ता उज्जुहित्ता पलायई ॥७॥

आसां व्याख्या—एकः पतति पार्श्वेनैकाङ्गविभागेन 'भूमाविति गम्यम्', अन्यस्तु 'निवेसइ' त्ति **निविशते** उपविशति, अपरश्च 'निवज्जई' त्ति **स्वपिति,** अपर **उत्कूर्दते** ऊर्ध्वं गच्छति, 'उप्फिडइ' त्ति मण्डूकव**दुत्प्लवतेऽन्यः, शठः** शाठ्यवानन्यो 'बालगवी वए' त्ति **बालगवीं** तरुणां गां **व्रजेत्** तदभिमुखं धावेदित्यर्थः ॥ **मायी** मायावानन्यः **मूर्ध्ना** मस्तकेन **पतत्ये**को 'भुवीति गम्यम्', **क्रुद्धः** सन् **गच्छति प्रतिपथम**न्यः पश्चाद् वलतीत्यर्थः, **मृतलक्ष्येण** मृतमिषेण **तिष्ठत्या**स्ते चान्यः, कथञ्चित् प्रगुणीकृतो **वेगेन प्रधावति** यथाऽन्यो गन्तुं न शक्नोति तथा यातीत्यर्थः ॥ **छिन्नालो** दुष्टजातिः कश्चित् गौः **छिनत्ति** 'सिल्लिं' ति **रश्मिं** बन्धनरज्जुमित्यर्थः, अन्यो दुर्दान्तो गौः **भनक्ति युगं** झूसरं,

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सोऽपि च तं भङ्क्त्वा 'सुस्सुयाइत्त' त्ति **सूत्कारान् कृत्वा** 'उज्जुहित्त' त्ति **प्रेर्य** स्वामिनं शकटं वा **पलायते**ऽन्यतो धावतीति गाथात्रयार्थः ॥५-६-७॥

इत्थं दृष्टान्तमुक्त्वा दार्ष्टान्तिकयोजनामाह—

खलुंका जारिसा जोज्जा दुस्सीसा वि हु तारिसा ।
जोइया धम्मजाणंमि भज्जंती धिइदुब्बला ॥८॥

व्याख्या—खलुङ्का उक्तरूपा **यादृशा गावो योज्या** घटनीया **दुःशिष्या अपि तादृशा एव** । यथा हि खलुका गावः स्वस्वामिनं क्लामयन्ति, असमाधिं च प्रापयन्ति एवमेतेऽपि गुरुमिति । एवं च कुतः ? इत्याह—यतो गुरुणा दुःशिष्या **योजिता** व्यापारिताः क्व ? **धर्मयाने** मुक्तिपुरप्रापकत्वेन धर्मवहने **भज्यन्ते** न सम्यक् प्रवर्तन्ते 'धिइदुब्बल' त्ति 'प्राकृतत्वाद्' **दुर्बलधृतयः** 'धर्मं प्रतीति गम्यम्' ॥८॥

धृतिदुर्बलत्वमेव भावयति—

इड्ढीगारविए एगे एगित्थ रसगारवे ।
सायागारविए एगे एगे सुचिरकोहणे ॥९॥
भिक्खालसिए एगे एगे ओमाणभीरुए ।
थद्धे एगं च अणुसासंमी हेऊहिं कारणेहि य ॥१०॥

अनयोर्व्याख्या—ऋद्ध्या गौरवं समृद्धाः श्राद्धा मे वश्याः, सम्पद्यते च यथेप्सितमित्यात्मबहुमानरूपमयस्यास्तीति **ऋद्धिगौरविक एकः** । **एकोऽत्र** दुःशिष्याधिकारे रसेषु मधुरादिषु गौरवं गार्ध्यं यस्यासौ **रसगौरविको** बालाद्याहारदाने तपसि च न प्रवर्तते । साते सुखे गौरवं प्रतिबन्धस्तदस्यास्तीति **सातगौरविक एकः,** सुखप्रतिबुद्धो हि नाप्रतिबद्धविहारे प्रवर्तते । एकः **सुचिरक्रोधनो** दीर्घरोषतयैव प्रवृत्तत्वात् ॥ भिक्षाया-मालस्यिक आलस्यवान् **भिक्षालस्यिक एको** विहर्तुं नेच्छति । **एकोऽपमानभीरु**र्भिक्षां भ्रमन्नपि न यस्य तस्य गृहे प्रविशति । **स्तब्धो**ऽहङ्कारवान् न स्वकदाग्रहात् कस्यापि नमयितुं शक्यः 'एक इति योज्यम्' । **एकं च** दुःशिष्यं 'अणुसासंमि' त्ति **अनुशास्मि** शिक्षां दद्मि **हेतुभिः कारणैश्चो**क्तरूपैरिति चिन्तयित्वा ह्याचार्य आत्मनः समाधिं प्रतिसन्धत्त इति गम्यते । इति गाथाद्वयार्थः ॥९-१०॥

सा चानुशिष्यमाणः परं किं कुरुते ? इत्याह—

सो वि अंतरभासिल्लो दोसमेव पकुव्वई ।
आयरियाणं तं वयणं पडिकूलेइ अभिक्खणं ॥११॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—सोऽपि दुःशिष्योऽ**न्तरभाषावान्** गुरुवचनान्तराले एव स्वाभिमतभाषको **दोषमेवा**पराधमेव **प्रकरोति** न त्वनुशिष्यमाणोऽपि दोषविच्छेदमिति भावः । **आचार्याणाम्** 'उपलक्षणादुपाध्यायादीनां' **तदि**त्यनुशिष्ट्यभिधायकं **वचनं प्रतिकूलयति** विपरीतं करोति युक्तिभिर**भीक्ष्णं** पुनः पुनर्न त्वेकदेति भावः ॥११॥

यथा प्रतिकूलयति तथाऽऽह—

न सा ममं वियाणाइ न य सा मज्झ दाहिई ।
निग्गया होहिई मन्ने साहू अन्नोऽत्थ वच्चउ ॥१२॥

व्याख्या—न सा श्राविका **मां विजानाति,** कोऽभिप्रायः ? गुरुभिः कदाचिदुक्तो भो आयुष्मन् ! ग्लानाद्यर्थममुकस्याः सकाशादमुकमौषधाद्यानय ततः स प्रतिकूलतया प्राह—न सा मां प्रत्यभिजानाति, **न च सा मह्यं दास्यति** तदिति, यदि वा **निर्गता** सा **भविष्यति** गृहादिति **मन्ये, अथवा साधुरन्योऽत्र** विवक्षितकार्ये **व्रजतु** किम् ? अहमेवैकः साधुरस्मीत्याद्यभिधत्ते ॥१२॥

अन्यच्च—

पेसिया पलिउंचिंति ते परियंति समंतओ ।
रायवेट्ठिं व मन्नंता करिंति भिउडिं मुहे ॥१३॥

व्याख्या—प्रेषिताः क्वचित् प्रयोजने प्रस्थापितास्तत्कार्यनिष्पादने पृष्टाः सन्तो 'पलिउंचिंति' त्ति **अपह्नुवते** क्व वयमुक्ताः ? गता वा तत्र वयं न तु सा दृष्टेति । 'परियंति' त्ति **पर्यटन्ति समन्ततः** सर्वासु दिक्षु न गुरुपार्श्वे कदाचिदासते मा कदाचिदेते कृत्यमादिशन्तीति, कथञ्चित् कर्तुं प्रवृत्तौ च **राजवेष्टिमिव मन्यमाना** मनस्यवधारयन्तः **कुर्वन्ति भृकुटीं** भ्रूक्षेपरूपां **मुखे** 'तदन्यवपुर्विकारोपलक्षणमिदम्' ॥१३॥

अपरं च—

वाइया संगहिया चेव भत्त-पाणे य पोसिया ।
जायपक्खा जहा हंसा पक्कमंति दिसो दिसिं ॥१४॥

व्याख्या—वाचिताः शास्त्राणि पाठिताः 'उपलक्षणादर्थं च ग्राहिताः' । **संग्रहीताः** परिग्रहे कृताश्चशब्दाद् दीक्षिता उपस्थापिताश्च 'स्वयमिति गम्यम्' । **भक्तपानेन च** स्निग्धमधुरादिना 'तृतीयाऽर्थेऽत्र सप्तमी' **पोषिता** उपचयं नीताः । तथा **जातपक्षा यथा हंसाः** प्रकर्षेण विप्रकृष्टदेशान्तरगमनलक्षणेन क्रामन्ति **प्रक्रामन्ति** प्रगच्छन्ति **दिशि दिशि** यदृच्छाविहारिणो भवन्तीत्यर्थः । प्रागेकप्रक्रमेऽपि यदिह वह्वभिधानं तदीदृशां भूयस्त्वख्यापनार्थम् ॥१४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इत्थं कुशिष्यस्वरूपं परिभाव्य तैरेव प्रापितक्लमासमाधिर्गुरुर्यदचेष्टत तदाह—

अह सारही व चिंतेइ खलुंकेहिं समागओ ।
किं मज्झ दुट्ठसीसेहिं अप्पा मे अवसीअई ॥१५॥

व्याख्या—अथ पूर्वोक्तचिन्ताऽनन्तरं सारथिरिव **सारथिः** 'धर्मयान इति प्रक्रमः' **गर्गा**चार्यो **विचिन्तयति** खलुङ्कैरिव **खलुङ्कैः शिष्यैः समागतः** सहितः । किं ? न **किञ्चिन्मम** 'ऐहिकमामुष्मिकं वा प्रयोजनं सिध्यतीति गम्यम्' **दुष्टशिष्यैः** 'प्रक्रमात् प्रेरितैः'। केवल**मात्मा** मे **ममावसीदति**, एतत्प्रेरणादिव्यग्रतया स्वकृत्यहानेस्तत एतत्त्यागाद् वरमुद्यतविहारेणैव विहृतमिति भावः ॥१५॥

अथैतत्प्रेरणाऽन्तराले स्वकृत्यमपि किं न क्रियते ? इत्याह—

जारिसा मम सीसा उ तारिसा गलिगद्दहा ।
गलिगद्दहे चइत्ताणं दढं पगिन्हई तवं ॥१६॥

व्याख्या—यादृशा मम शिष्याः 'तुः पूरणे' **तादृशा गलिगर्दभाः** 'यदि परमिति गम्यते' गर्दभग्रहणं कुत्साख्यापकम्, ते हि स्वरूपतोऽप्यतिप्रेरणयैव प्रवर्तन्ते ततस्तथैव कालो याति कुतस्तदन्तरालसम्भवः ? इति भावः । यतश्चैवमतो गलिगर्दभानिव **गलिगर्दभान्** दुःशिष्यांस्**त्यक्त्वा दृढं प्रगृह्णाति** स्वीकुरुते **गर्ग**नामाऽऽचार्य**स्तपो**ऽनशनादि ॥१६॥

ततः किमसौ कुरुते ? इत्याह—

मिउ मद्दवसंपन्ने गंभीरे सुसमाहिए ।
विहरई महिं महप्पा सीलभूएण अप्पणा ॥१७॥ त्ति बेमि ॥

व्याख्या—मृदुर्बहिर्वृत्त्या विनयवान् **मार्दवसम्पन्नो**ऽन्तःकरणतोऽपि तादृगेव । तत एव **गम्भीरो**ऽलब्धमध्यः **सुसमाहितः** सुष्ठु समाधिवान् **विहरत्य**प्रतिबद्धविहारेण महीं पृथ्वीं **महात्मा** शीलं चारित्रं भूतः प्राप्तः **शीलभूतस्तेनात्मनो**पलक्षितः । यतः खलुङ्कतात्मनो गुरूणां चेहैव दोषहेतुरतस्तत्त्यागतोऽशठतैव सेव्येत्यध्ययनान्वयार्थः । **इति ब्रवीमी**ति पूर्ववत् ॥१७॥ ग्रं० ८४ अ० २६॥

इति श्रीकमलसंयमोपाध्यायविरचितायां सर्वार्थसिद्धौ श्रीउत्तराध्ययनटीकायां
सप्तविंशं खलुङ्कीयमध्ययनं समाप्तम् ॥२७॥

● ● ●

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अष्टाविंशं मोक्षमार्गीयमध्ययनम्

अथानन्तराध्ययनोक्ताऽशठताव्यवस्थितस्य मोक्षमार्गगतिप्राप्तिरिति तदभिधायकमिदमष्टाविंशमध्ययनमारभ्यते—

मोक्खमग्गगइं तच्चं सुणेह जिणभासियं ।
चउकारणसंजुत्तं नाण-दंसणलक्खणं ॥१॥

व्याख्या—मोक्षोऽष्टकर्मोच्छेदस्तस्य मार्गो ज्ञानादिस्तेन गतिः सिद्धिगमनरूपा **मोक्षमार्गगतिस्तां** 'कथ्यमानामिति गम्यम्' 'तच्चं' ति **तथ्यां** सत्यां **शृणुत जिनभाषिताम्** । चत्वारि कारणानि वक्ष्यमाणलक्षणानि तैः संयुक्ता **चतुःकारणसंयुक्ता ताम्** । इह च चतुःकारणसाध्यस्य कर्मक्षयरूपमोक्षस्यानन्तरभाविन्या गतेश्चतुःकारणवतीत्वं व्यवहारतः, यतः 'कारणकारणस्यात्र कारणत्वाभिधानम्' अतोऽनन्तरकारणस्य मोक्षस्य कारणं मार्गस्तस्यापि मार्गस्य गतिकारणत्वमेतद्विशेषणेनोक्तम् । ननु मोक्षमार्गेण गतिरिति विग्रहेण मार्गस्य गतिकारणत्वमुक्तमेवेति किं पुनरनेन विशेषणेनेति चेन्नानन्तरकारणस्यैव कारणत्वमिति निश्चयनिराकरणार्थत्वादस्य । तथा **ज्ञान-दर्शने लक्षणं** चिह्नं यस्याः **सा** तथा **ताम्** । यस्य हि ज्ञान-दर्शनसत्ता तस्यावश्यं भाविनी सिद्धिगतिरिति निश्चीयते । एतयोश्चतुष्कारणान्तर्गत्वेऽपि मूलकारणतां दर्शयितुमित्थमुपन्यासः ॥१॥

मोक्षमार्गमाह—

नाणं च दंसणं चेव चरित्तं च तवो तहा ।
एस मग्गो त्ति पन्नत्तो जिणेहिं वरदंसिहिं ॥२॥

व्याख्या—**ज्ञानं** यथास्थितवस्तुतत्त्वावबोधरूपं तच्च सम्यग्ज्ञानमेव । **दर्शनं** सम्यग्दर्शनमेव । **चरित्रमपि** सम्यक्चारित्रमेव । **तपो** बाह्याभ्यन्तरभेदभिन्नं '**तथा च**ः समुच्चये' ततः समुदितान्येवैतानि मोक्षमार्गगतेः कारणम् । **एष** एव **मार्गः प्रज्ञप्तो** मुक्तिप्रापकत्वेन प्ररूपितो **जिनैर्वरम**व्यभिचारितया सर्वं वस्तु **द्रष्टुं शीलमेषां ते** तथा **तैः** ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इह चारित्रभेदत्वेऽपि तपसः पृथगुपादानं कर्मक्षपणं प्रत्यसाधारणहेतुत्वख्यापकम् ॥२॥

एतदनुवादद्वारेण फलमाह—

नाणं च दंसणं चेव चरित्तं च तवो तहा ।
एयं मग्गमणुप्पत्ता जीवा गच्छंति सोग्गइं ॥३॥

व्याख्या—पूर्वार्धं व्याख्यातमेव । **एतमुक्त**रूपं **मार्गमनुप्राप्ता** आश्रिता **जीवा गच्छन्ति सुगतिम**र्थाद् मुक्तिमिति ॥३॥

ज्ञानभेदानाह—

तत्थ पंचविहं नाणं सुयमाभिणिबोहियं ।
ओहिनाणं तइयं मणनाणं च केवलं ॥४॥

व्याख्या—तत्र ज्ञानादिषु मध्ये **पञ्चविधं** पञ्चप्रकारं **ज्ञानम्** । प्रकारानेवाह—**श्रुतमि**हाक्षरारूषितं भावश्रुतं गृह्यते । अभिमुखो नियतः स्वस्वविषयस्य बोधोऽभिनिबोधः स **एवाभिनिबोधिकम्** । अव इत्यधोऽधो विस्तृतविषयतया धावतीत्यवधिः, तदुपलक्षितं ज्ञानमप्यवधिः, ततोऽवधिश्चासौ ज्ञानं **चावधिज्ञानं** तृतीयम् । मनःशब्देन मनोद्रव्य-पर्यायास्तेषु तत्तत्संज्ञिविकल्पहेतुषु ज्ञानं **मनोज्ञानम्** । **केवलमे**कं सकलमनन्तं च ज्ञानं केवलज्ञानम् । किञ्च नन्द्यादिषु सूत्रेषु मतिज्ञानस्य पूर्वोक्तत्वेऽपि यदिहादितः श्रुतग्रहणं तच्छेषज्ञानस्वरूपावबोधस्य प्रायस्तदधीनत्वेन प्राधान्यख्यापनार्थमिति ॥४॥

अथैषां ज्ञेयविशेषसम्बद्धतामाह—

एयं पंचविहं नाणं दव्वाण य गुणाण य ।
पज्जवाणं च सव्वेसिं नाणं नाणीहिं देसियं ॥५॥

व्याख्या—एतत् पञ्चविधं ज्ञानं द्रव्याणां गुणानां पर्यवाणां च सर्वेषां ज्ञानमवबोधकं **ज्ञानिभिर**ऽर्थात् केवलिभि**र्देशितं** कथितमिति ॥५॥

द्रव्यादीनां लक्षणान्याह—

गुणाणमासओ दव्वं एगदव्वस्सिया गुणा ।
लक्खणं पज्जवाणं तु उभओ अस्सिया भवे ॥६॥

व्याख्या—गुणानामाश्रयो द्रव्यम्, अनेन रूपादय एव वस्तु न तदतिरिक्त-मन्यदिति **सौगत**मतमपास्तम् । तथैकस्मिन् द्रव्ये आधारभूते आश्रिताः स्थिता **एक-द्रव्याश्रिता गुणाः**, एतेन च ये द्रव्यमेवेच्छन्ति न तद्व्यतिरिक्तान् रूपादींस्तन्मतं

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

निराकृतम् । **लक्षणं पर्यवाणां 'तुर्विशेषणे' उभयोर्द्वयोर्द्रव्यगुणयोराश्रिताः** 'भवे' त्ति **भवेयुः**। तथा गुणेष्वपि नव—पुराणादिपर्यायाः प्रत्यक्षप्रतीता एव ॥६॥

द्रव्यस्य भेदानाह—

धम्मो अहम्मो आगासं कालो पुग्गल जंतवो ।
एस लोगो त्ति पन्नत्तो जिणेहिं वरदंसिहिं ॥७॥

व्याख्या—धर्म इति धर्मास्तिकायः । **अधर्म** इत्यधर्मास्तिकायः । **आकाशमि**त्याकाशास्तिकायः । **कालः** समयादिरूपः । **'पुग्गल'** त्ति पुद्गलास्तिकायः । **जन्तव** इति जीवास्तिकायः । 'एतानि द्रव्याणि इति शेषः' । **एष** इति सामान्यतो **लोक इती**त्येवंस्वरूपोऽनन्तरोक्तद्रव्यषट्कात्मको **देशितो जिनैर्वरदर्शिभि**रिति पूर्ववत् ॥७॥

धर्मादिभेदानाह—

धम्मो अहम्मो आगासं दव्वं इक्किक्कमाहियं ।
अणंताणि य दव्वाणि कालो पुग्गल जंतवो ॥८॥

व्याख्या—धर्म अधर्म आकाशं 'द्रव्यं' इति धर्मादिभिः प्रत्येकं योज्यन्ते । **एकैकमे**कसङ्ख्याया एवैतेषु भावा**दाख्यातम्** 'अर्हद्भिरिति गम्यते' । **अनन्तान्य**नन्तसङ्ख्यानि स्वगतभेदानन्त्याच्च कालादीनि **द्रव्याणि कालः पुद्गला जन्तवश्चो**क्तरूपाः । कालस्य चानन्त्यमतीताद्यपेक्षयेति ॥८॥

एषां लक्षणभेदानाह—

गइलक्खणो उ धम्मो अहम्मो ठाणलक्खणो ।
भायणं सव्वदव्वाणं नहं ओगाहलक्खणं ॥९॥

व्याख्या—गमनं गतिर्देशान्तरप्राप्तिर्लक्ष्यतेऽनेनेति लक्षणं ततश्च सा गतिर्लक्षणमस्येति **गतिलक्षणस्तु धर्मो** धर्मास्तिकायः । तथा **अधर्मः** अधर्मास्तिकायः स्थितिः स्थानं गतिनिवृत्तिरित्यर्थस्तल्लक्षणमस्येति **स्थानलक्षणः**, स्थितिपरिणतानां जीवपुद्गलानां स्थितिलक्षणकार्येण लक्ष्यते । **भाजनमाधारः सर्वद्रव्याणां** जीवादीनां **नभ** आकाशमवगाहः अवकाशः स लक्षणमस्ये**त्यवगाहलक्षणम्,** तच्चावगाढुं प्रवृत्तानामालम्बनीभवत्यनेनावगाहकारणत्वं नभस इति ॥९॥

वत्तणालक्खणो कालो जीवो उवओगलक्खणो ।
नाणेणं दंसणेणं च सुहेण य दुहेण य ॥१०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—वर्तन्ते भवन्ति भावास्तेन तेन रूपेण तान् प्रति प्रयोजकत्वं वर्तना सा लक्षणमस्येति **वर्तनालक्षणः** कः **कालः** ? सर्वथा वर्तनया लक्ष्यमाणत्वादस्ति काल इति भावः । **जीव** उपयोगो मतिज्ञानादि लक्षणं रूपमस्यासा**वुपयोगलक्षणो**ऽत एव **ज्ञानेन** विशेषग्राहिणा, **दर्शनेन** च सामान्यविषयेण, **सुखेन दुःखेन च** 'लक्ष्यते इति गम्यते' । न हि ज्ञानादीन्यजीवेषु कदाचिदुपलभ्यन्त इति ॥१०॥

जीवस्यैव लक्षणमनूद्य लक्षणान्तरमाह—

नाणं च दंसणं चेव चरितं च तवो तहा ।
वीरियं उवओगो य एयं जीवस्स लक्खणं ॥११॥

व्याख्या—स्पष्टा । नवरं **वीर्यं** वीर्यान्तरायक्षय—क्षयोपशमसमुत्थं सामर्थ्यम् । **उपयोगश्चा**वहितत्वम् । **एतत्** ज्ञानादि **जीवस्य लक्षणम्** । एतैर्हि जीवोऽनन्यसाधारणतया लक्ष्यते ॥११॥

पुद्गलानां लक्षणमाह—

सद्दंधयार उज्जोओ पहा छायातवे इ वा ।
वन्न-रस-गंध-फासा पुग्गलाणं तु लक्खणं ॥१२॥

व्याख्या—शब्दोऽन्धकारः 'उभयत्र सुपो लुप्' । **उद्योतो** रत्नादेः प्रकाशः । **प्रभा** चन्द्रादेः । **छाया** शैत्यगुणा । **आतपो** रवेरुष्णप्रकाशः '**इति**राद्यर्थस्ततश्च सम्बन्धभेदादीनां परिग्रहः, **वा** समुच्चये' **वर्ण-गन्ध-रस-स्पर्शास्तु** पुनः **पुद्गलानां लक्षणम्** । एभिरेव तेषां लक्ष्यत्वात् ॥१२॥

पर्यायलक्षणमाह—

एगत्तं च पुहत्तं च संखा संठाणमेव य ।
संजोगा य विभागा य पज्जवाण तु लक्खणं ॥१३॥

व्याख्या—एकस्य भाव **एकत्वम्**, भिन्नेष्वपि परमाण्वादिषु यकेदोऽयं घटादिरिति प्रतीतिहेतुः । '**च**शब्द उत्तरापेक्षया समुच्चयार्थः' । **पृथक्त्वं** चायमस्मात् पृथगिति प्रत्ययहेतुः । **सङ्ख्या** एको द्वौ वेत्यादिरूपा । **संस्थानं** परिमण्डलोऽयमित्यादिधी-निबन्धनम् '**एवेति** पूरणे' **संयोगा** अयमङ्गुल्योः संयोग इति व्यपदेशहेतवः । **विभागा-श्चा**यमितो विभक्त इति बुद्धिहेतवः । उभयत्र सम्बन्धिभेदापेक्षया बहुत्वम् '**च**शब्दो नव-पुराणाद्युपलक्षकः' । **पर्यवाणां** '**तुः** पूरणे' **लक्षणम**साधारणरूपम् । गुणानां रूपादि-रूपाणां पर्यवत्वमतिप्रतीतत्वान्नोक्तम् ॥१३॥

दर्शनं वक्तुमाह—

जीवाजीवा य बंधो य पुन्नं पावासवो तहा ।
संवरो निज्जरा मोक्खो संतेए तहिया नव ॥१४॥

व्याख्या—जीवाश्चैतन्यलक्षणाः । **अजीवा** धर्मास्तिकायादयः । **बन्धश्च** जीव—कर्मणोः संश्लेषः । **पुण्यं** शुभप्रकृतिरूपम् । **पापम**शुभं मिथ्यात्वादि । **आश्रवः** कर्मबन्धहेतुर्हिंसादिः । तथा **संवरो** गुप्त्यादिभिराश्रवनिरोधः । **निर्जरा** विपाकात् तपसो वा कर्मपरिशाटः । **मोक्षः** कृत्स्नकर्मक्षयात् स्वस्वरूपावस्थानम् । **सन्त्येते तथ्या** सत्या निरुपचरितवृत्तयो **नव**सङ्ख्याः 'भावा इति शेषः' । मध्यमापेक्षं चेदम् । जघन्यतो जीवाजीवयोरेव बन्धादीनामन्तर्भावाद् द्विसङ्ख्यैव । उत्कृष्टतस्तु तदुत्तरोत्तरभेदविवक्षयानन्त्यमेव स्यादिति ॥१४॥

ततः किम् ? इत्याह—

तहियाणं तु भावाणं सब्भावे उवएसणं ।
भावेण सद्दहंतस्स सम्मत्तं तं वियाहियं ॥१५॥

व्याख्या—तथ्यानां तु भावानां जीवादिस्वरूपाणां **सद्भावे** सद्भावविषयमवितथ–सत्ताऽभिधायक**मुपदेशनं** गुर्वाद्युपदेशं **भावेन** मनसा **श्रद्दधतस्त**थेति प्रतिपद्यमानस्य सम्यग् भावः **सम्यक्त्वं** दर्शनमित्यर्थः । **तदि**ति भावश्रद्धानं मोहनीयकर्माणुक्षयक्षयोप–शमसमुत्थात्मपरिणामरूपं **विशेषेणाख्यातं** कथितम् 'अर्हदादिभिरिति गम्यम्' ॥१५॥

सम्यक्त्वभेदानाह—

निसग्गुवएसरुई आणारुई सुत्त-बीयरुइमेव ।
अभिगम-वित्थाररुई किरिया-संखेव-धम्मरुई ॥१६॥

व्याख्या—रुचिशब्दः प्रत्येकं योज्यते । **निसर्गः** स्वभावस्तेन रुचिरभिलाषरूपा–ऽस्येति **निसर्गरुचिः** । उपदेशेन गुर्वादिवचनेन रुचिरस्येत्यु**पदेशरुचिः । आज्ञया** सर्वज्ञवचोरूपया **रुचिरस्य स** तथा । सूत्रेणागमेन रुचिरस्य **सूत्ररुचिः** । बीजमिव बीजं यदेकमप्यनेकार्थबोधकं वचस्तेन रुचिर्यस्य स **बीजरुचिः** 'अनयोर्द्वन्द्वे रुचिशब्दोऽपि योज्यः' 'एवेति समुच्चये' । अभिगमो ज्ञानं विस्तारो व्यासस्ताभ्यां प्रत्येकं रुचिशब्द–योजनाद**भिगमरुचिर्विस्ताररुचिश्चे**ति । तथा क्रिया धर्मानुष्ठानं, संक्षेपः संग्रहः, धर्मः श्रुतधर्मादिः, तेषु रुचिरस्येति प्रत्येकं रुचिशब्दसम्बन्धात् **क्रियारुचिः, संक्षेपरुचि–धर्मरुचिश्चे**ति 'विज्ञेय इति शेषः' । इह सम्यक्त्वस्य जीवानन्यत्वेन यदभिधानं गुण–गुणिनोः कथञ्चिदभेदख्यापनार्थमिति संक्षेपार्थः ॥१६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्यासार्थमाह—

भूयत्थेणाहिगया जीवाजीवा य पुन्न-पावं च ।
सहसंमइयासव-संवरे य रोएइ उ निसग्गो ॥१७॥

व्याख्या—भूतः सद्भूतः सत्योऽर्थो विषयो यस्य तद् **भूतार्थं** 'ज्ञानमिति गम्यते' **तेन** सद्भूता अमी अर्था इत्येवं रूपे**णाधिगताः** परिच्छिन्नाः 'येनेति गम्यते' । **जीवा-जीवाश्च पुण्य—पापं च** । कथमधिगताः ? इत्याह—'सहसंमइय' त्ति 'सोपस्कारत्वात्' सहात्मना सङ्गता मतिः **सहसम्मतिः** कोऽर्थः ? परोपदेशनिरपेक्षा जातिस्मरण—प्रतिभादिरूपा बुद्धिः **सहसम्मतिस्तया आश्रव—संवरौ** '**च**शब्दाद् बन्धादिपरिग्रहः, **तु**रेवार्थे' **रोचत एव** श्रद्धत्ते एव योऽधिगतानन्तरोक्तान् जीवादीनेव स **निसर्गरुचिः** 'ज्ञेय इति शेषः' ॥१७॥

अमुमेवार्थं पुनः स्पष्टन्नाह—

जो जिणदिट्ठे भावे चउव्विहे सद्दहइ सयमेव ।
एमेव नन्नह त्ति य स निसग्गरुइ त्ति नायव्वो ॥१८॥

व्याख्या—यो जिनदृष्टानर्हदुपदिष्टान् **भावान्** जीवादींश्**चतुर्विधान्** द्रव्य-क्षेत्र-काल-भावभेदतो नामादिभेदतो वा चतुष्प्रकारान् **श्रद्दधाति** तथेति प्रतिपद्यते **स्वयमेवा**न्योपदेशं विना । श्रद्धानमेवोल्लेखयति 'एमेव' त्ति **एवमेतद्** यथा जिनैर्दृष्टं जीवादि **नान्यथेति** '**च**: समुच्चये' **स निसर्गरुचि**रिति **ज्ञातव्यः** ॥१८॥

उपदेशरुचिमाह—

एए चेव उ भावे उवइट्ठे जो परेण सद्दहई ।
छउमत्थेण जिणेण व उवएसरुइ त्ति नायव्वो ॥१९॥

व्याख्या—एतांश्चैव '**तुः** पूरणे' **भावान्** जीवादीनु**पदिष्टान् परेणा**न्येन **श्रद्दधाति,** कीदृशेन परेण ? **छद्मस्थेना**नुत्पन्नकेवलेन **जिनेन वो**त्पन्नकेवलज्ञानेनार्हदादिना स **उपदेशरुचि**रिति **ज्ञातव्यः** ॥१९॥

आज्ञारुचिमाह—

रागो दोसो मोहो अन्नाणं जस्स अवगयं होइ ।
आणाए रोयंतो सो खलु आणारुई नाम ॥२०॥

व्याख्या—रागोऽभिष्वङ्गो **द्वेषो**ऽप्रीतिर्**मोहः** शेषमोहनीयप्रकृतयो**ऽज्ञानं** मिथ्या-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ज्ञानरूपं **यस्यापगतं** नष्टं **भवति** 'सर्वथास्यैतदपगमासम्भवाद् देशत इति गम्यते' 'अपगतशब्दो रागादिभिः प्रत्येकं सम्बध्यते'। एतदपगमाच्च 'आणाए रोयंतो' त्ति **आज्ञया**चार्यादिसम्बन्धिन्या **रोचमान**स्तथेति प्रतिपद्यमानो जीवादि **माषतुषादि**वत् **स** '**खलु**र्निश्चये' **आज्ञारुचिः** '**नामे**त्यभ्युपगमे ज्ञेयः'। अत्र दृष्टान्तः—

भन्दकन्दवसन्ताभे श्री**वसन्तपुरे**ऽभवत्।
धर्मघोषगुरोः शिष्यः शिक्षाद्वयसुशिक्षितः ॥१॥

तप्यमानस्तपस्तीव्रं व्रतकर्मसु कर्मठः।
योगोद्वहनपूर्वं सोऽधीयानः श्रुतमादरात् ॥२॥

अन्येद्युरुदयात् ज्ञानावरणीयस्य कर्मणः।
एकमप्यक्षरं नागात् प्राक्कृतस्याशुभायतेः ॥३॥

नित्यं पुनः पुनस्तस्य समुद्घोषयतः श्रुतम्।
सुगुरूनाह किं कुर्वे सर्वेऽप्युपहसन्ति माम् ॥४॥

गुरुणोचे महाभाग ! मा रुषो मा तुषश्च भोः !।
एतदेव पदं शश्वत् त्वमुद्घोषय भावतः ॥५॥

प्रमाणं मेऽस्तु गुर्वाज्ञा गुरूक्तं तत्पदं पठन्।
गुरूदितपदस्थाने मौग्ध्यान्मा तुषेत्यवक् ॥६॥

प्राख्यद् गुरुः पुनर्भद्र ! मा रुषेत्यादिकं पठ।
तत्कर्मदोषतो माषेत्याद्येव स पठेन्मुहुः ॥७॥

आज्ञाश्रद्धः स सद्ध्यानो माषेत्यादि पठन् मुहुः।
केवलं प्राप्य संक्षीणकृत्स्नकर्माऽऽप निर्वृतिम् ॥८॥

इत्याज्ञारुचौ **माषतुष**मुनिकथा ॥२०॥

सूत्ररुचिमाह—

जो सुत्तमहिज्जंतो सुएण उगाहई उ सम्मत्तं।
अंगेण बाहिरेण व सो सुत्तरुइ त्ति नायव्वो ॥२१॥

व्याख्या—यः सूत्रमागममधीयानः पठन् **श्रुतेना**ऽधीयमानेना**ऽवगाहते** प्राप्नोति 'तुः पूरणे' **सम्यक्त्वम्। अङ्गेनाचारादिना बाह्येन वा**ऽनङ्गप्रविष्टेनो**त्तराध्ययनादिना** वा **स** गोविन्दवाचकवत् **सूत्ररुचिर्ज्ञातव्यः** ॥२१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

बीजरुचिमाह—

एगेण अणेगाइं पयाइं जो पसरई उ सम्मत्तं ।
उदए व्व तेल्लबिंदू सो बीयरुइ त्ति नायव्वो ॥२२॥

व्याख्या—एकेन 'प्रक्रमात् पदेन' जीवादिना 'सुब्व्यत्ययात्' **अनेकेषु** बहुषु पदेषु जीवादिषु 'तुरेवार्थे' **यः प्रसरत्येव** व्यापकबुद्धितया 'सम्मत्तं' त्ति अभेदोपचारात् **सम्यक्त्ववान्** । क्व क इव ? **उदक इव तैलबिन्दुर्**यथोदकैकदेशगतोऽपि तैलबिन्दुः सर्वमुदकमाक्रामति तथा तत्त्वैकदेशोत्पन्नरुचिरप्यात्मा तथाविधक्षयोपशमादशेषतत्त्वेषु रुचिमान् भवति । **स** एवंविधो **बीजरुचिर्ज्ञातव्यो** यथा ह्येकमपि बीजं क्रमेणानेकबीजानां जनकमेवमस्यापि रुचिर्विषयभेदतो रुच्यन्तराणामिति ॥२२॥

अभिगमरुचिमाह—

सो होइ अभिगमरुई सुअनाणं जेण अत्थओ दिट्ठं ।
एक्कारसमंगाइं पइन्नगं दिट्ठिवाओ य ॥२३॥

व्याख्या—स भवत्यभिगमरुचिः **श्रुतज्ञानं येनार्थत** इति 'क्यब्लोपे पञ्चमी' ततोऽर्थोऽभिधेयस्**त**माश्रित्य **दृष्टमु**पलब्धं । को भावः ? येन श्रुतज्ञानस्यार्थोऽधिगतो भवति । किं ततः श्रुतज्ञानम् ? इत्याह—**एकादशाङ्गान्याचाराङ्गादीनि । प्रकीर्णक**मिति जातावेकत्वम् । ततः प्रकीर्णकान्**युत्तराध्ययनादीनि । दृष्टिवाद**ः परिकर्मसूत्रादिः '**चशब्दादु**पाङ्गा**न्यौपपातिकादीनि**' ॥२३॥

विस्ताररुचिमाह—

दव्वाण सव्वभावा सव्वपमाणेहिं जस्स उवलद्धा ।
सव्वाहिं नयविहीहि य वित्थाररुइ त्ति नायव्वो ॥२४॥

व्याख्या—द्रव्याणां धर्मास्तिकायादीनां **सर्वभावा** एकत्वपृथक्त्वाद्यशेषपर्यायाः **सर्वप्रमाणैः** प्रत्यक्षादिभि**र्यस्योपलब्धाः** 'सव्वाहिं' ति **सर्वैर्नयविधिभि**र्नैगमादिभेदैः **स विस्ताररुचिरिति ज्ञातव्यः** ॥२४॥

क्रियारुचिमाह—

दंसण-नाण-चरित्ते तव-विणए सच्चसमिइ-गुत्तीसु ।
जो किरियाभावरुई सो खलु किरियारुई नाम ॥२५॥

व्याख्या—दर्शन-ज्ञान-चारित्रे, तपो-विनये, सत्या निरुपचरिता याः **समिति—**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

गुप्तयस्तासु, यः क्रियाभावरुचिः को भावः ? दर्शनाद्याचारानुष्ठाने यस्य भावतो रुचिरस्ति **स खलु क्रियारुचिर्नामे**ति प्रकाशभणने । इह चारित्रान्तर्गतत्वेऽपि तपःप्रभृतीनां विशेषतो मुक्त्यङ्गत्वख्यापनार्थं पुनरभिधानम् ॥२५॥

सङ्क्षेपरुचिमाह—

अणभिग्गहियकुदिट्ठी संखेवरुइ त्ति होइ नायव्वो ।
अविसारओ पवयणे अणभिग्गहिओ य सेसेसु ॥२६॥

व्याख्या—अनभिगृहीताऽनङ्गीकृता **कुदृष्टिः** सौगतमतादिरूपा येन स तथा **सङ्क्षेपरुचिरिति भवति ज्ञातव्यः । अविशारदो**ऽकुशलः **प्रवचने** सर्वज्ञशासने, अविद्यमानमभीत्याभिमुख्येन गृहीतं ग्रहणं ज्ञानमस्ये**त्यनभिगृहीतो**ऽनभिज्ञ इत्यर्थः । क्व ? इत्याह—**शेषेषु कपिलादि**मतेषु । अयं भावो य उक्तविशेषणः सङ्क्षेपेणैव **चिलातीपुत्र**-वदुपशमादिपदत्रयेण तत्त्वरुचिमाप्नोति स सङ्क्षेपरुचिरिति । अत्र दृष्टान्तः—

क्षितिप्रतिष्ठिते द्रङ्गे क्षमाभृत्साधुशालिनि ।
क्षितिप्रतिष्ठितद्विष्टक्षमाभृत्साधुमालिनि ॥१॥

विज्ञंमन्यो **यज्ञदेवद्विजो** मिथ्यात्ववासितः ।
यज्ञे निन्दन् जिनान् जैनयतिना वादमातनोत् ॥२॥

जितस्य तस्य चादायि दीक्षा तेन महात्मना ।
स शिष्यो यो जितो जेतुर्भवितेति प्रतिज्ञया ॥३॥

सोऽथ शासनदेव्योचे भोः ! व्रतं चर भावतः ।
तेनैव सफलं तच्च तेजसेवाक्षियुग्मकम् ॥४॥

न सद्व्रतोऽप्यसौ साधुर्निन्दामन्तर्वसन् जहौ ।
शाड्वलोऽपीक्षुसक्तोऽपि निम्बः किं कटुतां त्यजेत् ? ॥५॥

तत्प्रेयसी प्रिये रागं नौज्झत् सद्वाग्भिरप्यलम् ।
कम्बलीवाब्दधाराभिः कृमिरागं सुरञ्जिता ॥६॥

ततः सा तं वशीकर्तुं व्यधात् कार्मणमुत्कटम् ।
वशा रक्ता विरक्ताऽपि वह्निज्वालेव तापयेत् ॥७॥

कार्मणेन क्रमात् सोऽथोष्णेनेव व्रततिव्रजः ।
सन्ततं शोष्यमाणाङ्गः स्वर्गलोकमवाप्तवान् ॥८॥

Jain Education International 2010_02   For Private & Personal Use Only   www.jainelibrary.org

तद्दुःखदुःखिता सापि व्रतं लात्वा दिवं ययौ ।
किन्त्वनालोच्य तत्पापं स्वकृतं पतिकष्टदम् ॥९॥

च्युत्वा **भूदेव**जीवोऽभूत् पुरे **राजगृहे** ततः ।
पुत्र**श्चिलातिका**चेट्या **धन**सार्थेशवेश्मनि ॥१०॥

भद्राया धनभार्याया द्विजजाया दिवश्च्युता ।
संसुमाऽऽख्या सुता जाता रूपादिगुणधारिणी ॥११॥

चिलातीपुत्रकश्चेटः श्रेष्ठिना बालहारकः ।
स्वपुत्र्या विहितः सोऽथ सा च रोदिति नित्यशः ॥१२॥

तदवाच्यप्रदेशे तु करस्पर्शं चकार सः ।
यदा चेटस्तदा साऽपि न्यवर्तत सुरोदनात् ॥१३॥

तच्चिह्ने विक्रियां कुर्वन् स दृष्टः श्रेष्ठिनाऽन्यदा ।
पापीयानेष इत्युच्चैर्निरवासि गृहात् स्वकात् ॥१४॥

ततोऽगात् **सिंहपल्लीं** स मल्लीमिव मधुव्रतः ।
ततोऽस्थापि स्वपट्टे स्नाक् पल्लीशेन मुमूर्षुणा ॥१५॥

भिल्लानुवाच सोऽन्येद्युर्मुष्णीमो धनमन्दिरम् ।
द्रव्यं वः संसुमा कन्या मम **राजगृहे** पुरे ॥१६॥

निश्योकस्तेषु मुष्णत्सु निलीयास्थात् **धनो** रहः ।
पञ्चभिः सूनुभिर्मुह्यन् देहे देहीन्द्रियैरिव ॥१७॥

पल्लीशः **संसुमां** लात्वा चौराश्च द्रविणं गताः ।
पुरारक्षैः सुतां नेतुमन्वगात् ससुतो धनः ॥१८॥

चौरान् जित्वा न्यवर्तन्त तलारक्षाः पुरं प्रति ।
धनोऽन्वधावत् ससुतो नयन्तं **संसुमां** तु तम् ॥१९॥

यावन्मिलत्यसौ तावत् पल्लीशः **संसुमा**शिरः ।
पद्मनालमिव च्छित्त्वा काकनाशं ननाश सः ॥२०॥

आकृष्टासिररण्यं स प्राविशत् **संसुमा**मुखम् ।
करस्थं रागतः पश्यन् सशम्बल इवाध्वगः ॥२१॥

धनः पुत्र्याः कबन्धं स दृष्ट्वा शोकार्दितोऽरुदत् ।
ससुतो ववले दैवं निन्दन् **राजगृहं** प्रति ॥२२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

क्रमात् प्रापाटवीं श्रेष्ठी क्षुत्-तुट्-शोक-श्रमातपैः ।
पञ्चाग्निसाधक इवातेपे च सुतसंयुतः ॥२३॥

न खाद्यं नैव पेयं च न तस्यां जीवनौषधम् ।
पश्यन् हिंस्रादिजीवेभ्यो मृत्यूपायं च केवलम् ॥२४॥

आत्मनस्तनयानां च स दृष्ट्वा विषमां दशाम् ।
गच्छन् विचिन्तयेदेवं चित्ते दैवविजृम्भितम् ॥२५॥

"यत् सुताऽपहृताऽनेन प्रापिता वयमापदम् ।
करस्थं नाशयत्येवं बलीयान् विधिरुच्चकैः ॥२६॥

प्रसाद्यते न दानेन विनयेन न गृह्यते ।
सेवयाऽऽवर्ज्यते नैव केयं दुःसाध्यता विधेः ? ॥२७॥

विबुधैर्बोध्यते नैव बलवद्भिर्न रुध्यते ।
न साध्यते तपस्यद्भिः प्रतिमल्लोऽस्तु को विधेः ? ॥२८॥

अहो ! दैवं मित्रमिव कदाचिदनुकम्पते ।
कदाचित् परिपन्थीव निःशङ्कं प्रणिहन्ति च ॥२९॥

विधिः पितेव सर्वत्र कदाचित् परिरक्षति ।
कदाचित् पीड्यत्येव दायाद इव दुर्मदः ॥३०॥

अनुकूले विधौ पुंसां विषमप्यमृतायते ।
विपरीते पुनस्तत्रामृतमेव विषायते" ॥३१॥

स एवं चिन्त्यन्नेव सम्प्राप निजमन्दिरम् ।
सशोकः **सुंसुमा**पुत्र्या विदधे चौर्ध्वदेहिकम् ॥३२॥

संसारानित्यतां श्रेष्ठी विरागार्हो विभावयन् ।
श्री**वीरा**न्ते परिव्रज्य तपस्तप्त्वाऽगमद् दिवम् ॥३३॥

चैलातेयः पुरो गच्छन् पश्चात्तापपरः पथि ।
ध्यानलीनं मुनिं कञ्चित् कायोत्सर्गस्थमैक्षत ॥३४॥

क्रूराकृतिः क्रूरकर्मा स उवाच महामुने ! ।
सङ्क्षेपाद् धर्ममाचक्ष्व न चेच्छेत्स्यामि ते शिरः ॥३५॥

"योग्यं मत्वा मुनिः प्राहोपशमः कार्य एव भोः ! ।
विवेकः संवरश्चैते कृतपातकघातकाः" ॥३६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इत्युक्त्वोत्पतिते साधौ मन्त्रवत् तत् पदत्रयम् ।
ध्यायतस्तस्य तस्यार्थो जागरूकोऽभवद् हृदि ॥३७॥

"क्रोधत्यागो ह्युपशमो हेयोपादेयबोधकः ।
विवेकः संवरस्तु स्यात् संवृतेन्द्रियचित्तता" ॥३८॥

इत्थं पदत्रयस्यार्थं भावयन् शुभभावतः ।
एकान्तेऽस्थात् प्रतिमया मुक्तशीर्षाऽसिसङ्ग्रहः ॥३९॥

सूचिमुख्योऽसृजो गन्धात् तत्र प्राप्ताः पिपीलिकाः ।
व्यधुर्रतिविधायिन्यस्तद्वपुश्चालिनीनिभम् ॥४०॥

दुष्कर्मनिर्गमद्वारकर्तृत्वेनोपकारिकाः ।
ममैताः कीटिका एवं शुद्धध्यानं बभार सः ॥४१॥

पिपीलिकाकृतां पीडां सहमानोऽद्रिनिश्चलः ।
स्वः सौख्यमाप सद्ध्यानः सार्धाहर्युगलेन सः ॥४२॥

इति सङ्क्षेपरुचौ **चिलातीपुत्र**कथा ॥२६॥

धर्मरुचिमाह—

जो अत्थिकायधम्मं सुयधम्मं खलु चरित्तधम्मं च ।
सद्दहइ जिणाभिहियं सो धम्मरुइ त्ति नायव्वो ॥२७॥

व्याख्या—योऽस्तिकायानां धर्मादीनां धर्मो गत्युपष्टम्भादिर**स्तिकायधर्मस्तम्** 'जातावेकचनम्', **श्रुतधर्ममङ्गप्रविष्टादि**रूपम्, **'खलु**रलङ्कारे' **चारित्रधर्मं वा** सामायिकादि 'चस्य वार्थत्वात्', **श्रद्दधाति** तथेति प्रतिपद्यते **जिनाभिहितं स धर्मरुचिरिति ज्ञातव्यः** । शिष्यमतिव्युत्पत्त्यर्थं चेत्थं सम्यक्त्वभेदाभिधानम्, अन्यथा हि निसर्गोपदेशयोरधिगमादौ वा क्वचित् केषाञ्चिदन्तर्भाव इति भावः ॥२७॥

सम्यक्त्वलिङ्गानाह—

परमत्थसंथवो वा सुदिट्ठपरमत्थसेवणा वा वि ।
वावन्नकुदंसणवज्जणा य सम्मत्तसद्दहणा ॥२८॥

व्याख्या—परमार्था जीवादयस्तेषु संस्तवो गुणोत्कीर्तनम्, तत्स्वरूपपरिभावनाजनित परिचयो वा **परमार्थसंस्तवः** । तथा सुष्ठु यथावद्दर्शितया दृष्टाः परमार्था जीवादयो यैस्ते **सुदृष्टपरमार्था** आचार्यादयस्तेषां **सेवनम्** '**वा**शब्दाद् यथाशक्ति तद्वैयावृत्यप्रवृत्तिश्च, **अपिः**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

समुच्चये' । 'दर्शनशब्दः प्रत्येकमभिसम्बध्यते' व्यापन्नं विनष्टं दर्शनं येषां ते व्यापन्नदर्शनास्ताहक्कर्मोदयाद् वान्तसम्यक्त्वा निह्नवादयः तथा कुदर्शनाः शाक्यादयस्तेषां वर्जनं परिहारो **व्यापन्नकुदर्शनवर्जनम्** 'सर्वत्र सूत्रत्वात् स्त्रीत्वम्, **चः** समुच्चये' **सम्यक्त्वं** श्रद्धीयते—अस्तीति प्रतिपद्यतेऽनेनेति **श्रद्धानं** सम्यक्त्वलिङ्गमित्यर्थः ॥२८॥

सम्यक्त्वमाहात्म्यमाह—

नत्थि चरित्तं सम्मत्तविहूणं दंसणे उ भइयव्वं ।
सम्मत्त-चरित्ताइं जुगवं पुव्वं व सम्मत्तं ॥२९॥

व्याख्या—नास्ति न विद्यते 'उपलक्षणत्वान्नासीन्न भविष्यति' **चारित्रं सम्यक्त्वविहीनम्** । को भावः ? यावन्न सम्यक्त्वोत्पादो न तावच्चारित्रम् । दर्शने तु सम्यक्त्वे सति पुनर्भक्तव्यं भजनीयं भवति वा न वा 'अर्थाच्चारित्रम्' । यतः **सम्यक्त्व—चारित्रे युगपदे**ककालं 'उत्पद्येते इति शेषः' । 'पुव्वं व' त्ति **पूर्वं वा** चारित्रोत्पादात् **सम्यक्त्वो**त्पत्तिः । ततो यदा युगपदुत्पादस्तदा तयोः सहभावः, यदा तु तथाविधक्षयोपशमाभावतो न तथोत्पादस्तदा सत्यपि सम्यक्त्वे न चारित्रमिति दर्शने भाज्यमिति ॥२९॥

अन्यच्च—

नादंसणिस्स नाणं नाणेण विणा न हुंति चरणगुणा ।
अगुणिस्स नत्थि मोक्खो नत्थि अमोक्खस्स निव्वाणं ॥३०॥

व्याख्या—नादर्शनिनो दर्शनरहितस्य **ज्ञानमिति** सम्यग्ज्ञानम् । **ज्ञानेन विना न भवन्ति चरणगुणाः**, अत्र चरणं व्रतादि, गुणाः पिण्डविशुद्ध्यादयः । **अगुणिनो**ऽविद्यमानगुणस्य 'चरणाविनाभावित्वाद् यथोक्तगुणानाम्' अविद्यमानचरणस्य च **नास्ति मोक्षः** कर्मक्षयलक्षणः । **नास्त्यमुक्तस्य** 'कर्मणेति गम्यते' **निर्वाणं** निर्वृतिर्मुक्तिपदप्राप्तिरित्यर्थः ॥३०॥

सम्यक्त्वस्याष्टाचारानाह—

निस्संकिय निक्कंखिय निव्वितिगिच्छा अमूढदिट्ठी य ।
उववूह-थिरीकरणे वच्छल्ल-पभावणे अट्ठ ॥३१॥

व्याख्या—निःशङ्कितं देशतः सर्वतश्च शङ्कारहितम् । **निष्काङ्क्षितं** शाक्याद्यन्यान्यदर्शनग्रहात्मककाङ्क्षारहितम् । विचिकित्सा फलं प्रति सन्देहो यथा किमियतः क्लेशस्य फलं स्यादुत नेति ? अथवा विदो विज्ञास्ते च तत्त्वतः साधव एव तज्जुगुप्सा यथा किममी यतयो मलदिग्धदेहाः ? प्रासुकजलस्नानेन हि कोऽत्र दोषः स्यादित्यादि

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

निन्दा तदभावो **निर्विचिकित्सं निर्विज्जुगुप्सं** वा 'आर्षत्वादेवं पाठः सूत्रे' । अमूढा ऋद्धि-मत्कुतीर्थिकदर्शनेऽप्यवगीतमस्मद्दर्शनमिति मोहरहिता दृष्टिर्बुद्धिरूपा **अमूढदृष्टिः** । अयं चतुर्विधोऽप्याचार आन्तर उक्तः । बाह्यं त्वाह-'उववूह' त्ति उपबृंहा दर्शनादिगुणवतां प्रशंसया तत्तद्गुणपरिवर्धनं सा च स्थिरीकरणं चाभ्युपगतधर्मानुष्ठानं प्रति सीदतां स्थैर्यापादन**मुपबृंहा-स्थिरीकरणे** । वात्सल्यं साधर्मिकजनस्य भक्त-पानाद्युचितप्रतिपत्तिकरणं तच्च प्रभावना च स्वतीर्थोन्नतिहेतुचेष्टासु प्रवर्तनात्मिका **वात्सल्य-प्रभावने** । **अष्टै**ते 'दर्शनाचाराः स्युरिति शेषः' । एतच्च ज्ञानाचाराद्युपलक्षकम्, यद्वा दर्शनस्यैव यदाचाराभिधानं तदस्यैवोक्तन्यायेन मोक्षमार्गमूलतासमर्थनार्थम् ॥३१॥

एवं ज्ञान-दर्शनाख्यं मुक्तिमार्गमुक्त्वा चारित्ररूपं तमेवाह-

सामाइय त्थ पढमं छेओवट्ठावणं भवे बीयं ।
परिहारविसुद्धीयं सुहुमं तह संपरायं च ॥३२॥

अकसायं अहक्खायं छउमत्थस्स जिणस्स वा ।
एयं चयरित्तकरं चारित्तं होइ आहियं ॥३३॥

अनयोर्व्याख्या-समो राग-द्वेषरहितः 'प्रस्तावाच्चित्तपरिणामः' तस्मिन्नायो गमनं समायो यद्वा समानां ज्ञान-दर्शन-चारित्राणामायो लाभः समायः स एव सामायिकं सर्वसावद्यविरतिरूपम् 'यद्यपि सर्वमपि चारित्रमविशेषतः सामायिकं तथापि च्छेदादिविशेषैर्विशेष्यमाणमर्थतः शब्दान्तरतश्च नानात्वं भजते' प्रथमं पुनरविशेषणात् सामान्यशब्द एवावतिष्ठते । एतच्च द्विधा इत्वरं यावत्कथिकं च । तत्रेत्वरमल्पकालं भरतैरावताद्यान्त्यार्हत्तीर्थयोरुपस्थापनायां छेदोपस्थापनीयचारित्रसद्भावेन तत्र तद्व्यपदेशाभावात् । यावत्कथिकं च भरतैरावतयोर्मध्यमतीर्थकृत्तीर्थेषु महाविदेहार्हत्तीर्थेषु चोपस्थापनाया अभावात् तद्व्यपदेशस्य यावज्जीवमपि सम्भवात् 'त्थ इति पादपूरणे' **तत् प्रथमं** चारित्रं **सामायिकं** । तथा च्छेदः पूर्वपर्यायव्यवच्छेदरूपस्तद्युक्तोपस्थापना महाव्रतोपणरूपा यस्मिंस्त**च्छेदोपस्थापनम्** । तदपि द्विधा निरतिचारं सातिचारं च । तत्र निरतिचारं यदित्वरसामायिकस्य शैक्षकस्य तीर्थान्तरं प्रतिपद्यमानस्य वा व्रतमारोप्यते, सातिचारं तु मूलघातिनो यतेर्यत् पुनर्व्रतारोपणं तद् **भवेद् द्वितीयं** चारित्रम् । तथा परिहारस्तपोविशेषस्तेन विशुद्धिर्यस्मिंस्तत्**परिहारविशुद्धिकं** । तद् द्विभेदं निर्विशमानकं निर्विष्टकायिकं च । तत्राद्यास्तदासेवका **द्वितीया**स्त्वासेवितविवक्षितचारित्रकास्तदभेदाच्चारित्रमपि तथा । अत्र च नवको गणस्तत्र चत्वारः परिहारका अन्ये तद्वैयावृत्त्यकराश्चत्वारोऽनुपरिहारका एकस्तु कल्पस्थितो वाचनाचार्यः । एतेषां चायं परिहारस्तथाहि-एतच्चारित्रवतामारम्भत एव ग्रीष्मे

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जघन्यं चतुर्थं मध्यमं षष्ठमुत्कृष्टमष्टमम् । शिशिरे जघन्यं षष्ठं मध्यममष्टममुत्कृष्टं दशमम् । वर्षासु जघन्यमष्टमं मध्यमं दशममुत्कृष्टं द्वादशमम् । पारणके चाचाम्लम् । किञ्च श्रुतोक्तासु सप्तसु भिक्षास्वाद्ययोर्भिक्षयोर्नियमोऽग्रेतनासु पञ्चसु भिक्षाग्रहणं तेषामिति । कास्ताः सप्त ? इत्यत्रागमः—

"[१]संसट्ठमसंसट्ठा उद्धड तह अप्पलेवडा चेव ।
उग्गहिया पग्गहिया उज्झियधम्मा य सत्तमिया" ॥१॥

कल्पस्थितादयः पञ्च प्रत्यमाचाम्लमेव कुर्वन्त्येवं षण्मासं यावत् तपः कृत्वा परिहारका अनुपरिहारका भवन्त्यनुपरिहारकाः परिहारकीभूय षण्मासं यावदेवं तपः कुर्वन्ति। ततः कल्पस्थितस्तेनैव विधिना षण्मासं यावत् तत् तपः करोति । शेषेष्वेकः कल्पस्थितः स्थाप्यतेऽन्ये सर्वेऽप्यनुपरिहारकाश्चेत्येवमष्टादशमासप्रमाणः कल्पो ज्ञातव्यः । कल्पसमाप्तौ तु पुनः परिहारविशुद्धिकं जिनकल्पं वा गच्छं वा श्रयन्ते । एतत्कल्पप्रतिपद्यमानका जिनस्य जिनपार्श्वासेवकस्य वा समीपे प्रतिपद्यन्ते नान्यस्य पार्श्वे इति एतेषां यच्चारित्रं तत् परिहारविशुद्धिकं तृतीयम् । '**तथे**त्यानन्तर्ये' छन्दोभङ्गभयादेवमुपन्यासः 'बिन्दुश्चार्षत्वात्' सूक्ष्मः किट्टीकरणतः सम्परायो लोभाख्यः कषायो यस्मिंस्तत् **सूक्ष्मसम्परायम्** । एतच्चोपशमश्रेणि—क्षपकश्रेण्योर्लोभाणुवेदनमसये सम्भवतीति चतुर्थः ॥ अकषायं क्षपितोपशमितकषायावस्थाभावि **यथाख्यात**मर्हत्कथितस्वरूपानतिक्रमवत् **छद्मस्थस्यो**प-शान्तक्षीणमोहाख्यगुणस्थानद्वयवर्तिनो **जिनस्य वा** केवलिनस्तत् पञ्चमं चारित्रम्। **एतत्** सामायिकादि चयस्य राशेः 'प्रस्तावात् कर्मणां' रिक्तं विरेकोऽभाव इत्यर्थस्तत् करोती-त्येवंशीलं **चयरिक्तकरं चारित्रं भवत्याख्यातं** कथितं 'अर्हदादिभिरिति गम्यते' इति गाथाद्वयार्थः ॥३३॥

तपोरूपं मार्गमाह—

तवो य दुविहो वुत्तो बाहिरब्भिंतरो तहा ।
बाहिरो छव्विहो वुत्तो एवमब्भिंतरो तवो ॥३४॥

व्याख्या—तपश्च द्विविधमुक्तं बाह्यमाभ्यन्तरं तथा । तत्र **बाह्यं षड्विधमेव-माभ्यन्तरम**पीति ॥३४॥

ज्ञानादीनां मुक्तिमार्गत्वे कस्य कतरो व्यापारः ? इत्याह—

---

१. संसृष्टाऽसंसृष्टे उद्धृता तथाऽल्पलेपा चैव ।
उद्गृहीता प्रगृहीता उज्झितधर्मा च सप्तमी ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

नाणेण जाणई भावे दंसणेण य सद्दहे ।
चरित्तेण न गेण्हाइ तवेणं परिसुज्झई ॥३५॥

व्याख्या—ज्ञानेन मत्यादिना **जानाति भावान्** जीवादीन् । **दर्शनेन च श्रद्धत्ते । चारित्रेण न गृह्णाति नादत्ते** 'कर्मेति गम्यम्' । **तपसा परिशुध्यति** पूर्वोपचितकर्मापगमतः शुद्धो भवति ॥३५॥

अथ मोक्षफलभूतां गतिमाह—

खवित्ता पुव्वकम्माइं संजमेण तवेण य ।
सव्वदुक्खप्पहीणट्ठा पक्कमंति महेसिणो ॥३६॥ त्ति बेमि ॥

व्याख्या—क्षपयित्वा पूर्वार्जितकर्माणि ज्ञानावरणादीनि **संयमेन** सप्तदशभेदेन, **तपसा** द्वादशविधेन **'चशब्दात्** ज्ञान-दर्शनाभ्यां च' । 'प्राकृतत्वात्' **प्रहीणानि** प्रकर्षेण हानिं गतानि **सर्वदुःखानि यत्र तत्** तथा तच्च सिद्धिक्षेत्रमेव **तदर्थयन्ति** तद्गामितया ये **ते** तथाविधाः **प्रक्रामन्ति** भृशं गच्छन्ति 'सिद्धिमिति शेषः' 'महेसिणो' त्ति **महर्षय** इति ब्रवीमीत्यादि प्राग्वत् ॥३६॥ ग्रं० २८७ अ० ११॥

इति श्रीकमलसंयमोपाध्यायविरचितायां सर्वार्थसिद्धौ श्रीउत्तराध्ययनटीकायां अष्टाविंशं मोक्षमार्गीयमध्ययनं समाप्तम् ॥२८॥

• • •

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एकोनत्रिंशं सम्यक्त्वपराक्रमाख्यमध्ययनम्

अनन्तराध्ययने मोक्षमार्गगतिरुक्ता । सा च वीतरागत्वपूर्विकेति यथा तत् स्यात् तथाभिधायकमेकोनत्रिंशमध्ययनमारभ्यते । तत्रादिसूत्रम्—

सुयं मे आउसं ! तेणं भगवया एवमक्खायं । इह खलु सम्मत्तपरक्कमे नामज्झयणे समणेणं भवगया महावीरेणं कासवेणं पवेइए । जं सम्मं सद्दहित्ता पत्तियाइत्ता रोयइत्ता फासित्ता पालइत्ता तीरइत्ता किट्टइत्ता सोहइत्ता आराहित्ता आणाए अणुपालइत्ता बहवे जीवा सिज्झंति बुज्झंति मुच्चंति परिनिव्वायंति सव्वदुक्खणमंतं करेंति ॥

व्याख्या—श्रुतं मे **मया आयुष्मन्निति सुधर्म**स्वामी **जम्बू**स्वामिनं प्रत्याह । **तेन भगवता** 'प्रक्रमाद् **वीरेण**' **एवमिति** वक्ष्यमाणप्रकारे**णाख्यातं** कथितम् । तमेवाह—**इहा**स्मिन् जगति प्रवचने वा खलु निश्चितं सम्यक्त्वे सति पराक्रम उत्तरोत्तरगुणप्रतिपत्त्या कर्मारिजय-सामर्थ्यलक्षणोऽर्थाज्जीवस्यास्मिन्निति **सम्यक्त्वपराक्रमं नामाध्ययनं श्रमणेन भगवता महावीरेण काश्यपेन** काश्यपगोत्रोद्भवेन **प्रवेदितं** स्वतः प्रवेदितमेव भगवता ममेदमाख्यातमिति भावः । **यदि**त्येतदध्ययनं **सम्यक् श्रद्धाय** शब्दार्थोभयरूपं सामान्येन प्रतिपद्य, **प्रतीत्य** विशेषत इत्थमेवेति निश्चित्य, **रोचयित्वा** तदध्यायनविषयं तदुक्तार्थानुष्ठानविषयं वाभिलाषमात्मन उत्पाद्य, **स्पृष्ट्वा** तदुक्तानुष्ठानतः, **पालयित्वा** तदुक्तानुष्ठानस्यातीचाररक्षणेन, **तीरयित्वा** तदुक्तानुष्ठानं पारं नीत्वा, **कीर्तयित्वा** स्वाध्यायविधानतः संशब्द्य, **शोधयित्वा** तदुक्तानुष्ठानस्य तत्तद्गुण-स्थानावाप्तितः शुद्धिप्रापणेन, **आराध्य** यथावदुत्सर्गापवादकौशल्येन तदर्थासेवनेन । एतत् किं स्वमनीषिकया ? नेत्याह—**आज्ञया** गुरुनियोगरूपया **अनुपाल्य** नित्यमासेव्य बहवो जीवाः **सिध्यन्ति** इहैवागमसिद्धत्वादिना, **बुध्यन्ते** घातिकर्मक्षयेण, **मुच्यन्ते** भवोपग्राहिकर्मचतुष्टयेन, **परिनिर्वान्ति** कर्मदावानलोपशमनेनात एव **सर्वदुःखानां शारीर-मानसानाम**न्तं विनाशं **कुर्वन्ति** मोक्षावाप्त्येति ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सम्प्रति सम्बन्धाभिधानपूर्वं सुप्रस्तुताध्ययनार्थमाह—

तस्स णं अयमट्ठे एवमाहिज्जइ । तं जहा—संवेगे १ निव्वेए २ धम्म सद्धाए ३ गुरु—साहम्मियसुस्सूसणया ४ आलोयणया ५ निंदणया ६ गरहणया ७ सामाइए ८ चउवीसत्थए ९ वंदणए १० पडिक्कमणे ११ काउसग्गे १२ पच्चक्खाणे १३ थय—थुइमंगले १४ कालपडिलेहणया १५ पायच्छित्तकरणे १६ खमावणया १७ सज्झाए १८ वायणया १९ पडिपुच्छणया २० परियट्टणया २१ अणुप्पेहा २२ धम्मकहा २३ सुयस्स आराहणया २४ एगग्गमणसंनिवेसणया २५ संजमे २६ तवे २७ वोदाणे २८ सुहसाए २९ अपडिबद्धया ३० विवित्तसयणासणसेवणया ३१ विणियट्टणया ३२ संभोगपच्चक्खाणे ३३ उवहिपच्चक्खाणे ३४ आहारपच्चक्खाणे ३५ कसायपच्चक्खाणे ३६ जोगपच्चक्खाणे ३७ सरीरपच्चक्खाणे ३८ सहायपच्चक्खाणे ३९ भत्तपच्चक्खाणे ४० सब्भावपच्चक्खाणे ४१ पडिरूवणया ४२ वेयावच्चे ४३ सव्वगुण-संपुन्नया ४४ वीयरागया ४५ खंती ४६ मुत्ती ४७ मद्दवे ४८ अज्जवे ४९ भावसच्चे ५० करणसच्चे ५१ जोगसच्चे ५२ मणगुत्तया ५३ वयगुत्तया ५४ कायगुत्तया ५५ मणसमाहारणया ५६ वयसमाहारणया ५७ काय-समाहारणया ५८ नाणसंपन्नया ५९ दंसणसंपन्नया ६० चरित्तसंपन्नया ६१ सोइंदियनिग्गहे ६२ चक्खिंदियनिग्गहे ६३ घाणिंदियनिग्गहे ६४ जिब्भिंदियनिग्गहे ६५ फासिंदियनिग्गहे ६६ कोहविजए ६७ माणविजय ६८ मायाविजए ६९ लोहविजए ७० पेज्ज-दोस-मिच्छादंसणविजए ७१ सेलेसी ७२ अकम्मया ७३॥

व्याख्या—तस्य सम्यक्त्वपराक्रमाध्ययनस्य '**णमिति** वाक्यालङ्कारे' अयमित्यनन्तरं वक्ष्यमाणोऽर्थोऽभिधेय एवममुना प्रकारेणाख्यायते कथ्यते 'महावीरेणेति गम्यम्' 'तद् यथेति वक्ष्यमाणतदर्थोपन्यासार्थः' ॥

अथ त्रिसप्ततिपदानि प्रतिपदमक्षरसंस्कारपुरस्सरं फलोपदर्शनद्वारेण व्याचिख्या-सुराह—

संवेगेणं भंते ! जीवे किं जणयइ ? । संवेगेणं अणुत्तरं धम्मसद्धं

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जणयइ । अणुत्तराए धम्मसद्धाए संवेगं हव्वमागच्छइ । अणंताणु-बंधिकोह—माण—माया—लोभे खवेइ । नवं कम्मं न बंधइ । तप्पच्चइयं च णं मिच्छत्तविसोहिं काऊण दंसणाराहए हवइ । दंसणविसोहीए य णं विसुद्धाए अत्थेगइए तेणेव भवग्गहणेणं सिज्झई । सोहीए य णं विसुद्धाए तच्चं पुणो भवग्गहणं नाइक्कमइ ॥१॥

व्याख्या—संवेगेन मोक्षाभिलाषेण हे **भदन्त** ! पूज्य ! **जीवः किं जनयति** ? कतरं गुणमुत्पादयतीत्यर्थ इति प्रश्नः । अत्रोत्तरमाह—**संवेगेनानुत्तरां** प्रधानां **धर्मश्रद्धां** श्रुतधर्मादिक्रियारुचिं जनयति । तया **अनुत्तरया धर्मश्रद्धया संवेगम**र्थात् तमेव विशिष्टतरं 'हव्वं' त्ति **शीघ्रमागच्छति** । ततोऽ**नन्तानुबन्ध्यादिक्रोधादीन् क्षपयति** । **नवं** च **कर्म** 'प्रस्तावादशुभं' **न बध्नाति** । 'तप्पच्चइयं' ति स एव कषायक्षयः प्रत्ययो निमित्तं यस्याः सा **तत्प्रत्ययिका तां, मिथ्यात्वस्य विशुद्धिः** सर्वथा क्षयो मित्यात्वविशुद्धि**स्तां कृत्वा दर्शनस्य** 'प्रस्तावात् क्षायिकसम्यक्त्वस्य' **आराधको** निरतिचारपालको **भवति** । ततो **दर्शनविशुद्ध्या विशुद्धया** निर्मलया 'अत्थेगइए' त्ति **अस्ति एककः** कश्चिद् भव्यो य**स्तेनैव भवग्रहणेन** जन्मोपादानेन **सिध्यति** । को भावः ? यस्मान्नेव जन्मनि दर्शनस्य शुद्धिस्तत्रैव भवे मुक्तो भवति यथा **मरुदेवा**स्वामिनी **ऋषभदेव**जननी । यस्तु न तेनैव भवेन सिध्यति स **शुद्ध्या** 'प्रक्रमाद् दर्शनस्य **विशुद्ध्या**' 'तच्चं' ति **तृतीयं पुनर्भव-ग्रहणं नातिक्रामति** नातिलङ्घति । अवश्यं तृतीयभवे सिध्यतीत्यर्थः । उत्कृष्टदर्शनाराधका-पेक्षमेतद् । उक्तञ्च—

"[१]उक्कोसदंसणेणं भंते ! जीवे कइहिं भवग्गहणेहिं सिज्झेज्झा ? ।
गोयमा ! उक्कोसेणं तेणेव भवेण, तइयं नाइकम्मइ" ॥ ॥१॥

संवेगाच्चावश्यम्भावी निर्वेद इति तमाह—

निव्वेएणं भंते ! जीवे किं जणयइ ? । निव्वेएणं दिव्व—माणुस्स—तेरिच्छिएसु कामभोगेसु निव्वेयं हव्वमागच्छइ । सव्वविसएसु विरज्जइ । सव्वविसएसु विरज्जमाणे आरंभपरिच्चायं करेइ । आरंभपरिच्चायं करेमाणे संसारमग्गं वुच्छिदइ । सिद्धिमग्गे पडिवन्ने भवइ ॥२॥

व्याख्या—'उत्तरत्र सर्वत्र सुगमत्वान्न प्रश्नव्याख्या' **निर्वेदेन** सामान्यतः संसार-

---

१. उत्कृष्टदर्शनेन भदन्त ! जीवः कतिभिर्भवग्रहणैः सिद्ध्येत् ? ।
गौतम ! उत्कर्षेण तेनैव भवेन, तृतीयं नातिक्रामत् ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

विषयेन कदाऽसौ त्याज्यः ? इत्येवंरूपेण **दिव्यादिकामभोगेषु निर्वेदं** 'हव्वं' ति **शीघ्र-मागच्छति** यथालमेतैरनर्थहेतुभिरिति । तथा च **सर्वविषयेषु** शब्दादिषु **विरज्यते** विरागमाप्नोति । **तेषु** च **विरज्यमान आरम्भः** प्राणिव्यपरोपणव्यापारस्**तत्परित्यागं करोति**। विषयार्थत्वादा**रम्भाणां तत्परित्यागं च कुर्वन् संसारमार्गं** मिथ्यात्वादि **व्यवच्छिनत्ति** । तत्त्यागत एवारम्भत्यागसम्भवात् । तद्व्यवच्छित्तौ च **सिद्धिमार्गः** सम्यग्दर्शनादिः **प्रतिपन्नो भवति** ॥२॥

सत्यपि निर्वेदे धर्मश्रद्धैव शुभहेतुरिति तामाह—

धम्मसद्धाए णं भंते ! जीवे किं जणयइ ? धम्मसद्धाए णं सायासोक्खेसु रज्जमाणे विरज्जइ । अगारधम्मं च णं चयइ । अणगारिए णं जीवे सारीर—माणसाणं दुक्खाणं छेयण—भेयण—संजोगाईणं वुच्छेयं करेइ । अव्वाबाहं च सुहं निव्वत्तेइ ॥३॥

व्याख्या—धर्मश्रद्धया धर्मरुचिरूपया **सातसौख्येषु** सातवेदनीयजनितसुखेषु वैषयिक-सुखेष्वित्यर्थः । **रज्यमानः** पूर्वं रागं कुर्वन् **विरज्यते** विरक्तो भवति । **अगारधर्मं च** गार्हस्थ्यं **त्यजति** । ततश्चानगारो यतिः सन् **जीवः शारीर—मानसानां दुःखानां छेदन—भेदन—संयोगादीनाम**निष्टानां 'आदिशब्दादिष्टवियोगादीनां' **व्युच्छेदं करोति** तन्निबन्धनकर्मोच्छेदनेनेति भावः । **अव्याबाधम**ुपरतसर्वपीडं 'अर्थान्मौक्तं' **सुखं च निर्वर्तयति** जनयति ॥३॥

धर्मश्रद्धायां चावश्यं गुर्वादीनां शुश्रूषणा कार्येति तामाह—

गुरु—साहम्मियसुस्सूसणयाए णं भंते ! जीवे किं जणयइ ? । गुरु—साहम्मियसुस्सूसणयाए णं विणयपडिवत्तिं जणयइ । विणयपडिवन्ने य णं जीवे अणच्चासायणसीले नेरइय—तिरिक्खजोणिय—मणुस्स—देवदुग्गईओ निरुंभइ । वन्नसंजलण—भत्ति—बहुमाणयाए मणुस्स—देवसुगईओ निबंधइ । सिद्धिसोग्गइं च विसोहेइ । पसत्थाइं च णं विणयमूलाइं सव्वकज्जाइं साहेइ । अन्ने य बहवे जीवे विणिइत्ता भवइ ॥४॥

व्याख्या—गुरु-साधर्मिकशुश्रूषणया तत्पर्युपासनया सेवया **विनयप्रतिपत्ति-मुचितकृत्याङ्गीकाररूपां जनयति** । 'विणयपडिवन्ने य' त्ति **प्रतिपन्नविनयो**ऽङ्गीकृतविनयो जीवो**ऽनत्याशातनाशीलो** गुरुपरिवादाद्याशातनाविकलस्वभावो **नैरयिकादिचतुर्दुर्गती-र्निरुणद्धि** निषेधति तद्धेतोरत्याशातनाया अभावेन तत्र गमनाभावात् । वर्णः श्लाघा तेन सञ्ज्वलनं गुणोद्भासनं भक्तिरभ्युत्थानादिका बहुमान आन्तरप्रीतिविशेषः 'एषां द्वन्द्वे

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भावप्रत्यये च' **वर्णसञ्ज्वलन–भक्ति–बहुमानता तया** 'प्रक्रमाद् गुरूणां' विनयप्रतिपत्तिरूपया **मनुष्य–देवसुगती** विशिष्टकुलेन्द्रत्वादिलक्षणे **निबध्नाति** । **सिद्धिसुगतिं च विशोधयति** तन्मार्गभूतसम्यग्दर्शनादिविशोधनेन । **प्रशस्तानि च विनयमूलानि** विनयहेतुकानि **सर्वकार्याणी**ह श्रुतज्ञानादीनि परत्र च मुक्तिं **साधयति** । **अन्यांश्च बहून् जीवान् विनेता** विनयं ग्राहिता स्वयं सुस्थितस्योपादेयवचनत्वाद् । उक्तं हि–"**ठिओ उ ठावयए परं**" ति ॥४॥

गुरुशुश्रूषणां कुर्वतोऽप्यतीचारसम्भवे आलोचनात् एवोक्तफलावाप्तिरिति तामाह–

आलोयणयाए णं भंते ! जीवे किं जणयइ ? । आलोयणयाए णं मायानियाणमिच्छादंसणसल्लाणं मोक्खमग्गविग्घाणं अणंतसंसारवद्धणाणं उद्धरणं करेइ । उज्जुभावं च णं जणयइ । उज्जुभावपडिवन्ने य णं जीवे अमायी इत्थीवेयं नपुंसकवेयं च न बंधइ । पुव्वबद्धं च णं निज्जरेइ ॥ ५॥

व्याख्या–आ सामस्त्येन **लोचना** गुर्वादेः स्वदोषाणां प्रकाशना **तया** माया शाठ्यं, यन्निदानं ममातस्तपःप्रभृत्यादेरिदं स्यादिति प्रार्थनात्मकम्, मिथ्यादर्शनं सांशयिकाद्येतानि शल्यानीव शल्यानि 'कर्मधारये' **माया–निदान–मिथ्यादर्शनशल्यानि तेषां, मोक्षविघ्नानां** कर्मबन्धहेतुत्वेन मुक्त्यन्तरायाणां, **तथानन्तसंसारवर्धनानामुद्धरणम**पनयनं **करोति** । तदुद्धरणतश्च **ऋजुभावं** सरलत्वं **जनयति** । **प्रतिपन्नर्जुभावश्च जीवोऽमायी** मायारहितः **स्त्रीवेदं नपुंसकवेदं च न बध्नाति** । **पूर्वबद्धं च** तद् द्वयं यद्वा सर्वमपि कर्म **निर्जरयति** क्षपयति ततो मुक्तिमाप्नोतीति भावः ॥५॥

आलोचना दुष्कृतनिन्दावत एव सफला स्यादिति तामाह–

निंदणयाए णं भंते ! जीवे किं जणयइ ? । निंदणयाए णं पच्छाणुतावं जणयइ । पच्छाणुतावे य णं विरज्जमाणो करणगुणसेढिं पडिवज्जइ । करणगुणसेढीपडिवन्ने य णं अणगारे मोहणिज्जं कम्मं उग्घाएइ ॥ ६॥

व्याख्या–आर्षत्वान्नि**न्दनेना**त्मनैवात्मदोषपरिभावनेन **पश्चादनुतापं** हा ! दुष्टमनुष्ठितमिदं मयेति **जनयति** । ततः **पश्चादनुतापेन विरज्यमानो** वैराग्यं गच्छन् करणेनापूर्वकरेन गुणहेतुका श्रेणिः **करणगुणश्रेणिः** सा चोपरितनस्थितेर्मोहनीयादिकर्मदलिकान्युपादायोदयसमयात् प्रभृति द्वितीयादिसमयेष्वसङ्ख्यातगुणपुद्गलप्रक्षेपरूपान्तर्मौहूर्तिकी । यत उक्तम्–

---

१. स्थितस्तु स्थापयति परम् ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

"[१]उवरिमठिईइ दलियं हिट्ठिमठाणेसु कुणइ गुणसेढी ।
गुणसंकमकरणं पुण असुहाओ सुहंमि पक्खिवइ" ॥१॥

'उपलक्षणात् स्थितिघात–रसघात–गुणसङ्क्रम–स्थितबन्धाश्च विशिष्टाः' अथवा करणगुणेनापूर्वकरणादिमाहात्म्येन श्रेणिः **करणगुणश्रेणिः** 'प्रक्रमात् क्षपकश्रेणिः' **तां प्रतिपद्यते । प्रतिपन्नगुणश्रेणिश्चानगारो मोहनीयं कर्मोद्धातयति** क्षपयति । तत्क्षपणे च मुक्तिप्राप्तिरप्यर्थत उक्तैव ॥६॥

कश्चित् स्वदोषान् निन्दन्नपि पापभीरुतया गर्हामपि कुर्यादिति तामाह—

गरहणयाए णं भंते ! जीवे किं जणयइ ? । गरहणयाए णं अपुरक्कारं जणयइ । अपुरक्कारगए णं जीवे अप्पसत्थेहिंतो जोगेहिंतो नियत्तेइ । पसत्थेहि य पडिवज्जइ । पसत्थजोगपडिवन्ने य णं अणगारे अणंतघाई पज्जवे खवेइ ॥७॥

व्याख्या—गर्हणेन परसमक्षमात्मनो दोषोद्भावनेन पुरस्कारो गौरवाध्यारोपो न तथा **अपुरस्कारो**ऽवज्ञास्पदत्वं **तं जनयति** 'स्वस्येति गम्यते' । **अपुरस्कारगतो जीवः** कदाचित् कदध्यवसायोत्पत्तावपि तद्भीत्यै**वाप्रशस्तेभ्यः** कर्मबन्धहेतुभ्यो **योगेभ्यो निवर्तते**, तान् न प्रतिपद्यते । **प्रशस्तयोगांस्तु प्रतिपद्यते । प्रतिपन्नप्रशस्तयोगोऽनगारो** 'अणंतघाइ' त्ति अनन्तविषयतया अनन्तज्ञान-दर्शने हन्तुं शीलं येषां ते**ऽनन्तघातिनस्तान् पर्यवान्** ज्ञानावरणादि-कर्मणः परिणतिविशेषान् **क्षपयति** । 'उपलक्षणं चैतन्मुक्तिप्राप्तेः' तदर्थत्वाद् धर्मानुष्ठानस्य ॥७॥

आलोचनादीनि च सामायिकवत एव भवन्तीति तदुच्यते—

सामाइएणं भंते ! जीवे किं जणयइ ? । सामाइएणं सावज्ज-जोगविरइं जणयइ ॥८॥

व्याख्या—सामायिकेनोक्तस्वरूपेण सावद्याः कर्मबन्धहेतवो योगा व्यापारास्तेभ्यो विरतिरुपरमः **सावद्ययोगविरतिस्तां जनयति** तद्विरतेरेव सामायिकसम्भवात् ॥८॥

सामायिकं चाङ्गीचिकीर्षुणा तत्प्रणेतॄणामर्हतां स्तवः कार्य इति तमाह—

चउवीसत्थएणं भंते ! जीवे किं जणयइ ? । चउवीसत्थएणं दंसणविसोहिं जणयइ ॥९॥

---

१. उपरितनस्थितेर्दलिकान्यधस्तनस्थानेषु करोति गुणश्रेणिः ।
गुणसङ्क्रमकरणं पुनरशुभान् शुभे प्रक्षिपति ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—चतुर्विंशतिस्तवेनैतदवसर्पिणीप्रभवार्हदुत्कीर्तनरूपेण **दर्शनस्य** सम्यक्त्वस्य **विशुद्धिं** तदुपघातिकर्मापगमान्निर्मलतां **जनयति** ॥९॥

स्तुत्वाप्यर्हतो गुरुवन्दनकपूर्वैव तत्प्रतिपत्तिरिति तदाह—

वंदणएणं भंते ! जीवे किं जणयइ ? । वंदणएणं नीयागोयं कम्मं खवेइ । उच्चागोयं कम्मं निबंधइ । सोहग्गं च णं अप्पडिहयं आणाफलं निव्वत्तेइ । दाहिणभावं च णं जणयइ ॥१०॥

व्याख्या—वन्दनकेनाचार्याद्युचितप्रतिपत्तिरूपेण **नीचैर्गोत्रम**धमकुलोत्पत्तिहेतु कर्म क्षपयति । **उच्चैर्गोत्रं निबध्नाति । सौभाग्यं च** सर्वजनस्पृहणीयतारूप**मप्रतिहतम**स्खलित-मत एवा**ज्ञाफलमा**ज्ञासारं **निर्वर्तयति** जनयति । **दक्षिणभावं चा**नुकूलतां **जनयति** 'लोकस्येति गम्यम्' ॥१०॥

एतद्गुणस्थितेनापि पूर्व—पश्चिमार्हतोस्तीर्थेऽवश्यं प्रतिक्रमणं कार्यमिति तदाह—

पडिक्कमणेणं भंते ! जीवे किं जणयइ ? । पडिक्कमणेणं वयछिद्दाइं पिहेइ । पिहियवयच्छिद्दे पुण जीवे निरुद्धासवे असबलचरित्ते अट्ठसु पवयणमायासु उवउत्ते अपुहत्ते सुप्पणिहिए विहरइ ॥११॥

व्याख्या—प्रतिक्रमणेनापराधेभ्यः प्रतीपनिवर्तनात्मकेन **व्रतानां** प्राणातिपातविरत्या-दीनां **छिद्राणि पिदधाति** स्थगयत्यपनयतीति यावत् । **पिहितव्रतच्छिद्रः पुनर्जीवो निरुद्धास्त्रवो**ऽशबलमेकविंशत्या**शबलस्थानै**रकर्बुरीकृतं चरित्रं यस्य स तथा, तथा**ष्टसु प्रवचनमातृषूपयुक्तो**ऽवधानवान्, न विद्यते पृथक्त्वं संयमयोगेभ्यो वियुक्तत्वं यस्यासाव-**पृथक्त्वः** सदा संयमयोगवानप्रमत्तो वा, तथा **सुप्रणिहितः** सुष्ठु संयमे प्रणिधानवान्, 'सुप्पणिहिंदिए' इति पाठे सुप्रणिहितान्यसन्मार्गात् प्रच्याव्य सन्मार्गे व्यवस्थापितानीन्द्रिया-ण्यनेनेति **सुप्रणिहितेन्द्रियो विहरति** संयममार्गे याति ॥११॥

अत्र चातीचारशुद्ध्यर्थं कायोत्सर्गः कार्य इति तमाह—

काउसग्गेणं भंते ! जीवे किं जणयइ ? । काउसग्गेणं तीय-पडुप्पन्नं पायच्छित्तं विसोहेइ । विसुद्धपायच्छित्ते य जीवे निव्वुयहियए ओहरियभरु व्व भारवहे पसत्थज्झाणोवगए सुहं सुहेणं विहरइ ॥१२॥

व्याख्या—कायस्य शरीरस्योत्सर्गः श्रुतोक्तनीत्या त्यागः **कायोत्सर्गस्तेनातीतमि**ह चिरकालभावितया, **प्रत्युत्पन्नं** चासन्नकालभावित्वेन, प्रायश्चित्तम् 'उपचारात् प्रायश्चित्तार्ह-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मतीचारं' **विशोधयत्यपनयति** । **विशुद्धप्रायश्चित्तश्च जीवो** निर्वृतं स्वस्वीकृतं हृदयं यस्य स **निर्वृतहृदयः**, क इव ? **अपहृतस्त्यक्तो भरो** भारो येन स तथा एवंविधो **भारवाहो** वाहकादिः **स इव** भारप्राया ह्यतीचारास्तदपनयनेऽपहृतभरभारवह इव निर्वृतहृदय एवेति भावः । **प्रशस्तध्यानोपगतः सुखं सुखेन** सुखपरम्परावाप्त्या **विहरति** ॥१२॥

एवमप्यशुद्ध्यमानेन प्रत्याख्यानं कार्यमिति तमाह—

पच्चक्खाणेणं भंते ! जीवे किं जणयइ ? । पच्चक्खाणेणं आसवदाराइं निरुंभइ ॥१३॥

व्याख्या—प्रत्याख्यानेन मूलगुणप्रत्याख्यानरूपेणास्त्रवद्वाराणि **निरुणद्धि** ॥१३॥

प्रत्याख्यानग्रहणानन्तरं चैत्यवन्दनं विधेयम्, तच्च न स्तवस्तुतिमङ्गलं विनेति तदाह—

थय-थुइमंगलेणं भंते ! जीवे किं जणयइ ? । थय-थुइमंगलेणं नाण-दंसण-चरित्त-बोहिलाभं जणयइ । नाण-दंसण-चरित्त-बोहिलाभ-संपन्ने णं जीवे अंतकिरियं कप्पविमाणोववत्तियं आराहणं आराहेइ ॥१४॥

व्याख्या—स्तवा देवेन्द्रस्तवादयः, स्तुतयः एकादिसप्तश्लोकान्ताः 'क्त्यन्तस्य पूर्वनिपाते प्राप्तेऽप्यार्षत्वाद् व्यत्ययः' **स्तुतिस्तवा** एव **मङ्गलं** भावमङ्गलरूपं **तेन** ज्ञान-दर्शन-चारित्रात्मिका बोधिर्ज्ञान-दर्शन-चारित्र-बोधिस्तस्या लाभो **ज्ञान-दर्शन-चारित्र-बोधिलाभो** जिनधर्मप्राप्ति**स्तं जनयति** । **ज्ञान-दर्शन-चारित्र-बोधिलाभसम्पन्नश्च जीवो**ऽन्तः पर्यन्तो भवस्य कर्मणो वा तस्य क्रिया करण**मन्तक्रिया** मुक्तिरित्यर्थ**स्ताम्, कल्पा** देवलोका **विमानानि** ग्रैवेयकानुत्तरसम्बन्धीनि ते**षूपपत्तिर्य**स्यां सा तथा **ताम्**, को भावः ? अनन्तरभवे कल्पादिषु देवत्वावाप्तिफलां परम्परया तु मुक्तिप्रापिका**माराधना** ज्ञानाद्याराधनारूपा**माराधयति** साधयति । तथा चैवमाराधनया कश्चिद् भरतादिस्तद्भवे एव दीर्घपर्यायेण, कश्चिद् **गजसुकुमालादिः** स्वल्पपर्यायेणान्तक्रियां करोतीति भावः ॥१४॥

अर्हद्वन्दनानन्तरं स्वाध्यायो विधेयः, स च कालप्रत्युपेक्षापूर्वमिति तामाह—

कालपडिलेहणयाए णं भंते ! जीवे किं जणयइ ? । काल-पडिलेहणयाए णं नाणावरणिज्जं कम्मं खवेइ ॥१५॥

व्याख्या—कालः प्रादोषिकादिस्तस्य प्रत्युपेक्षणा आगमविधिना यथावन्निरूपणाग्रहण—प्रतिजागरणरूपा **कालप्रत्युपेक्षणा तया ज्ञानावरणीयं कर्म क्षपयति** ॥१५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कथञ्चिदकालपाठे प्रायश्चित्तं प्रतिपत्तव्यमिति तदाह—

पायच्छित्तकरणेणं भंते ! जीवे किं जणयइ ? । गोयमा ! पायच्छित्तकरणेणं पावकम्मविसोहिं जणयइ । निरइयारे आवि भवइ । सम्मं च णं पायच्छित्तं पडिवज्जमाणे मग्गं मग्गफलं विसोहेइ । आयारं च आराहेइ ॥१६॥

व्याख्या—प्रायश्चित्तकरणेनालोचनादिविधानेन **पापकर्मणां विशुद्धिर**भावस्तां **जनयति । निरतिचारश्चापि** भवति । **सम्यक् च प्रायश्चित्तं प्रतिपद्यमानो मार्ग** इह ज्ञानप्राप्तिहेतुः सम्यक्त्वं **तं** च **तत्फलं** च ज्ञानं **विशोधयति** निर्मलीकुरुते । तत**श्चाचारश्चा**रित्रं तं च तत्फलं च मुक्तिलक्षण**माराधयति** । विशोधनाराधनयोश्च निरतिचारतैव हेतुरिति भावः ॥१६॥

प्रायश्चित्तकरणं च क्षामणावत एव स्यादिति तामाह—

खमावणाए णं भंते ! जीवे किं जणयइ ? । खमावणाए णं पल्हायणभावं जणयइ । पल्हायणभावगए य सव्वपाण—भूय—जीव—सत्तेसु मित्तीभावं उप्पाएइ । मित्तीभावमुवगए आवि जीवे भावविसोहिं काऊण निब्भए भवइ ॥१७॥

व्याख्या—क्षामणया दुष्कृतानन्तरं क्षमितव्यमिदं ममेत्यादिरूपया **प्रह्लादनभावं** चित्तप्रसत्तिरूपं **जनयति । प्रह्लादनभावमुपगतः** सर्वे च प्राणाश्च द्वि—त्रि—चतुरिन्द्रियाः, भूताश्च तरवः, जीवाश्च पञ्चेन्द्रियाः, सत्त्वाश्च शेषजन्तवः **सर्वप्राण—भूत—जीव—सत्त्वास्तेषु मैत्रीभावं** परहितचिन्तालक्षण**मुत्पादयति । मैत्रीभावमुपगतश्च** जीवो **भावविशुद्धिं** राग—द्वेषापगमरूपां **कृत्वा निर्भय** इह—परलोकादिभयविकलो **भवति** सर्वभयहेत्वभावात् । अत्रार्थे **मृगावती**दृष्टान्तः—

सद्वत्सविषयोल्लासिसुपयोदार्जुनीव या ।
सद्वत्सविषयोल्लासा **कौशाम्बी** पूर्वराऽस्ति सा ॥१॥

वर्धमानो जिनस्तत्र वर्धमानो गुणैः शुभैः ।
पादाभ्यां पावयन् पृथ्वीमुद्याने समवासरत् ॥२॥

पुष्पदन्तौ प्रभुं नन्तुं समाजग्मतुरन्यदा ।
विमानाभ्यां तमोऽस्यन्तौ तृतीये प्रहरे मुदा ॥३॥

स्वस्थानेऽगात् तमीं मत्वा चातुर्यादार्य**चन्दना** ।
तत्रास्थात् स्वामिवाग्लीना दिनभ्रान्त्या **मृगावती** ॥४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तयोश्च गतयोः सूर्य-चन्द्रयोः सा **मृगावती** ।
स्वाश्रयं **प्राप** भीता द्राक् तमसि प्रसृतेऽभितः ॥५॥

ईर्यापथिक्यामालोच्य नत्वा सुप्तां प्रवर्तिनीम् ।
ममागः क्षम्यतामेतदित्युक्त्वा चापतत् पदोः ॥६॥

चन्दना चन्दनाभाभिर्वाणीभिस्तामशिक्षयत् ।
किं निर्मलकुले युक्तं नक्तं स्थातुं बहिस्तव ? ॥७॥

चन्दनाचरणौ संवाहयन्ती सा **मृगावती** ।
निद्राणां क्षामयन्ती तां केवलज्ञानमासदत् ॥८॥

उद्दध्रेऽथ **मृगावत्या** धरातश्च**न्दनाकर**म् ।
प्रबुद्धा **चन्दना**ऽवोचत् किमचालि करो मम ? ॥९॥

जगौ **मृगावती** सर्पन् सर्पोऽस्तीत्याह **चन्दना** ।
अदर्शि स कथं ध्वान्ते साऽऽख्यत् केवलसंविदा ॥१०॥

उत्थाय **चन्दना**ऽऽचष्ट महासति मृगावति ! ।
केवल्याशातनामन्तुं क्षमस्वाज्ञानतः कृतम् ॥११॥

मृगावतीं क्षामयन्ती प्रवर्तिन्यार्य**चन्दना** ।
निन्दन्ती च मुहुः स्वागः श्रिता केवलसम्पदा ॥१२॥

इति क्षामणायां **चन्दना–मृगावती**कथा ॥१७॥

एवंविदेन यतिना स्वाध्याये यतितव्यमिति तमाह–

सज्झाएणं भंते ! जीवे किं जणयइ ? । सज्झाएणं नाणावरणिज्जं कम्मं खवेइ ॥१८॥

व्याख्या–स्वाध्यायेन ज्ञानावरणीयं 'उपलक्षणाच्छेषं कर्म' **क्षपयति** । यत उक्तम्–

"[1]कम्ममसंखिज्जभवं खवेइ अणुसमयमेव आउत्तो ।
अन्नयरंमि वि जोए सज्झायंमी य विसेसेण" ॥१॥ ॥१८॥

अत्र च पूर्वं वाचनैव विधेयेति तामाह–

वायणाए य णं भंते ! जीवे किं जणयइ ? । वायणाए य णं

१. कर्मासङ्ख्यातभवं क्षपयत्यनुसमयमेवायुक्तः ।
अन्यतरस्मिन्नपि योगे स्वाध्याये च विशेषणे ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

निज्जरं जणयइ । सुयस्स अणासायणाए वट्टइ । सुयस्स अणासायणाए वट्टमाणे तित्थधम्मं अवलंबइ । तित्थधम्मं अवलंबमाणे महानिज्जरे महापज्जवसाणे भवइ ॥१९॥

व्याख्या—वक्ति शिष्यस्तं वचन्तं गुरुः प्रयुङ्क्ते वाचयतीति **वाचना** पाठनमित्यर्थ**स्तया निर्जरां** कर्मपरिशाटरूपां **जनयति** । तथा **श्रुतस्या**गम**स्यानाशातनायां वर्तते** । ततः **श्रुतस्यानाशातनायां वर्तमान**स्तीर्थं गणधरस्तस्य धर्म आचारः श्रुतप्रदानरूपस्**तीर्थ-धर्ममवलम्बते**। ततस्**तीर्थधर्ममवलम्बमान** आश्रयन् महती बहुकर्मविषयत्वान्निर्जराऽस्येति **महानिर्जरः**, महत् प्रशस्यं मुक्त्यवाप्त्या पर्यवसानमन्तः कर्मो भवस्य वा यस्य स **महापर्यवसानश्च भवति** मुक्तिभाग् भवतीति हृदयम् ॥१९॥

गृहीतवाचनेन संशयादौ पुनः प्रच्छनं प्रतिपृच्छेति तामाह—

पडिपुच्छणाए णं भंते ! जीवे किं जणयइ ? । गोयमा ! पडिपुच्छणाए णं सुत्तत्थ—तदुभयं विसोहेइ । कंखामोहणिज्जं कम्मं वुच्छिदइ ॥२०॥

व्याख्या—तत्र च पूर्वपठितस्य सूत्रादेः पुनः प्रच्छनं **प्रतिप्रच्छनं तेन सूत्रार्थ-तदुभयानि विशोधयति** संशयाद्यपनयनेन विशुद्धानि कुरुते । **काङ्क्षा** इदमित्थमित्थं च ममाध्येतुमुचितमित्यादिका वाञ्छा सैव **मोहनीयं कर्मा**नभिग्रहिकमिथ्यात्वरूपं **व्युच्छिनत्ति** विशेषेणापनयति ॥२०॥

इत्थं विशोधितस्यापि सूत्रस्य मा भूद् विस्मरणमिति परावर्तनामाह—

परिअट्टणाए णं भंते ! जीवे किं जणयइ ? । गोयमा ! परिअट्टणाए णं वंजणाइं जणयइ । वंजणलद्धिं च उप्पाएइ ॥२१॥

व्याख्या—सूत्रत्वात् **परावर्तना** गुणनं **तया** व्यज्ञन्ते अर्था एभिरिति **व्यञ्जनान्य-**क्षराणि **जनयत्युत्पादयति** । तानि हि विगलितान्यपि गुणयतो झगित्युत्पतन्तीत्युत्पादि-तान्युक्तानि । तथाविधकर्मक्षयोपशमतो **व्यञ्जनलब्धिं** '**चशब्दाद्** व्यञ्जनसमुदायरूपपद-लब्धिं पदानुसारितालक्षणां' **उत्पादयति** ॥२१॥

सूत्रवदर्थस्यापि विस्मरणसम्भव इत्यनुप्रेक्षामाह—

अणुप्पेहाए णं भंते ! जीवे किं जणयइ ? । गोयमा ! अणुप्पेहाए णं आऊयवज्जाओ सत्त कम्मपयडीओ धणियबंधणबद्धाओ सिढिल-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

बंधणबद्धाओ पकरेइ । दीहकालट्ठिइयाओ हस्सकालट्ठिइयाओ पकरेइ । तिव्वाणुभावाओ मंदाणुभावाओ पकरेइ । बहुप्पएसग्गाओ अप्पपएसग्गाओ पकरेइ । आऊयं च णं कम्मं सिय बंधइ सिय नो बंधइ । असातावेयणिज्जं च णं कम्मं नो भुज्जो भुज्जो उवचिणइ । अणाइयं अणवयग्गं दीहमद्धं चाउरंतसंसारकंतारं खिप्पमेव वीईवयइ ॥२२॥

व्याख्या—अनुप्रेक्षा सूत्रस्यार्थचिन्तितं चिन्तनिका **तया** प्रकृष्टशुभभावहेतुतया **आयुर्वर्जाः सप्त कर्मप्रकृतीः** 'धणियं' **गाढं बन्धनं** तेन **बद्धा** निकाचिताः **शिथिलबन्धनबद्धाः** किञ्चिन्मुत्कलाः कोऽर्थः ? अपवर्तनादिकरणयोग्याः **प्रकरोति** । तपोरूपत्वादस्यास्तपसश्च । निकाचितकर्मक्षयक्षमत्वाद्, उक्तञ्च—'[१]**तवसा उ निकाइयाणं च**'त्ति । **दीर्घकालस्थितिका ह्रस्वकालस्थितिकाः प्रकरोति** शुभाध्यवसायवशात् स्थितिखण्डकापहारेणेति भावः । एतच्चैवं सर्वकर्मणामपि स्थितेरशुभत्वाद् यदुक्तम्—

"[२]सव्वासिं पि ठिईओ सुहासुहाणं पि होंति असुहाओ ।
माणुस—तिरिक्ख—देवाउयं च मोत्तूण सेसाणं" ॥१॥

तथा **तीव्रानुभावाश्चतुः**स्थानिकरसत्वे **मन्दानुभावास्त्रि**स्थानिकरसवत्त्वाद्यापादनेन **प्रकरोति** । एताश्चाशुभप्रकृतयो ज्ञेयाः । तथा बहु प्रभूतं प्रदेशाग्रं कर्मदलिकपरिमाणं यासां ता **बहुप्रदेशाग्रा अल्पप्रदेशाग्राः प्रकरोति** । किञ्चैकस्मिन् भवे सकृदेवान्तर्मुहूर्तकाल एवायुर्बन्धसम्भवादायुर्वर्जत्वमुक्तमत **आयुष्कं च कर्म स्याद् बध्नाति स्यान्नो बध्नाति,** तस्य त्रिभागादिशेषायुष्कतायामेव बन्धसम्भवात् । उक्तं हि—'[३]**सिह तिभागे सिय तिभागतिभागे**' इत्यादि । अपरं **चासातवेदनीयं** शारीरादिदुःखहेतु **च कर्म** 'चशब्दादन्याश्चाशुभप्रकृतीः' **नो भूयो भूय उपचिनोति** बध्नाति । भूयो भूयो ग्रहणं त्वन्यतमप्रमादतः प्रमत्तसंयतगुणस्थानवर्तितायां तद्बन्धस्य सम्भवात् । तथा **अनादिकमा**देरसम्भवात्, अनवगच्छदग्रपरिमाणं यस्य **सोऽनवदग्रः** सदावस्थितपरिमाणोऽनन्त इत्यर्थ**स्तं** प्रवाहापेक्षं चैतत्, अत एव 'दीहमद्धं'ति 'मकारोऽलाक्षणिकः' **दीर्घाद्धं** दीर्घकालम्, चत्वारश्चतुर्गतिलक्षणा अन्ता अवयवा यस्मिंस्त**च्चतुरन्तं संसारकान्तारं क्षिप्रमेव** शीघ्रमेव 'वीईवयइ'त्ति **व्यतिव्रजत्य**तिक्रामति मुक्तिमाप्नोतीत्यर्थः ॥२२॥

---

१. तपसा तु निकाचितानां चेति ।

२. सर्वासामपि स्थितयः शुभाशुभानामपि भवन्त्यशुभाः ।
मनुष्य-तिर्यग-देवायुश्च मुक्त्वा शेषाणाम् ॥१॥

३. स्यात् त्रिभागे स्यात् त्रिभागत्रिभागे ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एवमभ्यस्तश्रुतेन च धर्मकथाऽपि कार्येति तामाह—

धम्मकहाए णं भंते ! जीवे किं जणयइ ? । गोयमा ! धम्मकहाए पवयणं पभावेइ । पवयणपभावए जीवे आगमेसिस्स भद्दत्ताए कम्मं निबंधइ ॥२३॥

व्याख्या—धर्मकथया व्याख्यानरूपया **प्रवचनं** सिद्धान्तं **प्रभावयति** प्रकाशयति । **प्रवचनप्रभावको जीवः** 'आगमेसिस्स भद्दत्ताए'त्ति **आगमिष्यद**ागामिकालभावि **भद्रं** कल्याणं यस्मि**स्तत्** तथा **तस्य भावस्तत्ता** तयोपलक्षितं **कर्म निबध्नाति** शुभ-मुपार्जयतीति भावः ॥२३॥

इत्थं पञ्चविधस्वाध्यायरतेन श्रुतमाराधितं स्यादिति तदाराधनमाह—

सुयस्स आराहणयाए णं भंते ! जीवे किं जणयइ ? । गोयमा ! सुयस्स आराहणयाए णं अन्नाणं खवेइ । न य संकिलिस्सइ ॥२४॥

व्याख्या—श्रुतस्याराधनया सम्यगासेवनयाऽ**ज्ञानं क्षपयति** विशिष्टतत्त्वबोधा-वाप्तेः । **न च संक्लिश्यते** नैव रागादिजनितक्लेशभाग् भवति, तद्वशतो नवनव-संवेगावाप्तेः । यतः—

"[१]जह जह सुयमवगाहइ अइसयरसपसरसंजुयमपुव्वं ।
तह तह पल्हाइ मुणी नवमवसंवेगसद्धाए"॥१॥ ॥२४॥

श्रुताराधना चैकाग्रमनःसन्निवेशनावत एव स्यादतस्तामाह—

एगग्गमणसंनिवेसणयाए णं भंते ! जीवे किं जणयइ ? गोयमा ! एगग्गमणसंनिवेशणयाए णं चित्तनिरोहं करेइ ॥२५॥

व्याख्या—एकमग्रं प्रस्तावाच्छुभमालम्बनमस्यै**त्येकाग्रं** तच्च **तन्मनश्च** तस्य **सन्निवेशना** स्थापना **तया** चित्तस्येतस्तत उन्मार्गप्रस्थितस्य निरोधो नियन्त्रणं **चित्तनिरोधस्तं करोति** ॥२५॥

एवंविधस्यापि संयमादेवेष्टफलावाप्तिरिति तमाह—

संजमेणं भंते ! जीवे किं जणयइ ? । गोयमा ! संजमेणं अणण्हयत्तं जणयइ ॥२६॥

---

१. यथा यथा श्रुतमवगाहतेऽतिशयरसप्रसरसंयुतमपूर्वम् ।
तथा तथा प्रह्लादते मुनिर्नवनवसंवेगश्रद्धया ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—संयमेन पञ्चाश्रवाः पञ्चेन्द्रियाणि चत्वारः कषायास्त्रयो दण्डा स्तद्विरमणेन 'अणण्हयत्तं'ति **अनंहस्कत्वम**विद्यमानकर्मत्वं **जनयत्या**स्त्रवविरमणात्मकत्वादस्य ॥२६॥

संयमवतोऽपि तपो विना न कर्मक्षय इति तदाह—

तवेणं भंते ! किं जणयइ ? । तवेणं वोदाणं जणयइ ॥२७॥

व्याख्या—तपसा वक्ष्यमाणेन 'वोदाणं'ति **व्यवदानं** पूर्वबद्धकर्मापगमतो विशिष्टां शुद्धिं **जनयति** ॥२७॥

तपोऽनन्तरफलं व्यवदानमिति तमाह—

वोदाणेणं भंते ! किं जणयइ ? । वोदाणेणं अकिरियं जणयइ । अकिरियाए भवित्ता तओ पच्छा सिज्झइ बुज्झइ मुच्चइ परिनिव्वाइ सव्वदुक्खाणमंतं करेइ ॥२८॥

व्याख्या—व्यवदानेनान्तरोक्तार्थे**नाक्रियां** व्युपरतक्रियाख्यशुक्लध्यानचतुर्थभेदं **जनयति**, **अक्रियाको** व्युपरतक्रियाख्यशुक्लध्यानवर्ती **भूत्वा ततः पश्चात् सिध्यति** निष्ठितार्थो भवति, **बुध्यते** ज्ञान—दर्शनाभ्यां वस्तुतत्त्वं जानाति, **मुच्यते** संसारादत एव **परिनिर्वाति** परि समन्तान्निर्वाति कर्माग्निविध्यापनेन शीतीभवति, **सर्वदुःखानामन्तं करोति** ॥२८॥

व्यवदानं च संयमादिषु सत्स्वपि सुखशाता नैव स्यादिति तमाह—

सुहसाएणं भंते ! किं जणयइ ? । सुहसाएणं अणुस्सुयत्तं जणयइ । अणुस्सुए णं जीवे अणुकंपे अणुब्भडे विगयसोगे चरित्तमोहणिज्जं कम्मं खवेइ ॥२९॥

व्याख्या—सुखस्स वैषयिकस्य शातस्तद्गतस्पृहानिवारणेनापनयनं **सुखशातस्तेना**-नुत्सुकत्वं विषयसुखं प्रति निःस्पृहत्वं जनयति । **अनुत्सुकश्च जीवो**ऽनु सह कम्पते इत्यनु**कम्पको** दुःखेन कम्पमानं परमवलोक्य तद्दुःखदुःखितया स्वयमपि तत्काल एव कम्पते, तथा**ऽनुद्भटो**ऽनुल्बणः, **विगतशोको** नैहिकार्थभ्रंशेऽपि शोचते मुक्तिबद्धस्पृह-त्वादेवंविधशुभाध्यवसाया**च्चारित्रमोहनीयं कर्म क्षपयति** ॥२९॥

सुखशातस्थितस्य चाप्रतिबद्धता भवतीति तामाह—

अप्पडिबद्धयाए णं भंते ! जीवे किं जणयइ ? । अप्पडिबद्धयाए णं निस्संगत्तं जणयइ । निस्संगत्तगए णं जीवे एगे एगग्गचित्ते दिया य राउ य असज्जमाणो अप्पडिबद्धे आवि विहरइ ॥३०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—अप्रतिबद्धतया मनसि निरभिष्वङ्गतया **निस्सङ्गत्वं** बहिः सङ्गाभावं **जनयति** । **निस्सङ्गत्वगतो जीव एको** रागादिविकलः, **एकाग्रचित्तो** धर्मैकतानमनाः, **दिवा रात्रौ वाऽसजन्** सदा बहिः सङ्गं त्यजन्नित्यर्थः । **अप्रतिबद्धश्चापि विहरति** मासकल्पादिनोद्यतविहारेण पर्यटतीति भावः ॥३०॥

अप्रतिबद्धता च विविक्तशयनासनतायां सम्भवत्यतस्तामाह—

विवित्तसयणासणयाए णं भंते ! जीवे किं जणयइ ? । विवित्तसयणासणयाए णं चरित्तगुत्तिं जणयइ । चरित्तगुत्ते य णं जीवे विवित्ताहारे दढचरित्ते एगंतरए मोक्खभावपडिवन्ने अट्ठविहकम्मगंठिं निज्जरेइ ॥३१॥

व्याख्या—विविक्तानि स्त्र्याद्यसंसक्तानि **शयनासनानि** 'उपलक्षणत्वादुपाश्रयश्च' यस्य **स** तथा **तस्य भावस्तत्ता** तया **चरित्रगुप्तिं** चरणरक्षां **जनयति** । 'सूत्रत्वाद्' **गुप्तचरित्रश्च जीवो** विविक्तो विकृत्यादिबृंहकवस्तुरहित आहारो यस्य स **विविक्ताहारः**, तथा दृढं निश्चलं चरित्रं यस्येति **दृढचरित्रः**, तत एवैकान्तेन निश्चयेन रत आसक्त **एकान्तरतः** 'संयमे इति गम्यम्', मोक्षे भावेन मनसा प्रतिपन्न आश्रितो **मोक्षभावप्रतिपन्नो** मोक्ष एव मया साधयितव्य इत्यर्थः । अष्टविधं कर्म ग्रन्थिरिव ग्रन्थिर्दुर्भेदतयाष्टविधकर्मग्रन्थिस्तं **निर्जरयति** क्षपयति ॥३१॥

विविक्तशयनासनतायां च विनिवर्तना स्यादिति तामाह—

विणिवट्टणयाए णं भंते ! जीवे किं जणयइ ? । विणिवट्टणयाए णं पावकम्माणं अकरणयाए अब्भुट्ठेइ । पुव्वबद्धाण य निज्जरणयाए तं नियत्तेइ । तओ पच्छा चाउरंतं संसारकंतारं वीइवयइ ॥३२॥

व्याख्या—विनिवर्तनया विषयेभ्य आत्मनः पराङ्मुखीकरणरूपया **पापकर्मणां** सावद्यानुष्ठानाना**मकरणतया** मया न पापानि कर्तव्यानित्येवंरूपया **अभ्युत्तिष्ठते** धर्मं प्रत्युत्सहते । **पूर्वबद्धानां** 'पापकर्मणामिति प्रक्रमः' **निर्जरणया** '**च**शब्दादभिनवानुपादानेन' पापकर्म **निवर्तयति** निर्वासयति । **ततः पश्चाच्चतुरन्तं संसारकान्तारं व्यतिव्रजती**ति स्पष्टम् ॥३२॥

विषयविनिवृत्तश्च कश्चित् सम्भोगप्रत्याख्यानवान् सम्भवत्यतस्तदाह—

संभोगपच्चक्खाणेणं भंते ! जीवे किं जणयइ ? । संभोगपच्चक्खाणेणं आलंबणाइं खवेइ । निरालंबणस्स य आयतट्ठिया जोगा

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भवंति। सएणं लाभेणं तुस्सइ। परलाभं नो तक्केइ नो पीहेइ नो पत्थेइ नो अहिलसेइ। परस्स लाभं अणासाएमाणे अतक्केमाणे अपीहेमाणे अपत्थेमाणे अणभिलसमाणे दोच्चं सुहसिज्जं उवसंपज्जित्ता णं विहरइ ॥३३॥

व्याख्या—सम्भोग एकमण्डलीभोक्तृत्वं तस्य प्रत्याख्यानं गीतार्थावस्थायां जिनकल्पप्रतिपत्त्यां परिहारः **सम्भोगप्रत्याख्यानं तेनालम्बनानि** ग्लानतादीनि **क्षपयति** तिरस्कुरुते सदोद्यत्वेन वीर्चाचारमेवालम्बते। **निरालम्बनस्यायत**तो मोक्षः संयमो वा स एवार्थः प्रयोजनं येषामित्**यायतार्थिका योगा** व्यापारा **भवन्ति** प्रबन्धतः प्रवर्तन्ते। तथा **स्वकीयेन लाभेन सन्तुष्यति** निरभिलाषो भवति। ततश्च **परलाभं नो तर्कयति** यदिदं मह्यं दास्यतीति मनसा न विकल्पयति, **नो स्पृहयति** तच्छ्रद्धालुतयात्मनः स्पृहां नाविष्करोति, **नो प्रार्थयते** मह्यं देहीति न याचते, **नो अभिलषति** तल्लालसतया न वाञ्छति। एवंविधश्च कं गुणमाप्नोति ? तमेवोक्तमनूद्याह—तथा **परस्य लाभमनास्वादयन्न**भुञ्जानो**ऽतर्कयन्नि**त्यादिपूर्वोक्तगुणविशिष्टो 'दोच्चं' ति **द्वितीयां सुखशय्यामुपसम्पद्य** प्राप्य **विहरति** ईदृग्रूपत्वात् तस्याः। किञ्चानुवादसूत्रे 'अणासाएमाणे' इति दर्शनात् पूर्वत्रापि 'णो आसाए' त्ति वचोऽनुमीयते तच्च गम्यतया न निर्दिष्टं लेखकवैगुण्याद् वेति न ज्ञायते ॥३३॥

सम्भोगप्रत्याख्यानवतश्चोपधिप्रत्याख्यानमपि सम्भवतीति तदाह—

उवहिपच्चक्खाणेणं भंते ! किं जणयइ ? । उवहिपच्चक्खाणेणं अपलिमंथं जणयइ। निरुवहिए णं जीवे निक्कंखे उवहिमंतरेण न संकिलिस्सइ ॥३४॥

व्याख्या—उपधेरुपकरणस्य रजोहरणव्यतिरिक्तस्य प्रत्याख्यानं न मयाऽसौ ग्रहीतव्य इत्येवं निवृत्ति**रुपधिप्रत्याख्यानं तेन** परिमन्थः स्वाध्यायादिक्षतिस्तदभावो**ऽपरिमन्थस्तं जनयति। निरुपधिको जीवो निष्काङ्क्षो** वस्त्राद्यभिलाषरहितः सन्**नुपधिमन्तरेण** न सङ्क्लिश्यते न मानसादिक्लेशमाप्नोति ॥३४॥

उपधिप्रत्याख्याता च जिनकल्पिकादिरेषणीयालाभेनोपोषित एवास्ते। अत आहारप्रत्याख्यानमाह—

आहारपच्चक्खाणेणं भंते ! जीवे किं जणयइ ? । आहारपच्चक्खाणेणं जीवियासंसप्पओगं वुच्छिदइ। जीवियसंसप्पओगं वुच्छिदित्ता जीवे आहारमंतरेणं न किलिस्सइ ॥३५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—आहारप्रत्याख्यानेनानेषणीयभक्तपानत्यागरूपेणं जीविते प्राणधारणे **आशंसाभिलाषस्तस्याः प्रयोगो** व्यापारस्तं **व्यवच्छिनत्ति** आहाराधीनत्वाज्जीवितस्य । **जीविताशंसाप्रयोगं विच्छिद्य जीव आहारमन्तरेण न संक्लिश्यति** विकृष्टतपोऽनुष्ठानेऽपि न बाधामनुभवतीत्यर्थः ॥३५॥

एतत् प्रत्याख्यानत्रयमपि कषायाभाव एव फलवदिति तत्प्रत्याख्यानमाह—

कसायपच्चक्खाणेणं भंते ! जीवे किं जणयइ ? । कसायपच्चक्खाणेणं वीयरागभावं जणयइ । वीयरागभावपडिवन्ने य णं जीवे समसुह–दुक्खे भवइ ॥३६॥

व्याख्या—कषायप्रत्याख्यानेन क्रोधादिपरिहारेण वीतो गतो राग उपलक्षणाद् द्वेषश्चास्येति **वीतरागस्तद्भावं जनयति** । 'प्राकृतत्वात्' **प्रतिपन्नवीतरागभावः पुनः जीवः समे** राग–द्वेषाभावतस्तुल्ये **सुख–दुःखे** यस्य **स** तथाविधो भवति ॥६॥

निष्कषायोऽपि योगप्रत्याख्यानादेव मुक्तिसाधक इति तदाह—

जोगपच्चक्खाणेणं भंते ! जीवे किं जणयइ ? । जोगपच्चक्खाणेणं अजोगत्तं जणयइ । अजोगी य णं जीवे नवं कम्मं न बंधइ पुव्वबद्धं निज्जरेइ ॥३७॥

व्याख्या—योगा मनो—वाक्—कायव्यापारा**स्तत्प्रत्याख्यानेन** तन्निरोधे**नायोगत्वमयोगिभावं जनयति । अयोगी च जीवो नवं कर्म न बध्नाति । पूर्वबद्धं** भवोपग्राहिकर्मचतुष्टयमन्यस्य तदाऽसम्भवा**न्निर्जरयति** क्षपयति ॥३७॥

योगप्रत्याख्यानतः शरीरप्रत्याख्यानमपि स्यादिति तदाह—

सरीरपच्चक्खाणेणं भंते ! जीवे किं जणयइ ? । सरीरपच्चक्खाणेणं सिद्धाइसयगुणत्तं निव्वत्तेइ । सिद्धाइसयगुणसंपन्ने य णं जीवे लोगग्गमुवगए परमसुही भवइ ॥३८॥

व्याख्या—शरीरमौदारिकादि **तत्प्रत्याख्यानेन सिद्धानामतिशयगुणा** न कृष्णा न नीला इत्यादयो यस्य **स** सिद्धातिशयगुण**स्तद्भावस्तत्त्वं निर्वर्तयति** जनयति । **सिद्धातिशयगुणसम्पन्नश्च जीवो लोकाग्रं** मुक्तिपद**मुपगतः** प्राप्तः **परमसुखी भवति** । यद्यपि योगप्रत्याख्यानेन शरीरप्रत्याख्यानमप्युक्तमेव, तथापि मनो—वाग्योगयोरेतदाधारत्वात् प्राधान्यख्यापनार्थम् ॥३८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सम्भोगादिप्रत्याख्यानानि प्रायः सहायप्रत्याख्यान एव सुकराणि स्युरिति तदाह—

सहायपच्चक्खाणेणं भंते ! जीवे किं जणयइ ? । सहायपच्चक्खाणेणं एगीभावं जणयइ । एगीभावभूए य जीवे एगग्गं भावेमाणे अप्पझंझे अप्पकसाए अप्पकलहे अप्पतुमंतुमे संजमबहुले संवरबहुले समाहिए आवि भवइ ॥३९॥

व्याख्या—सहायाः साहाय्यकारिणो यतयस्**तत्प्रत्याख्यानेन** तथाविधयोग्यताभाविनाऽभिग्रहविशेषे**णैकीभावमे**कत्वं **जनयति** । **एकीभावभूतश्चै**कत्वप्राप्तश्च जीव **एकाग्र्यमे**कालम्बनत्वं **भावयन्न**भ्यसन् **अल्पझञ्झो**ऽविद्यमानवाक्कलहो**ऽल्पकषायो**ऽविद्यमानक्रोधादिः । **अल्पम**विद्यमानं 'तुमंतुम'त्ति **त्वं त्वमि**ति स्वल्पापराधिन्यपि त्वमेवं पुराऽपि कृतवान्, त्वमेवं सदा करोषीत्यादि पुनः पुनः प्रलपनं **यस्य स** तथा । 'सर्वत्राल्पशब्दोऽभाववाची' । तथा **संयमबहुलः संवरबहुल** इति प्राग्वत् । अत एव **समाहितो** ज्ञानादिसमाधिमां**श्चापि भवति** ॥३९॥

एवंविधश्चान्ते भक्तप्रत्याख्यानवान् स्यादिति तदाह—

भत्तपच्चक्खाणेणं भंते ! जीवे किं जणयइ ? । भत्तपच्चक्खाणेणं अणेगाइं भवसयाइं निरुंभइ ॥४०॥

व्याख्या—भक्तप्रत्याख्यानेनाहारत्यागरूपेण भक्तपरिज्ञानादिना **अनेकानि भवशतानि निरुणद्धि** ॥४०॥

सर्वप्रत्याख्यानप्रधानं सद्भावप्रत्याख्यानमाह—

सब्भावपच्चक्खाणेणं भंते ! जीवे किं जणयइ ? । सब्भावपच्चक्खाणेणं अणियट्टिं जणयइ । अणियट्टिपडिवन्ने य अणगारे चत्तारि कम्मंसे खवेइ । तंजहा—वेयणिज्जं आउयं नामं गोयं पच्छा सिज्झइ, बुज्झइ, मुच्चइ, परिनिव्वाइ, सव्वदुक्खाणमंतं करेइ ॥४१॥

व्याख्या—सद्भावेन सर्वथा पुनःकरणासम्भवात् परमार्थेन प्रत्याख्यानं **सद्भावप्रत्याख्यानं** सर्वसंवररूपं शैलेशीति यावत् **तेनानिवृत्तिं** शुक्लध्यानचतुर्थभेदं **जनयति** । **प्रतिपन्नानिवृत्तिश्चानगारश्चत्वारि** केवलिनः **कर्मांशानि** 'अंशशब्दस्य सत्पर्यायत्वात्' सत्कर्माणि भवोपग्राहीणि **क्षपयति तद् यथा वेदनीयमायुर्नाम गोत्रं** चेति । ततः **पश्चात् सिध्यति बुध्यत** इति पूर्ववत् ॥४१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एतत् प्रत्याख्यानं प्रायः प्रतिरूपतायामेव स्यादतस्तामाह—

पडिरूवयाए णं भंते ! जीवे किं जणयइ ? । पडिरूवयाए णं लाघवियं जणयइ । लहुभूए णं जीवे अप्पमत्ते पागडलिंगे पसत्थलिंगे विसुद्धसम्मत्ते सत्तसमिइसमत्ते सव्वपाण—भूय—जीव—सत्तेसु वीससणिज्जरूवे अप्पपडिलेहे जिइंदिए विउलतवसमिइसमन्नागए आवि भवइ ॥४२॥

व्याख्या—'**प्रतिः** सादृश्ये' ततः प्रतीति स्थविरकल्पिकादिसदृशं **रूपं** वेषो यस्य **स** तथा **तद्भावस्तत्ता** तयाऽधिकोपकरणत्यागरूपया लाघवमस्यास्तीति लाघवी तद्भावो **लाघविता तां** द्रव्यतः स्वल्पोकरणत्वेन भावतस्त्वप्रतिबद्धतया **जनयति** । **लघुभूतश्च** जीवोऽ**प्रमत्त**स्तथा **प्रकटलिङ्गः** स्थविरकल्पादिरूपेण विज्ञायमानत्वात् । **प्रशस्तलिङ्गो** जीवरक्षाहेतुरजोहरणादिधारकत्वात् । **विशुद्धसम्यक्त्वः** । सत्त्वं चापत्स्ववैक्लव्याध्यवसानम्, समितय ईर्याद्याः पञ्च समाप्ताः परिपूर्णा यस्य स **समाप्तसत्त्वसमितिः** 'निष्ठान्तस्य परनिपातः प्राकृतत्वात्' तत एव **सर्वप्राण—भूत—जीव—सत्त्वेषु विश्वसनीयरूप**स्तत्पीडाऽपहारित्वात् । **अल्पप्रत्युपेक्षो**ऽल्पोपकरणत्वात् । **जितेन्द्रियो** विपुलेनानेकभेदतया विस्तीर्णेन तपसा समितिभिश्च समन्वागतो युक्तो **विपुलतपःसमितिसमन्वागतश्चापि भवति** ॥४२॥

प्रतिरूपतायामपि वैयावृत्त्यादेवेष्टफलावाप्तिरिति तदाह—

वेयावच्चेणं भंते ! जीवे किं जणयइ ? । वेयावच्चेणं तित्थयरनामगोयं कम्मं निबंधइ ॥४३॥

व्याख्या—व्यावृतः कुलादिकार्येषु व्यापारवांस्तद्भावो **वैयावृत्त्यं तेन तीर्थकरनामकर्म निबध्नाति** । उक्तं हि तद्धेतुविंशतिस्थानसूत्रे—'[1]**वेयावच्चे समाही य** 'त्ति ॥४३॥

वैयावृत्त्यवांश्च सर्वगुणभाग् स्यादिति तदाह—

सव्वगुणसंपन्नया णं भंते ! जीवे किं जणयइ ? । सव्वगुणसंपन्नया णं अपुणरावत्तिं जणयइ । अपुणरावत्तिपत्तए णं जीवो सारीर—माणुसाणं दुक्खाणं नो भागी भवइ ॥४४॥

व्याख्या—सर्वगुणैर्ज्ञानादिभिः सम्पन्नो युक्तस्तद्भावः **सर्वगुणसम्पन्नता तया**

१. वैयावृत्त्ये समाधिश्चेति ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अपुनरावृत्तिं पुनरिहागमनाभावमर्थान्मुक्तिं **जनयति अपुनरावृत्तिप्राप्तो जीवः शारीर-मानसानां दुःखानां नो भागी भवति** सिद्धिसुखभाग् भवतीति भावः ॥४४॥

सर्वगुणसम्पन्नता च वीतरागतया स्यादिति तामाह—

वीयरागयाए णं भंते ! जीवे किं जणयइ ? । वीयरागयाए णं नेहाणुबंधणाणि तण्हाणुबंधणाणि य वुच्छिदइ । मणुन्नामणुन्नेसु सद्द-फरिस-रूव-रस-गंधेसु विरज्जइ ॥४५॥

व्याख्या—वीतरागतया राग-द्वेषापगमरूपया **स्नेहः** पुत्रादिविषयः, **तृष्णा** द्रव्यादि-विषया तद्रूपाण्यनु**बन्धनान्य**नुकूलानि बन्धनानि **व्यवच्छिनत्ति** । ततश्च **मनो-ज्ञामनोज्ञेषु शब्द-स्पर्श-रूप-रस-गन्धेषु विरज्यते** । कषायप्रत्याख्यानेनैव गतार्थत्वेऽपि रागस्य सर्वानर्थमूलत्वख्यापनार्थं पृथग् वीतरागतोपादानम् ॥४५॥

वीतरागतायां तात्त्विकं श्रामण्यम्, तत्र च व्रतानि, तत्पालनोपायभूता क्षान्तिरेव प्रथमेति तामाह—

खंतीए णं भंते ! जीवे किं जणयइ ? । खंतीए णं परीसहे जणयइ ॥४६॥

व्याख्या—क्षान्तिः क्रोधजय**स्तया परीषहान**र्थाद् वधादीन् **जनयति** ॥४६॥

क्षान्तिस्थितेन मुक्तिरपि कार्येति तामाह—

मुत्तीए णं भंते ! जीवे किं जणयइ ? । मुत्तीए णं अकिंचणं जणयइ । अकिंचणे य जीवे अत्थलोलाणं पुरिसाणं अपत्थणिज्जे भवइ ॥४७॥

व्याख्या—मुक्तिर्निर्लोभता **तया अकिञ्चनं** निष्परिग्रहत्वं **जनयति । अकिञ्चनश्च जीवो**ऽर्थो लोला लम्पटा **अर्थलोलाश्चौ**रादय**स्तेषामप्रार्थनीयः** 'प्रस्तावाद् याचितुम्' अभिलषणीयो **न भवति** ॥४७॥

लोभे सति माया स्यात्, तदभाव आर्जवमतस्तदाह—

अज्जवयाए णं भंते ! जीवे किं जणयइ ? । अज्जवयाए णं काउज्जुययं भावुज्जुययं भासुज्जुययं अविसंवायणं जणयइ । अवि-संवायणसंपन्ने णं जीवे धम्मस्स आराहए भवइ ॥४८॥

व्याख्या—ऋजुरवक्रस्तद्भाव **आर्जवं तेन** मायापरिहाररूपेण कायेन ऋजुरेव

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ऋजुकः **कायर्जुकस्तद्भावस्तत्ता** कुब्जादिवेष–भ्रूविकाराद्यकरणतः प्राञ्जलता ताम्, भावोऽभिप्रायस्तेन ऋजुकता **भावर्जुकता** यदन्यद् विचिन्तयन् लोकभीत्यादिहेतोरन्यद् वाचा भाषतेऽन्यत् करोति तत्त्यागरूपा ताम्, भाषया ऋजुकता **भाषर्जुकता** यदुपहासादि-हेतोरन्यदेशभाषया भाषणं तत्परित्यागात्मिका **ताम्, अविसंवादनं** पराविप्रतारणं **जनयति** । **अविसंवादनसम्पन्नः** 'उपलक्षणात् कायर्जुकतादिसम्पन्नश्च' **जीवो धर्मस्याराधको भवति** ॥४८॥

एवंगुणस्यापि विनयेनैव फलावाप्तिः, स च मार्दवादेवेति तदाह–

मद्दवयाए णं भंते ! जीवे किं जणयइ ? । मद्दवयाए णं मिउमद्दवसंपन्ने अट्ठ मयट्ठाणाइं निट्ठवेइ ॥४९॥

व्याख्या–मार्दवेन 'अभ्यस्यमानेनेति गम्यम्' **मृदुः** कोमलः सकलभव्यजनमनः-सन्तोषहेतुत्वाद् द्रव्यतो भावतश्चावनमनशील**स्तस्य भावो मार्दवं** यत् सदा मार्दवोपेतस्यैव भवति **तेन** सम्पन्नस्तदभ्यासात् सदा मृदुस्वभावो **मृदुमार्दवसम्पन्नः** सन् **अष्ट मद-स्थानानि** जात्यादीनि **निष्ठापयति** विनाशयति ॥४९॥

एतत् तत्त्वतः सत्यव्यवस्थितस्यैव स्यात्, तत्र च भावसत्यं प्रधानमिति तदाह–

भावसच्चेणं भंते ! जीवे किं जणयइ ? । भावसच्चेणं भावविसोहिं जणयइ । भावविसोहीए वट्टमाणे जीवे अरहंतपन्नत्तस्स धम्मस्स आराहणयाए णं अब्भुट्ठेइ । अरहंतपन्नत्तस्स धम्मस्स आराहणयाए णं अब्भुट्ठित्ता परलोगधम्मस्स आराहए भवइ ॥५०॥

व्याख्या–भावसत्येन शुद्धान्तरात्मतारूपेण पारमार्थिकावितथत्वेन **भावविशुद्धिं** विशुद्धाध्यवसायात्मिकां **जनयति । भावविशुद्धौ वर्तमानो जीवोऽर्हत्प्रज्ञप्तस्य धर्मस्या-राधनयाऽभ्युत्थाय परलोकधर्मस्याराधको भवति** प्रेत्यजिनधर्मावाप्त्येति भावः ॥५०॥

भावसत्ये च करणसत्यं सम्भवतीति तदाह–

करणसच्चेणं भंते ! जीवे किं जणयइ ? । करणसच्चेणं करणसत्तिं जणयइ । करणसच्चे वट्टमाणो जीवो जहावाई तहाकारी आवि भवइ ॥५१॥

व्याख्या–करणसत्यं यत् प्रतिलेखनादिक्रियां यथोक्तामुपयुक्तः कुरुते **तेन करणशक्तिं** तन्माहात्म्यात् पुराऽनध्यवसितक्रियासामर्थ्यरूपां **जनयति । करणसत्ये वर्तमानो जीवो यथावादी तथाकारी चापि भवति** स हि सूत्रार्थमधीयानो यथैव

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

क्रियाकलापं वदति तथैव करोतीति भावः ॥५१॥

एवंविधस्य योगसत्यमपि स्यादिति तदाह—

जोगसच्चेणं भंते ! जीवे किं जणयइ ? । जोगसच्चेणं जोगे विसोहेइ ॥५२॥

व्याख्या—योगा मनो—वाक्—कायास्तेषां सत्यमवितथत्वं **योगसत्यं तेन योगान् विशोधयति** कर्मबन्धाभावान्निर्दोषान् करोति ॥५२॥

एतच्च सत्यं गुप्त्यन्वितस्यैव स्यादित्याद्यां मनोगुप्तिमाह—

मणगुत्ताए णं भंते ! जीवे किं जणयइ ? । मणगुत्ताए णं जीवे एगग्गं जणयइ । एगग्गचित्ते णं जीवे मणगुत्ते संजमाराहए भवइ ॥५३॥

व्याख्या—मनोगुप्ततया मनोगोपनरूपया जीव **एकाग्र्यं** धर्मैकतानचित्तत्वं **जनयति । एकाग्रचित्तो जीवो** गुप्तमशुभाध्यवसायेभ्यो रक्षितं मनो येन स **गुप्तमनाः संयमाराधको भवति** मनोरोधस्य तत्र प्रधानत्वात् ॥५३॥

द्वितीयां गुप्तिमाह—

वयगुत्तयाए णं भंते ! जीवे किं जणयइ ? । वयगुत्तयाए णं निव्विकारत्तणं जणयइ । निव्विकारेणं जीवे वयगुत्ते अज्झप्पजोग-साहणजुत्ते आवि भवइ ॥५४॥

व्याख्या—वाग्गुप्ततया कुशलवागुदीरणया **निर्विकारत्वं** विकथादिवाग्विकाराभावं **जनयति । निर्विकारो जीवो वाग्गुप्तः** सर्वथा वाग्निरोधलक्षणवाग्गुप्तिमान**ध्यात्मं** मनस्तस्य **योगा** व्यापार धर्मध्यानादयस्**तेषां साधनान्ये**काग्रतादीनि **तैर्युक्तश्चापि भवति** । वाग्गुप्त एव हि चित्तैकाग्रतादिभाग् भवेदिति भावः ॥५४॥

तृतीयां गुप्तिमाह—

कायगुत्तयाए णं भंते ! जीवे किं जणयइ ? । कायगुत्तयाए णं संवरं जणयइ । संवरेण कायगुत्ते पुणो पावासवनिरोह करेइ ॥५५॥

व्याख्या—कायगुप्ततया शुभयोगप्रवृत्त्यात्मककायगुप्तिरूपया **संवरम**शुभयोगनिरोधरूपं **जनयति । संवरेण** 'अभ्यस्यमानेनेति गम्यम्' **कायगुप्तः पुनः** सर्वथा निरुद्धकायिकव्यापारः पापस्य कर्मण आस्रवा उपादानहेतवो हिंसादयः **पापास्रवास्तन्निरोधं करोति** ॥५५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इतश्च गुप्तित्रयाद् यथाक्रमं मनो-वाक्-कायसमाधारणासम्भव इति तामाह—

मणसमाहारणयाए णं भंते ! जीवे किं जणयइ ? । मणसमाहारणयाए एगग्गं जणयइ । एगग्गं जणइत्ता नाणपज्जवे जणयइ । नाणपज्जवे जणइत्ता सम्मत्तं विसोहेइ मिच्छत्तं विणिज्जरेइ ॥५६॥

व्याख्या—मनसः 'सम्' इति सम्यक् 'आङ्' इति मर्यादया श्रुतोक्तभावाप्त्या वा धारणा व्यवस्थापनं **मनःसमाधारणा तयैकाग्र्यं जनयति । ऐकाग्र्यं जनयित्वा ज्ञानपर्यवान्** विशिष्टवस्तुतत्त्वावबोधरूपान् **जनयति । ज्ञानपर्यवान् जनयित्वा सम्यक्त्वं विशोधयति मिथ्यात्वं** च **निर्जरयति** ॥५६॥

वयसमाहारणयाए णं भंते ! जीवे किं जणयइ ? । वयसमाहारणयाए णं वयसाहारणदंसणपज्जवे विसोहेइ । वयसाहारणदंसणपज्जवे विसोहित्ता सुलहबोहियत्तं निव्वत्तेइ दुलहबोहियत्तं निज्जरेइ ॥५७॥

व्याख्या—वाक्यसमाधारणया स्वाध्याय एव वाग्निवेशनात्मिकया, वाचा साधारणा **वाक्साधारणा** ये वचसोऽपि विषयाः प्रज्ञापनीया इत्यर्थः 'अवाग्विषयाणामन्यथात्वासम्भवेन शोधनानुपपत्तेः' तादृशाश्च ते **दर्शनपर्यवाश्च** सम्यग्भेदारूपा वाक्साधारणदर्शनपर्यवास्तान् **विशोधयति** शङ्कादिमालिन्यापनयनेन विशुद्धान् निर्मलान् करोति । **वाक्साधारणदर्शनपर्यवान् विशोध्य सुलभबोधिकत्वं निर्वर्तयति** । तत एव **दुर्लभबोधिकत्वं निर्जरयति** ॥५७॥

कायसमाहारणयाए णं भंते ! जीवे कि जणयइ ? । कायसमाहारणयाए चरित्तपज्जवे विसोहेइ । चरित्तपज्जवे विसोहइत्ता अहक्खायचरित्तं विसोहेइ । अहक्खायचरित्तं विसोहित्ता चत्तारि केवलिकम्मंसे खवेइ । तओ पच्छा सिज्झइ बुज्झइ ॥५८॥

व्याख्या—कायसमाधारणया संयमयोगेषु देहस्य सम्यग्व्यवस्थापनरूपया **चरित्रपर्यवान्** चारित्रभेदान् 'क्षायौपशमिकानिति गम्यते' **विशोधयति** निर्मलीकरोति । **चारित्रपर्यवान् विशोध्य यथाख्यातचारित्रं विशोधयति** चारित्रमोहोदयनिर्जरणेन निर्मलीकुरुते । **यथाख्यातचारित्रं विशोध्य चत्वारि केवलिसत्कर्मांशान्** भवोपग्राहीणि सत्कर्माणि **क्षपयति ततः सिध्यति बुध्यते** इति पूर्ववत् ॥५८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एवं समाधारणात्रयाद् यथाक्रमं ज्ञानादित्रयस्य शुद्धिमुक्त्वा फलमाह—

नाणसंपन्नयाए णं भंते ! जीवे किं जणयइ ? । नाणसंपन्नयाए सव्वभावाभिगमं जणयइ । नाणसंपन्ने जीवे चाउरंतसंसारकंतारे न विणस्सइ । जहा सूई ससुत्ता पडिया न विणस्सइ । तहा जीवे ससुत्ते संसारे न विणस्सइ । नाण—विणय—तव—चरित्तजोगे संपाउणइ । ससमय—परसमयसंघायणिज्जे भवइ ॥५९॥

व्याख्या—ज्ञानमिह प्रस्तावाच्छुतज्ञानं **तत्सम्पन्नतया** जीवः **सर्वभावानामभिगमं** ज्ञानं **जनयति** । तथा **ज्ञानसम्पन्नो जीवश्चतुरन्ते संसारकान्तारे न विनश्यति** । 'यथेति दृष्टान्ते' **सूची ससूत्रा सुप्रापतया न विनश्यति** 'कचवरादिपतिताऽपीति गम्यम्' तथा **जीवः ससूत्रः** सश्रुतः **संसारे न विनश्यति** । यतः—

"सूई[१] जहा ससुत्ता न नस्सइ कयवरंमि पडिया वि ।
जीवो तहा ससुत्तो न नस्सइ गओ वि संसारे" ॥१॥

तत एव ज्ञानं चावध्यादि, विनयश्च ज्ञान—विनयादिस्तपश्च वक्ष्यमाणं, चरित्र-योगाश्चारित्र-व्यापारा **ज्ञान—विनय—तपश्चारित्रयोगास्तान् प्राप्नोति** । स्वसमय—परसमययोः सङ्घात-नीयः प्रमाणपुरुषतया मीलनीयः **स्वसमय—परसमयसङ्घातनीयो भवति** । स्वसमय—परसमयवेदिषु पुरुषेष्वेव संशयादिव्यवच्छेदाय मीलनसम्भवादिति भावः ॥५९॥

दंसणसंपन्नयाए णं भंते ! जीवे किं जणयइ ? । दंसणसंपन्नयाए णं भवमिच्छत्तच्छेयणं करेइ । परं न विज्झाइ । अणुत्तरेणं नाण—दंसणेणं अप्पाणं संजोएमाणे सम्मं भावेमाणे विहरइ ॥६०॥

व्याख्या—दर्शनसम्पन्नतया क्षायोपशमिकसम्यक्त्वसमन्वितया **भवहेतुमिथ्या-त्वस्य च्छेदनं** क्षपणं **करोति** कोऽर्थः ? क्षायिकसम्यक्त्वमाप्नोति । ततश्च **परमित्युत्तर-**कालमुत्कृष्टतस्तद्भवे एव मध्यम—जघन्यापेक्षया तृतीये चतुर्थे वा जन्मनि केवलोत्पत्तौ **न विध्यायति** न ज्ञान—दर्शनप्रकाशाभावरूपं विध्यानमाप्नोति । **किन्त्वनुत्तरेण** क्षायिकत्वात् प्रधानेन **ज्ञान—दर्शनेनात्मानं संयोजयन्** प्रतिसमयमपरापरेणोपयोगरूपतयोत्पद्यमानेन घटयन् । संयोजनं च भेदेऽपि स्यादत आह—**सम्यग् भावयं**स्तेनात्मानमात्मसान्नयन् **विहरति** भवस्थकेवलितया मुक्ततया वा ॥६०॥

---

१. सूची यथा ससूत्रा न नश्यति कचवरे पतिताऽपि ।
जीवस्तथा ससूत्रो न नश्यति गतोऽपि संसारे ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

चरित्तसंपन्नयाए णं भंते ! जीवे किं ? । चरित्तसंपन्नयाए णं सेलेसीभावं जणयइ । सेलेसिं पडिवन्ने अणगारे चत्तारि कम्मंसे खवेइ । तओ पच्छा सिज्झइ बुज्झइ ॥६१॥

व्याख्या–चरित्रसम्पन्नतया शैलेशो मेरुः स इव शैलेशो मुनिर्निरुद्धयोगतया- ऽत्यन्तस्थैर्येण तस्येयमवस्था शैलेशी तस्या भावः **शैलेशीभावस्तं जनयति** । उक्तं हि– '[1]**सेलेसो इह मेरू सेलेसी होइ जा तहाचलया**' । **शैलेशीप्रतिपन्नोऽनगारश्चत्वारि केवलि-सत्कर्माणि क्षपयती**त्यादि प्राग्वत् ॥६१॥

चारित्रं चेन्द्रियनिग्रहादेव स्यादिति तन्निग्रहमाह–

सोइंदियनिग्गहेणं भंते ! जीवे किं जणयइ ? । सोइंदियनिग्गहेणं मणुन्नामणुन्नेसु सद्देसु राग-द्दोसनिग्गहं जणयइ । तप्पच्चइयं च कम्मं न बंधइ । पुव्वबद्धं च निज्जरेइ ॥६२॥

व्याख्या–श्रोत्रेन्द्रियस्य कर्णस्य **निग्रहः** स्वविषयाभिमुखमनुधावतो नियमनं नियन्त्रणं श्रोत्रेन्द्रियनिग्रह**स्तेन मनोज्ञामनोज्ञेषु शब्देषु राग-द्वेषनिग्रहं जनयति । तत्प्रत्ययिकं** राग-द्वेषनिमित्तं **कर्म न बध्नाति । पूर्वबद्धं** 'प्रक्रमात् कर्म' **निर्जरयति** क्षपयति तन्निग्रहे शुभाध्यवसायप्रवृत्तेरिति भावः ॥६२॥

चक्खिदियनिग्गहेणं भंते ! जीवे किं जणयइ ? । चक्खिदिय-निग्गहेणं मणुन्नामणुन्नेसु रूवेसु राग-द्दोसनिग्गहं जणयइ ॥६३॥ घाणेंदिए एवं चेव ॥६४॥ जिब्भिदिए वि तहेव ॥६५॥ फासिंदिए वि एवं ॥६६॥ नवरं गंधेसु रसेसु फासेसु वत्तव्वं ॥

व्याख्या–एवं **चक्षुरिन्द्रियनिग्रहेण** चक्षुरिन्द्रियग्राह्येषु **रूपेषु** ॥६३॥ तथा **घ्राणेन्द्रियनिग्रहेण** तद्ग्राह्येषु **गन्धेषु** ॥६४॥ **जिह्वेन्द्रियनिग्रहेण** एतद्ग्राह्येषु **रसेषु** ॥६५॥ **स्पर्शनेन्द्रियनिग्रहेण** तद्ग्राह्येषु **स्पर्शेषु** । शेषं श्रोत्रेन्द्रियवद् विज्ञेयम् ॥६६॥

एतन्निग्रहोऽपि कषायविजयात् स्यादतस्तमाह–

कोहविजएणं भंते ! जीवे किं जणयइ ? । कोहविजएणं खंतिं जणयइ । कोहवेयणिज्जं कम्मं न बंधइ । पुव्वबद्धं च निज्जरेइ ॥६७॥

---

१. शैलेश इह मेरुः शैलेशी भवति या तथाऽचलता ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—क्रोधविजये दुरन्ततादिपरिभावनेनोदयनिरोधस्तेन **क्षान्तिं** जनयति । क्रोधेन वेद्यत इति **क्रोधवेदनीयं** तद्धेतुभूतपुद्गलरूपं **कर्म न बध्नाति** । तथा **पूर्वबद्धं** 'प्रक्रमात् तदेव' **निर्जरयति** क्षपयति । अत्रार्थे लौकिकमुदाहरणम्—

सिरि**कण्हो**[1] बलदेवो सव्वगो तह दारुगो य चत्तारि ।
एऐ अस्साहरिया संपत्ता अडविमज्झंमि ॥१॥

संता नग्गोहतले वीसमिया ते तुरङ्गमं मोत्तुं ।
रत्ति वसंति दुप्पय—चउप्पयाई भयग्घत्था ॥२॥

अन्नोन्नं च कहंति य इक्को य करेउ पहरजागरणं ।
अह दारुगो य जग्गइ पढमे जामे सुयंतन्नो ॥३॥

ताव य पिसायरूवो कोहो आगम्म दारुगं भणइ ।
बहुदिणछुहालुओ हं सुत्ते तिन्ने वि भक्खेमि ॥४॥

तो दारुगो पयंपइ मइ संते को इमे य भक्खेइ ? ।
भणइ पिसाओ जइ पुण एवं ता देहि मह जुज्झं ॥५॥

बाढं ति दारुगो पुण भणिऊणं तेण जुज्झिउं लग्गो ।
अन्नोन्नमाहणंति य मुट्ठिपहाराइसव्वेहिं ॥६॥

---

१. श्रीकृष्णे बलदेवः स्वर्गस्तथा दारुकश्च चत्वारः ।
एतेऽश्वाहृताः सम्प्राप्ता अटवीमध्ये ॥१॥

श्रान्ता न्यग्रोधतले विश्रान्तास्ते तुरङ्गमान् मुक्त्वा ।
रात्रिं वसन्ति द्विपद-चतुष्पदादिभयग्रस्ताः ॥२॥

अन्योऽन्यं च कथयन्ति चैकश्च करोतु प्रहरजागरणम् ।
अथ दारुकश्च जागर्ति प्रथमे यामे स्वपन्त्यन्ये ॥३॥

तावच्च पिशाचरूपः क्रोध आगत्य दारुकं भणति ।
बहुदिनबुभुक्षितोऽहं सुप्तान् त्रीनपि भक्षयामि ॥४॥

ततो दारुकः प्रजल्पति मयि सति क इमांश्च भक्षयेत् ? ।
भणति पिशाचो यदि पुनरेवं तद् देहि मम युद्धम् ॥५॥

बाढमिति दारुकः पुनर्भणित्वा तेन युद्धं लग्नः ।
अन्योन्यमाहतश्च मुष्टिप्रहारादिसर्वैः ॥६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

[1]तं दारुगो निहणिउं जहा न सक्केइ तह पवड्ढेइ ।
कोहो य दारुगस्स य बलं च गाढं पिसायगस्स ॥७॥

एवं किच्छप्पाणो निव्वाहइ दारुगो पहरमेगं ।
सिर-जाणु-कोप्परेसुं दढप्पहारव्वणाइन्नो ॥८॥

लग्गे दुइज्जजामे उट्ठइ अह सव्वगो पबोहट्ठा ।
सुत्ते य दारुगे उण पयडीहूओ पिसाओ सो ॥९॥

सो सव्वगं च जंपइ एए खाएमि देउ वा जुद्धं ।
तेण य किच्छप्पाणो तहेव पुण सव्वगो वि कओ ॥१०॥

तइए पहरे जग्गइ बलदेवो उट्ठिओ महाबलिओ ।
तेण य जुज्झेउं तहेव पुण दारुग व्व कओ ॥११॥

एवं चउत्थजामे उट्ठइ हरिसुब्भरो हरी जाव ।
तावागओ पिसाओ कहेइ तिन्ने वि खाएमि ॥१२॥

कहइ हरी कह खायसि सहायए मह अणिज्जिओ एए ? ।
इइ वोत्तूणं दोण्णि वि संगामं काउमारद्धा ॥१३॥

---

१. तं दारुको निहन्तुं यथा न शक्नोति तथा प्रवर्धते ।
क्रोधश्च दारुकस्य च बलं च गाढं पिशाचकस्य ॥७॥

एवं कृच्छ्रात्मा निर्वाहयति दारुकः प्रहरमेकम् ।
शिरो-जानु-कूर्परेषु दृढप्रहारव्रणाकीर्णः ॥८॥

लग्ने द्वितीययामे उत्तिष्ठत्यथ सर्वगः प्रबोधार्थम् ।
सुप्ते च दारुके पुनः प्रकटीभूतः पिशाचः स ॥९॥

स सर्वगं च जल्पत्येतान् खादामि ददातु वा युद्धम् ।
तेन च कृच्छ्रात्मा तथैव पुनः सर्वगोऽपि कृतः ॥१०॥

तृतीये प्रहरे जागर्ति बलदेव उत्थितो महाबलिकः ।
तेन च योद्धुं तथैव पुनर्दारुक इव कृतः ॥११॥

एवं चतुर्थयामे उत्तिष्ठति हर्षोद्भरो हरिर्यावत् ।
तावदागतः पिशाचः कथयति त्रीनपि खादामि ॥१२॥

कथयति हरिः कथं खादसि सहायकान् ममानिर्जित एतान् ।
इत्युक्त्वाद्वावपि सङ्ग्रामं कर्तुमारब्धौ ॥१३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मुट्ठिपहाराईहिं[1] जहा जहा जुज्झए पिसाओ य ।
एसो य महाबलिओ मए वि सह जुज्झइ जो उ ॥१४॥

इइ चिंतिऊण तुस्सइ तहा तहा केसवो पमोएण ।
जह जह तुस्सेइ हरी बलहीणो तह तह पिसाओ ॥१५॥

एवं सो य पिसाओ पसंतचित्तेण विजियकोवेण ।
हरिणा कुट्टिय छूढो संकोएउं उयट्टाए ॥१६॥

तो हरिणा य पभाए तिन्नि वि दारुगाइया पुट्ठा ।
सम्भिन्नजाणु-कोप्पर-सिरा य तुब्भे य केण कया ? ॥१७॥

ते पभणंति पहो ! इह पिसायरूवो समागओ रत्तिं ।
तेण समं जुज्झेउं एवं जाया पुणो अम्हे ॥१८॥

तो दरिसिओ य हरिणा स एस कोवो पिसायरूवधरो ।
ऊयट्टियाउ कड्ढिय पसंतयाए जिओ स मया ॥१९॥

इति क्रोधविजये **कृष्णा**दिदृष्टान्तः॥६७॥

माणविजएणं भंते ! जीवे किं जणयइ ? माणविजएणं मद्दवं जणयइ ॥६८॥

व्याख्या–मानविजयेन मार्दवं जनयति । शेषं पूर्ववत् ॥६८॥

---

१. मुष्टिप्रहारादिभिर्यथा यथा युध्यति पिशाचश्च ।
एष च महाबलिको मयाऽपि सह युध्यति यस्तु ॥१४॥

इति चिन्तयित्वा तुष्यति तथा तथा केशवः प्रमोदेन ।
यथा यथा तुष्यति हरिर्बलहीनस्तथा तथा पिशाचः ॥१५॥

एवं स च पिशाचः प्रशान्तचित्तेन विजितकोपेन ।
हरिण कुट्टयित्वा क्षिप्तः सङ्कोच्योद्वर्तितया ॥१६॥

ततो हरिणा च प्रभाते त्रयोऽपि दारुकादयः पृष्टाः ।
सम्भिन्नजानु-कर्पूर-शिरसश्च यूयं केन कृताः ? ॥१७॥

ते प्रभणन्ति प्रभो ! इह पिशाचरूपः समागतो रात्रौ ।
तेन समं युद्ध्वा एवं जाता पुनर्वयम् ॥१८॥

ततो दर्शितश्च हरिणा स एष कोपः पिशाचरूपधरः ।
उद्वर्तितात् कृष्ट्वा प्रशान्ततया जितः स मया ॥१९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मायाविजएणं भंते ! जीवे किं जणयइ ? । मायाविजएणं उज्जुभावं जणयइ ॥६९॥

व्याख्या—मायाविजयेन ऋजुभावं जनयति । शेषं प्राग्वत् ॥६९॥

लोभविजएणं भंते ! जीवे किं जणयइ ? । लोभविजएणं संतोसं जणयइ ॥७०॥

व्याख्या—लोभविजयेन सन्तोषभावं जनयति । शेषं तथैव ॥७०॥

एतज्जयश्च न प्रेम—द्वेषादिविजयं विना स्यादतस्तमाह—

पेज्ज-दोस-मिच्छादंसणविजएणं भंते ! जीवे किं जणयइ ? । पेज्ज-दोस-मिच्छादंसणविजएणं नाण-दंसण-चरित्ताराहणयाए अब्भुट्ठेइ । अट्ठविहस्स कम्मस्स कम्मगंठविमोयणयाए तह पढमयाए जहाणुपुव्वीए अट्ठावीसविहं मोहणिज्जं कम्मं उग्घाएइ । पंचविहं नाणावरणिज्जं नवविहं दंसणावरणं पंचविहमंतराय एए तिन्नि वि कम्मंसे जुगवं खवेइ । तओ पच्छा अणुत्तरं अणंतं कसिणं पडिपुन्नं निरावणं वितिमिरं विसुद्धं लोगालोगप्पभावणं केवलवरनाणदंसणं समुप्पाडेइ । जाव सजोगी भवइ ताव य इरियावहियं कम्मं बंधइ । सुहफरिसं दुसमयठिइयं तं पढमसमए बद्धं बिइयसमये वेइयं तइयसमए निज्जिन्नं तब्बद्धं पुट्ठं उईरियं वेइअं निज्जिन्नं सेअकाले अकम्मं वावि भवइ ॥७१॥

व्याख्या—प्रेम च रागरूपं द्वेषश्चाप्रतिरूपो मिथ्यादर्शनं च सांशयिकादि **प्रेम-द्वेष-मिथ्यादर्शनानि तद्विजयेन ज्ञान-दर्शन-चारित्राराधनायामभ्युत्तिष्ठते** उद्यच्छति प्रेमादि-निमित्तत्वात् तद्विराधनायाः । तत**श्चाष्टविधस्य कर्मणः** 'मध्ये इति गम्यते' कर्मग्रन्थिरति-दुर्भेदघातिकर्मरूपस्तस्य विमोचना क्षपणा **कर्मग्रन्थिविमोचना तस्यै** 'चस्य गम्यत्वात्' तदर्थं च 'अभ्युत्तिष्ठे इत्यनुवर्तनीयम्' । अभ्युत्थाय च किं करोति ? इत्याह—**तत्प्रथमतया,** न हि तेन तत् पुरा क्षपितमासीदिति । आनुपूर्व्या अनतिक्रमेण **यथानुपूर्वि अष्टाविंशति-विधं मोहनीयं कर्मोद्घातयति** । चरमसमये तु यत् क्षपयति तत् सूत्रकृदेवाह—**पञ्चविधं ज्ञानावरणीयं नवविधं दर्शनावरणीयं पञ्चविधमन्तरायं** 'एए' त्ति लिङ्गव्यत्ययादे**तानि त्रीण्यपि** 'कम्मंसे' त्ति **सत्कर्माणि युगपत् क्षपयति** । **तत** इति क्षपणात् **पश्चादनन्तर-मनुत्तरं** प्रधानम्, **अनन्तम**विनाशितया विषयानन्त्याच्च, **कृत्स्नं** च सर्ववस्तुविषयत्वात्,

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

प्रतिपूर्णं सकलस्व–परपर्यायप्रतिपूर्णवस्तुप्रकाशकत्वात् । **निरावरणं** निःशेषावरणविगमात् । **वितिमिरं** तस्मिन् सत्यज्ञानतिमिराभावात् । **विशुद्धं** सर्वदोषापगमात् । **लोकालोक-प्रभावकं** तत्स्वरूपप्रकाशकत्वात् । **केवलम**सहायं **वरं** शेषज्ञानापेक्षया ज्ञानं च दर्शनं च **केवलवरज्ञान–दर्शनं समुत्पादयति** जनयति 'आत्मन इति गम्यम्' । स च **यावत् सयोगी** मनो–वाक्–कायव्यापारवान् **भवति तावच्च** किम् ? इत्याह–ईर्या गतिस्तस्याः पन्था यदाश्रिता सा भवति तस्मिन् भवमैर्यापथिकं 'उपलक्षणं च पथिग्रहणं' तिष्ठतोऽपि सयोगस्येर्यासम्भवात्, सम्भवन्ति हि सयोगितायां केवलिनोऽपि सूक्ष्मा गात्रसञ्चारा इति । तदेवं पथि तिष्ठ**न्नैर्यापथिकं कर्म बध्नाति** तत् कीदृग् ? इत्याह–सुखयतीति सुखः स्पर्श आत्मप्रदेशैः सह संश्लेषो यस्य तत् **सुखस्पर्शम्,** द्वौ समयौ यस्याः सा द्विसमया स्थितिरस्येति **द्विसमयस्थितिकं, तत् प्रथमसमये बद्धम**ात्मसात् कृतं 'स्पर्शाविनाभावित्वाच्च स्पृष्टं च', **द्वितीयसमये वेदितमनुभूतं, तृतीये समये निर्जीर्णं** परिशटितं तदुत्तरकालस्थितेः कषायहेतुत्वात् । अत**स्तद् बद्धं** जीवप्रदेशैः श्लिष्टं व्योम्ना पटवत् तथा **स्पृष्टं** मसृणमणिकुड्यपतिततशुष्कस्थूलचूर्णवत् । अनेन विशेषणद्वयेन तस्य निधत्त-निकाचितावस्थयोरभावमाह । **उदीरितमु**दयप्राप्तमुदीरणायास्तत्रासम्भवाद्, **वेदितं** तत्फल-सुखानुभवनेन, **निर्जीर्णं** क्षयमुपगतं, 'सेअकाले' त्ति सूत्रत्वादे**ष्यत्काले** चतुर्थसमया-दा**वकर्म चापि भवति** । तज्जीवापेक्षया पुनस्तस्य तथाविधपरिणामाभावात् ॥७१॥

शैलेश्यकर्मताद्वारद्वयमर्थतो व्याचिख्यासुराह–

अहाउयं पालइत्ता अंतोमुहुत्तावसेसाऊए जोगनिरोहं करेमाणे सुहुमकिरियं अप्पडिवाइ सुक्कज्झाणं झायमाणे तप्पढमयाए मणजोगं निरुंभइ । वयजोगं निरुंभइ । आणापाणनिरोहं करेइ । ईसि पंचरहस्सक्खरुच्चारद्धाए य णं अणगारे समुच्छिन्नकिरियं अणियट्टिसुक्कज्झाणं ज्झियायमाणे वेयणिज्जं आउयं नामं गोयं एए चत्तारि कम्मंसे खवेइ । तओ ओरालियकम्माइं च सव्वाहिं विप्पजहणाहिं विप्पजहित्ता उज्जुसेढीपत्ते अफुसमाणगई उड्ढं एगसमएणं अविग्गहेणं तत्थ गंता सागारोवउत्ते सिज्झइ बुज्झइ मुच्चइ परिनिव्वाइ सव्वदुक्खाणं अंतं करेइ ॥७२-७३॥

व्याख्या–अथ केवलावाप्त्यनन्तर**मायुष्कं** देशोनपूर्वकोटीमन्तर्मुहूर्तादिप्रमाणं **पालयित्वाऽन्तर्मुहूर्तावशेषायुष्कः** सन् **योगनिरोधं** 'करेमाणे'त्ति **करिष्यमाणः सूक्ष्म-क्रियमप्रतिपातिशुक्लध्यानतृतीयभेदं ध्यायंस्तत्प्रथमतया** मनसो योगो मनोद्रव्य-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

साचिव्यजनितो जीवव्यापारो **मनोयोगस्तं निरुणद्धि**। तदनन्तरं च वाचो योगो **वाग्योगो** भाषाद्रव्यसाचिव्यजनितो जीव्यापारस्तं **निरुणद्धि**। **आनापान**वुच्छ्वास-निःश्वासौ **तन्निरोधं करोति** 'सकलकाययोगनिरोधोपलक्षणं चैतत्'। इत्थं योगत्रयं निरुध्येषदिति स्वल्पः प्रयत्नापेक्षया पञ्चानां ह्रस्वाक्षराणां अ इ उ ऋ लृ इत्येवंरूपाणामुच्चारो भणनमविलम्बिता-द्रुतत्वेन तस्याद्धा कालो यावता ते पञ्चवर्णा उच्चार्यन्ते **ईषत्पञ्चह्रस्वाक्षरोच्चारणाद्धा तस्यां 'च णमिति** प्राग्वत्' **अनगारः** समुच्छिन्नोपरता क्रिया मनोव्यापाररूपा यस्मिस्तत् **समुच्छिन्नक्रियं**, न निवर्तते कर्मक्षयात् प्रागित्येवंशीलमित्य**निवर्तिशुक्लध्यानं** चतुर्थभेदरूपं **ध्यायन्** शैलेश्यवस्थामनुभवन्निति भावः। **वेदनीयमायुर्नाम गोत्रं चैतानि चत्वार्यपि** 'कम्मंसे'त्ति **कर्मांशानि** सत्कर्माणि युगपत् समकालं **क्षपयति**। 'तओ'त्ति **ततो** वेदनीयादिचतुर्कर्मक्षयानन्तर**मौदारिक—कार्मणे शरीरे** 'उपलक्षणात् तैजसं च' 'सव्वाहिं विप्पजहणाहिं'त्ति **सर्वाभिर्**विशेषेण प्रकर्षतो हानयस्त्यागा **विप्रहाणयः** 'व्यक्त्यपेक्षं बहुत्वम्' **ताभिः**, कोऽर्थः? सर्वथा परिशाटेन न तु यथा पूर्वं सङ्घात—परिशाटाभ्यां देशत्यागतः 'विप्पजहित्त'त्ति **विप्रहाय** परिशाट्य, **ऋजुः** सरला **श्रेणिरा**-काशप्रदेशपङ्क्ति**स्तां प्राप्तो**ऽनुश्रेणिगत इति यावत्। 'अफुसमाणगइ'त्ति **अस्पृशद्गतिः** कोऽर्थः? यावत् स्वाकाशप्रदेशेषु जीवोऽवगाढस्तावत एव प्रदेशान् स्पृशति, न ततोऽतिरिक्तमेकमपि प्रदेश**मूर्ध्वमु**परि **एकसमयेन**, द्वितीयादिसमयान्तरास्पर्शने**नाविग्रहेण** वक्रगतिरूपविग्रहाभावेनान्वय—व्यतिरेकाभ्यामुक्तोऽर्थः स्पष्टतरः स्यादित्यविग्रहेणेत्युक्तम्। 'तत्थ'त्ति **तत्र** मुक्तिपदे 'गंत'त्ति **गत्वा साकारोपयुक्तो** ज्ञानोपयोगवान् **सिध्यती**त्यादि **यावदन्तं करोती**त्यादि प्राग्वत् ॥७२-७३॥

सम्प्रत्युपसंहर्तुमाह—

एसो खलु सम्मत्तपरक्कमस्स अज्झयणस्स अट्ठे समणेणं भगवया महा-वीरेणं आघविए पन्नविए परूविए दंसिए निदंसिए उवदंसिए त्ति बेमि ॥७४॥

व्याख्या—एषोऽनन्तरोक्तः 'खलु निश्चये' **सम्यक्त्वपराक्रमस्याध्ययनस्यार्थः श्रमणेन भगवता महावीरेण** 'आघविए'त्ति आर्षत्वा**दाख्यातः** सामान्य—विशेष-पर्यायाभिव्याप्तिकथयेन। **प्रज्ञापितो** हेतु—फलादिप्रकर्षज्ञापनेन। **प्ररूपितः** स्वरूप-कथनेन। **दर्शितो** नानाविधभेददर्शनेन। **निदर्शितो** दृष्टान्तोपन्यासेन। **उपदर्शित** उपसंहारेण। **इति ब्रवीमी**त्यादि प्राग्वत्॥ ग्रं० ५९५ अ० २३॥

इति श्रीकमलसंयमोपाध्यायविरचितायां सर्वार्थसिद्धौ श्रीउत्तराध्ययनटीकायां एकोनत्रिंशं सम्यक्त्वपराक्रमाख्यमध्ययनं समाप्तम् ॥२९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

त्रिंशत्तमं तपोमार्गगत्याख्यमध्ययनम्

इह प्रागध्ययनेऽप्रमाद उक्तस्तद्वता तपोविधेयमिति तत्स्वरूपाभिधायकं त्रिंशत्तम-मारभ्यते—

जहा उ पावयं कम्मं राग-दोससमज्जियं ।
खवेइ तवसा भिक्खू तमेगग्गमणो सुण ॥१॥

व्याख्या—यथा येन प्रकारेण 'तुरवधारणे' **पापकं कर्म** ज्ञानावरणीयादि **राग-द्वेषाभ्यां समर्जितमुपात्तं क्षपयत्येव तपसा भिक्षुस्तदेकाग्रमनाः** सावधानचित्तः **शृणु** शिष्य ! ॥१॥

अनाश्रवेणैव किल कर्म क्षिप्यते इति तमाह—

पाणिवह-मुसावाए-अदत्त-मेहुण-परिग्गहा विरओ ।
राईभोयणविरओ जीवो भवइ अणासवो ॥२॥

पंचसमिओ तिगुत्तो अकसाओ जिइंदिओ ।
अगारवो य निस्सल्लो जीवो भवइ अणासवो ॥३॥

अनयोर्व्याख्या—प्राणिवधादिभ्यो विरतो जीवो **भवत्यनाश्रवो**ऽविद्यमानकर्मोपा-दानहेतुः ॥ तथा **पञ्चसमित्यादिसहितो**ऽपि **जीवोऽनाश्रवः** समित्यादिविपर्ययस्य कर्मोपादान-हेतुत्वेनाश्रवरूपत्वात् तदभावादनाश्रवत्वम् । शेषं सुगमम् । इति गाथाद्वयार्थः ॥२-३॥

एवंविधश्च यथा कर्म क्षपयति तथाह—

एएसिं तु विवच्चासे राग-द्दोससमज्जियं ।
खवेइ जं जहाकम्मं तं मे एगमणो सुण ॥४॥

व्याख्या—एतेषां तु प्राणिवधविरत्यादीनां समित्यादीनां चानाश्रवहेतूनां 'विवच्चासे'त्ति **विपर्यासे** प्राणिवधादावसमितत्वादौ च **राग-द्वेषाभ्यां समर्जितं** 'कर्मेति गम्यते' तद् यथा **क्षपयति तन्मे** कथयत **एकाग्रमनाः शृण्विति** ॥४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अत्र दृष्टान्तमाह—

जहा महातलागस्स संनिरुद्धे जलागमे ।
उस्सिंचणाए तवणाए कमेणं सोसणा भवे ॥५॥

व्याख्या—यथा महातडागस्स सन्निरुद्धे पाल्यादिना निषिद्धे **जलागमे** जलप्रवेशे 'उस्सिंचणाए'त्ति सूत्रत्वादुत्सेचनेनारघट्टघट्यादिभिरुदञ्चनेन 'तवणाए'त्ति **तपनेन** रविकर-सन्तापरूपेण **क्रमेण** परिपाट्या **शोषणा** जलाभावरूपा **भवेत्** ॥५॥

दार्ष्टान्तिकमाह—

एवं तु संजयस्सावि पावकम्मे निरासवे ।
भवकोडीसंचियं कम्मं तवसा निज्जरिज्जई ॥६॥

व्याख्या—एवं 'तु पुनः' संयतस्यापि पापकर्मणां निराश्रवे प्राणिवधाद्या-श्रवाभावे **भवकोटीसञ्चितं कर्म तपसा निर्जीर्यते** आधिक्येन क्षयं नीयते । अत्र कोटीग्रहणं बहुत्वोपलक्षणं कोटीनियमासम्भवात् ॥६॥

तपोभेदानाह—

सो तवो दुविहो वुत्तो बाहिरब्भिंतरो तहा ।
बाहिरो छव्विहो वुत्तो एवमब्भिंतरो तवो ॥७॥

व्याख्या—तदनन्तरं प्रक्रान्तं प्रस्तावोपपन्नं **तपो द्विविधमुक्तं बाह्यं तथा आभ्यन्तरम्** । तत्र **बाह्यं षड्विधमुक्तम्** । एवमिति यथा बाह्यं षड्विधं **तथा आभ्यन्तरमपि षड्विधं तपः** । शेषं स्पष्टम् । 'सर्वत्र सूत्रत्वाल्लिङ्गव्यत्ययः' । किञ्च बाह्यं बाह्यद्रव्याद्यपेक्षया, प्रायो मुक्त्यवाप्ति-बहिरङ्गतया च, तद्विपरीतमाभ्यन्तरं, यदि वा लोकप्रतीतत्वात् कुतीर्थिकैश्च स्वाभिप्रायेणा-सेव्यमानत्वात् बाह्यं, तदितरच्चाभ्यन्तरमिति ॥७॥

षड्विधं तदाह—

अणसणमूणोयरिया भिक्खायरिया य रसपरिच्चाओ ।
कायकिलेसो संलीणया य बज्झो तवो होइ ॥८॥

व्याख्या—अक्षरार्थः स्पष्ट एव ॥८॥

भावार्थं तु प्रतिभेदमेतेषां स्वरूपत इवाह—

इत्तरिय—मरणकाला अणसणा दुविहा भवे ।
इत्तरिय सावकंखा निरवकंखा बिइज्जिया ॥९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—इत्वरमेव**त्वरिकं** नियतकालावधिकमित्यर्थः । मरणावसानः कालो यस्य त**न्मरणकालं** 'मध्यपदलोपी समासः' यावज्जीवमित्यर्थः । अशनमाहारश्चतुर्विधो देशतः सर्वतो वा तदभावो**ऽनशनं** तच्च **द्विविधं भवेत्** । तत्रे**त्वरिकं** सहावकाङ्क्षया घटिकाद्वयाद्युत्तरकालं भोजनाभिलाषरूपया वर्तते इति **सावकाङ्क्षम्** । **निरवकाङ्क्षं** तज्जन्मनि भोजनाशंसाऽभावात् **द्वितीयं** पुनर्मरणकालाख्यं 'प्राकृतत्वात् सर्वत्र स्त्रीलिङ्गत्वम्' ॥९॥

इत्वरिकानशनभेदानाह—

जो सो इत्तरियतवो सो समासेण छव्विहो ।
सेढितवो पयरतवो घणो य तह होइ वग्गो य ॥१०॥

व्याख्या—यद् तदित्वरकं तप इत्वरानशनरूपं **तत् समासेन** सङ्क्षेपण **षड्विधं**, विस्तरेण बहुतरभेदमिति भावः । षड्विधत्वमेवाह—'सेढि' श्रेणिः पङ्क्तिः तदुपलक्षितं तपः **श्रेणितप**स्तच्चतुर्थादिक्रमेण क्रियमाणमिह षण्मासान्तं परिगृह्यते । तथा श्रेणिरेव श्रेण्या गुणिता प्रतरस्तदुपलक्षितं तपः **प्रतरतपः** इह चाव्यामोहार्थं चतुर्थषष्ठाष्टमदशमाख्य-पदचतुष्टयात्मिका श्रेणिर्विवक्ष्या सा च चतुर्भिर्गुणिता षोडशपदात्मकः प्रतरो भवति । अयं चायामतो विस्तरतश्च तुल्य इत्यस्यायं स्थापनोपायः ।

"एकाद्याद्या व्यवस्थाप्याः पङ्क्तयोऽत्र यथाक्रमम् ।
द्वितीयाद्याः क्रमादेताः पूरयेदेककादिभिः" ॥१॥

एक आद्योऽस्यां सा एकाद्या पङ्क्तिः सा आद्या यासु ता एकाद्याद्या व्यवस्थाप्या न्यस्याः । पङ्क्तयः श्रेणयो यथाक्रमं क्रमानतिक्रमेण । कोऽर्थः ? प्रथमा एकाद्या एककादारभ्य स्थाप्यते । एवं द्वितीयाद्याद्या द्विकादारभ्य । तृतीया त्रिकादारभ्य । चतुर्थी चतुष्कादारभ्य व्यवस्थाप्यते । एवं प्रथमां पङ्क्तिं प्रपूर्य द्वितीयाद्याः पङ्क्तीः क्रमात् प्राक् स्थापिताङ्कादग्रे एककादिभिः पूरयेत् पूर्णाः कुर्यात् । कोऽर्थः ? द्वितीय-पङ्क्तौ द्विक-त्रिक-चतुष्कानामग्रे एककः । तृतीयपङ्क्तौ त्रिक-चतुष्कयोरन्ते एकको द्विकश्च । चतुर्थपङ्क्तौ चतुष्काग्रे एकक-द्विक-त्रिकाः स्थाप्यन्ते । स्थापना चेयम् ।

१ च	२ ष	३ ऽष्ट	४
२	३	४	१
३	४	१	२
४	१	२	३

तथा **घन** इति घनतपः **'चः** पूरणे' **तथा 'भवती**ति क्रिया प्रतितपः प्रयोज्या' । अत्र च षोडशपदात्मकः प्रतरः पदचतुष्टयात्मिकया श्रेण्या गुणितो घनो भवति, आगतं चतुःषष्टि, स्थापना तु पूर्विकैव,नवरं बाहुल्यतोऽपि पदचतुष्टयात्मकत्वं विशेषः । एतदुपलक्षितं तपो घनतप इति । **वर्ग** इति वर्गतपस्तत्र घन एव घनेन गुणितो वर्गो भवति । ततश्चतुःषष्टिश्चतुःषष्ट्यैव गुणिता जातानि षण्णवत्यधिकानि चत्वारि सहस्राणि

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

४०९६ एतदुपलक्षितं तपो वर्गतपः ॥१०॥

तत्तो य वग्गवग्गो उ पंचमो छट्ठओ पइन्नतवो ।
मणइच्छियचित्तत्थो नायव्वो होइ इत्तरिओ ॥११॥

व्याख्या–ततश्च वर्गतपोऽनन्तरं **वर्गवर्ग** इति वर्गवर्गतपः 'तुः समुच्चये' **पञ्चमम्**। अत्र च वर्ग एव वर्गेण गुणितो वर्गवर्गो भवति यथा चैककोटिः सप्तषष्टिर्लक्षाः सप्तसप्ततिसहस्राणि द्वे शते षोडशाधिके अङ्कतः १६७७७२१६ एतदुपलक्षितं तपो वर्गवर्गतप इति । एवं पञ्चादिपदेष्वपि भावना कार्या । तथा **षष्ठकं प्रकीर्णतपो** यच्छ्रेण्यादिनियतरचनारहितं स्वशक्त्यपेक्षं नमस्कारसहितादि पूर्वपुरुषाचरितं यवमध्य–वज्रमध्य–चन्द्रप्रतिमादि वेति । उपसंहारमाह–'मणइच्छियचित्तत्थो' त्ति मनस ईप्सित इष्टश्चित्रोऽनेकप्रकारोऽर्थः स्वर्गापवर्गादिस्तेजोलेश्यादिर्वा यस्मात् तन्**मनईप्सितचित्रार्थं ज्ञातव्यं भवतीत्वरकं** 'प्रक्रमादनशनाख्यं तप इति' ॥११॥

मरणकालमनशनमाह–

जा साऽणसणा मरणे दुविहा सा वियाहिया ।
सवियारमवियारा कायचेट्ठं पई भवे ॥१२॥

व्याख्या–'सुब्व्यत्ययाद्' **यदनशनं मरणे** मरणावसरे **द्विविधं तत् व्याख्यातं** कथितम् 'अर्हदादिभिरिति गम्यम्' । द्वैविध्यमाह–सह विचारेण मनो–वाक्–कायभेद–चेष्टारूपेण वर्तते यत् तत् **सविचारं** तद्विपरीत**मविचारम्** । विशेषार्थमाह–**कायचेष्टामु**द्वर्तन–परिवर्तनादिकां कायप्रवीचारं **प्रतीत्याश्रित्य भवेत्** तत्र सविचारं भक्तप्रत्याख्यानमिङ्गिनीमरणं च । तथाहि–भक्तप्रत्याख्याने गच्छस्थो गुरुदत्तालोचनो मरणायोद्यतो विधिना कृतसंलेखन–स्त्रिविधं चतुर्विधं वाऽऽहारं प्रत्याख्याय त्यक्तदेहाद्युपकृतिममत्वः स्वयमेवोच्चार्यमाणान्य–साध्वादिदीयमाननमस्कारो यथाशक्ति यथासमाधि स्वयमुद्वर्तते परिवर्तते वाऽसत्यां च शक्तौ परैरपि समाधिजनकं तत् कारयति । इङ्गिनीमरणमप्युक्तन्यायेन प्रतिपद्य शुद्धस्थण्डिलस्थाता एकाक्येव कृतचतुर्विधाहारप्रत्याख्यानः स्थण्डिलस्यान्तश्छायात उष्णमुष्णाच्च च्छायां स्वयं सङ्क्रामत्युद्वर्तनादिचेष्टां च करोति नान्येन कारयतीत्येतद्द्वयं सविचारम् । अविचारं तु पादपोपगमनं तत्र यो विधिवद् देवान् गुरून् नत्वा कृतचतुर्विधाहारप्रत्याख्यानः सर्वत्राप्रति–बद्धो दण्डायतादिस्थानस्थो गिरिकन्दरादिषु पादपवन्निश्चेष्टस्तिष्ठति तस्य तद् भवति ॥१२॥

प्रकारान्तरेण पुनर्द्वैविध्यमाह–

अहवा सपरिकम्मा अपरिकम्मा य आहिया ।
नीहारिमनीहारि आहारछेओ य दोसु वि ॥१३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—अथवा सह परिकर्मणा स्थान—निषदन—त्वग्वर्तनादिना वर्तत इति **सपरिकर्म** तदितर**दपरिकर्म चाख्यातं** कथितम्। तत्र सपरिकर्म भक्तप्रत्याख्यानमिङ्गिनीमरणं च। प्रथमे स्वयमन्येन वा कृतस्य। द्वितीये स्वयं कृतस्यैवोद्वर्तनादिचेष्टारूपपरिकर्मणाऽनुज्ञानात्। यद्वा संलेखनापरिकर्म यत्र तत् **सपरिकर्म** तद्विपरीतं **त्वपरिकर्म**। तथा निर्हारो गिरिकन्दरादिगमनेन ग्रामादेर्बहिर्निर्गमनं तद् विद्यते यत्र त**न्निर्हारि**। यदुत्थातुकामे व्रजिकादौ क्रियते त**दनिर्हारि** इदं निर्हारिमानिर्हारिमस्वरूपं **बृहट्टीकायां स्थानाङ्गटीका**यां तु इदमुक्तम्—यद् वसतेरेकदेशे विधीयते तत् ततः शरीरस्य गर्हणान्निःसारणा**न्निर्हारिमं**, यत् पुनर्गिरिकन्दराऽऽदौ विधीयते [तत्] ततः शरीरस्य अनिःसारणा**दनिर्हारिमम्**। परमार्थं तु बहुश्रुता विदन्ति। एतच्च प्रकारद्वयमपि पादपोपगमनविषयम्। **आहारच्छेदश्च द्वयोरपि** सपरिकर्मापरिकर्मणोर्निर्हार्यनिर्हारिणोश्च 'सम इति शेषः' ॥१३॥

ऊनोदरतामाह—

उमोयरिणं पंचहा समासेण वियाहियं।
दव्वओ खित्त-कालेणं भावेणं पज्जवेहि य ॥१४॥

व्याख्या—अवमं न्यूनमुदरं यस्यासाववमोदरस्तस्य भावो**ऽवमोदरता** न्यूनोदरता **पञ्चधा समासेन** सङ्क्षेपेण **व्याख्याता**। पञ्चधात्वमेवाह—**द्रव्यतः**, क्षेत्रं च कालश्च **क्षेत्रकालं तेन, भावेन, पर्यायैश्चो**पाधिभूतैः 'अत्र हेतौ पञ्चमी तृतीया च' ॥१४॥

तत्र द्रव्यत आह—

जो जस्स उ आहारो तत्तो उमं तु जो करे।
जहन्नेणेगसित्थाई एवं दव्वेण उ भवे ॥१५॥

व्याख्या—यो यस्य 'तुः पूरणे' पुंसो द्वात्रिंशत्कवलमानः, स्त्रियस्त्वष्टाविंशतितन्मान **आहारो** भोजनम्, **ततः** स्वाहारा**दवमं** ऊनं '**तुः** प्राग्वत्' **यः कुर्याद्** 'भुञ्जान इति शेषः'। **जघन्येनैकसिक्थकं** यत्रैकमेव सिक्थं भुज्यते। आदिशब्दात् सिक्थद्वयारादभ्य यावदेककवलभोजनमेतच्चाल्पाहाराख्यमवमौदर्यमाश्रित्योक्तम्, इदं चाष्टकवलान्तं १। नवकादारभ्य द्वादशभिः कवलैरपार्धाख्यम् २। त्रयोदशकादारभ्य षोडशान्तं द्विभागाख्यम् ३। सप्तदशकादारभ्य चतुर्विंशतितत्पर्यन्तं प्राप्ताख्यम् ४। पञ्चविंशतेरारभ्य यावदेकत्रिंशत्कवलभोजनं किञ्चिदूनमवमौदर्यम् ५। इत्येवं पञ्चविधमवमौदर्यमिति। उक्तं च।

"★[1]अप्पाहार [2]अवड्ढा [3]दुभाग [4]पत्ता [5]तेहेव किंचूणा।
[1]अट्ठ [2]दुवालस [3]सोलस [4]चउवीस [5]तेहेक्कतीसा य" ॥१॥

★ अल्पाहारापार्ध-द्विभाग-प्राप्तं तथैव किञ्चिदूनम् ५।
अष्ट द्वादश षोडश चतुर्विंशतिस्तथैकत्रिंशच्च ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

'यत्–तदोर्नित्याभिसम्बन्धात्' तस्यैव **द्रव्येणो**पाधिभूतेन **भवे**दवमौदर्यमिति ॥१५॥

क्षेत्रावमौदर्यमाह–

गामे नगरे तह रायहाणि–निगमे य आगरे ।
पल्ली–खेडे कब्बड–दोणमुह–पट्टण–मडंब–संबाहे ॥१६॥

आसमपए विहारे संनिवेसे समाय–घोसे य ।
थलि–सेणा–खंधारे सत्थे संवट्ट–कोट्टे य ॥१७॥

वाडेसु व रत्थासु व घरेसु वा एवमेत्तियं खित्तं ।
कप्पइ उ एवमाई एवं खित्तेण ऊ भवे ॥१८॥

आसां व्याख्या–ग्रसते गुणान् गम्यो वाऽष्टादशानां कराणामिति वा **ग्रामः** । नात्र कराः सन्तीति **नगरम्** । तथा **राजधानी** राज्ञः पीठस्थानम् । **निगमः** प्रभूतवणिग्निवासः । **आकरः** स्वर्णाद्युत्पत्तिस्थानम् । **पल्ली** वृक्षगहनाश्रिता प्रान्तजनस्थानं चोरादिस्थानम् । **खेटं** धूलिप्राकारपरिक्षिप्तम् । **कर्बटं** कर्बटजनावासं कुनगरमित्यर्थः । **द्रोणमुखं** जल–स्थल–निर्गम–प्रवेशं यथा भृगुकच्छम् । **पत्तनं** तु यत्र सर्वदिग्भ्यो जनाः पतन्ति तच्च द्विभेदं जलमध्यवर्ति स्थलमध्यवर्ति च । **मडम्बं** यस्य सर्वदिक्ष्वर्धतृतीययोजनान्तर्ग्रामो न स्यात् । **सम्बाधः** प्रभूतचातुर्वर्ण्यनिवासः 'सर्वत्र द्वन्द्वः' **तस्मिन्** । **आश्रमपदं** तापसाश्रयोपलक्षितं स्थानम् । **विहारो** देवगृहम् **सन्निवेशो** यात्राद्यायातजनावासः । **समाजः** परिषत् । **घोषो** गोकुलम् । **स्थली** उच्चभूभागः । **सेना** चतुरङ्गबलसमूहः । **स्कन्धावारः** स एवाशेष–खेडाद्यङ्गोपलक्षितः प्रतीतः । **संवर्तो** भयत्रस्तजनसमवायः । **कोट्टं** प्राकारम् । 'अत्रापि समाहारः' **तस्मिन्** ॥ **वाटेषु** वृत्यादिपरिक्षिप्तगृहसमूहेषु । **रथ्यासु** सेरिकासु । **गृहेषु** प्रसिद्धेसु 'सर्वत्र वा विकल्पे' **एवं**प्रकारेण 'एत्तियं'ति **एतावद्** विवक्षितनियतपरिमाणं **क्षेत्रं कल्पते** उपयोगं याति 'पर्यटितुमिति शेषः' **एवमादि** 'आदिशब्दात् गृहशालादि–परिग्रहः' । **एवमि**त्यूनत्वेनाभिग्रहलक्षणेन **क्षेत्रेण** क्षेत्रविषयं '**तुः** पूरणे' **भवेद्** 'अवमौदर्यमिति प्रक्रमः' इति गाथात्रयार्थः ॥१६–१७–१८॥

प्रकारान्तरेण क्षेत्रावमौदर्यमाह–

पेडा य अद्धपेडा गोमुत्ति पयंगवीहिया चेव ।
संबुक्कावट्टाऽऽययगंतुंपच्चागया छट्ठा ॥१९॥

व्याख्या–पेटा पेटिका इव चतुष्कूणा । ततश्च यत्र चतुःश्रेणिव्यवस्थितगृहं पङ्क्तिषु भ्रम्यते मध्यगृहाणि मुच्यन्ते सा पेटेत्यर्थः १। **अर्धपेटा** इयमेवार्धसंस्थिता द्विकूणा श्रेणिद्वय–

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सम्बद्धगृहभ्रमणवतीत्यर्थः २। **गोमूत्रिका** गोमूत्राकारेण वक्रपरिभ्रमणरूपा । उक्तं च—

"[१]वामाउ दाहिणगिहे भिक्खइ तो दाहिणाउ वामाए ।
पुणरवि दाहिण-वामाइ जीए सा होइ गोमुत्ती" ॥ ३। ॥१॥

पतङ्गवीथिकाऽनियता पतङ्गः शलभस्तदुड्डयनसदृशा ४। **शम्बूकः** सङ्खस्तद्वदावर्तो यस्यां सा **शम्बूकावर्ता** सा द्विविधा आभ्यन्तरा बाह्या च । तत्राभ्यन्तरशम्बूका अभ्यन्तरात् शङ्खनाभिक्षेत्रोपमाद्याकृत्याऽन्तर्मध्यत आरभ्य भिक्षायां चरन् बाह्यतो निवर्तते । द्वितीया विपर्ययाद् विज्ञेया । उक्तं च—

"[२]अब्भितरसंबुक्का मज्झा भमिरो बहिं विणिस्सरइ ।
तव्विवरीया भण्णइ बहिसंबुक्का य भिक्ख त्ति" ॥ ५। ॥१॥

आयतगतप्रत्यागता तत्रायतं दीर्घं प्राञ्जलमित्यर्थः । सरलतया गत्वा निवर्तत इति षष्ठी ६। किञ्चाग्रगोचरत्वरूपत्वाद् भिक्षाचर्यात्वेऽप्यासामवमौदर्यमस्त्वित्यभिसन्धिना विधीयमान-त्वादवमौदर्यव्यपदेशोऽप्यदुष्ट एव निमित्तभेदादेकत्रापि पुरुषे पितृ-पुत्रादिव्यपदेशवत् । एवं पूर्वं ग्रामादिविषयस्योत्तरत्र कालादिविषयस्य च नैयत्यस्याभिग्रहत्वेन भिक्षाचर्यात्व-प्रसङ्गेऽपि इदमेवोत्तरं वाच्यम् ॥१९॥

कालावमौदर्यमाह—

दिवसस्स पोरिसीणं चउण्हं पि उ जत्तिओ भवे कालो ।
एवं चरमाणो खलु कालोमाणं मुणेयव्वं ॥२०॥

व्याख्या—दिवसस्य पौरुषीणां प्रहराणां **चतसृणामपि** 'तुः प्राग्वत्' **यावद् भवेत् कालो**ऽर्धप्रहरादिकः 'अभिग्रहविषय इति शेषः' । **एवं** 'प्रक्रमात् तेन कालेन' 'चरमाणो' त्ति **चरतः खलु** निश्चितं 'कालोमाणं' ति **कालेन** हेतुना**ऽवमत्वं** 'प्रक्रमादुदरस्य' कालावमौदर्यं **मुणितव्यं** ज्ञातव्यम् ॥२०॥

एतदेव प्रकारान्तरेणाह—

अहवा तइयाए पोरिसीए ऊणाइ घासमेसंतो ।
चउभागूणाए वा एवं कालेण ऊ भवे ॥२१॥

---

१. वामाद् दक्षिणगृहे भिक्षते ततो दक्षिणाद् वामायाम् ।
पुनरपि दक्षिण-वामायां यस्यां सा भवति गोमूत्रिका ॥१॥

२. अभ्यन्तरशम्बूका मध्ये भ्रमन् बहिर्विनिःसरति ।
तद्विपरीता भण्यते बहिःशम्बूका च भिक्षेति ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—अथवा तृतीयायां पौरुष्यामूनायां **ग्रासमाहारमेषयंस्त्रि**विधैषणया गवेषयन् **चतुर्भागोनायां** '**वाशब्दात्** पञ्चादिभागोनायां' तृतीयपौरुष्या**मेवम**मुना कालविषयाभिग्रहलक्षणेन प्रकारेण 'चरन्नित्यनुवर्तते' **कालेन तु भवेद**वमौदर्यमौत्सर्गिकविधिविषयमेतदुत्सर्गतो हि तृतीयपौरुष्यामेव भिक्षाटनस्यानुज्ञातत्वात् ॥२१॥

भावावमौदर्यमाह—

इत्थी वा पुरिसो वा अलंकिओ वा णलंकिओ वा वि ।
अन्नयरवयत्थो वा अन्नतरेणं च वत्थेणं ॥२२॥

अन्नेण विसेसेणं वन्नेणं भावमणुमुअंतो उ ।
एवं चरमाणो खलु भावोमाणं मुणेयव्वं ॥२३॥

अनयोर्व्याख्या—स्त्री वा पुरुषो वाऽलङ्कृतः कटकाद्यलङ्कारभूषितोऽनलङ्कृतो वाऽपि । अन्यतरवयस्थो वा बाल्याद्यपेक्षया । **अन्यतरेण वा** पट्टकूलादि**वस्त्रेणो**पलक्षितः ॥ **अन्येन विशेषेण** कुपित—प्रहसितादिनावस्थाभेदेन, **वर्णेन** श्वेतादिनोपलक्षितः, **भावं** पर्यायमुक्तरूपमलङ्कृतत्वादि 'अणुमुअंतो' त्ति 'तुरेवार्थे' **अनुन्मुञ्चन्नेवा**त्यजन्नेव यदि दाता दास्यति ततोऽहं ग्रहीष्ये नान्यथेति भावः । **एवं चरन्** '**खलु**निश्चयेन' 'भावोमाणं' ति **भावावमत्वम्** 'अर्थादुदरस्य' **मुणितव्यं** ज्ञातव्यमिति गाथाद्वयार्थः ॥२२-२३॥

पर्यवावमौदर्यमाह—

दव्वे खित्ते काले भावंमि य आहिया उ जे भावा ।
एएहि उमचरओ पज्जवचरओ भवे भिक्खू ॥२४॥

व्याख्या—द्रव्येऽशनादौ **क्षेत्रे** ग्रामादौ **काले** पौरुष्यादौ **भावे** स्त्रीत्वादा**वाख्याताः** कथितास्तु **ये भावाः** पर्याया एकसिक्थोनत्वादय **एतैः** सर्वैरपि द्रव्यादिपर्यायैः 'उम'त्ति अवमम् 'अर्थादवमौदर्यं' चरत्यासेवते इत्य**वमचरकः पर्यवचरको भवेद् भिक्षुः** । को भावः ? एकसिक्थोनत्वादावपि ग्राम—पौरुषी—स्त्रीत्वादिष्वपि नव—पुराणादिविशिष्टाभिग्रहतः पूर्वस्मादूनत्वं भावनीयम् । इह च पर्यवग्रहणेन पर्यवप्राधान्यविवक्षया पर्यवावमौदर्यमिति । यत्रापि च द्रव्यतो न्यूनतोदरस्य नास्ति तत्रापि क्षेत्रादिन्यूनतामपेक्ष्यावमौदर्याण्यवसेयानि ॥२४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भिक्षाचर्यामाह—

अट्ठविहगोयरग्गं तु तहा सत्तेव एसणा ।
अभिग्गहा य जे अन्ने भिक्खायरियमाहिया ॥२५॥

व्याख्या—अष्टविधोऽष्टप्रकारोऽग्रः प्रधान आधाकर्मादिपरिहारेण गोचरो गोरिव चरणं पर्यटन**मष्टविधाग्रगोचरः** 'तुः समुच्चये' **तथा सप्तैवैषणाः** । **अभिग्रहाश्च येऽन्ये** एतदतिरिक्तास्ते किम् ? इत्याह—**भिक्षाचर्या** वृत्तिसङ्क्षेपापरनामिका **आख्याता** उक्ता । अत्र चाऽष्टाग्रगोचरभेदाः पेटादय एव प्रागुक्ताः षट् शम्बूकावर्ताया द्वैविध्याश्रयणात् ऋज्वाद्याश्चापरायाः प्रक्षेपादष्ट । सप्तैषणाश्चेमा—

"[१]संसट्ठमसंसट्ठा उद्धड तह अप्पलेवडा चेव ।
उग्गहिया पग्गहिया उज्झियधम्मा य सत्तमिया" ॥१॥

अभिग्रहाश्च द्रव्यादयस्तत्र द्रव्यतः कुन्ताग्रादिस्थितं मण्डकादि, क्षेत्रतो देहली पादान्तरे कृत्वा, कालतः सर्वभिक्षाचरेषु भिक्षातो निवृत्तेषु, भावतो हसन् रुदन् वा बद्धो वेत्येवं यदि दास्यति तर्हि ग्रहीष्यते इत्येवमादयः । सामान्येनाभिग्रहयुक्ता वा सप्तैषणा अष्ट स्युरिति ॥२५॥

रसपरित्यागमाह—

खीर-दहि-सप्पिमाई पणीयं पाण-भोयणं ।
परिवज्जणं रसाणं तु भणियं रसविवज्जणं ॥२६॥

व्याख्या—क्षीरं दुग्धं **दधि** प्रतीतं **सर्पिर्घृतं तदादि** 'आदिशब्दाद् गुरुपक्वान्नादिपरिग्रहः' **प्रणीतम**तिबृंहकं **पानं** खर्जूररसादि **भोजनं** गलद्बिन्द्वोदनादि 'अनयोर्द्वन्द्वे' **पानभोजनमेषां परिवर्जनं** किम्भूतानां ? रस्यमानत्वेन **रसानां** 'तुः पूरणे' **भणितमर्ह**दादिभिरिति **रसविवर्जनं** नाम बाह्यं तप इति ॥२६॥

कायक्लेशमाह—

ठाणा वीरासणाईया जीवस्स उ सुहावहा ।
उग्गा जहा धरिज्जंति कायकिलेसं तमाहियं ॥२७॥

व्याख्या—स्थानानि कायावस्थितिभेदा वीरासनं यत् सिंहासनस्थस्य तदपनयने तथैवावस्थानं तदादिर्येषां तानि **वीरासनादीनि** 'आदिशब्दाद् गोदोहिकासनादि' 'लोचाद्युपलक्षणं चैतत्' । तथोक्तम्—

---

१. संसृष्टाऽसंसृष्टे उद्धृता तथाऽल्पलेपा चैव ।
उद्ग्रहिका प्रग्रहिका उज्झितधर्मा च सप्तमी ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

"[१]वीरासण-उक्कुडगासणाइ-लोयाइओ य विन्नेओ ।
कायकिलेसो संसारवासनिव्वेयहेउ त्ति" ॥१॥

जीवस्य 'तुरेवार्थे' **सुखावहान्येव** मुक्तिसुखप्रापकत्वेनो**ग्राणि** दुरनुष्ठेयतयोत्कटानि **यथा धार्यन्ते** सेव्यन्ते 'यतिभिरिति गम्यम्' **कायक्लेशः स आख्यातः** 'तथैवेति शेषः' ॥२७॥

संलीनतामाह–

एगंतमणावाए इत्थी-पसुविवज्जिए ।
सयणासणसेवणया विवित्तसयणासणं ॥२८॥

व्याख्या–एकान्ते जनानाकुले **अनापाते** स्त्र्याद्यापातरहिते **स्त्री–पशुविवर्जिते** तत्रैवावस्थितस्त्र्यादिरहिते 'शून्यागारादाविति भावः' **शयनासनसेवनं** शयनं शय्या आसनं पीठं तस्य सेवनम् 'प्राकृतत्वाल्लिङ्गव्यत्यय' तेन **विविक्तशयनासनं** नाम 'बाह्यं तप इति शेषः' 'उपलक्षणादेषणीयफलकादिग्रहणम्' अनेन विविक्तचर्या नाम संलीनतोक्ता, शेष-संलीनतोपलक्षणं चासौ प्राधान्याच्चास्या एवाभिधानं साक्षादिति प्राधान्यं चेन्द्रियसंलीन-तोपकारित्वादस्याः । इयं च चतुर्धा–

"[★]इंदिय [१]कसाय [२]जोगे [३]पडुच्च संलीणया मुणेयव्वा ।
तह जा [४]विवित्तचरिया पन्नत्ता वीयरागेहिं" ॥१॥

तत्रेन्द्रियसंलीनता श्रोत्रेन्द्रियादिभिः सुन्दरेतरेषु शब्दादिषु राग-द्वेषाकरणं १। कषायसंलीनता तदुदयनिरोध उदीर्णविफलीकरणं च २। योगसंलीनता च मनोयोगादीनामकुशलानां निरोधः कुशलानामुदीरणम् ३ ॥२८॥

उक्तमर्थमुपसंहरन्नुत्तरार्धं च सम्बन्धयन्नाह-

एसो बाहिरगतवो समासेण वियाहिओ ।
अब्भिंतरो तवो इत्तो वुच्छामि अणुपुव्वसो ॥२९॥

व्याख्या–'आर्षत्वात्' **एतद् बाह्यं तपः समासेन** सङ्क्षेपेण **व्याख्यातम्** । ननु किं पुनरितो बाह्यात् तपसः फलम् ? उच्यते-निःसङ्गता–शरीरलाघवेन्द्रियजय–संयम-रक्षणादियोगाच्छुभध्यानावस्थितस्य कर्मनिर्जरणमिति । **आभ्यन्तरं तप इतो**ऽनन्तरं **वक्ष्याम्यानुपूर्व्येति** ॥२९॥

---

१. वीरासनोत्कटासनादि-लोचादिकश्च विज्ञेयः ।
कायक्लेशः संसारवासनिर्वेदहेतुरिति ॥१॥

★ इन्द्रिय-कषाय-योगान् प्रतीत्य संलीनता ज्ञातव्या ।
तथा या विविक्तचर्या प्रज्ञप्ता वीतरागैः ॥१॥

Jain Education International 2010_02   For Private & Personal Use Only   www.jainelibrary.org

तदेवाह—

पायच्छित्तं विणओ वेयावच्चं तहेव सज्झाओ ।
झाणं उस्सग्गो वि य अब्भिंतरओ तवो होइ ॥३०॥

अक्षरार्थः स्पष्टो भावार्थं सूत्रकृदेवाह—

आलोयणारिहाईयं पायच्छित्तं तु दसविहं ।
जे भिक्खू वहई सम्मं पायच्छित्तं तमाहियं ॥३१॥

व्याख्या—आलोचनं स्वकृतपापप्रकाशनं प्रादुष्करणमित्यर्थः । तदर्हति योग्यं भवति तदालोचनाऽर्हं यत् पापमालोचनात एव शुध्यति 'आदिशब्दात् प्रतिक्रमणार्हादिपरिग्रहः' इह पुनर्विषय—विषयिणोरभेदोपचारादेवंविधपापविशुद्ध्युपायभूतान्यालोचनादीन्येवालोचना-ऽर्हादिशब्देनोक्तानि तदेवंविधमालोचनाऽर्हमादिर्यस्य **तदालोचनाऽर्हादिकं प्रायश्चित्तं** 'तुरेवार्थे' **दशविधमेव** तदित्थम्—

★"[१]आलोयण-[२]पडिक्कमणे [३]मीस-[४]विवेगे तहा वि [५]उस्सग्गे ।
[६]तव-[७]छेय-[८]मूल-[९]अणवट्ठिया य [१०]पारंचिए चेव" ॥१॥

'जे'इत्यार्षत्वाद् **यद् भिक्षुर्वहत्या**सेवते **सम्यग**वैपरीत्येन **प्रायश्चित्तं तदाख्यातम्** ॥३१॥

विनयमाह—

अब्भुट्ठाणं अंजलिकरणं तहेवासणदायणं ।
गुरुभत्ति भावसुस्सूसा विणओ एस वियाहिओ ॥३२॥

व्याख्या—अभ्युत्थानमञ्जलिकरणं च प्रतीतं '**तथैवेति** समुच्चये' 'आसणदायणं' ति सूत्रत्वा**दासनदानं गुरुभक्तिर्भावे**नान्तःकरणेन **शुश्रूषा** तदादेशं प्रति श्रोतुमिच्छा पर्युपासना वा **विनय एष व्याख्यातः** ॥३२॥

वैयावृत्त्यमाह—

आयरियमाईए वेयावच्चंमि दसविहे ।
आसेवणं जहाथामं वेयावच्चं तमाहियं ॥३३॥

व्याख्या—आर्चायादिविषये व्यावृतभावो **वैयावृत्त्यमु**चिताहारादिसम्पादनं **तस्मिन् दशविधे यदासेवनमे**तद्विषयमनुष्ठानं **यथास्थाम** स्वसामर्थ्यानतिक्रमेण **वैयावृत्त्वं**

★ आलोचना-प्रतिक्रमणे मिश्र-विवेके तथाप्युत्सर्गः ।
तपः-छेद-मूलानवस्थितानि च पारञ्चितश्चैव ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तदाऽऽख्यातम्। तद् दशविधत्वमाचार्यादिविषयभेदाद् । उक्तं च–

★"[१]आयरिय-[२]उवज्झाए [३]थेरे-[४]तवस्सी [५]गिलाण-[६]सेहाण ।
[७]साहम्मिय-[८]कुल-[९]गण-[१०]संघसंगयं तमिह कायव्वं" ॥१॥ ॥३३॥

स्वाध्यायमाह–

वायणा पुच्छणा चेव तहेव परियट्टणा ।
अणुपेहा धम्मकहा सज्झाओ पंचहा भवे ॥३४॥

व्याख्या–प्राग्वत् ॥३४॥

ध्यानमाह–

अट्ट-रुद्दाणि वज्जित्ता झाइज्जा सुसमाहिए ।
धम्म-सुक्काइ झाणाइं झाणं तं तु बुहा वए ॥३५॥

व्याख्या–ऋतं दुःखं ऋते भवमार्तं, रोदयत्यपरानिति रौद्रो हिंसादिपरिणत आत्मैव तस्येदं कर्म रौद्रं, आर्तं च रौद्रं **चार्त-रौद्रे** 'प्राकृतत्वाद् बहुत्वं' **वर्जयित्वा ध्यायेत् सुसमाहितः** । किम् ? इत्याह–धर्मः क्षान्त्यादिदशलक्षणस्तस्मादनपेतं धर्म्यं, शुक्लं शुचि निर्मलं मिथ्यात्वादिमलविलयनात् यद्वा शुगिति दुःखमष्टप्रकारं कर्म ततः शुचं क्लमयति निरस्यतीति शुक्लम् 'अनयोर्द्वन्द्वः' ततो **धर्म्य–शुक्ले ध्याने** स्थिराध्यवसानरूपे । उक्तं च–'[१]**जं थिरमज्झवसाणं तं झाणं जं चलं तयं चित्तं**'ति । **ध्यानं** ध्यानाख्यं तत् तपः **'तुरेवार्थे' तदेव बुधाः** 'वए'त्ति **वदन्ति** 'प्राकृतत्वादेकवचनम्' ॥३५॥

व्युत्सर्गमाह–

सयणासण ठाणे वा जे उ भिक्खू न वावरे ।
कायस्स विउस्सग्गो छट्ठो सो परिकित्तिओ ॥३६॥

व्याख्या–शयनं स्वापः, **आसनमु**पवेशनम् 'सूत्रत्वादुभयत्र सुपो लुक्' **स्थाने** ऊर्ध्वस्थाने 'यथाशक्ति स्थित इति गम्यम्, **वा** विकल्पे' **यस्तु भिक्षुर्न** 'वावरे'त्ति **न व्याप्रियते** न चलनादिक्रियां कुरुते । 'यत्–तदोर्नित्याभिसम्बन्धात्' तस्य भिक्षोः **कायस्य व्युत्सर्गः** परित्यागो यः **षष्ठं तत्** 'प्रक्रमादभ्यन्तरं तपः' **परिकीर्तितम**र्हदादिभिरुपदिष्टम्

★ आचार्योपाध्याये स्थविरे तपस्वि–ग्लान–शैक्षाणाम् ।
साधर्मिक–कुल–गण–सङ्घसङ्गतं तदिह कर्तव्यम् ॥१॥

१. यत् स्थिरमध्यवसानं तद् ध्यानं यच्चलं तद् चित्तमिति ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

'शेषव्युत्सर्गोपलक्षणमिदं' तस्यानेकविधत्वात् । उक्तं च–

"[१]दव्वे भावे य तहा दुविह वुस्सगो चउव्विहो दव्वे ।
गण-देहोवहि-भत्ते भावे कोहाइचाउ त्ति" ॥१॥ ॥३६॥

अथाध्ययनार्थमुपसंहरन्नस्यैव फलमाह–

एयं तवं तु दुविहं जं सम्मं आयरे मुणी ।
से खिप्पं सव्वसंसारा विप्पमुच्चइ पंडिए ॥३७॥ त्ति बेमि ॥

व्याख्या–एतदनन्तरोक्तस्वरूपं **तपो द्विविधमपि यः सम्यगाचरे**दासेवेत **मुनिः स क्षिप्रं** शीघ्रं **संसारा**च्चतुर्गतिरूपादि **विप्रमुच्यते** पृथग् भवति **पण्डितः** । अत्र कालत्रयेऽपि तुल्यमाहात्म्यत्वादस्यैतत्क्षेत्रापेक्षया वर्तमानतेति । अत्रार्थे दृष्टान्तो यथा–

प्रभुः **कयङ्गलापुर्यां** चैत्ये **छत्रपलाशके** ।
श्री**वीरः** समवासार्षीत् सुर-साधुपुरस्कृतः ॥१॥

समस्तारिस्तदभ्यासे समस्तास्तोकवस्तुभूः ।
समस्ति पूश्च **श्रावस्ती** समस्ति स्वस्तिशस्तिका ॥२॥

गर्दभाल्यन्तिषत् तत्र परिव्राट् **स्कन्दको**ऽभवत् ।
कात्यायनसगोत्रीयो वेद-स्मृति-पुराणवित् ॥३॥

तत्रान्यदा तमप्राक्षीद् **वीर**शिष्यर्षि**पिङ्गलः** ।
भोः **स्कन्दक** ! मम प्रश्नस्योत्तरं वद पण्डित ? ॥४॥

किं सान्तोऽनन्तो वा लोको जीवश्च सिद्धिरथ सिद्धः ।
केन मरणेन जीवाः संसारे संसरन्ति तथा ? ॥५॥

ततः सम्यगजानानस्तमर्थं **स्कन्दको**ऽजनि ।
तूष्णीको द्विस्त्रिरप्येवं पृष्टस्तस्थौ तथैव सः ॥६॥

श्री**वीरं** वन्दितुं लोकं यान्तं दृष्ट्वा प्रचेलिवान् ।
स्कन्दकोऽपि स्वसन्देहं प्रष्टुं द्रुतमुपप्रभु ॥७॥

स्वामी तत् **पिङ्गल**प्रश्नं **स्कन्दका**ज्ञानवार्तिकम् ।
गौतमं प्राह सोऽथागादभ्यगात् तं च **गौतमः** ॥८॥

---

१. द्रव्ये भावे च तथा द्विविधो व्युत्सर्गश्चतुर्विधो द्रव्ये ।
गण-देहोपधि-भक्ते भावे क्रोधादित्याग इति ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पृष्टे तत् **पिङ्गलप्रश्नस्वरूपे गौतमेन** सः ।
विस्मितः **स्कन्दकः** प्रोचे ज्ञातं **गौतम** ! तत्कथम् ? ॥९॥

गौतमोऽप्यूचिवान् जाने सर्वविन्मद्गुरोर्मुखात् ।
ततः सर्वज्ञनिर्णीतेः श्री**वीरं स्कन्दको**ऽनमत् ॥१०॥

स हृष्टः प्राञ्जलिः प्राहादिश निःशंसयान् विभो ! ।
पिङ्गलप्रश्नितानर्थान् प्रभुरादिष्टवानिति ॥११॥

तथाहि—"[१]**खंदया ! चत्तारि वि लोयाइअ दव्वओ एगदव्वत्तणओ स अंते । खित्तओ णं लोए असंखेज्जजोयणकोडाकोडीप्पमाणे, जीवे असंखेज्जपएसिए असंखिज्जपएसोगाढे, सिद्धी पणतालीसं जोयणसयसहस्साइं आयामविक्खंभेणं, सिद्धे असंखेज्जपएसिए असंखेज्जपएसोगाढे अउ चउरो वि स अंते । कालओ कालत्तयवत्तिण उ चत्तारि वि अणंते । भावओ अणंतणाणाइपज्जवत्तणओ चत्तारि वि अणंते । मरणे वि खंदया ! दुविहे पन्नत्ते । तं जहा—बालमरणे पंडियमरणे य । तत्थ णं बालमरणेणं मरमाणे जीवे अणंतेहिं नेरइय—तिरियभवग्गहणेहिं अप्पाणं संजोएइ संसारमणुपरियट्टइ । पंडियमरणेणं मरमाणे जीवे अणंतेहिं नेरइय—तिरियभवग्गहणेहिं अप्पाणं विसंजोएइ संसारं वीईवयइ**" ॥

ततो भवभयोद्विग्नं संविग्नं शुद्धमानसम् ।
स्कन्दकं भगवान् धर्मोपदेशं पुनरब्रवीत् ॥१२॥

**"यथा कश्चिद् विपश्चिद् भो ! गृहे लग्ने प्रदीपने ।
बहिस्तात् सारभाण्डानि निष्काशयति तत्क्षणात् ॥१३॥**

**आदीप्ते च प्रदीप्ते च जरया मृत्युना तथा ।
लोके सारत्वमात्मानं निष्काशय महामते !" ॥१४॥**

इति श्रुत्वा प्रबुद्धः स प्रव्रज्य **स्कन्दकः** सुधीः ।
अधीत्यैकादशाङ्गेषु शिक्षाकर्मसु कर्मठः ॥१५॥

---

१. स्कन्दक ! चत्वारोऽपि लोकादिका द्रव्यत एकद्रव्यत्वात् सान्ताः । क्षेत्रतो लोकोऽसङ्ख्येय-योजनकोटाकोटिप्रमाणः । जीवोऽसङ्ख्येयप्रदेशिकोऽसङ्ख्येयप्रदेशावगाढः । सिद्धिः पञ्चचत्वारिंशद् योजनशतसहस्राणि आयामविष्कम्भेन । सिद्धोऽसङ्ख्येयप्रदेशिकोऽसङ्ख्येयप्रदेशावगाढोऽतश्चत्वारोऽपि सान्ताः । कालतः कालत्रयवर्तिनस्तु चत्वारोऽप्यनन्ताः । भावतोऽनन्तज्ञानादिपर्यवत्वतश्चत्वारोऽप्यनन्ताः । मरणे अपि स्कन्दक ! द्विविधे प्रज्ञप्ते । तद् यथा—बालमरणं पण्डितमरणं च । तत्र खलु बालमरणेन म्रियमाणो जीवोऽनन्तैर्नैरयिक—तिर्यग्भवग्रहणैरात्मानं संयोजयति संसारमनुपरिवर्तते । पण्डितमरणेन म्रियमाणो जीवोऽनन्तैर्नैरयिक—तिर्यग्भवग्रहणैरात्मानं विसंयोजयति संसारं व्यतिव्रजति ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

षष्ठाष्टम-विकृष्टार्धमास-मासादिकं तथा ।
वर्धमान-गुणरत्न-संवत्सरतपस्तथा ॥१६॥

सिंहनिष्क्रीडितं भिक्षुप्रतिमाद्यं सुदुस्तपम् ।
तप्यमानस्तपश्चात्मनीनो व्रतमपालयत् ॥१७॥ **त्रिभिः कुलकम्**

एवं तपोभिर्विविधैरात्मानं भावयन् मुनिः ।
सत्त्वावान् शोषिताङ्गोऽभूत् स कृशो धमनीसमः ॥१८॥

ततः स स्वाम्यनुज्ञातः संलिख्य विधिना वपुः ।
समाधिमाननशनं पादपोपगमं व्यधात् ॥१९॥

इत्थं स **स्कन्दकः** साधुर्व्रतं द्वादशवत्सरी ।
पालयित्वाऽ**च्युते** कल्पे देवत्वेनोदपद्यत ॥२०॥

तत्र दिव्यसुखं भुक्त्वा ततश्च्युत्वा स सेत्स्यति ।
महाविदेहे प्रव्रज्य भविताऽनन्तसौख्यभाक् ॥२१॥

इति तपसो माहात्म्यं मत्वा मुनयो महानुभावा भोः ! ।
यूयमपीह यतध्वं भवत यथा सातिनस्तद्वत् ॥२२॥

इति तपःफले **स्कन्दक**मुनिकथा ॥

इति ब्रवीमीति प्राग्वत् ॥३७॥ ग्रं० २६६ अ० ६॥

इति श्रीकमलसंयमोपाध्यायविरचितायां सर्वार्थसिद्धौ श्रीउत्तराध्ययनटीकायां त्रिंशत्तमं तपोमार्गगत्याख्यमध्ययनं समाप्तम् ॥३०॥

• • •

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एकत्रिंशत्तमं चरणविधिनामकमध्ययनम्

पूर्वाध्ययने तप उक्तम्, तच्च चरणवत एव स्यादिति चरणविध्यभिधायकमेकत्रिंशत्तममध्ययनमारभ्यते ।

चरणविहिं पवक्खामि जीवस्स उ सुहावहं ।
जं चरित्ता बहू जीवा तिन्ना संसारसागरं ॥१॥

व्याख्या–चरणविधिमागमोक्तं **प्रवक्ष्यामि जीवस्य** 'तुरेवार्थे' **सुखावहमेव शुभावहमेव वा, यं चरित्वा**ऽऽसेव्य बहवो जीवास्**तीर्णाः संसारसागरं** मुक्त्यवाप्त्येति भावः ॥१॥

यथाप्रतिज्ञातमाह–

एगओ विरइं कुज्जा एगओ य पवत्तणं ।
असंजमे नियत्तिं च संजमे य पवत्तणं ॥२॥

व्याख्या–एकत एकस्मात् स्थानाद् **विरतिं कुर्यात् । एकत** एकस्मिंश्च **प्रवर्तनं च** 'कुर्यादिति योगः' । एतदेव विशेषेणाह–**असंयमाद्** हिंसादिरूपात् 'पञ्चम्यर्थे सप्तमी' **निवृत्तिं** त्यागरूपां **संयमे च प्रवर्तनं** कुर्यात् 'चशब्दः समुच्चये' ॥२॥

तथा–

राग-दोसा य दो पावे पावकम्मपवत्तणे ।
जे भिक्खू रुंभई निच्चं से न अच्छइ मंडले ॥३॥

व्याख्या–राग-द्वेषौ 'चः पूरणे' **द्वौ** द्विसङ्ख्यौ **पापौ** कोपादिपापप्रकृतिरूपत्वात्, पापकर्माणि मिथ्यात्वादीनि प्रवर्तयत इति **पापकर्मप्रवर्तकौ यो भिक्षू रुणद्धि** उदयस्य, कथञ्चिदुदितयोर्वा प्रसरस्य निराकरणेन तिरस्कुरुते **नित्यं स नास्ते** न तिष्ठति **मण्डले** चतुरन्तसंसारे इति वृद्धव्याख्या ॥३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

दंडाणं गारवाणं च सल्लाणं च तियं तियं ।
जे भिक्खू चयई निच्चं से न अच्छइ मंडले ॥४॥

व्याख्या—दण्ड्यते चारित्रैश्वर्याद्यपहारतोऽसारीक्रियते एभिरात्मेति दण्डाः दुष्प्रणिहितमानसादिरूपा **मनोदण्डादयस्तेषां त्रिकं** मनोदण्ड-वाग्दण्ड-कायदण्डरूपं तथा गुरुर्लोभाद्याध्मातचित्त आत्मा तद्भावस्तस्य चैतान्यध्यवसानानि **गौरवाणि तेषां त्रिकं** ऋद्धिगौरव-रसगौरव-सातागौरवात्मकं तथा शल्यते बाध्यते जन्तुरेभिरिति **शल्यानि तेषां त्रिकं** माया-निदान-मिथ्यादर्शनशल्यरूपं '**चशब्दौ** समुच्चये' **यो भिक्षुस्त्यजति** वर्जयति **नित्यं स न तिष्ठति मण्डले** ॥४॥

दिव्वे य जे उवस्सग्गे तहा तेरिच्छ-माणुसे ।
जे भिक्खू सहई सम्मं से न अच्छइ मंडले ॥५॥

व्याख्या—दिव्यान् देवकृतान् **तैरश्चान्** पश्वादिकृतान् **मानुष्यकान्** मनुष्यकृतांश्चोप**सर्गान्** 'चशब्दादात्मसंवेदनीयांश्च' **यो भिक्षुः सहते स न तिष्ठति मण्डले** इति प्राग्वत् ॥५॥

विगहा-कसाय-सन्नाणं झाणाणं च दुयं तहा ।
जे भिक्खू वज्जई निच्चं से न अच्छइ मंडले ॥६॥

व्याख्या—विरुद्धा विरूपा वा कथा **विकथा** स्त्री—भक्त—देश—राजभेदतश्चतुर्धा । **कषायाः** क्रोधादयश्चत्वारः । **संज्ञा** आहार—भय—मैथुन—परिग्रहाख्याः 'एषां द्वन्द्वे, प्रत्येकं चतुष्कमिति शेषः' 'झाणाणं च'त्ति प्राकृतत्वाद् **ध्यानयोश्च** द्विकमार्त—रौद्ररूपं यो **भिक्षुर्वर्जयति स** इत्यादि प्राग्वत् । यद्यपि ध्यानस्य चातुर्विध्येऽपि वर्जनीयप्रस्तावादत्र द्वयोरभिधानम् ॥६॥

वएसु इंदियत्थेसु समिईसु किरियासु य ।
जे भिक्खू जयई निच्चं से न अच्छइ मंडले ॥७॥

व्याख्या—व्रतेषु प्राणातिपातविरत्यादिषु पञ्चसु **इन्द्रियार्थेषु** शब्दादिषु, **समितिष्वीर्यादिषु, क्रियासु च** कायिकी—आधिकरणिकी—प्राद्वेषिकी—पारितापनिकी—प्राणातिपातरूपासु **यो भिक्षुर्यतते** यत्नं कुरुते **स न तिष्ठति मण्डले** । तत्र व्रत—समितिषु यथावत् परिपालनात्, इन्द्रियार्थेषु माध्यस्थ्यकरणात्, क्रियासु परिहारतश्च ॥७॥

लेसासु छसु काएसु छक्के आहारकारणे ।
जे भिक्खू जयई निच्चं से न अच्छइ मंडले ॥८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या–लेश्यासु वक्ष्यमाणासु **षट्सु कायेषु** पृथिव्यादिषु वक्ष्यमाणेष्वेव । **षट्के** परिमाणे **आहारकारणे** वेदनादौ प्रागुक्तरूपे **यो भिक्षुर्यतते** यथायोगं निरोधोत्पादन–रक्षानुरोधविधानेन यत्न कुरुते ॥८॥

पिंडुग्गहपडिमासुं भयट्ठाणेसु सत्तसु ।
जे भिक्खू जयई निच्चं से न अच्छइ मंडले ॥९॥

व्याख्या–पिण्डावग्रहप्रतिमासु आहारग्रहणविषयाभिग्रहरूपासु संसृष्टादिषु पूर्वाध्ययनोक्तासु 'सप्तस्वित्यत्रापि सम्बध्यते' । तथा **भयस्थानेष्विह**लोकादिषु **सप्तसु यो भिक्षुर्यतते** एकत्र पालनातोऽन्यत्र भयाकरणतः ॥९॥

मएसु बंभगुत्तीसु भिक्खुधम्मंमि दसविहे ।
जे भिक्खू जयई निच्चं से न अच्छइ मंडले ॥१०॥

व्याख्या–मदा जातिमदादयोऽष्टौ तेषु 'प्रसिद्धत्वादिहान्यत्र सङ्ख्याऽनभिधानम्' । **ब्रह्मगुप्तिषु** वसत्यादिनवसु । **भिक्षुधर्मे** दशविधक्षान्त्यादिभेदे **यो भिक्षुर्यतते** यथावत् परिहारासेवन–परिपालनादिभिः ॥१०॥

उवासगाणं पडिमासु भिक्खूणं पडिमासु य ।
जे भिक्खू जयई निच्चं से न अच्छइ मंडले ॥११॥

व्याख्या–उपासकानां श्रावकाणां **प्रतिमास्व**भिग्रहविशेषास्वेकादशसु दर्शनादिषु । यदुक्तिम्–

★"[१]दंसण-[२]वय-[३]सामाइय-[४]पोसह-[५]पडिमा-[६]अबंभ-[७]सच्चित्ते ।
[८]आरंभ-[९]पेस [१०]उद्दिट्ठवज्जए [११]समणभूए य" ॥१॥

तथा **भिक्षूणां** साधूनां **प्रतिमासु च** मासिक्यादिषु द्वादशसु । यदाह–

"[१]**मासाई सत्तंता पढमा बिइ तइय सत्तराइ-दिणा ।**
अहराइ एगराई भिक्खुपडिमाण बारसगं" ॥१॥

यो भिक्षुर्यतते यथावत् परिज्ञानोपदेश–पालनादिभिः ॥११॥

★ दर्शन–व्रत–सामायिक–पोषध–प्रतिमा–ऽब्रह्म–सचित्तः ।
आरम्भ–प्रेष्योद्दिष्टवर्जकः श्रमणभूतश्च ॥१॥

१. मासादयः सप्तान्ताः प्रथमा द्वितीया तृतीया सप्तरात्रि–दिनाः ।
अहोरात्रिरेकरात्रिर्भिक्षुप्रतिमानां द्वादशकम् ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

किरियासु भूयगामेसु परमाहम्मिएसु य ।
जे भिक्खू जयई निच्चं से न अच्छइ मंडले ॥१२॥

व्याख्या—क्रियाः कर्मबन्धनिबन्धनभूताश्चेष्टास्तास्वर्थानर्थादिभेदतस्त्रयोदशसु । यदागमः—
"[1]अट्ठाणट्ठा-हिंसा-ऽकम्हा दिट्ठी य मोस-ऽदिण्णे या ।
अज्झप्प-माण-ऽमित्ते माया-लोभेरियावहिया" ॥१॥

भूताः प्राणिनस्तेषां ग्रामाः सङ्घाता **भूतग्रामाः तेष्वे**केन्द्रियसूक्ष्मेतरादिभेदतश्चतुर्दशसु । यदुक्तम्—
"[2]एगिंदिय सुहुमियरा सन्नियरपणिंदिया य सबितिचऊ ।
अपज्जत्ता पज्जत्ता कम्मेण चउदस जियट्ठाणा" ॥१॥

तथा परमाश्च ते सर्वाधार्मिकप्रधानतया अधार्मिकाश्च परमाधार्मिका अतिसंक्लिष्टचित्ता अम्बादयः पञ्चदश । उक्तं च—
★"[1]अंबे [2]अंबरिसी चेव [3]सामे [4]सबले त्ति आवरे ।
[5]रुद्दो[6]वेरोद्द[7]काले य [8]महाकाले त्ति आवरे ॥१॥
[9]असिपत्ते [10]धणुं [11]कुंभे [12]वालू [13]वेयरणी इय ।
[14]खरस्सरे [15]महाघोसे एए पण्णरसाहिया" ॥२॥

तेषु यो भिक्षुर्यतते यथाक्रमं परिहार—रक्षा—परिज्ञानादिभिः ॥१२॥

गाहासोलसएहिं तहा असंजमंमि य ।
जे भिक्खू जयई निच्चं से न अच्छइ मंडले ॥१३॥

व्याख्या—गीयते शब्द्यते स्व-परसमयस्वरूपमस्यामिति गाथा **सूत्रकृताङ्गस्य** षोडशमध्ययनम् । ततश्च **गाथा**ऽध्ययनं षोडशमेषामिति **गाथाषोडशकानि** 'सुब्व्यत्ययात्'

---

१. अर्थानर्थ-हिंसा-ऽकस्माद् दृष्टिश्च मृषा-ऽदत्तं च ।
अध्यात्म-मानामित्री माया-लोभेर्यापथिका ॥१॥

२. एकेन्द्रियाः सूक्ष्मेतराः संज्ञीतरपञ्चेन्द्रियाश्च सद्वि-त्रि-चतुरिन्द्रियाः ।
अपर्याप्ताः पर्याप्ताः क्रमेण चतुर्दश जीवस्थानानि ॥१॥

★ अम्बोऽम्बर्षिश्चैव श्यामः शबल इत्यपरः ।
रुद्र उपरुद्रः कालश्च महाकाल इति चापरः ॥१॥
असिपत्रो धनुः कुम्भो वालुर्वैतरणिरिति ।
खरस्वरो महाघोष एते पञ्चदशाख्याताः ॥२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तेषु सूत्रकृताध्ययनेषु षोडशसु । उक्तं हि—

★"समओ वेयालीयं उवसग्गपरिण्ण थीपरिण्णा य ।
निरयविभत्ती वीरत्थओ य कुसीलाण परिभासा ॥१॥
वीरिए धम्म समाही मग्ग समोसरण अहतहं गंथो ।
जेमइयं तह गाहा सोलसमं होइ अज्झयणं" ॥२॥

तथाऽसंयमः सप्तदशभेदः पृथिव्यादिविषयः । यदुक्तम्—

%"पुढवि-दग-अगणि-मारुय-वणप्फई-बि-ति-चउ-पणिंदि-अज्जीवे ।
पेहुप्पेहे-पमज्जण-परिट्ठवण-मणो-वई-काए" ॥१॥

तस्मिंश्च **यो भिक्षुर्यतते** एकत्र तदुक्तानुष्ठानतोऽन्यत्र तु त्यागतः ॥१३॥

बंभंमि नायज्झयणेसु ठाणेसु यऽसमाहिए ।
जे भिक्खू जयई निच्चं से न अच्छइ मंडले ॥१४॥

व्याख्या—ब्रह्मणि ब्रह्मचर्येऽष्टादशभेदभिन्ने—

•"ओरालियं च दिव्वं मण-वय-काएण करणजोएणं ।
अणुमोयण-कारावण-करणाणट्ठारसाऽबंभं" ॥१॥

तथा **ज्ञातान्युदाहरणानि** तत्प्रतिपादकान्य**ध्ययनानि** षष्ठाङ्गोक्तान्युत्क्षिप्तज्ञातादीन्येकोनविंशति**स्तेषु** । यदुक्तम्—

&"उक्खित्तणाए संघाडे अंडे कुम्मे य सेलए ।
तुंबे य रोहिणी मल्ली मायंदी चंदिमा इय ॥१॥

★ समयो वैतालीयं उपसर्गपरिज्ञा स्त्रीपरिज्ञा च ।
निरयविभक्तिर्वीरस्तवश्च कुशीलानां परिभाषा ॥१॥
वीर्य-धर्म-समाधि-मार्ग-समवसरणं याथातथ्यं ग्रन्थः ।
आदानीयं तथा गाथा षोडशं भवत्यध्ययनम् ॥२॥

% पृथ्वी-दकाग्नि-मारुत-वनस्पति-द्वि-त्रि-चतुः - पञ्चेन्द्रियाजीवान् ।
प्रेक्ष्योत्प्रेक्ष्य-प्रमार्जन-परिष्ठापन-मनो-वचः-कायैः ॥१॥

● औदारिकं च दिव्यं मनो-वचः-कायेन करणयोगेन ।
अनुमोदन-कारण-करणैरष्टादशाब्रह्म ॥१॥

& उत्क्षिप्तज्ञातः सङ्घाटेऽण्डः कूर्मश्च शैलकः ।
तुम्बश्च रोहिणी मल्ली माकन्दी चन्द्रमाश्च ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

दोवद्दए उदगणाए मंडुक्के तेयली इय ।
नंदिफले अवरकंका आइण्णे सुंसु पुंडरिए'' ॥२॥

तथा **स्थानेष्वा**श्रयेषु कारणेष्विति यावत् । कस्य ? इत्याह—समाधिर्ज्ञानादिषु चित्तैकाग्र्यं, न समाधि**रसमाधि**स्तस्य **तेषु समवायाङ्गो**क्तेषु विंशतावसमाधिस्थानेषु । तदुक्तम्—''★**वीसं असमाहिठाणा पन्नत्ता । तं जहा—दवदवचारी अपमज्जचारी दुप्पमज्जियचारी अइरित्तसेज्जासणिए रायणियपरीहासी थेरोवघाती भूतोवघाती संजलणे कोहणे पिट्ठिमंसिए अभिक्खणं तं उहारइत्ता भवति नवाणं अहिगरणाणं अणुप्पन्नाणं उप्पाइत्ता भवति । पोराणाणं अहिगरणाणं खामियविओसवियाणं पुणोदीरित्ता भवति । ससरक्खपाणिपाए अकालसज्झायकारए सद्दकरे कलहकरे झंझकरे सूरप्पमाणभोई एसणाए असमिए आवि भवति**'' । एतेषु **यो भिक्षुर्यतते** रक्षा—परिज्ञान—परिहारादिभिः ॥१४॥

एगवीसा य सबलेसु बावीसाए परीसहे ।
जे भिक्खू जयई निच्चं से न अच्छइ मंडले ॥१५॥

व्याख्या—एकविंशतौ शबलन्ति कुर्बुरीकुर्वन्ति चारित्रमिति शबलाः क्रिया-विशेषास्तेषु हस्तकर्मादिष्वेकविंशतौ । तथा चोक्तमागमे—

●**तं जह उ-''हत्थकम्मं कुव्वंते मेहुणं च सेवंते ।**
राइं च भुंजमाणे आहाकम्मं च भुंजंते ॥१॥
तत्तो य रायपिंडं कीयं पामिच्चं अभिहडं अछेज्जं ।
भुंजंते सबले ऊ पच्चक्खिय भिक्ख भुंजंते ॥२॥

दावद्रवोदकज्ञातो मण्डूकः तेतलिश्च ।
नन्दीफलोऽपरकङ्का अश्वः सुंसमा पुण्डरीकः ॥२॥

★ विंशतिरसमाधिस्थानानि प्रज्ञप्तानि । तद्यथा—द्रुतद्रुतचारी अप्रमार्ज्यचारी दुष्प्रमार्ज्यचारी अतिरिक्तशय्यासनिको रात्रिकपरिभाषी स्थविरोपघाती भूतोपघाती संज्वलनः क्रोधनः पृष्ठमांसिकोऽभीक्ष्णमवधारयिता भवति । नवानामधिकरणानामनुत्पन्नानामुत्पादयिता भवति । पुराणानामधिकरणानां क्षामितव्युत्सृष्टानां पुनरुदीरयिता भवति । सरजस्कपाणि—पादः । अकालस्वाध्यायकारकः शब्दकरः कलहकरो झञ्झाकरः सूर्यप्रमाणभोजी एषणायामसमितश्चापि भवति ।

● तद्यथा तु-हस्तकर्म कुर्वाणो मैथुनं च सेवमानः ।
रात्रौ च भुञ्जान आधाकर्म च भुञ्जानः ॥१॥
ततश्च राजपिण्डं क्रीतं प्रामित्यमभ्याहृतमाच्छेद्यम् ।
भुञ्जानः शबल एव प्रत्याख्याय भिक्षां भुञ्जानः ॥२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

[११]छम्मासब्भिंतरओ गणागणं संकमं करिंते य ।
मासब्भिंतर तिण्णि य दगलेवा ऊ करेमाणे ।।३।।

[१२]मासब्भिंतरओ चिय मायठाणाइं तिन्नि कुणमाणे ।
[१३]पाणाइवाय उट्टिं कुव्वंते [१४]मुसं वयंते य ।।४।।

[१५]गिण्हंते य अदिन्नं आउट्टिं तह अणंतरहियाए ।
[१६]पुढवीए ठाण-सेज्जं निसीहियं वा वि चेएति ।।५।।

[१७]एवं ससिणिद्धाए ससरक्खाए चित्तमंतसिललेलू ।
कोलावासपइट्ठा कोलघुणा तेसि आवासो ।।६।।

[१८]संड-सपाण-सबीए जाव उ संताणए भवे तहियं ।
ठाणाइ चेयमाणे सबले आउट्टियाए उ ।।७।।

[१९]आउट्टि मूल-कंदे पुप्फे य फले य बीय-हरिए य ।
भुंजंते सबले ऊ तहेव संवच्छरस्संतो ।।८।।

[२०]दस दगलेवे कुव्वं तह माइट्ठाण दस य वरिसंतो ।
आउट्टिय सीओदगवग्घारियहत्थमत्ते य ।।९।।

---

१. षण्मासाभ्यन्तरतो गणाद् गणं संक्रमं कुर्वंश्च ।
मासाभ्यन्तरे त्रींश्च दकलेपांस्तु कुर्वाणः ।।३।।

मासाभ्यन्तरत एव मायास्थानानि त्रीणि कुर्वाणः ।
प्राणातिपाताकुट्टिं कुर्वाणो मृषा वदंश्च ।।४।।

गृह्णंश्चादत्तमाकुट्टिं तथाऽनन्तरायाम् ।
पृथ्व्यां स्थान-शय्यां नैषेधिकीं वाऽपि चेतयति ।।५।।

एवं सस्निग्धायां सरजस्कायां चित्तवच्छिलालेलुमत्याम् ।
कोलावासप्रतिष्ठायां कोलघुणास्तेषामावासे ।।६।।

साण्ड-सप्राण-सबीजं यावत् तु सन्तानकं भवेत् तत्र ।
स्थानादि कुर्वन् शबल आकुट्या तु ।।७।।

आकुट्या मूलानि कन्दान् पुष्पाणि च फलानि च बीजानि हरितानि च ।
भुञ्जानः सबलस्तु तथैव संवत्सरस्यान्तः ।।८।।

दश दकलेपान् कुर्वन् तथा मातृस्थानानि दश च वर्षान्तः ।
आकुट्या शीतोदकक्लिन्नहस्तमात्रश्च ।।९।।

Jain Education International 2010_02   For Private & Personal Use Only   www.jainelibrary.org

[२१]दव्वीए भायणेण व दिज्जंतं भत्त-पाण घित्तूणं ।
भुंजइ सबलो एसो इगवीसो होइ नायव्वो" ॥१०॥

तथा **द्वाविंशतौ** क्षुदादि**परीषहेषु यो भिक्षुर्यतते** परिहार—सहनादिभिः ॥१५॥

तेवीसइ सूयगडे रूवाहिएसु सुरेसु य ।
जे भिक्खू जयई निच्चं से न अच्छइ मंडले ॥१६॥

व्याख्या—त्रयोविंशतौ सूत्रकृताध्ययनेषु तत्र **पुण्डरीका**दीनि सप्त, **समयादीनि** च पूर्वोक्तानि षोडशेति मिलितास्त्रयोविंशतिस्तस्मिन् । उक्तं हि—

★"[१]**पुंडरिय** [२]**किरियठाणं** [३]**आहारपरिण्ण य** [४]**पच्चक्खाणकिरिया य ।**
[५]**अणगार** [६]**अद्द** [७]**नालंद सोलसाइं च तेवीसं" ॥१॥**

तथा रूपमेकस्तेनाधिकाः 'प्रक्रमात् **सूत्रकृताङ्गा**ध्ययनेभ्यः' **रूपाधिकाश्च**तुर्विंशतिरित्यर्थ**स्तेषु** केषु ? इत्याह—**सुरेषु भवनपत्या**दिषु यदि वा देवेष्वर्हत्सु **वृषभादिषु**श्चतुर्विंशतौ । यदुक्तम्—

"[१]**भवण-वण-जोइ-वेमाणिया य दस-अठ-पंच-एगविहा ।**
इह चउवीसं देवा केई पुण बेंति अरहंता" ॥१॥

तेषु **यो भिक्षुर्यतते** यथावत्प्ररूपणादिना स न तिष्ठति मण्डले चतुरन्तसंसारे ॥१६॥

पणवीस भावणाहिं च उद्देसेसु दसाइणं ।
जे भिक्खू जयई निच्चं से न अच्छइ मंडले ॥१७॥

व्याख्या—पञ्चविंशतौ 'सुब्व्यत्ययाद्' **भावनासु** महाव्रतविषयेर्यासमित्यादियत्नरूपासु । ताश्चैवं श्रुते—"●**पणवीसं भावणाओ पन्नत्ताओ तं जहा—**[१]**ईरियासमिति** [२]**मणगुत्ती,** [३]**वयगुत्ती,** [४]**आलोइऊण पाण-भोयणं,** [५]**आयाणभंडमत्तनिक्खेवणासमिई पढमवए ।**

दर्व्या भाजनेन वा दीयमानं भक्त-पानं गृहीत्वा ।
भुनक्ति शबल एष एकविंशतितमो भवति ज्ञातव्यः ॥१०॥

★ पौण्डरीकं क्रियास्थानमाहारपरिज्ञा च प्रत्याख्यानक्रिया च ।
अनगार आर्द्रो नालन्दः षोडश च त्रयोविंशतिः ॥१॥

१. भवन-वन-ज्योतिर्वैमानिकाश्च दशाष्ट-पञ्चैकविधाः ।
इति चतुर्विंशतिर्देवाः केचित् पुनर्ब्रुवन्त्यर्हन्तः ॥१॥

● पञ्चविंशतिर्भावनाः प्रज्ञप्ताः । तद्यथा—ईर्यासमितिः १ मनोगुप्तिः २ वचोगुप्तिः ३ आलोक्य पान-भोजनम् ४ आदानभाण्डमात्रनिक्षेपणासमितिः ५ प्रथमव्रते । अनुवीचिभाषणता १ क्रोधविवेकः २

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

[1]अणुवीइभासणया, [2]कोहविवेगे, [3]लोहविवेगे, [4]भयविवेगे, [5]हासविवेगे बिइयवए । [1]उग्गहअणुन्नवणया, [2]उग्गहसीमजायणया, [3]सयमेव उग्गहअणुगेण्हणया, [4]साहंमिय-उग्गहमणुण्णविय परिभुंजणया, [5]साहारणभत्तपाणं अणुण्णविय परिभुंजणया तईयवए । [1]इत्थि-पसु-पंडगसंसत्तसयणासणवज्जणया, [2]इत्थीकहविवज्जणया, [3]इत्थीण इंदियाणं आलोयणवज्जणया, [4]पुव्वरयपुव्वकीलियाणं विसयाणं असरणया, [5]पणीयाहार-विवज्जणया चउत्थवए । [1]सोइंदियरागोवरमे एवं पंचवि इंदिया पंचमवए" ।

एवं पञ्चानां व्रतानां पञ्च पञ्च मीलने पञ्चविंशतिः । **तथोद्देशेष्वि**त्युपलक्षणत्वादुद्देशकालेषु 'षड्विंशतिसङ्ख्येष्विति शेषः' **दशादीनां** दशाश्रुतस्कन्धकल्पव्यवहाराणाम् । उक्तं हि—

"[1]दस उद्देसणकाला दसाण कप्पस्स हुंति छच्चेव ।
दस चेव य ववहारस्स हुंति सव्वे वि छव्वीसं" ॥१॥

तेसु **यो भिक्षुर्यतते** सर्वदा परिभावना—प्ररूपणा—कालग्रहणादिभिः ॥१७॥

अणगारगुणेहिं च पकप्पंमि तहेव य ।
जे भिक्खू जयई निच्चं से न अच्छइ मंडले ॥१८॥

व्याख्या—अनगारः साधुस्तस्य **गुणा** व्रतषट्केन्द्रियनिग्रहादयः सप्तविंशतिः 'सुब्व्यत्ययात्' तेषु चोक्तं हि—

★**"[6]वयछक्क[11]मिंदियाणं च निग्गहो [13]भावकरणसच्चं च ।**
[14]खमया [15]विरागया वि य [18]मणमाईणं निरोहो य ॥१॥
[24]कायाण छक्क [25]जोगंमि जुत्तया [26]वेयणाहियासणया ।
[27]तह मारणंतियहियासणया एएऽणगारगुणा" ॥२॥

लोभविवेकः ३ भयविवेकः ४ हास्यविवेकः ५ द्वितीयव्रते । अवग्रहानुज्ञपनता १ अवग्रहसीमयाचनता २ स्वयमेवावग्रहानुग्रहणता ३ साधर्मिकावग्रहमनुज्ञाप्य परिभुञ्जनता ४ साधारणभक्तपानमनुज्ञाप्य परिभुञ्जनता ५ तृतीयव्रते । स्त्री-पशु-पण्डकसंसक्तशयनासनवर्जनता १ स्त्रीकथाविवर्जनता २ स्त्रीणामिन्द्रियाणामालोक-नवर्जनता ३ पूर्वरत-पूर्वक्रीडितानां विषयाणामस्मरणता ४ प्रणीताहारविवर्जनता ५ चतुर्थव्रते । श्रोत्रेन्द्रियरागोपरमः १ एवं पञ्चापीन्द्रियाणि ५ पञ्चमव्रते ॥

१. दश उद्देशनकाला दशानां कल्पस्य भवन्ति षडेव ।
दश चैव च व्यवहारस्य भवन्ति सर्वेऽपि षड्विंशतिः ॥१॥

★ व्रतषट्कमिन्द्रियाणां च निग्रहो भाव-करणसत्यं च ।
क्षमता विरागताऽपि च मन आदीनां निरोधश्च ॥१॥
कायानां षट्कं योगे युक्तता वेदनाऽध्यासनता ।
तथा मारणान्तिकाध्यासनता एतेऽनगारगुणाः ॥२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

प्रकल्पो यतिव्यवहारोऽर्थादाचाराङ्गमेव **शस्त्रपरिज्ञा**द्यष्टाविंशत्यध्ययनात्मकं **तस्मिन्** । उक्तं च—

★"[१]सत्थपरिण्णा [२]लोगविजओ य [४]सीओसणिसम्मत्तं ।
[७]आवंति-धुव-विमोहो [८]उवहाणसुयं [९]महपरिण्णा ॥१॥
[१४]पिंडेसण-सेज्जेरिया-भासा-वत्थेसणा य [१५]पोएसणा ।
[१६]उग्गहपडिमा [२३]सत्तिक्कसत्तया [२५]भावण-विमुत्ती ॥२॥
[२७]उग्घायमणुग्घायं [२८]आरोवण तिविहमो निसीहं तु ।
इइ अट्ठावीसविहो आयारपगप्पनामो उ" ॥३॥

तेषु तथैव यथावदासेवना—प्ररूपणादिना प्रकारेण **यो भिक्षुर्यतते** ॥१८॥

पावसुयपसंगेसु मोहठाणेसु चेव य ।
जे भिक्खू जयई निच्चं से न अच्छइ मंडले ॥१९॥

व्याख्या—पापोपादानानि यानि श्रुतानि तेषु प्रसङ्गास्तथाविधासक्तिरूपाः **पापश्रुतप्रसङ्गास्ते** चाष्टाङ्गनिमित्तसूत्रादिविषयभेदादेकोनत्रिंशत् तेषु । यदागमः—

"●अट्ठ निमित्तंगाइं [१]दिव्वु[२]पायं[३]तलिक्ख-[४]भोमं च ।
[५]अंगं [६]सर-[७]लक्खण-[८]वंजणं च तिविहं पुणेक्किक्कं ॥१॥

सुत्तं वित्ती तह वत्तियं च पावसुय अउणतीसविहं ॥
[२५]गंधव्व-[२६]नट्ट-[२७]वत्थुं [२८]आउं [२९]धणु-वेयसंजुत्तं" ॥२॥

मोहो मोहनीयं कर्म तिष्ठति निमित्ततया एतेष्विति **मोहस्थानानि** वारिमध्यमग्न-त्रसप्राणमारणादीनि त्रिंशत् । उक्तं हि—

★ शस्त्रपरिज्ञा लोकविजयश्च शीतोष्णीय-सम्यक्त्वम् ।
आवन्ती-धूत-विमोक्ष उपधानश्रुतं महापरिज्ञा ॥१॥
पिण्डेषणा-शय्येर्या-भाषा-वस्त्रैषणा च पात्रैषणा ।
अवग्रहप्रतिमा सप्तैकसप्तिका भावना-विमुक्तिः ॥२॥
उद्घातमनुद्घातमारोपणं त्रिविधं निशीथं तु ।
इत्यष्टाविंशतिविध आचारप्रकल्पनामा तु ॥३॥

● अष्ट निमित्ताङ्गानि दिव्यौत्पातान्तरिक्ष-भौमं च ।
आङ्गं स्वर-लक्षण-व्यञ्जनं च त्रिविधं पुनरेकैकम् ॥१॥

सूत्रं वृत्तिस्तथा वार्तिकं च पापश्रुतमेकोनत्रिंशद्विधम् ।
गान्धर्व-नाट्य-वास्तु, आयुर्धनुर्वेदसंयुक्तम् ॥२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

★"[१]वारिमज्झे वगाहित्ता तसे पाणे य हिंसइ ।
[२]छाएउ मुहं हत्थेणं अंतो नायं गलेरवं ॥१॥
[३]सीसावेढेण वेढित्ता संकिलेसेण मारए ।
[४]सीसंमि जे य आहंतु दुहमारेण हिंसए ॥२॥
[५]बहुजणस्स नेयारं दीवं ताणं च पाणिणं ।
[६]साहारणे गिलाणंमि पहूकिच्चं न कुव्वति ॥३॥
[७]साहुं सकम्मधम्माओ जो भंसेज्ज उवट्ठियं ।
[८]णेयाओयस्स मग्गस्स अवगारंमि वट्टति ॥४॥
[९]जिणाणं अणंतणाणीणं अवण्णं जो पभासए ।
[१०]आयरिय-उवज्झाए खिंसए मंदबुद्धिए ॥५॥
[११]तेसिमेव य णाणीणं सम्मं नो परितप्पई ।
[१२]पुणो पुणो अहिगरणं उप्पाए तित्थभेयए य ॥६॥
[१३]जाणं आहम्मिए जोए पउंजति पुणो पुणो ।
[१४]कामे वमेत्ता पत्थेइ इहऽण्णभविएइ वा ॥७॥
[१५]अभिक्खं बहुस्सुएऽहंति जे भासतेऽबहुस्सुए ।
[१६]तहा य अतवस्सीओ जे तवस्सि त्ति हं वए ॥८॥

★ वारिमध्येऽवगाह्य त्रसान् प्राणांश्च हिनस्ति ।
छादयित्वा मुखं हस्तेनान्तर्नादं गलेरवम् ॥१॥
शीर्षवेष्टेन वेष्टयित्वा संक्लेशेन मारयेत् ।
शीर्षे यश्चाहत्य दुःखमारेण हिंस्यात् ॥२॥
बहुजनस्य नेतारं द्वीपं त्राणं च प्राणिनाम् ।
साधारणे ग्लाने प्रभुकृत्यं न कुर्वति ॥३॥
साधुं स्वकर्मधर्माद् यो भ्रंशयेदुपस्थितम् ।
न्यायोपेतस्य मार्गस्यापकारे वर्तते ॥४॥
जिनानामनन्तज्ञानिनामवज्ञां यः प्रभाषते ।
आचार्योपाध्यायान् खिंसति मन्दबुद्धिकः ॥५॥
तेषामेव च ज्ञानिनां सम्यग् नो परितर्पयेत् ।
पुनः पुनरधिकरणमुत्पादयेत् तीर्थभेदांश्च ॥६॥
जानन् आधार्मिकान् योगान् प्रयुनक्ति पुनः पुनः ।
कामान् वान्त्वा प्रार्थयते इहान्यभविकान् वा ॥७॥
अभीक्ष्णं बहुश्रुतोऽहमिति यो भाषतेऽबहुश्रुतः ।
तथा चातपस्वी यस्तपस्व्यहमिति वदेत् ॥८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

[१७]जायतेएण बहुजणं अंतो धूमेण हिंसइ ।
[१८]अकिच्चमप्पणा काउं कयमेएण भासए ॥९॥

[१९]नियडुवहि-पणिहीए पलिउंचे सादिजोयजुत्ते य ।
[२०]बेइ सव्वं मुसं वयसि [२१]अज्झीण झंझए सया ॥१०॥

[२२]अद्धाणंमि पवेसित्ता जो धणं हरइ पाणिणं ।
[२३]वीसंभित्ता उवाएणं दारे तस्सेव लुब्भति ॥११॥

[२४]अभिक्खमकुमारे उ कुमारेऽहं ति भासए ।
[२५]एवं अबंभयारी वि बंभयारि त्ति भासए ॥१२॥

[२६]जेणेवेसरियं णीए वित्ते तस्सेव लुब्भति ।
[२७]तप्पहावुट्ठिए वावि अंतरायं करेति से ॥१३॥

[२८]सेणावइं पसत्थारं भत्तारं वावि हिंसए ।
रट्ठस्स वावि णिगमस्स णायगं सेट्ठिमेव वा ॥१४॥

[२९]अपस्समाणो पस्सामि अहं देव त्ति वा वए ।
[३०]अवण्णेणं च देवाणं महामोहं पकुव्वई" ॥१५॥

तेषु **यो भिक्षुर्यतते** तत्परिहारद्वारतः ॥१९॥

जाततेजसा बहुजनमन्तर्धूमेन हिनस्ति ।
अकृत्यमात्मना कृत्वा कृतमेतेन भाषते ॥९॥

निकृत्युपधि-प्रणिधिकः परिकुञ्चकः सातियोगयुक्तश्च ।
ब्रूते सर्वं मृषा वदस्यक्लेशं क्लेशयति सदा ॥१०॥

अध्वनि प्रवेश्य यो धनं हरति प्राणिनाम् ।
विश्रम्भ्योपायेन दारेषु तस्यैव लुभ्यति ॥११॥

अभीक्ष्णमकुमारस्तु कुमारोऽहमिति भाषते ।
एवमब्रह्मचार्यपि ब्रह्मचारीति भाषते ॥१२॥

येनैवैश्वर्यं नीतो वित्ते तस्यैव लुभ्यति ।
तत्प्रभावोत्थितश्चाप्यन्तरायं करोति तस्य ॥१३॥

सेनापतिं प्रशास्तारं भर्तारं वाऽपि हिनस्ति ।
राष्ट्रस्य वाऽपि निगमस्य नायकं श्रेष्ठिनमेव वा ॥१४॥

अपश्यन् पश्याम्यहं देवान् इति वा वदेत् ।
अवर्णेन च देवानां महामोहं प्रकुरुते ॥१५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सिद्धाइगुणजोगेसु तित्तीसासायणासु य ।
जे भिक्खू जयई सम्मं से न अच्छई मंडले ॥२०॥

व्याख्या—सिद्धानामतिशायिनो गुणाः सिद्धातिगुणाः संस्थानादिनिषेधरूपा एकत्रिंशत् । यदाह—

★"पडिसेहणसंठाणे[५] वण्ण[५]-गंध[२]-रस[५]-फास[८]-वेए[३] य ।
पणपणदुपणट्ठतिहा इगतीसमकाय[१]ऽसंग[१]ऽरुहा[१] ॥१॥
णव दरिसणंमि चत्तारि आउए पंच आइमे अंते ।
सेसे दो दो भेया खीणभिलावेण इगतीसं" ॥२॥

तथा 'जोग' त्ति 'पदैकदेशेऽपि पदप्रयोगदर्शनात्' योगसंग्रहा यैर्योगाः शुभमनो-वाक्-कायव्यापाराः सम्यग् गृह्यन्ते स्वीक्रियन्ते ते चालोचनादयो द्वात्रिंशद् । उक्तं हि—

●"[१]आलोयणा [२]निरवलावे [३]आवईसु दढधम्मया ।
[४]अणिस्सिओवहाणे य [५]सिक्खा [६]निप्पडिकम्मया ॥१॥
[७]अण्णायणया [८]अलोभे य [९]तितिक्खा [१०]अज्जवे [११]सुई ।
[१२]सम्मद्दिट्ठी [१३]समाही य [१४]आयारे [१५]विणओवयए ॥२॥
[१६]धिइमई य [१७]संवेगो [१८]पणिही [१९]सुविही [२०]संवरे ।
[२१]अत्तदोसोवसंहारे [२२]सव्वकामविरत्तया ॥३॥
[२३-२४]पच्चक्खाणे [२५]विउस्सग्गे [२६]अप्पमाए [२७]लवालवे ।
[२८]झाणसंवरजोगे य उदए [२९]मारणंतिए ॥४॥

★ प्रतिषेधनसंस्थानानि वर्ण-गन्ध-रस-स्पर्श-वेदांश्च ।
पञ्च-पञ्च-द्वि-पञ्चाष्ट-त्रिधा एकत्रिंशदकायासङ्गारुहाः ॥१॥
नव दर्शने चत्वार्यायुषि पञ्चादावन्ते ।
शेषे द्वौ द्वौ भेदौ क्षीणाभिलापेन चैकत्रिंशत् ॥२॥

● आलोचना निरपलाप आपत्सु दृढधर्मता ।
अनिश्रितोपधानश्च शिक्षा निष्प्रतिकर्मता ॥१॥
अज्ञापनताऽलोभश्च तितिक्षाऽऽर्जवः शुचिः ।
सम्यग्दृष्टिः समाधिश्चाचारो विनयोपगतः ॥२॥
धृतिमतिश्च संवेगः प्रणिधिः सुविधिः संवरः ।
आत्मदोषोपसंहारः सर्वकामविरक्तता ॥३॥
प्रत्याख्यानं व्युत्सर्गोऽप्रमादो लवालवः ।
ध्यानसंवरयोगश्चोदयो मारणान्तिकः ॥४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

[30]संगाणं च परिण्णाया [31]पायच्छित्तकरणे इय ।
[32]आराहणा य मरणंते बत्तीसं जोगसंगहा'' ॥५॥

शिष्यस्य निःशल्यालोचनाग्राहिता । आचार्यदेर्दत्तायामालोचनायां नान्यस्मै प्रकाशनं निरपलापः । परस्यानिश्रया तपःकारिता । ग्रहणासेवनाशिक्षाद्वयासेविता । निःप्रतिकर्मता शरीरे । तपसः परिजनस्याज्ञापनमज्ञापनता । तितिक्षा परीषहादिजयः । 'सुइ'त्ति शुचिना भाव्यं संयमवतेत्यर्थः । सुविधिकारिता । प्रणिधिर्माया सा त्याज्या । धृतिप्रधानमतिः । प्रत्याख्यानं मूलोत्तरगुणविषयतया द्विभेदमिति द्वारद्वयम् । 'लवालवे'त्ति क्षणे क्षणे सामाचार्यनुष्ठानं । ध्यानमेव संवरयोगः । उदये वेदनोदये मारणान्तिकोपसर्गेऽप्यक्षोभ्यता । सुगमप्रायाः शेषयोगसंग्रहाः । शुचिद्वारे दृष्टान्तस्तथाहि—

श्री**वीर**शिष्यौ द्वौ **धर्मघोष-धर्मयशोमती** ।
परावर्तयतः सूत्रमशोकस्य तरोस्तले ॥१॥

न पूर्वाह्णेऽपराह्णे च तच्छाया पर्यवर्तत ।
एकः प्राह प्रभावस्ते द्वितीयोऽवक् तवास्त्ययम् ॥२॥

क्रमात् तौ कायिकीभूमिं गत्वा च्छायां तथैव ताम् ।
दृष्ट्वा पप्रच्छतु**र्वीरं** तद्वृत्तं सोऽभ्यधादिति ॥३॥

पुरा **शौर्यपुरे** राजा **समुद्रविजयो**ऽभवत् ।
तापसोऽभूद् **यज्ञयशाः सोममित्रा** तदङ्गना ॥४॥

तदङ्गजो **यज्ञदत्त**स्तस्य **सोमयशाः** प्रिया ।
तत्सुतो **नारदो** जज्ञे तत्पितामहमुख्यकाः ॥५॥

उञ्छन्त्येकान्तरं भुक्त्यै मुक्त्वाऽशोकतले शिशुम् ।
तमपश्यन् दिवा यान्तो **वैताढ्यजृम्भका**मराः ॥६॥

स्वनिकायच्युतं मत्वाऽवधिना तं स्तनन्धयम् ।
अस्तभंस्तत्तरोश्छायां मा भूत् तापोऽस्य दुःखदः ॥७॥

प्रत्यायन्तस्ततस्ते तु पूर्वस्नेहाद् ददुर्मुदा ।
प्रज्ञप्त्याद्या महाविद्या **नारदस्य** महाधियः ॥८॥

सङ्गानां च परिज्ञाता प्रायश्चित्तकरणमिति ।
आराधना च मरणान्ते द्वात्रिंशद् योगसङ्ग्रहाः ॥५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अथ स व्योममार्गेण यात्यायाति च सन्ततम् ।
सुवर्णकुण्डिकाहस्तः पादयोर्मणिपादुकः ॥९॥

अन्येद्युर्**द्वारिका**पुर्यां पृष्टः **कृष्णे**न नारदः ।
किं शौचमिति तत्प्रत्युत्तरं दातुं स न क्षमः ॥१०॥

विनोद्य सूक्तिभिर्विष्णुं तत उत्थाय सोऽगमत् ।
क्षिप्रं पूर्व**विदेहे**ऽथो उप**सीमन्धरं** प्रभुम् ॥११॥

युगबाहुहरिस्तत्र किं शौचं पृष्टवान् जिनम् ।
स्वाम्याह शौचं सत्यं हि तच्छ्रुत्वा **नारदो** ययौ ॥१२॥

विदेहे पश्चिमे पृष्टस्त**न्महाबाहु**विष्णुना ।
शौचं तदेव व्याचष्टे **युगन्धर**जिनस्तदा ॥१३॥

ततो **द्वारवतीं** गत्वा **नारदः कृष्ण**मब्रवीत् ।
सत्यं शौचं हरिः प्राह किं सत्यं तद् वदाशु भोः ? ॥१४॥

नारदः प्रोचिवान् सत्यं न पृष्टोऽर्हंस्तदा मया ।
इत्येवं चिन्तयन् जातिस्मृतिमाप विशुद्धहृत् ॥१५॥

सोऽथ ज्ञात्वा तया सत्यं सर्वभूतहितं खलु ।
अतीव शोचयन् सम्यक् प्राप प्रत्येकबुद्धताम् ॥१६॥

परिव्रज्य तपस्तप्त्वा घातिकर्मक्षयेण सः ।
क्षपकश्रेणिमारूढः केवलज्ञानमासदत् ॥१७॥

धर्मधुराधौरेयो विधाय सत्याभिधं महाऽध्ययनम् ।
सोऽध्यास्त सिद्धिसौधं ध्यानाग्निध्मातकर्मैधाः ॥१८॥

तेन बाल्येऽल्पकर्मत्वात् शयानस्य तरोस्तले ।
एतस्योपरि तच्छाया जज्ञे पुण्यवतोऽचला ॥१९॥

तौ मुनी अपि तद्वृत्तं श्रुत्वा **वीर**जिनाननात् ।
सत्य-भूतहितासक्तावभूतां सिद्धिभाजनम् ॥२०॥

॥ इति शौचफले **नारद**कथा ॥

ततश्च सिद्धातिगुणाश्च ते योगाश्च **सिद्धातिगुणयोगास्तेषु** । 'तित्तीसासायणासु य' त्ति **त्रयस्त्रिंशत्याशातनासु** चार्हदादिविषयासु प्रतिक्रमणसूत्रोक्तासु, आचार्यादेः पुरतः

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

शिष्यगमनादिकासु वा **समवायाङ्गा**भिहितासु **यो भिक्षुर्यतते** यथायोगं **सम्यक्** श्रद्धाना-सेवना—वर्जनादिभिः **स न आस्ते मण्डले** चतुरन्तसंसारे । अत्र श्राद्धप्रतिमादिविस्तर-स्वरूपं विधिश्च **दशाश्रुतस्कन्धा**दवसेयः ॥२०॥

निगमनमाह—

इइ एएसु ठाणेसु जे भिक्खू जयई सया ।
खिप्पं से सव्वसंसारा विप्पमुच्चइ पंडिए ॥२१॥ त्ति बेमि ॥

व्याख्या—इतीत्यनेन प्रकारे**णैते**ष्वनन्तरोक्तेष्वसंयमादि**स्थानेषु यो भिक्षुर्यतते** यत्नवान् भवति **सदा । क्षिप्रं स सर्वसंसाराद्** विप्र**मुच्यते पण्डित इति ब्रवीमी**त्यादि पूर्ववत् ॥२१॥ ग्रं० १८९ अ० ८॥

इति श्रीकमलसंयमोपाध्यायविरचितायां सर्वार्थसिद्धौ श्रीउत्तराध्ययनटीकायां एकत्रिंशत्तमं चरणविधिनामकमध्ययनं समाप्तम् ॥३१॥

● ● ●

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

द्वात्रिंशत्तमं प्रमादस्थानाख्यमध्ययनम्

इह पूर्वाध्ययने चरणविधिरुक्तः, स च प्रमादस्थानत्यागादेवासेवितुं शक्यः । तत्त्यागश्च तत्परिज्ञानपूर्वक इति तदर्थं द्वात्रिंशमध्ययनमारभ्यते । तत्र च स प्रमादो द्विविधो द्रव्य–भावभेदात् । तत्र द्रव्यप्रमादो मद्यादिः । भावप्रमादो निद्रा-विकथा-कषाय-विषयादिः । अत्र च भावप्रमादेनैवाधिकारोऽयं च परिहार्य एव दुस्त्यजश्चायं जिनेष्वप्यस्य श्रूयमाणत्वात् । यथा भगवतः श्री**ऋषभदेव**स्य वर्षसहस्रप्रमाणं कालं तदुग्रं तपश्चरतः सङ्कलितः प्रमादोऽहोरात्रं कथमिदं प्रमाणं घटामटाट्टीति ? उच्यते–किलाप्रमादगुणस्थानस्यान्तर्मुहूर्तिकत्वेनानेकशोऽपि प्रमादप्राप्तौ तदवस्थितिविषयभूतस्यान्तर्मुहूर्तस्यासङ्ख्येयभेदत्वात् तेषामतिसूक्ष्मतायां सर्वसङ्कलनायामप्यहोरात्रमेवावसेयम् । तथा **वर्धमान**स्वामिनोऽपि द्वादशवर्षाणि साधिकानि तपश्चरतः प्रमादकालोऽन्तर्मुहूर्तमात्र एव सङ्कलितः । इहाप्यन्तर्मुहूर्तानामसङ्ख्येयभेदात् प्रमादस्थितविषयान्तर्मुहूर्तानां सूक्ष्मत्वं सङ्कलनान्तर्मुहूर्तस्य च बृहत्तरत्वमिति भावनीयम् । अत **एव** जिनाः प्रमादं महादोषं वदन्ति । प्रमादतो हि प्राणिनोऽनन्तसंसारं पर्यटन्ति, अतोऽसौ त्याज्य एवेत्येतदेवाह–

अच्चंतकालस्स समूलयस्स सव्वस्स दुक्खस्स उ जो पमोक्खो ।
तं भासओ मे प्पडिपुण्णचित्ता सुणेह एगंतहियं हियत्थं ॥१॥

व्याख्या–अन्तमतिक्रान्तोऽत्यन्तो वस्तुनश्च द्वावन्तावारम्भक्षणो निष्ठाक्षणश्च । तत्रेहारम्भलक्षणोऽन्तः परिगृह्यते । तथा चात्यन्तोऽनादिः कालो यस्य सो**ऽत्यन्तकालः तस्य**। सह मूलेन कषायाविरतिरूपेण वर्तत इति **समूलकस्तस्य** । उक्तं च–[१]**मूलं संसारस्स होंति कसाया अविरई य**' त्ति । **सर्वस्य** दुःखयतीति **दुःखः** संसारस्त**स्य यः** प्रकर्षेण मोक्षोऽपगमः 'तुशब्दस्यैवार्थत्वात्' **प्रमोक्ष** एव **तं भाषमाणस्य** यथाऽसौ स्यात् तथा ब्रुवाणस्य 'मे' **मम** प्रतिपूर्णं विषयान्तरागमनेनाखण्डितं चित्तं येषां ते **प्रतिपूर्णचित्ताः शृणुत एकान्तहितं** किमर्थं ? **हितो मोक्षस्तदर्थम्** ॥१॥

---

१. मूलं संसारस्य भवन्ति कषाया अविरतिश्च ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

प्रतिज्ञातमाह—

नाणस्स सव्वस्स पगासणाए अन्नाण-मोहस्स विवज्जणाए ।
रागस्स दोसस्स य संखएणं एगंतसोक्खं समुवेइ मोक्खं ॥२॥

व्याख्या—ज्ञानस्य मतिज्ञानादेः **सर्वस्य प्रकाशनया** निर्मलीकरणेनानेन ज्ञानात्मको मोक्षहेतुरुक्तः । तथाऽज्ञानं मत्यज्ञानादि, मोहो दर्शनमोहनीयम् 'अनयोर्द्वन्द्वे' **अज्ञानमोहं तस्य विवर्जना** परिहारो मिथ्याश्रुतश्रवण—कुदृष्टिसङ्गत्यागादिना परिहाणि**स्तया**, अनेन स एव सम्यग्दर्शनात्मकोऽभिहितः । तथा **रागस्य द्वेषस्य च संक्षयेण** विनाशेन एतेन तस्यैव चारित्रात्मकस्याभिधानम् । ततश्च सम्यगदर्शन-ज्ञान-चारित्रै**रेकान्तसौख्यं** दुःखलेशाकलङ्कितं सुखं **समुपैति मोक्षम्** । अयं च दुःखप्रमोक्षाविनाभावीत्यनेन स एवोपलक्षित इति ॥२॥

ज्ञानादीनां दुःखप्रमोक्षत्वमुक्त्वामीषां प्राप्तिहेतूनाह—

तस्सेस मग्गो गुरु-विद्धसेवा विवज्जणा बालजणस्स दूरा ।
सज्झायएगंतनिसेवणा य सुत्तऽत्थसंचिंतणया धिई य ॥३॥

व्याख्या—तस्येति योऽपि पूर्वं मोक्षोपाय उक्त**स्तस्य एषो**ऽनन्तरवक्ष्यमाणो **मार्गः** प्राप्तिहेतुर्यदुत गुरवो यथावच्छास्त्रार्थोपदेशका वृद्धाश्च श्रुतपर्यायदिभिस्तेषां सेवोपासना **गुरु-वृद्धसेवा** इयं च 'गुरुकुलवासोपलक्षणम्' तत्र सुप्रापाण्येव ज्ञानादीनि । यदाह—

"[१]नाणस्स होइ भागी थिरयरओ दंसणे चरित्ते ।
धन्ना आवकहाए गुरुकुलवासं न मुंचंति" ॥१॥

तथा **विवर्जना** परिहारो **बालजनस्य** पार्श्वस्थादे**र्दूराद्** दूरेण तत्सङ्गस्याल्पीयसोऽपि महादोषनिबन्धनत्वात् । तथा स्वाध्यायस्यैकान्तनिषेवणा निश्चयेनानुष्ठानं **स्वाध्यायै-कान्तनिषेवणा** । तथा सूत्रस्यार्थोऽभिधेयः **सूत्रार्थस्तस्य सञ्चिन्तना** । तथा **धृतिश्चि**त्तस्वा-स्थ्यमनुद्विग्नत्वमित्यर्थो न हि धृतिं विना ज्ञानादिलाभ इति ॥३॥

यतश्चायं ज्ञानादिमार्गस्तत एतान्यभिलषता प्राक् किं कार्यम् ? इत्याह—

आहारमिच्छे मियमेसणिज्जं सहायमिच्छे निउणत्थबुद्धिं ।
निकेयमिच्छेज्ज विवेगजोगं समाहिकामे समणे तवस्सी ॥४॥

व्याख्या—आहारमशनादिक**मिच्छेद**भिलषे**न्मितमेषणीयम्** । तथा **सहायं** सहचर-

---

१. ज्ञानस्य भवति भागी स्थिरतरको दर्शने चारित्रे च ।
धान्या यावत्कथं गुरुकुलवासं च मुञ्चन्ति ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मिच्छेद् 'गच्छान्तर्वर्ती सन्निति गम्यम्' निपुणा अर्थेषु जीवादिषु बुद्धिरस्येति **निपुणार्थ-बुद्धिस्तम्**। तथा **निकेतमाश्रयमिच्छेद्** विवेकः पृथग्भावः स्त्र्यादिसंसर्गाभाव इति यावत् तस्मै योग्यमुचितं तदापाताद्यसम्भवेन **विवेकयोग्यम्**। समाधिर्द्रव्यभावभेदाद् द्विभेदस्तत्र द्रव्यसमाधिः क्षीर-शर्करादिद्रव्याणां परस्परमविरोधेनावस्थानम्। भावसमाधिस्तु ज्ञानादीनामन्योन्यमबाधयावस्थानमेतं भावसमाधिं कामयतेऽभिलषतीति भाव**समाधिकामो** ज्ञानाद्यवाप्तुकाम इत्यर्थः। **श्रमणस्तपस्वी** ॥४॥

कालादिदोषत एवंविधसहायाप्राप्तौ कृत्यमाह—

न वा लभिज्जा निउणं सहायं गुणाहियं वा गुणओ समं वा।
इक्को वि पावाइ विवज्जयंतो विहरेज्ज कामेसु असज्जमाणो ॥५॥

व्याख्या—'नेति निषेधे, वाशब्दश्चेदर्थे' ततश्च **न चेल्लभेत निपुणमि**ति निपुणबुद्धिं **सहायं, गुणै**र्ज्ञानादिभि**रधिकं, गुणत** इति ज्ञानादिगुणानाश्रित्य समाश्रित्य **समं वा** तुल्यम् 'उभयत्र आत्मन इति गम्यते, वा विकल्पे' तत**श्चैकोऽप्य**सहायी **पापानि** पापहेतून्यनुष्ठानानि **विवर्जयन् विहरेत्** संयमाध्वनि यायात्। **कामेषु** विषयेष्व**सजन्** प्रतिबन्धमकुर्वंस्तथा-विधगीतार्थयतिविषयं चैतद्, अन्यथैकाकिविहारस्यागमे निषिद्धत्वात् ॥५॥

दुःखस्य दुःखहेतूनां वा भावं दृष्टान्तेनाह—

जहा य अंडप्पभवा बलागा अंडं बलागप्पभवं जहा य।
एमेव मोहययणं खु तण्हं मोहं च तण्हाययणं वयंति ॥६॥

व्याख्या—यथा च येनैव प्रकारे**णाण्डप्रभवा बलाका**। पक्षिविशेषो**ऽण्डं बलाकाप्रभवं यथा च। एवमेवा**नेनैव प्रकारेण मोहोऽज्ञानमायतनमुत्पत्तिस्थानं यस्याः सा **मोहायतना ताम्** '**खुरेवार्थे**' **तृष्णां** 'वदन्तीति सम्बन्धः' **मोहं च तृष्णाऽऽयतनं वदन्ति**। तृष्णा हि सति वस्तुनि मूर्च्छा सा च रागप्रधाना ततस्तया राग उपलक्ष्यते। द्वेषोऽपि तस्मिन् सति सम्भवतीत्यनयैवाक्षिप्यते। ततस्तृष्णाऽऽक्षिप्तयो रागद्वेषयोरनन्तानु-बन्धिकषायरूपः सत्तायामवश्यम्भावी मिथ्यात्वोदयोऽत एवोपशान्तकषायवीतरागस्यापि मिथ्यात्वगमनम्। तत्र सिद्ध एवाज्ञानरूपो मोहः। एतेन च परस्परं हेतुहेतुमद्भावेन यथा रागादीनां सम्भवस्तथोक्तम् ॥६॥

यथैतेषां दुःखहेतुत्वं तथाऽऽह—

रागो य दोसो वि य कम्मबीयं कम्मं च मोहप्पभवं वयंति।
कम्मं च जाई-मरणस्स मूलं दुक्खं च जाई-मरणं वयंति ॥७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—रागश्च माया-लोभात्मकः, **द्वेषोऽपि च** क्रोध—मानात्मकः, कर्म ज्ञानावरणीयादि तस्य बीजं कारणं **कर्मबीजं, कर्म च** मोहात् प्रभवतीति **मोहप्रभवं** मोहकारणमं **वदन्ति 'चः** सर्वत्र समुच्चये' । **कर्म च** पुनर्जातयश्च मरणं च **जाति-मरणं तस्य मूलं** कारणं, **दुःखं च जाति-मरणं वदन्ति** । जाति-मरणस्यैवादितदुःखहेतुत्वात् । उक्तं हि—

> "[1]मरमाणस्स जं दुक्खं जायमाणस्स जंतुणो ।
> तेण दुक्खेण संतत्तो न सरइ जाइमप्पणो" ॥१॥ ॥७॥

अतः किं स्थितमित्याह—

दुक्खं हयं जस्स न होइ मोहो मोहो हओ जस्स न होइ तण्हा ।
तण्हा हया जस्स न होइ लोहो लोहो हओ जस्स न किंचणाइं ॥८॥

व्याख्या—दुःखं हतमिव **हतं** केन ? इत्याह—**यस्य न भवति मोह**स्तस्यैव तन्मूलकारणत्वाद्, **मोहो हतो यस्य न भवति तृष्णा,** कोऽर्थः ? तृण्याया अभावान्मोहाभावस्तदायतनत्वेन तस्याभिधानात् । **तृष्णा हता यस्य न भवति लोभः, लोभो हतो यस्य न किञ्चनानि** द्रव्याणि 'सन्तीति गम्यते' । सत्सु हि तेषु सम्भवत्यभिकाङ्क्षा तद्रूप एव हि लोभः । यत् तु तत्सद्भावेऽपि लोभहननं **भरता**दीनां तत्कादाचित्कत्वान्न विवक्षितमिति ॥८॥

दुःखहेतुमोहादीनामुन्मूलनोपायं प्रस्तावयितुमाह—

रागं च दोसं च तहेव मोहं उद्धत्तुकामेण समूलजालं ।
जे जे उवाया पडिवज्जियव्वा ते कित्तइस्सामि अहाणुपुव्विं ॥९॥

व्याख्या—रागं च द्वेषं च तथैव मोहमुद्धर्तुकामेनोन्मूलयितुमिच्छता सहमूलानामिव मूलानां मोहप्रकृतीनां जालेन समूहेन वर्तत इति **समूलजालस्तम्** । **ये ये उपाया**स्तदुद्धरणहेतवः **प्रतिपत्तव्या** अङ्गीकर्तव्या**स्तान् कीर्तयिष्याम्यानुपूर्व्या**ऽनुक्रमेण ॥९॥

तानेवाह—

रसा पगामं न निसेवियव्वा पायं रसा दित्तिकरा नराणं ।
दित्तं च कामा समभिद्दवंति दुमं जहा सादुफलं व पक्खी ॥१०॥

व्याख्या—रसाः क्षीरादिविकृतयः **प्रकामम**त्यर्थं च **निषेवितव्या** नोपभोक्तव्याः । प्रकामग्रहणं तु वातादिक्षोभोपशमाय रसाः सेव्याः, एवं निष्कारणसेवनस्य तु निषेध इति

---

१. म्रियमाणस्य यद् दुःखं जायमानस्य जन्तुनः ।
तेन दुःखेन सन्तप्तो न स्मरति जातिमात्मनः ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ख्यापनार्थम् । किमित्येवम् ? इत्याह—**प्रायो** बाहुल्येन रसाः 'निषेव्यमाणा इति गम्यते' दृप्तिर्धातूद्रेकस्तत्करणशीला **दृप्तिकरा नराणाम्** 'उपलक्षणात् स्त्र्यादीनां च' ते ह्युपभुक्तास्तेषामुदीरयन्ति मोहानलमित्युक्तं च—

"[१]विगईपरिणइधम्मो मोहो जमुदिज्जए उदिण्णे य ।
सुट्ठु वि चित्तजयपरो कहं अकज्जे ण वट्टिहिई" ? ॥१॥

एवं च को दोषः ? इत्याह—**दृप्तं** दर्पिष्ठं 'नरमिति प्रक्रमः, **चः** पुनरर्थे, जात्यपेक्षया एकवचनम्' **कामा** विषयाः **समभिद्रवन्ति** पराभवन्ति । तथाविधस्त्र्याद्यभिलषणीयत्वात् सुखाभिभवनीयत्वाच्चेति भावः । कमिव क इव ? इत्याह—**द्रुमं** वृक्षं **यथा स्वादुफलं** मधुरफलोपेतं '**वेति** भिन्नक्रमः' ततश्च **पक्षिण** इव । इह च द्रुमोपमः पुरुषादिः, स्वादुफलतातुल्यं च दृप्तत्वं, पक्षिसदृशाश्च कामा इति । अनेन रसप्रकामभोजने दोष उक्तः ॥१०॥

अथ सामान्येन प्रकामभोजने दोषमाह—

जहा दवग्गी पउरिंधणे वणे समारुओ नोवसमं उवेइ ।
एविंदियग्गी वि पगामभोइणो न बंभयारिस्स हियाय कस्सई ॥११॥

व्याख्या—यथा दवाग्निर्दवानलः प्रचुरेन्धने वने समारुतः सवायु**र्नोपशमं** विध्यात**मुपैति** प्राप्नोति । **एवमि**ति दवाग्निवन्नोपशमभाग् भवति 'इंदियग्गि'त्ति इन्द्रियशब्देनोन्द्रियजनितो राग एवोक्तस्तस्यैवानर्थहेतुत्वेनेह चिन्त्यमानत्वात् स एवाग्निरिव धर्मवनादहकत्वा**दिन्द्रियाग्निः** सो**ऽपि प्रकामभोजिनो**ऽतिमात्राहारस्य, प्रकामभोजनस्य पवनप्रायत्वेन तदुदीरकत्वात्, **न ब्रह्मचारिणो हिताय** ब्रह्मचर्यविघातकत्वेन **कस्यचिद**तिसुस्थितस्यापि, तदनेन प्रकामभोजनस्य परिहार्यत्वमुक्तम् ॥११॥

अथ रागमुद्धर्तुकामेन यदतियत्नेन कर्तव्यं तदाह—

विवित्तसिज्जासणजंतियाणं ओमासणाणं दमिइंदियाणं ।
न रागसत्तू धरिसेइ चित्तं पराइओ वाहिरिवोसहेहिं ॥१२॥

व्याख्या—विविक्ता स्त्र्यादिविकला शय्या वसतिस्तस्यामासनमवस्थानं तेन यन्त्रिता **विविक्तशय्यासनयन्त्रितास्तेषाम् । अवमाशनानां** न्यूनभोजनानां **दमितेन्द्रियाणां न** नैव रागः शत्रुरिवाभिभवहेतुत्वाद् **रागशत्रुर्घर्षयति** पराभवति **चित्तम्** । क इव ? **पराजितः**

---

१. विकृतिपरिणतिधर्मो मोहो यदुदीर्यते उदीर्णे च ।
सुष्ठ्वपि चित्तजयपरः कथमकार्ये न वर्तिष्यते ? ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पराभूतो **व्याधिरि**ति च कुष्ठादि**रौषधै**र्गडूच्यादिभिः 'देहमिति गम्यते' ॥१२॥

विविक्तशय्यादिविपर्यये दोषमाह—

जहा बिरालावसहस्स मूले न मूसगाणं वसही पसत्था ।
एमेव इत्थीनिलयस्स मज्झे न बंभयारिस्स खमो निवासो ॥१३॥

व्याख्या—यथा बिडालानां मार्जाराणामावसथ आश्रयो **बिडालावसथस्तस्य मूले** समीपे **मूषकाणां न वसतिः प्रशस्ता** शोभना । तत्रावश्यं तदपायसम्भवात् । **एवं स्त्रीणाम्** 'उपलक्षणात् पण्डकादीनां' **निलयो** निवास**स्तस्य मध्ये न ब्रह्मचारिणः क्षमो** युक्तो **निवासो**ऽवस्थानं तत्र ब्रह्मचर्यबाधासम्भवादिति भावः ॥१३॥

विविक्तशय्यादावपि कदाचित् स्त्रीणां सम्पाते यत् कृत्यं तदाह—

न रूव-लावन्न-विलास-हासं न जंपियं इंगिय वीहियं वा ।
इत्थीण चित्तंसि निवेसइत्ता दट्ठुं ववस्से समणे तवस्सी ॥१४॥

व्याख्या—न नैव रूपं, लावण्यं नयनाद्याह्लादको गुणः, विलासा विशिष्टवेष-रचनादयः, हासः कपोलविकासादिः 'एषां द्वन्द्वे' **रूप—लावण्य—विलास—हासम्, न जल्पितं** मन्मनोल्लापादि, **इङ्गितम**ङ्गभङ्गादि, **वीक्षितं** कटाक्षविक्षेपादि '**वा** समुच्चये' **स्त्रीणां** सम्बन्धि 'चित्तंसि' त्ति **चित्ते** मनसि **निवेश्या**हो ! सुन्दरमिदमिति विकल्पितं स्थापयित्वा **द्रष्टुमि**न्द्रियविषयतां नेतुं **व्यवस्येद**ध्यवस्येत् **श्रमणस्तपस्वी**ति ॥१४॥

किमित्येवम् ? इत्याह—

अदंसणं चेव अपत्थणं च अचिंतणं चेव अकित्तणं च ।
इत्थीजणस्सारियज्झाणजोग्गं हियं सया बंभवए रयाणं ॥१५॥

व्याख्या—अदर्शनमिन्द्रियाविषयीकरणम्, '**च**ः समुच्चये, **एवो**ऽवधारणे' **अप्रार्थनं चा**नभिलषणम्, **अचिन्तनं चैव** रूपाद्यपरिभावनम्, **अकीर्तनं चा**संशब्दनं नामतो गुणतो वा **स्त्रीजनस्यार्य**ध्यानं धर्मादि तस्य योग्यं तद्धेतुत्वेनोचित**मार्यध्यानयोग्यं हितं** पथ्यं **सदा ब्रह्मव्रते रताना**मासक्तानाम् ॥१५॥

ननु 'विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः' । तत् किं विविक्तशय्यादिभिरित्याशङ्क्याह—

कामं तु देवीहि वि भूसियाहिं न चाइया खोभइउं तिगुत्ता ।
तहा वि एगंतहियं ति नच्चा विवित्तवासो मुणिणं पसत्थे ॥१६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या–'**कामं** तु'त्ति **अनुमतमेवै**तत् यदुत 'देवीहिं वि'त्ति **देवीभिरप्य**प्सरोभिरपि 'आस्तां मानुषीभिरित्यपिशब्दार्थः' **भूषिताभि**रलङ्कृता**भिर्न** नैव 'चाइय'त्ति **शकिताः क्षोभयितुं** चालयितुं 'संयमादिति गम्यते' **तिसृभिर्म**नोगुप्त्यादिगुप्तिभि**र्गुप्ताः** 'अर्थान्मुनयः' । **तथापि** यद्यप्येवंविधाश्चालयितुं न शक्यन्ते, तद**प्येकान्तहितमेतदिति ज्ञात्वा** कोऽर्थः ? सम्भवन्ति हि केचिदभ्यस्तयोगिनोऽपि ये तत्सङ्गतः क्षुभ्यन्ति, येऽपि च न क्षुभ्यन्ति तेऽपि स्त्रीसंसक्तवसतिवासेऽवर्णवादादिदोषभाजो भवेयुः, इत्यादि परिभाव्य **विविक्तवासो** विविक्तशय्यासनात्मको **मुनीनां प्रशस्त** इत्यन्तर्भावितणिगर्थत्वात् प्रशंसितो गणधरादिभिरतः स एवाश्रयणीय इति भावः ॥१६॥

एतत्समर्थनार्थमेव स्त्रीणां दुरितक्रमत्वमाह–

मुक्खाभिकंखिस्स वि माणवस्स संसारभीरुस्स ठियस्स धम्मे ।
न तारिसं दुत्तरमत्थि लोए जह त्थीओ बालमणोहराओ ॥१७॥

व्याख्या–मोक्षाभिकाङ्क्षिणोऽपि मानवस्य, संसाराद् भयनशीलः भीरुः **संसारभीरुः** 'अपेरत्रापि सम्बन्धात्' **तस्यापि,** तथा **स्थितस्यापि** धर्मे **श्रुतधर्मादौ** । **न तादृशं दुस्तरं** दुरतिक्रम**मस्ति लोके यथा स्त्रियो बालमनोहरा** निर्विवेकचित्ताक्षेपिण्यो दुस्तरा, दुस्तरत्वे च बालमनोहरत्वं हेतुरतश्चातिदुस्तरत्वादासां त्याज्यत्वेन विविक्तशय्यासनमेव श्रेय इति भावः ॥१७॥

स्त्रीसङ्गातिक्रमे गुणमाह–

एए य संगे समइक्कमित्ता सुहुत्तरा चेव भवंति सेसा ।
जहा महासागरमुत्तरित्ता नई भवे अवि गंगासमाणा ॥१८॥

व्याख्या–एतांश्च सङ्गान् सम्बन्धान् स्त्रीविषयान् **समतिक्रम्यो**ल्लङ्घ्य **सुखोत्तराः** सुखोल्लङ्घ्या**श्चैव भवन्ति शेषा** द्रव्यादिसङ्गाः, सर्वसङ्गानां रागरूपत्वे समानेऽपि स्त्रीसङ्गानामेव तेषु प्राधान्यादिति भावः । दृष्टान्तमाह–**यथा महासागरं** स्वयम्भूरमण**मुत्तीर्य, नदी भवेत्** 'सुखोत्तरैवेति प्रक्रमः' वीर्यातिशययोगत इति भावः । **अपि गङ्गासमाने**ति गङ्गा किल महानदी तत्सदृशाऽप्यास्तामितरा क्षुद्रनदीत्यपिशब्दार्थः ॥१८॥

रागस्य दुःखहेतुत्वं दर्शयति–

कामाणुगिद्धिप्पभवं खु दुक्खं सव्वस्स लोगस्स सदेवगस्स ।
जं काइयं माणसियं च किंचि तस्संतगं गच्छइ वीयरागो ॥१९॥

व्याख्या–कामा विषयास्तेष्वनुगृद्धिः सतताभिकाङ्क्षा 'अनोः सातत्यार्थत्वात्'

तस्याः प्रभवो यस्य तत् कामानुगृद्धिप्रभवं 'खुरेवार्थे' **कामानुगृद्धिप्रभवमेव**, किं तद् ? **दुःखं, सर्वस्य लोकस्य** प्राणिगणस्य **सदेवकस्य** देवैः समन्वितस्य **यत् कायिकं** रागादि, **मानसिकं** चेष्टवियोगादिजन्यं **किञ्चित्** स्वल्पमपि **तस्य** द्विविधस्यापि दुःखस्यान्तमे**वान्तकं** पर्यन्तं **गच्छति वीतरागो** विगतकामानुगृद्धिरित्यर्थः ॥१९॥

ननु कामाः सुखरूपतयैवानुभूयन्ते तत् कथं कामानुगृद्धिप्रभवमेव दुःखं ? उच्यते—

जहा य किंपागफला मणोरमा रसेण वण्णेण य भुज्जमाणा ।
ते खुद्दए जीविय पच्चमाणा एउवमा कामगुणा विवागे ॥२०॥

व्याख्या—यथा च किम्पाको वृक्षविशेषस्त**त्फलानि** 'अपेर्गम्यत्वात्' **मनोरमा-ण्यपि रसेना**स्वादेन, **वर्णेन** रक्तादिना '**च**शब्दाद् गन्धादिना च' **भुज्यमानानि** 'ते' इति **तानि** प्रतीतानि, **क्षुद्रके** सोपक्रमे **जीविते** आयुषि **पच्यमानानि** विपाकावस्थाप्राप्तानि 'मरणान्तदुःखदायीनीति शेषः' 'लिङ्गव्यत्ययः प्राकृतत्वात्' **एतदुपमाः** किम्पाकफलतुल्याः **कामगुणा विपाके** फलप्रदानकाले । को भावः ? यथा किम्पाकफलानि भुज्यमानानि विपाके दुःखदानि, एवं कामगुणा अप्युपभुज्यमाना नरकादिदुःखदायिन इति ॥२०॥

रागस्यैव द्वेषसहितस्योद्धरणोपायमाह—

जे इंदियाणं विसया मणुन्ना न तेसु भावं निसिरे कयाइ ।
न यामणुन्नेसु मणं पि कुज्जा समाहिकामे समणे तवस्सी ॥२१॥

व्याख्या—ये इन्द्रियाणां चक्षुरादीनां **विषया** रूपादयो **मनोज्ञाः, न तेषु** विषयेषु **भावम**भिप्रायम् 'अपेर्गम्यत्वात्' भावमपि 'प्रस्तावादिन्द्रियाणि प्रवर्तयितुं' किं पुनस्तत्-प्रवर्तनामित्यपेरर्थः, **निसृजेत्** कुर्यात् **कदाचित्** । मनोज्ञविषयप्रवृत्तानां मनःप्रभृतीनां रागनिमित्तत्वात् । तथा **न च नैवामनोज्ञेषु मनोऽपि** 'अत्रापि इन्द्रियाणि प्रवर्तयितुम्' 'अपिशब्दार्थः प्राग्वत्' **कुर्याद**मनोज्ञविषयप्रवृत्तानामपि मनःप्रभृतीनां द्वेषनिमित्तत्वात् । तदनेन वाक्यद्वयेनापीन्द्रियदम उक्तः । **समाधिश्चि**त्तैकाग्र्यं स च राग-द्वेषाभाव एव **तत्कामो** राग-द्वेषोद्धरणाभिलाषी **श्रमणस्तपस्वी** ॥२१॥

अथ विषयेषु प्रवर्तने राग—द्वेषानुद्धरणे च प्रत्येकमिन्द्रियाणि प्रसङ्गतो मनश्चाश्रित्य दोषं दर्शयितुमाह—

चक्खुस्स रूवं गहणं वयंति तं रागहेउं तु मणुन्नमाहु ।
तं दोसहेउं अमणुन्नमाहु समो य जो तेसु स वीयरागो ॥२२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—चक्षुषो रूपं वर्णः संस्थानं च गृहतेऽनेनेति **ग्रहणमा**क्षेपकमित्यर्थो विशिष्टेन रूपेण चक्षुराक्षिप्यत इति तद् **वदन्ति** 'अर्हदादय इति गम्यते'। ततश्च **तद्** रूपं **रागहेतुं** 'तुः पूरणे' **मनोज्ञमाहुः**। तथा **तद्** रूपमेव **द्वेषहेतुममनोज्ञमाहुः**। ततश्च तयोश्चक्षुःप्रवर्तने राग-द्वेषसम्भवात् तदुद्धरणाऽशक्तिलक्षणो दोष इति भावः। सति रूपे कथं वीतरागः स्याद् ? इत्याह—**समश्चा**रक्त—द्विष्टतया तुल्यः पुनर्**यस्तयो**र्मनोज्ञेतररूपयोः **स वीतरागः**, तदविनाभावित्वाद् वीतद्वेषश्च। को भावः ? न तावच्चक्षुः तयोः प्रवर्तयेत्। कथञ्चित् प्रवर्तने समतामेवालम्बेतेति ॥२२॥

ननु यद्येवं रूपमेव राग—द्वेषजनकं ततस्तदुद्धरणार्थिनस्तद्गतैव चिन्ताऽस्तु, 'रूपे चक्षुर्न प्रवर्तयेत्' इत्येवं तु चक्षुश्चिन्ता कर्तुं न युक्तेत्याशङ्क्याह—

रूवस्स चक्खुं गहणं वयंति चक्खुस्स रूवं गहणं वयंति।
रागस्स हेउं समणुन्नमाहु दोसस्स हेउं अमणुन्नमाहु ॥२३॥

व्याख्या—रूपस्य चक्षुः गृह्णातीति **ग्रहणं वदन्ति**। तथा **चक्षुषो रूपं** गृह्यत इति **ग्रहणं** प्रागुक्तरीत्याऽऽक्षेपकं ग्राह्यं तद् **वदन्ति**। तदनेन रूप—चक्षुषोर्ग्राह्य—ग्राहकभाव उक्तः। तथा न ग्राहकं विना ग्राह्यत्वं नापि ग्राह्यं विना ग्राहकत्वमित्यनयोः परस्परमुप-कार्योपकारकभाव उक्तो भवति। ततो यथा रूपं राग—द्वेषकारणं तथा चक्षुरप्यत एवाह—**रागस्य हेतुं** 'प्रक्रमाच्चक्षुः' सह मनोज्ञेन ग्राह्येण रूपेण वर्तत इति [समनोज्ञं] **समनोज्ञ**रूपविषय**माहु**र्ब्रुवते, **द्वेषस्यामनोज्ञम**मनोज्ञरूपप्रवृत्त**माहु**रेवं रूप—चक्षुषोर्मिलि-तयोरेव राग—द्वेषजनकत्वात् तावुद्धर्तुकामो रूपे चक्षुर्न प्रवर्तयेदिति भावः ॥२३॥

रागानुद्धरणे दोषमाह—

रूवेसु जो गिद्धिमुवेइ तिव्वं अकालियं पावइ सो विणासं।
रागाउरे से जह वा पयंगे आलोयलोले समुवेइ मच्चुं ॥२४॥

व्याख्या—रूपेषु यो गृद्धिं गार्ध्यं रागमित्यर्थः। **उपैति तीव्रा**मुत्कटां, अकाले भव**मकालिकं** यथास्थित्यायुषोरर्वागेव **प्राप्नोति स विनाशम्**। रागेणातुरो **रागातुरः** सन् **स** इति लोकप्रतीतो **यथा वे**ति 'वाशब्दस्येवार्थत्वाद् यथैव **पतङ्गः** शलभ आलोकः **स्निग्धदीपशिखादिदर्शनं** तस्मिन् लोलो लम्पट **आलोकलोलः समुपैति मृत्युं** तस्यापि ह्यालोकलोलत्वं राग एवेति भावः ॥२४॥

द्वेषानुद्धरणे दोषमाह—

जे यावि दोसं समुवेइ निच्चं तंसि क्खणे से उ उवेइ दुक्खं।
दुद्दंतदोसेण सएण जंतू न किंचि रूवं अवरज्झई से ॥२५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—**यश्चापि द्वेषं** दोषं **समुपैति** समुपगच्छति 'रूपेष्विति प्रक्रमः' **नित्यं** 'तंसि'त्ति **तस्मिन् क्षणे** प्रस्तावे यस्मिन् द्वेष उत्पन्नः, **स 'तुः पूरणे' उपैति दुःखं** हा ! मया किमिदं दृष्टम् ? इति मानसम्, तज्जं शारीरादि च । इत्थं तर्हि रूपस्यैव दुःख-हेतुत्वम्, तद्दर्शन एव द्वेषसम्भवादित्याशङ्क्याह—दुष्टं दमनं दुर्दान्तं तच्च 'प्रक्रमाच्चक्षुः' तदेव दोषो **दुर्दान्तदोषः तेन स्वकीयेन जन्तुः** प्राणी 'दुःखमुपैतीति उक्तमेव' । **न किञ्चिद**ल्पमपि **रूपं** 'प्रक्रमादमनोज्ञम् **अपराध्यति** दुष्यति 'से' **तस्य** । यदि हि रूपमेवापराध्येत न कस्यचिद् दोषाभावः स्यात्, तथा च मुक्त्यभावादयो दोषा इति भावः ॥२५॥

द्वेषस्य रागहेतुत्वादनर्थमूलत्वं दर्शयंस्तत्त्यागमाह—

एगंतरत्तो रुइरंसि रूवे अयालिसे से कुणई पओसं ।
दुक्खस्स संपीलमुवेइ बाले नालिप्पई तेण मुणी विरागे ॥२६॥

व्याख्या—**एकान्तरक्तो** यो **रुचिरे** मनोहरे **रूपेऽतादृशे**ऽन्यादृशेऽरुचिरे रूपे **स करोति प्रद्वेषम्** । तथा **दुःखस्य सम्पीडं** सङ्घातं **समुपैति बालो**ऽज्ञः । व्यतिरेकमाह—**न लिप्यते** श्लिष्यते **तेन** द्वेषकृतदुःखेन **मुनिर्विरागो** रागरहितस्तस्यैव तन्मूलहेतुत्वादिति भावः ॥२६॥

सम्प्रति रागस्यैव हिंसाद्याश्रवहेतुतामिहैव च तद्द्वारेण दुःखजनकत्वमाह—

रूवाणुगासाणुगए य जीवे चराचरे हिंसइ णेगरूवे ।
चित्तेहि तं परितावेइ बाले पीलेइ अत्तट्ठ गुरू किलिट्ठे ॥२७॥

व्याख्या—रूपं 'प्रस्तावान्मनोज्ञं' अनुगच्छतीति रूपानुगा, सा चासावाशा च **रूपानुगाशा** रूपविषयोऽभिलाष इत्यर्थः । **तदनुगतश्च** प्राणी **जीवांश्चराचरांस्त्र**स-स्थावरान् **हिनस्ति** विनाशय**त्यनेकरूपान्** जात्यादिभेदतः । कांश्चित् तु **विचित्रै**रनेकप्रकारैः 'स्व-परकायशस्त्रादिभिरुपायैरिति गम्यते' तमिति 'सुब्व्यत्ययात्' **तान्** चराचरान् **परितापयति** दुःखयति **बालो** विवेकविकलः परांश्च **पीडयत्ये**कदेशदुःखोत्पादने**नात्मार्थं गुरुश्च** प्रयोजननिष्ठः **क्लिष्टो** रागबाधितः ॥२७॥

अन्यच्च—

रूवाणुवाएण परिग्गहेण उप्पायणे रक्खणसंनिओगे ।
वए विओगे य कहं सुहं से संभोगकाले य अतित्तिलाभे ॥२८॥

व्याख्या—रूपेऽनुपातोऽनुगमनमनुराग इत्यर्थो **रूपानुपातस्तेन**, तथा **परिग्रहेण** मूर्छात्मकेन

हेतुना, **उत्पादने** उपार्जने, रक्षणं चापायनिवारणं संनियोगश्च स्व–परप्रयोजनेषु सम्यग्व्यापारणं ततो द्वन्द्वे **रक्षणसन्नियोगं तस्मिन्**। 'वए'त्ति **व्यये** विनाशे, **वियोगे** विरहे, 'सर्वत्र रूपस्येति प्रक्रमः' **क्व सुखं** ? न क्वचित्, किन्तु सर्वत्र दुःखमेवेति भावः । 'से' **तस्य** जन्तोः । रूपमूर्च्छितो हि सुरूपकरि–तुरग–कलत्रादीनामुत्पादनाद्यर्थं क्लेशहेतुषूपायेषु प्रवर्तमानः दुःखमेवानुभवतीति भावः । सम्भोगकाले रूपस्य सुखं भविष्यतीत्याशङ्क्याह–**सम्भोगकाले** **चो**पभोगप्रस्तावे**ऽतृप्तिलाभः** । कोऽभिप्रायः ? बहुधाऽपि रूपदर्शने रागिणां न तृप्तिरस्ति । यतोऽन्यैरप्युक्तम्–

"न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते" ॥१॥

तस्मिन् सति क्व सुखम् ? इत्युत्तरेच्छया हि परिखिद्यत एव रूपानुरागीति ॥२८॥

अपि च–

रूवे अतित्ते य परिग्गहंमि सत्तोवसत्तो न उवेइ तुट्ठिं ।
अतुट्ठिदोसेण दुही परस्स लोभाविले आययई अदत्तं ॥२९॥

व्याख्या–रूपेऽतृप्तश्च परिग्रहे च तद्विषयमूर्च्छात्मके, सक्तः सामान्येनैवासक्तिमान्, उपसक्तश्च गाढमासक्तस्ततः पूर्वं सक्तः पश्चादुपसक्तः **सक्तोपसक्तो नोपैति** नोपगच्छति तुष्टिं सन्तोषम् । तथा चातुष्टिरेव दोषो**ऽतुष्टिदोषस्तेन दुःखी,** यदि ममेदमिदं च रूपवद् वस्तु स्यादित्याकाङ्क्षातोऽतिदुःखवान् । किं कुर्याद् ? इत्याह–**परस्य** सम्बन्धि 'रूपवद् वस्त्विति गम्यते' **लोभाविलो** लोभकलुष **आदत्ते** गृह्णा**त्यदत्त**मिति । यद्वा परस्य स्वं **परस्वं** तत्र **लोभाविलः** सन्**नादत्तेऽदत्त**मनिसृष्टं 'परकीयमेव रूपवद् वस्तित्वति गम्यम्' ॥२९॥

पुनर्दोषान्तरमाह–

तण्हाभिभूयस्स अदत्तहारिणो रूवे अतित्तस्स परिग्गहे य ।
मायामुसं वड्ढइ लोभदोसा तत्थावि दुक्खा न विमुच्चई से ॥३०॥

व्याख्या–तृष्णाभिभूतस्य लोभपराजितस्य । तत एवादत्तं हरति गृह्णातीत्येवंशीलो**ऽदत्तहारी तस्य** । तथा **रूपे** रूपविषये यः **परिग्रहस्तस्मिन्नतृप्तस्य च** तत्रासन्तुष्टस्य। मायाप्रधानं 'मोसं'ति मृषाऽलीकभाषणं **मायामृषा वर्धते** । कुतः ? इत्याह–**लोभदोषाल्लो**भापराधात् । लुब्धो हि परस्वमादाय तद्रक्षणपरो मायामृषां वक्ति । **तत्रापि** मृषाभाषणेऽपि **दुःखान्न विमुच्यते स** किन्तु दुःखभागेव स्यादिति भावः ॥३०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

दुःखाविमुक्तिमेव भावयति—

मोसस्स पच्छा य पुरत्थओ य पओगकाले य दुही दुरंते ।
एवं अदत्ताणि समाययंतो रूवे अतित्तो दुहिओ अणिस्सो ॥३१॥

व्याख्या—मृषाया अनृतभाषणस्य **पश्चादिदं** मया न सुसंस्थापितमुक्तमिति पश्चात्तापतः । **पुरस्ताच्च** कथं वञ्चनीयोऽयं मयेति चिन्तयाऽऽकुलत्वेन । **प्रयोगकाले** चानृतभाषणप्रस्तावे च नासौ ममालीकभाषितां लक्षयति ? इति क्षोभतः । **दुःखी** सन्, तथा दुष्टोऽन्तः पर्यवसानमिहानेकविडम्बनातोऽमुत्र नरकादिप्राप्त्या यस्यासौ **दुरन्तो** 'भवति जन्तुरिति गम्यते' । उपसंहरति—**एवमदत्तानि समाददानो रूपेष्वतृप्तः** सन् **दुःखितो** भवति। कीदृशः ? **अनिश्रो** दोषवत्तया सर्वोपेक्षणीयत्वात् कस्यचिदवष्टम्भेन रहितः 'मैथुनाश्रवोपलक्षणं चैतत्' ॥३१॥

निगमयितुमाह—

रूवाणुरत्तस्स नरस्स एवं कत्तो सुहं हुज्ज कयाइ किंचि ।
तत्थोवभोगे वि किलेसदुक्खं निव्वत्तई जस्स कए ण दुक्खं ॥३२॥

व्याख्या—रूपानुरक्तस्य नरस्यैवं प्रागुक्तसूत्रप्रकारेण **कुतः सुखं भवेत् कदाचित् किञ्चित्** ? सदा दुःखमेवेति भावः । यत**स्तत्र** रूपानुरागे **उपभोगेऽपि क्लेशदुःखम**तृप्ति-लाभतालक्षणबाधाजनितमसातम् । उपभोगमेव विशेषयति—**निर्वर्तयत्यु**त्पादयति **यस्ये**त्युप-भोगस्य **कृते 'णेत्यलङ्कारे' दुःखं** प्रयासलक्षणं कृच्छ्रम् 'आत्मन इति गम्यम्' । उपभोगार्थं हि जन्तुः क्लिश्यति यदुत तत्र मे सुखं स्यादिति । यदि तु तदापि दुःखं तदा कुतोऽन्यदा सुखसम्भवः ? इति भावः ॥३२॥

इत्थं रागस्यानर्थहेतुतामभिधाय द्वेषस्यापि तामतिदेष्टुमाह—

एमेव रूवंमि गओ पओसं उवेइ दुक्खोहपरंपराओ ।
पदुट्ठचित्तो य चिणेई कम्मं जं से पुणो होइ दुहं विवागे ॥३३॥

व्याख्या—एवमेव यथाऽनुरक्तस्तथैव **रूपे गतः प्रद्वेषमुपैति** 'इहैवेति शेषः' **दुःखौघो** दुःखसमूहस्त**स्य परम्परा** उत्तरोत्तरदुःखसमूहरूपाः । तथा **प्रदुष्टं** प्रकर्षेण द्विष्टं **चित्तं** यस्य स तथाविधश्च **चिनोति** बध्नाति **कर्म**, तच्छुभमपि सम्भवत्यत आह—**यत्** **'से' तस्य पुनर्भवति दुःखं** दुःखहेतु**र्विपाके**ऽनुभवकाले, इह परत्र चेति भावः । पुनर्दुःखग्रहणमैहिकदुःखपेक्षमिति ॥३३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

राग-द्वेषोद्धरणे गुणमाह—

रूवे विरत्तो मणुओ विसोगे एएण दुक्खोहपरंपरेण ।
न लिप्पए भवमज्झे वि संतो जलेण वा पुक्खरिणीपलासं ॥३४॥

व्याख्या—रूपे विरक्तः 'उपलक्षणादद्विष्टश्च' **मनुजो** मनुष्यो **विशोकः** शोकरहितः संस्तन्निबन्धनयो राग-द्वेषयोरभावादेतेनानन्तरोक्तेन 'दुक्खोहपरम्परेणेति' दुःखानामोघाः सङ्घातास्तेषां परम्परा सन्ततिर्दुः**खौघपरम्परा तया न लिप्यते** न स्पृश्यते **भवमध्येऽपि सन्** तिष्ठन्नित्यर्थः । दृष्टान्तमाह—**जलेनेव** 'वाशब्दस्योपमार्थत्वात्' **पुष्करिणीपलाशं** पद्मिनीपत्रं 'जलमध्येऽपि सदिति शेषः' । इत्थं चक्षुराश्रित्य त्रयोदश सूत्राणि व्याख्यातानि ॥३४॥

श्रोत्रमाश्रित्य तान्याह—

सोयस्स सद्दं गहणं वयंति तं रागहेउं तु मणुन्नमाहु ।
तं दोसहेउं अमणुन्नमाहु समो य जो तेसु स वीयरागो ॥३५॥

व्याख्या—श्रोत्रस्य श्रोत्रेन्द्रियस्य शब्द्यत इति **शब्दो ग्रहणमा**क्षेपकं **वदन्ति** । ततश्च **तं** शब्दं **मनोज्ञं** काकलीगीतादि **रागहेतुमाहुः । तममनोज्ञं** खर-कर्कशादि **द्वेषहेतुमाहुः । समश्चा**रक्त-द्विष्टतया तुल्यो **मनोज्ञेतरशब्दयोः स वीतरागो** वीतद्वेषश्च ॥३५॥

सद्दस्स सोयं गहणं वयंति सोयस्स सद्दं गहणं वयंति ।
रागस्स हेउं समणुन्नमाहु दोसस्स हेउं अमणुन्नमाहु ॥३६॥

व्याख्या—शब्दस्य श्रोत्रं गृह्णातीति **ग्रहणं** ग्राहकं **वदन्ति । श्रोत्रस्य शब्दं** गृह्यत इति **ग्रहणं** ग्राह्यं **वदन्ति** । तदनेन शब्द—श्रोत्रयोर्ग्राह्य—ग्राहकभाव उक्तोऽत एवाह—**रागस्य हेतुं** श्रोत्रं **समनोज्ञं** मनोज्ञशब्दविषय**माहुः । द्वेषस्यामनोज्ञशब्दविषयं** हेतु**माहु**र्ब्रुवते ॥३६॥

रागानुद्धरणे दोषमाह—

सद्देसु जो गिद्धिमुवेइ तिव्वं अकालियं पावइ से विणासं ।
रागाउरे हरिणमिए व्व मुद्धे सद्दे अतित्ते समुवेइ मच्चुं ॥३७॥

व्याख्या—शब्देषु यो गृद्धिं रागमित्यर्थः । **तीव्रामुपैति सोऽकालिकमा**युषो-ऽर्वागेव **प्राप्नोति विनाशम् । रागातुरः** सन् स 'हरिणमिए व्व'त्ति हरिणः प्रसिद्धो मृगः सर्वोऽपि पशुरुच्यते । हरिणश्चासौ मृगश्च **हरिणमृग इव मुग्धोऽज्ञः शब्दे** गौरीगीतात्मके-**ऽतृप्त**स्तदाकृष्टचित्ततया **मृत्युमुपैति** ॥३७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

द्वेषानुद्धरणे दोषमाह—

जे यावि दोसं समुवेइ निच्चं तंसि क्खणे से उ उवेइ दुक्खं ।
दुद्दंतदोसेण सएण जंतू न किंचि सद्दो अवरज्झई से ॥३८॥

व्याख्या—**यश्चापि द्वेषं समुपैति** शब्देषु **नित्यं तस्मिन् क्षणे स दुःखं** शारीराद्युपैति । इत्थं तर्हि शब्द एव दोष हेतुरित्याशङ्क्याह—'दुद्दंत'त्ति दुर्दान्तं श्रोत्रं तदेव दोषो **दुर्दान्तदोषस्तेन स्वकीयेन जन्तुः प्राणी, न किञ्चिद**मनोज्ञ**शब्दोऽपराध्यति** दुष्यति 'से' **तस्य** ॥३८॥

द्वेषस्यानर्थमूलत्वात् तमाह—

एगंतरत्तो रुइरंसि सद्दे अतालिसे से कुणई पओसं ।
दुक्खस्स संपीडमुवेइ बाले न लिप्पई तेण मुणी विरागो ॥३९॥

व्याख्या—**एकान्तरक्तो** यो **रुचिरे** मनोहरे **शब्दे** । **अतादृशे**ऽरुचिरे **स करोति प्रद्वेषम्**। तथा **दुःखस्य संपीडं** सङ्घातं **समुपैति बालो**ऽज्ञः, **न लिप्यते तेन** द्वेषेण **मुनिर्विरागो** नीरागः ॥३९॥

रागस्यैव हिंसाद्याश्रवहेतुत्वमाह—

सद्दाणुयासाणुगए य जीवे चराचरे हिंसइ णेगरूवे ।
चित्तेहि तं परितावेइ बाले पीलेइ अत्तट्ठ गुरू किलिट्ठे ॥४०॥

व्याख्या—**शब्दानुगा आशा** शब्दविषयोऽभिलाष इत्यर्थः । **तदनुगतश्च** प्राणी **जीवांश्चराचरान्** त्रस—स्थावरान् **हिनस्त्यनेकरूपान्**। कांश्चित् **चित्रैरनेक**प्रकारैरुपायैः **परितापयति** दुःखयति **बालो**ऽपरांश्च **पीडयत्यात्मार्थं गुरुः** स्वकार्यनिष्ठः **क्लिष्टो** रागवान् ॥४०॥

अन्यच्च—

सद्दाणुवाएण परिग्गहेण उप्पायणे रक्खण-संनिओगे ।
वए विओगे य कहं सुहं से संभोगकाले य अतित्तिलाभे ॥४१॥

व्याख्या—शब्दानुपातः **शब्दानुरागस्तेन** तथा **परिग्रहेण** मूर्च्छात्मकेन, **उत्पादने** उपार्जने, रक्षणं चापायनिवारणं सन्नियोगश्च सम्यग् व्यापारणं **रक्षण-सन्नियोगस्तस्मिन्,** 'वए'त्ति **व्यये** विनाशे, **वियोगे,** 'अर्थाच्छब्दस्य' **क्व सुखं** ? 'से' **तस्य** जन्तोः **सम्भोगकालेऽतृप्तिलाभः** शब्दश्रवणे रागिणां न तृप्तिरिति भावः ॥४१॥

अपि च—

सद्दे अतित्ते य परिग्गहंमि सत्तोवसत्तो न उवेइ तुट्ठिं ।
अतुट्ठिदोसेण दुही परस्स लोभाविले आययई अदत्तं ॥४२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या–शब्देऽतृप्तः, परिग्रहे च सक्तः सामान्येन, **उपसक्तश्च** गाढमासक्तो **नोपैति तुष्टिं** सन्तोषम् । **अतुष्टिदोषेण दुःखी** स्यात् । **परस्य** सम्बन्धि शब्दवद् वस्तु वादित्रादि **लोभाविलो** लोभकलुष **आदत्ते** गृह्णात्यदत्तमिति ॥४२॥

तण्हाऽभिभूयस्स अदत्तहारिणो सद्दे अतित्तस्स परिग्गहे य ।
मायामुसं वड्ढइ लोभदोसा तत्थावि दुक्खा न विमुच्चई से ॥४३॥

व्याख्या–तृष्णाभिभूतस्य अदत्तहारिणः शब्दे शब्दविषये यः **परिग्रहस्तस्मिन्नतृप्तस्य च** 'मायामुसं' **मायामृषा वर्धते लोभदोषात्** । **तत्रापि** मायामृषाभाषणे **दुःखान्न विमुच्यते स** इति ॥४३॥

मोसस्स पच्छा य पुरत्थओ य पओगकाले य दुही दुरंते ।
एवं अदत्ताणि समाययंतो सद्दे अतित्तो दुहिओ अणिस्सो ॥४४॥

व्याख्या–मृषाया अलीकभाषणस्य, **पश्चादिदं** मया न सुसंस्थापितमुक्तमिति पश्चात्तापात्, **पुरस्ताच्च** कथमयं वञ्चनीयो मयेति, **प्रयोगकाले च** नासौ ममालीकभाषितां लक्षयतीति । **दुरन्तो** नरकादिप्राप्त्या भवति जन्तुर्**दुःखी । एवमदत्तान्याददानः शब्देष्वतृप्तः** सन् **दुःखितो भवति** । कीदृक् ? **अनिश्रः** सर्वेषामुपेक्षणीयः ॥४४॥

निगमयन्नाह–

सद्दाणुरत्तस्स नरस्स एवं कत्तो सुहं हुज्ज कयाइ किंचि ? ।
तत्थोवभोगे वि किलेसदुक्खं निव्वत्तई जस्स कए ण दुक्खं ॥४५॥

व्याख्या–शब्दानुरक्तस्य नरस्यैवं कुतः सुखं कदाचित् किञ्चित् **भवेत्** ? । **तत्र** शब्दो**पभोगेऽपि क्लेशदुःखं । निर्वर्तय**त्युत्पादयति **यस्ये**त्युपभोगस्य **कृते दुःखम्** 'आत्मन इति गम्यम्' ॥४५॥

अथ द्वेषस्यानर्थहेतुतामाह–

एमेव सद्दंमि गओ पओसं उवेइ दुक्खोहपरंपराओ ।
पदुट्ठचित्तो य चिणेइ कम्मं जं से पुणो होइ दुहं विवागे ॥४६॥

व्याख्या–एवमेव यथाऽनुरक्तस्तथैव गतः **शब्दे प्रद्वेषमुपैति दुःखौघपरम्पराः** दुःखसमूहम् । तथा **प्रद्विष्टचित्तश्चिनोति** बध्नाति **कर्म** यत् **'से' तस्य पुनर्भवति दुःखं विपाके**ऽनुभवकाले इह परत्र चेति भावः ॥४६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

राग-द्वेषोद्धरणे गुणमाह—

सद्दे विरत्तो मणुओ विसोगो एएण दुक्खोहपरंपरेण ।
न लिप्पए भवमज्झे वि संतो जलेण वा पुक्खरिणीपलासं ॥४७॥

व्याख्या—शब्दे विरक्तः 'उपलक्षणादद्विष्टश्च' **मनुजो** मनुष्यो **विशोकः** शोकरहितः सन् **एतेन दुःखौघपरम्परेण न लिप्यते** न स्पृश्यते **भवमध्येऽपि सन्** तिष्ठन्नित्यर्थः । दृष्टान्तमाह—**जलेनेव पुष्करिणीपलाशं** पद्मिनीपत्रं 'जलमध्येऽपि सदिति शेषः' ॥४७॥ इति त्रयोदश सूत्राणि शब्दाभिलापेन लेशतो रूपवद् व्याख्यातानि ॥

घ्राणेन्द्रियमाश्रित्याह—

घाणस्स गंधं गहणं वयंति तं रागहेउं तु मणुन्नमाहु ।
तं दोसहेउं अमणुन्नमाहु समो य जो तेसु स वीयरागो ॥४८॥

व्याख्या—घ्राणस्य घ्राणेन्द्रियस्य **गन्धं ग्रहणमा**क्षेपकं **वदन्ति** । ततश्च **तं** गन्धं **मनोज्ञं** कर्पूरादि, **अमनोज्ञं** लशुनादि । **मनोज्ञेतरगन्धयोर्यः समस्तुल्यः स वीतरागो** वीतद्वेषश्च ॥४८॥

गंधस्स घाणं गहणं वयंति घाणस्स गंधं गहणं वयंति ।
रागस्स हेउं समणुण्णमाहु दोसस्स हेउं अमणुन्नमाहु ॥४९॥

व्याख्या—गन्धस्य घ्राणं गृह्णातीति **ग्रहणं** ग्राहकं **वदन्ति** । **घ्राणस्य गन्धं** गृह्यते इति **ग्रहणं** ग्राह्यं **वदन्ति** । तदनेन घ्राण—गन्धयोर्ग्राह्यग्राहकभाव उक्तोऽत एवाह—**रागस्य हेतुं** घ्राणं **समनोज्ञं** मनोज्ञ—गन्धविषय**माहुः । द्वेषस्यामनोज्ञ**ममनोज्ञगन्धविषयं **हेतुमाहु**र्ब्रुवते ॥४९॥

रागानुद्धरणे दोषमाह—

गंधस्स जो गिद्धिमुवेइ तिव्वं अकालियं पावइ से विणासं ।
रागाउरे ओसहिगंधगिद्धे सप्पे बिलाओ विव निक्खमंतो ॥५०॥

व्याख्या—गन्धेषु यो गृद्धिं रागमित्यर्थः । **तीव्रामुपैति** सो**ऽकालिकमा**युषोऽर्वागेव **प्राप्नोति विनाशं । रागातुरः** सन् ओषध्यो नागदमन्यादिकास्तासां गन्धस्तत्र गृद्धो गृद्धि-**मानोषधिगन्धगृद्धः** सन् । 'सप्पे बिलाओ विव'त्ति 'इवशब्दस्य भिन्नक्रमत्वात्' **सर्प इव बिलान्निष्क्रामन्,** स ह्यत्यन्ततत्प्रियतया तद्गन्धं सोढुमशक्नुवन् बिलादभिनिष्क्रामतीति भावः ॥५०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

द्वेषानुद्धरणे दोषमाह—

जे आवि दोसं समुवेइ निच्चं तंसि क्खणे से उ उवेइ दुक्खं ।
दुद्दंतदोसेण सएण जंतू न किंचि गंधो अवरज्झई से ॥५१॥

व्याख्या—यश्चापि द्वेषं समुपैति गन्धेषु **नित्यं** 'तंसि क्खणे'त्ति **तस्मिन् क्षणे स दुःखं** शारीराद्युपैति । इत्थं तर्हि गन्ध एव दोषहेतुरित्याशङ्क्याह—दुर्दान्तं घ्राणं तदेव दोषो **दुर्दान्तदोषस्तेन स्वकीयेन जन्तुः** प्राणी । **न किञ्चिदमनोज्ञो गन्धोऽपराध्यति** दुष्यति 'से' **तस्य** ॥५१॥

द्वेषस्यानर्थमूलत्वात् त्यागमाह—

एगंतरत्तो रुइरंसि गंधे अतालिसे से कुणई पओसं ।
दुक्खस्स संपीडमुवेइ बाले न लिप्पई तेण मुणी विरागो ॥५२॥

व्याख्या—एकान्तरक्तो यो **रुचिरे** मनोहरे **गन्धे, अतादृशे** अन्यादृशे अरुचिरे गन्धे **स करोति प्रद्वेषं,** तथा **दुःखस्य संपीडं** सङ्घातं **समुपैति बालोऽज्ञः । न लिप्यते तेन** द्वेषकृतदुःखेन **मुनिर्विरागो** नीरागः ॥५२॥

रागस्यैव हिंसाद्याश्रवहेतुत्वमाह—

गंधाणुयासाणुगए य जीवे चराचरे हिंसइ णेगरूवे ।
चित्तेहि तं परितावेइ बाले पीलेइ अत्तट्ठ गुरू किलिट्ठे ॥५३॥

व्याख्या—गन्धानुगाऽऽशा गन्धविषयोऽभिलाष इत्यर्थः । **तदनुगतश्च जीवांश्च-राचरान्** त्रस—स्थावरान् हिनस्त्यनेकरूपान् । कांश्चित् तु **चित्रैरनेकप्रकारैरुपायैः परितापयति** दुःखयति **बालोऽपरांश्च पीडयत्यात्मार्थं गुरुः** स्वकार्यनिष्ठः **क्लिष्टो** रागवान् ॥५३॥

अन्यच्च—

गंधाणुवाएण परिग्गहेण उप्पायणे रक्खण-संनिओगे ।
वए विओगे य कहं सुहं से संभोगकाले य अतित्तिलाभे ॥५४॥

व्याख्या—गन्धानुपातो गन्धानुरागस्तेन तथा **परिग्रहेण** मूर्च्छात्मकेन, **उत्पादने** उपार्जने, रक्षणं चापायनिवारणं सन्नियोगश्च सम्यग् व्यापारणं **रक्षण—सन्नियोगस्तस्मिन्,** 'वए'त्ति **व्यये** विनाशे, **वियोगे,** 'अर्थाद् गन्धस्य', **क्व सुखं ? 'से' तस्य** जन्तोः **सम्भोगकालेऽतृप्तलाभः,** गन्धग्रहणे रागिणां न तृप्तिरिति भावः ॥५४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अपि च—

गंधे अतित्ते य परिग्गहंमि सत्तोवसत्तो न उवेइ तुट्ठिं ।
अतुट्ठिदोसेण दुही परस्स लोभाविले आययई अदत्तं ॥५५॥

व्याख्या—गन्धे अतृप्तः परिग्रहे च सक्तः सामान्येन, **उपसक्तश्च** गाढमासक्तो **नोपैति तुष्टिं** सन्तोषम् । **अतुष्टिदोषेण दुःखी** स्यात् । **परस्य** सम्बन्धि गन्धवद्वस्तु कर्पूरादि **लोभाविलो** लोभकलुष **आदत्ते** गृह्णात्यदत्तमिति ॥५५॥

तण्हाऽभिभूयस्स अदत्तहारिणो गंधे अतित्तस्स परिग्गहे य ।
मायामुसं वड्ढइ लोभदोसा तथावि दुक्खा न विमोक्खई से ॥५६॥

व्याख्या—तृष्णाभिभूतस्य अदत्तहारिणो गन्धे गन्धविषये यः **परिग्रहस्त-स्मिन्नतृप्तस्य च** 'मायामोसं' **मायामृषा वर्धते लोभदोषात् । तत्रापि** मायामृषाभाषणे **दुःखान्न विमुच्यते स** इति ॥५६॥

मोसस्स पच्छा य पुरत्थओ य पओगकाले य दुही दुरंते ।
एवं अदत्ताणि समाययंतो गंधे अतित्तो दुहिओ अणिस्सो ॥५७॥

व्याख्या—मृषाया अलीकभाषणस्य, **पश्चादिदं** मया न सुसंस्थापितमुक्तमिति पश्चात्तापात्, **पुरस्ताच्च** कथमयं वञ्चनीयो मयेति, **प्रयोगकाले च** नासौ ममालीकभाषितां लक्षयतीति, **दुरन्तो** नरकादिप्राप्त्या भवति जन्तु**र्दुःखी । एवमदत्तान्याददानो गन्धेष्वतृप्तः** सन् **दुःखितो** भवति । कीदृक् ? **अनिश्रः** सर्वेषामुपेक्षणीयः ॥५७॥

निगमयन्नाह—

गंधाणुरत्तस्स नरस्स एवं कत्तो सुहं हुज्ज कयाइ किंचि ? ।
तत्थोवभोगे वि किलेसदुक्खं निव्वत्तई जस्स कए ण दुक्खं ॥५८॥

व्याख्या—गन्धानुरक्तस्य नरस्यैवं कुतः सुखं कदाचित् किञ्चित् भवेत् ? । तत्र गन्धोपभोगेऽपि क्लेशदुःखं । निर्वर्तत्युत्पादयति **यस्येत्यु**पभोगस्य **कृते दुःखम्** 'आत्मन इति गम्यम्' ॥५८॥

अथ द्वेषस्यानर्थहेतुतामाह—

एमेव गंधंमि गओ पओसं उवेइ दुक्खोहपरंपराओ ।
पदुट्ठचित्तो य चिणेइ कम्मं जं से पुणो होइ दुहं विवागे ॥५९॥

व्याख्या—एवमेव यथाऽनुरक्तस्तथैव **गतो गन्धे प्रद्वेषमुपैति दुःखौघपरम्पराः**

दुःखसमूहम् । तथा **प्रद्विष्टचित्तश्च चिनोति** बध्नाति **कर्म यत्** 'से' **तस्य पुनर्भवति दुःखं विपाके**ऽनुभवकाले इह परत्र चेति भावः ॥५९॥

राग-द्वेषोद्धरणे गुणमाह—

गंधे विरत्तो मणुओ विसोगो एएण दुक्खोहपरंपरेण ।
न लिप्पए भवमज्झे वि संतो जलेण वा पुक्खरिणीपलासं ॥६०॥

व्याख्या—गन्धे विरक्तः 'उपलक्षणादद्विष्टश्च' **मनुजो** मनुष्यो **विशोकः** शोकरहितः सन् । **एतेन दुःखौघपरम्परेण न लिप्यते** न स्पृश्यते **भवमध्येऽपि सन्** तिष्ठन्नित्यर्थः । दृष्टान्तमाह—**जलेनेव पुष्करिणीपलाशं** पद्मिनीपत्रं 'जलमध्ये सदिति शेषः' ॥६०॥ इति त्रयोदश सूत्राणि गन्धाभिलापेन लेशतो व्याख्यातानि ॥

अथ रसनेन्द्रियमाश्रित्याह—

जिहाए रसं गहणं वयंति तं रागहेउं तु मणुन्नमाहु ।
तं दोसहेउं अमणुन्नमाहु समो य जो तेसु स वीयरागो ॥६१॥

रसस्स जिहा गहणं वयंति जिब्भाए रसं गहणं वयंति ।
तं रागहेउं समणुन्नमाहु दोसस्स हेउं अमणुन्नमाहु ॥६२॥

रसस्स जो गिद्धिमुवेइ तिव्वं अकालियं पावइ से विणासं ।
रागाउरे बिडिसविभिन्नकाए मच्छे जहा आमिसभोगगिद्धे ॥६३॥

जे आवि दोसं समुवेइ निच्चं तंसि क्खणे से उ उवेइ दुक्खं ।
दुद्दंतदोसेण सएण जंतू रसं न किंची अवरज्झई से ॥६४॥

एगंतरत्तो रुइरे रसंमि अतालिसे से कुणई पओसं ।
दुक्खस्स संपीडमुवेइ बाले न लिप्पई तेण मुणी विरागो ॥६५॥

रसाणुयासाणुगए य जीवे चराचरे हिंसइ णेगरूवे ।
चित्तेहिं तं परितावेइ बाले पीलेइ अत्तट्ठ गुरू किलिट्ठे ॥६६॥

रसाणुवाएण परिग्गहेण उप्पायणे रक्खण-संनिओगे ।
वए विओगे य कहं सुहं से संभोगकाले य अतित्तिलाभे ॥६७॥

रसे अतित्ते य परिग्गहंमि सत्तोवसत्तो न उवेइ तुट्ठिं ।
अतुट्ठिदोसेण दुही परस्स लोभाविले आययई अदत्तं ॥६८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तण्हाऽभिभूयस्स अदत्तहारिणो रसे अतित्तस्स परिग्गहे य ।
मायामुसं वड्ढइ लोभदोसा तत्थावि दुक्खा न विमोक्खई से ॥६९॥

मोसस्स पच्छा य पुरत्थओ य पओगकाले य दुही दुरंते ।
एवं अदत्ताणि समाययंतो रसे अतित्तो दुहिओ अणिस्सो ॥७०॥

रसाणुरत्तस्स नरस्स एवं कत्तो सुहं हुज्ज कयाइ किंचि ? ।
तत्थोवभोगे वि किलेसदुक्खं निव्वत्तई जस्स कए ण दुक्खं ॥७१॥

एमेव रसंमि गओ पओसं उवेइ दुक्खोहपरंपराओ ।
पदुट्ठचित्तो य चिणेइ कम्मं जं से पुणो होइ दुहं विवागे ॥७२॥

रसे विरत्तो मणुओ विसोगो एएण दुक्खोहपरंपरेण ।
न लिप्पए भवमज्झे वि संतो जलेण वा पुक्खरिणीपलासं ॥७३॥

व्याख्या—एतान्यपि त्रयोदश सूत्राणि गन्धवद् रसाभिलापेन व्याख्येयानि । नवरं **जिह्वाया** जिह्वेन्द्रियस्य रस्यते आस्वाद्यते इति **रसस्तं मनोज्ञं** मधुरादिक**ममनोज्ञं** कटुकादि ॥ तथा बिडिशं प्रान्तन्यस्तामिषो लोहकीलकस्तेन विभिन्नकायो विदारिताङ्गो **बिडिशविभिन्नकायो मत्स्यो यथा**ऽऽमिषस्य मांसादेर्भोगोऽभ्यवहारस्तत्र गृद्ध **आमिष-भोगगृद्धः** ॥६१-७३॥

अथ स्पर्शनेन्द्रियमाश्रित्याह—

कायस्स फासं गहणं वयंति तं रागहेउं तु मणुन्नमाहु ।
तं दोसहेउं अमणुन्नमाहु समो य जो तेसु स वीयरागो ॥७४॥

फासस्स कायं गहणं वयंति कायस्स फासं गहणं वयंति ।
रागस्स हेउं समणुन्नमाहु दोसस्स हेउं अमणुन्नमाहु ॥७५॥

फासस्स जो गिद्धिमुवेइ तिव्वं अकालियं पावइ से विणासं ।
रागाउरे सीयजलावसन्ने गाहग्गहीए महिसे व रन्ने ॥७६॥

जे आवि दोसं समुवेइ निच्चं तंसि क्खणे से उ उवेइ दुक्खं ।
दुद्दंतदोसेण सएण जंतू न किंचि फासं अवरज्झई से ॥७७॥

एगंतरत्तो रुइरंसि फासे अतालिसे से कुणई पओसं ।
दुक्खस्स संपीडमुवेइ बाले न लिप्पई तेण मुणी विरागो ॥७८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

फासाणुगासाणुगए य जीवे चराचरे हिंसइ णेगरूवे ।
चित्तेहिं तं परितावेइ बाले पीलेइ अत्तट्ठ गुरू किलिट्ठे ॥७९॥

फासाणुवाएण परिग्गहेण उप्पायणे रक्खण-संनिओगे ।
वए विओगे य कहं सुहं से संभोगकाले य अतित्तिलाभे ॥८०॥

फासे अतित्ते य परिग्गहंमि सत्तोवसत्तो न उवेइ तुट्ठिं ।
अतुट्ठिदोसेण दुही परस्स लोभाविले आययई अदत्तं ॥८१॥

तण्हाऽभिभूयस्स अदत्तहारिणो फासे अतित्तस्स परिग्गहे य ।
मायामुसं वड्ढइ लोभदोसा तत्थावि दुक्खा न विमोक्खई से ॥८२॥

मोसस्स पच्छा य पुरत्थओ य पओगकाले अ दुही दुरंते ।
एवं अदत्ताणि समाययंतो फासे अतित्तो दुहिओ अणिस्सो ॥८३॥

फासाणुरत्तस्स नरस्स एवं कत्तो सुहं हुज्ज कयाइ किंचि ? ।
तत्थोवभोगे वि किलेसदुक्खं निव्वत्तई जस्स कए न दुक्खं ॥८४॥

एमेव फासंमि गओ पओसं उवेइ दुक्खोहपरंपराओ ।
पदुट्ठचित्तो य चिणेइ कम्मं जं से पुणो होइ दुहं विवागे ॥८५॥

फासे विरत्तो मणुओ विसोगो एएण दुक्खोहपरंपरेण ।
न लिप्पए भवमज्झे वि संतो जलेण वा पुक्खरिणीपलासं ॥८६॥

व्याख्या—एतान्यपि त्रयोदश सूत्राणि स्पर्शाभिलापेन व्याख्येयानि पूर्ववत् । काय इह स्पर्शनेन्द्रियम्, सर्वाङ्गगतत्वख्यापनार्थं चास्यैवमुक्तं तस्य **कायस्य** । स्पृशत इति **स्पर्शस्तं मनोज्ञं** मृदुप्रभृति**ममनोज्ञं** कर्कशादि ॥ तथा शीतं शीतस्पर्शवज्जलं तत्राव-सन्नोऽवमग्नः **शीतजलावसन्नो ग्राहै**र्जलचरविशेषै**र्गृहीतः** क्रोडीकृतो **महिष इवारण्ये,** ग्रामादौ हि कदाचित् केनचिन्मोच्येतापीत्यरण्यग्रहणम् ॥७४-८६॥

मन आश्रित्याह—

मणस्स भावं गहणं वयंति तं रागहेउं तु मणुन्नमाहु ।
तं दोसहेउं अमणुन्नमाहु समो य जो तेसु स वीयरागो ॥८७॥

भावस्स मणं गहणं वयंति मणस्स भावं गहणं वयंति ।
रागस्स हेउं समणुन्नमाहु दोसस्स हेउं अमणुन्नमाहु ॥८८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भावस्स जो गिद्धिमुवेइ तिव्वं अकालियं पावइ से विणासं ।
रागाउरे कामगुणेसु गिद्धे करेणुमग्गावहिए व नागे ॥८९॥
जे यावि दोसं समुवेइ निच्चं तंसि क्खणे से उ उवेइ दुक्खं ।
दुद्दंतदोसेण सएण जंतू न किंचि भावं अवरज्झई से ॥९०॥
एगंतरत्तो रुइरंसि भावे अतालिसे से कुणई पओसं ।
दुक्खस्स संपीडमुवेइ बाले न लिप्पई तेण मुणी विरागो ॥९१॥
भावाणुगासाणुगए य जीवे चराचरे हिंसइ णेगरूवे ।
चित्तेहि तं परितावेइ बाले पीलेइ अत्तट्ठ गुरू किलिट्ठे ॥९२॥
भावाणुवाएण परिग्गहेण उप्पायणे रक्खण-संनिओगे ।
वए विओगे य कहं सुहं से संभोगकाले य अतित्तिलाभे ॥९३॥
भावे अतित्ते य परिग्गहंमि सत्तोवसत्तो न उवेइ तुट्ठिं ।
अतुट्ठिदोसेण दुही परस्स लोभाविले आययई अदत्तं ॥९४॥
तण्हाऽभिभूयस्स अदत्तहारिणो भावे अतित्तस्स परिग्गहे य ।
मायामुसं वड्ढइ लोभदोसा तत्थावि दुक्खा न विमोक्खई से ॥९५॥
मोसस्स पच्छा य पुरत्थओ य पओगकाले य दुही दुरंते ।
एवं अदत्ताणि समाययंतो भावे अतित्तो दुहिओ अणिस्सो ॥९६॥
भावाणुरत्तस्स नरस्स एवं कत्तो सुहं हुज्ज कयाइ किंचि ? ।
तत्थोवभोगे वि किलेसदुक्खं निव्वत्तई जस्स कए ण दुक्खं ॥९७॥
एमेव भावंमि गओ पओसं उवेइ दुक्खोहपरंपराओ ।
पदुट्ठचित्तो य चिणेइ कम्मं जं से पुणो होइ दुहं विवागो ॥९८॥
भावे विरत्तो मणुओ विसोगो एएण दुक्खोहपरंपरेण ।
न लिप्पई भवमज्झे वि संतो जलेण वा पुक्खरिणीपलासं ॥९९॥

व्याख्या—एतदपि सूत्रत्रयोदशकं भावाभिलापेन रूपवद् व्याख्येयम्, नवरं **मनसश्चे**तसो **भावो**ऽभिप्रायः स चेह स्मृतिगोचरस्तं **ग्रहणं** ग्राह्यं वदन्तीन्द्रियाविषयत्वात् तस्य, **मनोज्ञं** मनोज्ञरूपादिविषय**ममनोज्ञं** तद्विपरीतविषयमेव ॥ **कामगुणेषु** मनोज्ञरूपादिषु

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

गृद्ध आसक्तः 'करेणुमग्गावहिए व नागे'त्ति करेण्वा करिण्या हस्तिन्या मार्गेण निजपथेनापहृत आकृष्टः **करेणुमार्गापहृतो नाग इव** हस्तीव । स हि मदान्धोऽदूरवर्तिनीं करिणीमुपदर्श्य तद्रूपादिमोहितस्तन्मार्गानुगामितया च गृह्यते सङ्ग्रामादिषु च विनाशमाप्नोतीति । ननु चक्षुरादीन्द्रियवशादेव गजस्य प्रवृत्तिस्तत् कथमस्यात्र भावविषये दृष्टान्तत्वेनाभिधानम् ? उच्यते, एवमेतत्, मनःप्राधान्यविवक्षया तन्नेयम्, अथवा तथाविधकामदशायां चक्षुरादीन्द्रियव्यापाराभावेऽपि मनसः प्रवृत्तिरिति न दोषः । कामस्य मनस एवोत्पादादिति भावः ॥८७-९९॥

उक्तमेवार्थमुपसंहरन्नाह—

एविंदियत्था य मणस्स अत्था दुक्खस्स हेऊ मणुयस्स रागिणो ।
ते चेव थोवं पि कयाइ दुक्खं न वीयरागस्स करेंति किंचि ॥१००॥

व्याख्या—एवमुक्तन्यायेने**न्द्रियार्थाश्च**क्षुरादिविषया रूपादयः 'चशब्दो भिन्नक्रमः' ततो **मनसोऽर्थाश्च**स्मृत्यादिभावाः 'उपलक्षणादिन्द्रियाणि मनांसि च' **दुःखस्य हेतवो मनुजस्य रागिणः** 'उपलक्षणत्वाद् द्वेषिणश्च' । **ते चैवे**न्द्रिय—मनोऽर्थाः **स्तोकमपि कदाचिद् दुःखं न वीतरागस्य** विगतराग—द्वेषस्य **कुर्वन्ति किञ्चि**दिति शारीरं मानसं वेति ॥ अथात्रार्थे दृष्टान्तः—

जितेन्द्रियो वीतरागो यो नैव विषयोन्मुखः ।
अश्नुतेऽसौ सदा सौख्यं यथा स **जिनपालकः** ॥१॥

यश्चेन्द्रियवशो रागानुविद्धो विषयार्दितः ।
आस्पदं विपदामेष स्याद् यथा **जिनरक्षितः** ॥२॥

तथाहि—

अङ्गेष्वस्ति पुरी **चम्पा** प्रत्नरत्नकृतालया ।
नापेक्षते दशाकर्षं जनता यत्र निश्यपि ॥३॥

माकन्दः कमलापिक्या माकन्दीत्याख्ययाऽजनि ।
आश्रितानां रमाकन्दः सार्थवाहः पुराग्रणीः ॥४॥

लक्ष्म्या निःपुण्यतोपाधिकतां चपलतामसौ ।
पुण्यपुण्यस्थिरश्रीको धनर्द्धिर्व्यपाकरोत् ॥५॥

अभूतां द्वौ सुतौ तस्य रूपिणावर्कजाविव ।
जिनपालित इत्याद्यः परस्तु **जिनरक्षितः** ॥६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

गत्वैकादशकृत्वस्तौ पयोधिं वाहनस्थितौ ।
समर्ज्य धनमायातौ निरुपद्रवमालयम् ॥७॥
पुष्यत्तृष्णातिरेकेण पोतारूढौ पुनर्गतौ ।
भग्नपोतौ तटं लब्धफलकावम्बुधेः श्रितौ ॥८॥
ततः प्राविशतां द्वीपं रत्नद्वीपमिमौ क्रमात् ।
रत्नाङ्कूरप्रभाचक्रप्रकाशितकुतूहलम् ॥९॥
चतुर्वनयुतस्तत्र घटितो रत्नराशिभिः ।
अभ्रलग्नः प्रभापुञ्ज इवास्ते देवतालयः ॥१०॥
उवास सततं तत्र **रत्नद्वीपा**धिदेवता ।
साहसैकनिधिः पापाद् दुष्टान्तःकरणाङ्गिषु ॥११॥
प्राणवृत्तिं विधायैतौ पयोभिः सरसैः फलैः ।
तददूरमहीदेसे सन्निविष्टौ शिलातले ॥१२॥
क्व तद् गृहं क्व सा लक्ष्मीः क्व स तातः क्व सा प्रसूः ।
सर्वैरेकपदे धात्रा पापादावां वियोजितौ ॥१३॥
इति चिन्तापरौ यावत् तत्रास्थातामिमौ क्षणम् ।
तावत् सा देवता व्योम्नि प्रादुर्भूयेत्यभाषत ॥१४॥
रे ! भुञ्जेथां मया भोगान् प्रासादेऽमुत्र मामके ।
असिना कर्तयिष्यामि युवयोरन्यथा शिरः ॥१५॥
मदानुकूल्योद्यतयोर्दुर्लभा वां न सम्पदः ।
कुर्वतोः प्रातिकूल्यं मां ध्रुवा विपद एव हि ॥१६॥
ये सम्प्राप्य **मणिद्वीप**मेतन्मामवजानते ।
निषेधयन्ति दण्डेन विशन्तीं ते गृहे रमाम् ॥१७॥
तस्य बिभीत्सरूपेण विचोभिरतिकर्कशैः ।
भीताभ्यां तद्वचोऽमानि रोगिभिर्वैद्यवागिव ॥१८॥
उत्क्षिप्य सा ततोऽनैषीदन्तःप्रासादमाशु तौ ।
अहार्षीच्च तयोः शक्त्या शरीराशुभपुद्गलान् ॥१९॥
अभुङ्क्त विपुलान् भोगांस्ताभ्यामेषा निरन्तरम् ।
वनामृतफलैर्नित्यानुरक्ता तावतर्पयत् ॥२०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कियत्यपि गते काले तावित्यभिहितौ तया ।
सुस्थितं लवणाधीशं शक्रोऽद्येदं समादिशत् ॥२१॥
शोध्योऽब्धिरित्यतस्तेन तथा कार्यं मया सह ।
एकविंशतिमाक्रम्यो वारानेषोऽतिशुद्धये ॥२२॥
तृणावकर–पत्रौघ–काष्ठादि निखिलं ततः ।
आहत्य तत्तटे क्षेप्यमस्मदादियुजाऽमुना ॥२३॥
विधाय तदिदं यावदहमत्रैमि हे प्रियौ ! ।
भवन्तौ तावदत्रैव प्रासादे तिष्ठतां मुदा ॥२४॥
कदाचिदरतौ कान्तौ ! यियासायां बहिर्युवाम् ।
यातमौदीच्य-पौरस्त्य-प्रातीच्योद्यानपङ्क्तिषु ॥२५॥
एकैकस्मिन् वने तत्र मनोहरमृतुद्वयम् ।
अस्ति सर्वर्तुकं शर्मानुभवेतं तदनन्तराम् ॥२६॥
आपाच्ये तु न गन्तव्यं वने कथमपि प्रियौ ! ।
अवश्यं तत्र गतयोर्विनिपातो भविष्यति ॥२७॥
इत्थं सा तौ दृढीकृत्य जगामाम्भोधिशुद्धये ।
क्षणं स्थित्वा वनं प्राच्यं जग्मतुश्च दिदृक्षया ॥२८॥
उद्भिन्नकन्दलां तत्र फुल्लत्केतकजातिकाम् ।
सरसां प्रावृष्टं वीक्ष्य प्रमोदं चित्रमापतुः ॥२९॥
शरदीव रवेरिन्दोर्जलस्यापि प्रसन्नताम् ।
सरांसि फुल्लपद्मानि वीक्षाते तत्र विस्मितौ ॥३०॥
ऋतुद्वयसमायोगजनितां तां वनश्रियम् ।
वीक्ष्यौत्तराऽपि सा दृश्येत्ययातां तत्र तावथ ॥३१॥
दृष्ट्वा शीतयवस्तम्बान् कान्दमाघ्राय सौरभम् ।
हेमन्त-शिशिरप्राप्यं तत्रानन्दमवापताम् ॥३२॥
प्रातीच्ये कानने चूतमञ्जर्यामोदमोदिनः ।
निरीक्ष्यास्मरतां भृङ्गान् वियोगार्ते स्ववल्लभे ॥३३॥
तत्रोपभुज्य पक्वाम्रफलानि दयिताकुचैः ।
तुल्यानि सुरभिग्रीष्मलीलामकुरुतां क्षणम् ॥३४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तादृक्कुतूहलाक्षेपाद् विस्मृते तन्निवारणे ।
आपाच्येऽविशतां यावदुद्याने रभसैव तौ ॥३५॥

तावत् प्राप्यातिदुर्गन्धिमभिभूतौ पुरोगतौ ।
तत्राकर्णयतां दीनं कस्यचित् करुणस्वरम् ॥३६॥

किञ्चित् तदनुसारेण व्रजन्तः प्रेतभूमिगम् ।
शूलाऽऽरोपितमालोक्य क्रन्दन्तं नरमाहतुः ॥३७॥

कस्त्वं कथमिहायातः शूलायां कथमर्पितः ? ।
अस्थिभिः किमसौ पृथ्वी च्छन्ना दुर्गन्धभूरिभिः ? ॥३८॥

केनेदमतिरौद्रेण देवेनाधिष्ठितं पदम् ? ।
अस्माच्चित्तेऽतिभीस्तस्मात् सर्वं सद्यो निवेद्यताम् ॥३९॥

आख्यत् सगद्गदं सोऽथ **काकन्दी**तोऽहमम्बुधौ ।
निर्भिन्नवहनो लब्धफलकोऽत्रागमं क्रमात् ॥४०॥

एतद्देवतया भोगा मया भुक्ताश्च रक्तया ।
अन्यदाऽऽगसि तुच्छेऽपि शूलायां मामसौ न्यधात् ॥४१॥

एवमेवानयाऽन्येऽपि नैकेऽमार्यन्त दुष्टया ।
तेषामस्थ्नामियं श्रेणिरत्र श्वभ्रनिभे पदे ॥४२॥

आवाभ्यां न भवान् दृष्टस्तत्प्रासादे कदाचन ।
तत्कालरोपित इव शूलायां लक्ष्यसे कथम् ? ॥४३॥

तयोर्वच इति श्रुत्वा सोऽवग् ननु दुराशया ।
नैकानि भोगवेश्मानि कुरुतेऽथ हरत्यपि ॥४४॥

कैश्चिद् यथेच्छं रमते कदाचित् क्वचिदप्यसौ ।
विश्वासघातनिरता हन्यात् कांश्चिदपि क्षणात् ॥४५॥

ताभ्यां ततोऽतिभीताभ्यां तत्पुरोऽकथि हा ! कथम् ? ।
सङ्कटे पतितावावां भविता नावपीदृशम् ॥४६॥

त्वं तु कर्मवशान्मित्र ! प्राप्तः प्राणान्तिकीं दशाम् ।
यदि वेत्सि ततो ब्रूहि निस्तारोपायमावयोः ॥४७॥

ततोऽसौ प्राह नन्वस्या वेशे ये पतिता जनाः ।
तेषां न क्लेशतो मोक्षो हिंसकानामिवाङ्गिनाम् ॥४८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तथापि शृणुतं प्राच्योद्याने दुःस्थितवत्सलः ।
रूपवान् **शैलको** यक्षो नित्यमास्ते क्षमानिधिः ॥४९॥

चतुर्दश्यादिपर्वाहिष्वसावुद्घोषत्यदः ।
यस्तार्यः प्रतिपाल्यो वा स द्राग् मामुपतिष्ठताम् ॥५०॥

युवाभ्यामपि तद् वाच्यमावां तारय पालय ।
स तद् वां वचनं श्रुत्वा सर्वं स्वास्थ्यं करिष्यति ॥५१॥

गृद्धेन वा प्रमूढेन नानुष्ठितमदो मया ।
भवद्भ्यां पुनरुद्यम्य स सेव्यः सौख्यकाङ्क्षया ॥५२॥

तद्वागमृतमापीय गत्वा तस्मिन्नुभावपि ।
स्नात्वा पवित्रौ पद्मानि लात्वाऽऽनर्चतुराशु तम् ॥५३॥

भक्त्या नत्वा मुदा स्तुत्वा विनीतौ पर्युपासताम् ।
तदानीमन्यदा तादृग् वचः श्रुत्वेत्यवोचताम् ॥५४॥

तार्यौ पाल्यौ जनावेतावाशु तारय पालय ।
त्वां विनाऽन्यो न नौ प्रार्थ्यः शरणं चेह सम्प्रति ॥५५॥

यक्षेणोचे करोम्येतत् पृष्टिमारोप्य वामहम् ।
तारयामि महाम्भोधिं प्रापयामि स्यात् पुरीम् ॥५६॥

किन्तु मत्पृष्टिमारूढौ युवां दृष्ट्वा दुराशया ।
प्रतिकूलानुकूलैः सा निश्चितं क्षोभयिष्यति ॥५७॥

मनागपि मनोरागं यदि तस्यां धरिष्यथः ।
पृष्ठतः पातयित्वा वां ततः क्षेप्ताऽहमम्बुधौ ॥५८॥

उपेक्ष्य सर्वथा चेत् तां द्रक्ष्यथो न मनागपि ।
ततो नयामि निर्विघ्नमभीप्सितपदं युवाम् ॥५९॥

अथैतावूचतुर्नम्रौ भवद्भिर्बभणे यथा ।
तथैवावां करिष्यावः स्वार्थभ्रंशं करोति कः ? ॥६०॥

विकृत्याऽऽश्वं ततो रूपं पृष्टावारोप्य नीरधौ ।
यक्षश्चचाल वेगेन यावत् तन्मध्यमागमत् ॥६१॥

तावत् संशोध्य सा वार्धिं जगाम निजमाश्रयम् ।
सम्भ्रान्ता तावपश्यन्ती प्रायुङ्क्त च रुषाऽवधिम् ॥६२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तत्र तौ वीक्ष्य सर्वाङ्गमाश्लिष्टा रोषरक्षसा ।
तदुपान्तमथागत्य साक्षेपमिदमब्रवीत् ।।६३।।

रे रे ! मां प्रोज्झय चलितौ **शैलकेन** दुरात्मना ।
विदितं न किमद्यापि मुग्धौ ! वां चरितं मम ? ।।६४।।

अरे ! त्यक्त्वैनमद्यापि पुनर्मां श्रयतं द्रुतम् ।
मत्कृपाणदशाकर्षे मा यातं भोः ! पतङ्गताम् ।।६५।।

रे ! मार्गं शरणं गत्वा व्याघ्रीतो मुच्यते कथम् ? ।
सवाताभिपतद्वह्नेर्नाधितृण्यं छुटिर्भवेत् ।।६६।।

क्षमा क्रष्टुमहं जन्तुं रे ! कृतान्तमुखादपि ।
शैलकं शरणं कृत्वा निर्भीकाविव किं युवाम् ? ।।६७।।

इत्येवं निष्ठुरोक्त्याऽपि भीतौ यावदमू न हि ।
ततः क्षोभयितुं वाक्यैरनुकूलैरुपाक्रमत् ।।६८।।

हंहो ! वां निष्ठुरं चेतः कठिनं शैलतोऽपि हि ।
यदेवं त्यज्यते भावानुरक्तो लीलया जनः ।।६९।।

सम्भावितो युवाभ्यां चेदपराधोऽस्ति कश्चन ।
वाच्योऽयमन्यथा त्यागः कथं निर्हेतुकः कृतः ? ।।७०।।

सस्नेहमधुरालापान् सरसक्रीडितानि च ।
विस्मार्यैकपदे कान्तौ ! त्यक्त्वा मां चलितौ हहा ! ।।७१।।

कान्तौ ! प्रसद्य दुर्वारमाराग्निकवलीकृतम् ।
सद्यः शमयतं मेऽङ्गं सङ्गशीतलवारिणा ।।७२।।

एवं कृतेऽपि संरम्भे तयोरक्षुभ्यतोरसौ ।
प्रयुज्यावधिमज्ञासीत् सुक्षोभ्यो **जिनरक्षितः** ।।७३।।

तमुद्दिश्य ततोऽभाणीत् त्वमेवाभूर्मम प्रियः ।
त्वयैव सह सद्भावरतिसौख्यं ममाजनि ।।७४।।

स्वभावेनाविदग्धात्मा न प्रियो **जिनपालितः** ।
प्रागप्यभून्ममानेन न हि सद्भावजा रतिः ।।७५।।

न मे प्रतिवचो दत्ते यद्यसौ मा ददातु तत् ।
नेदं प्रिय ! तव न्याय्यं प्राणादप्यधिकस्य मे ।।७६।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पाल्येन प्रतिपन्नस्य यदि युष्मादृशामपि ।
न प्रयत्नस्तदा नूनममर्यादमिदं जगत् ॥७७॥

त्वद्विप्रयोगनैदाघतापान्मे हृदयावनिः ।
समाधिनीरशोषेण स्फुटतीव स्फुटं प्रिय ! ॥७८॥

अथैषा कौसुमीं वृष्टिं पुष्टां कृत्वाऽधितच्छिरः ।
श्रावयन्ती श्रवःशर्मकारिणो भूषणारवान् ॥७९॥

ससम्भ्रमं सनिर्वेदं भूयोऽभाणीत् स्खलद्गिरा ।
जिनरक्षित ! हा नाथ ! व्रजन् मे पाहि जीवितम् ॥८०॥

किमिदं निष्ठुरं वक्षस्तव दैवेन निर्ममे ? ।
आज्ञाकारी जनः प्राणान् सन्त्यजन् यदुपेक्ष्यते ॥८१॥

प्राणान(द)तिविशिष्टोऽसौ त्वादृशश्चेत् प्रियो जनः ।
त्यक्त्वा चचाल पर्याप्तं प्राणितेनामुना ततः ॥८२॥

प्रत्यागच्छैकदा गेहमपराद्धं च यन्मया ।
तत् क्षमस्व न वै प्रीतौ वैरस्यं कुरुते ततः ॥८३॥

तवालापपरीरम्भसम्पदः सन्तु दूरतः ।
दृष्टेऽप्यहं तवास्याब्जे भवाम्युज्जीवितेव भोः ! ॥८४॥

पश्य पश्यैकदा तावत् परावृत्त्य मुखाम्बुजम् ।
दर्शनामृतपानेन तप्तां मां सुखिनीं कुरु ॥८५॥

एवं स्पष्टीकृतस्नेहं सुविदग्धं मनोहरम् ।
प्रम्लानमदनाङ्कूरपुनरुज्जीवनाम्बुदम् ॥८६॥

अन्तःकपटसंटङ्कं बहिर्माधुर्यबन्धुरम् ।
तदाकर्ण्य वचस्तस्या अलङ्काररवानपि ॥८७॥

आघ्राय सौरभं पौष्पं चान्दनं तद्वपुर्गतम् ।
स्मृत्वा च क्रीडितं पूर्वं ग्राम्यवन्मूढमानसः ॥८८॥

विस्मृत्य सकालं शूलाऽऽरोपितस्य हितं वचः ।
स्वयं दृष्टान्तितदुःखान्यविमर्श्य शयालुवत् ॥८९॥

विगणय्य क्षणाच्छिक्षां **शैलकेन** स्फुटीकृताम् ।
व्यालुलोकेऽभितत् कामविद्धो द्राग् **जिनरक्षितः** ॥९०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इन्द्रियाणामहो ! कश्चिद् विकारो वचनातिगः ।
यद्वशश्चिन्तयेन्नैव भाव्यपायपरम्पराम् ॥९१॥

शैलकस्तं तथा ज्ञात्वा निजपृष्ठाद् व्यधूनयत् ।
पतन्तं तं त्रिशूलेन सा प्रत्यैच्छद् दुरात्मिका ॥९२॥

रे रे ! मृतोऽधुना यासि कुत्र त्राणं गवेषय ।
मत्त्यागफलमादत्स्व निर्वदन्तीति निष्ठुरम् ॥९३॥

उल्लाल्य गगने प्रोच्चैर्गृहीत्वा निशितासिना ।
रसन्तं खण्डशः कृत्वा भूतेभ्यो बलिमक्षिपत् ॥९४॥

हृष्टयाऽथ तया ज्येष्ठ उपासृज्यत नैकधा ।
तथैव तं परं न चाक्षुभद् वायुरिवाचलम् ॥९५॥

श्रान्ता प्रत्यगमत् क्षुद्रदेवताऽथ स्वमाश्रयम् ।
शैलकोऽपि च तं **चम्पा**मनय**ज्जिनपालितम्** ॥९६॥

मातापित्रोः सुताध्वानं नित्यं संवीक्ष्यमाणयोः ।
मिलितो जगदे **जिनरक्षितो**दन्तमप्ययम् ॥९७॥

तत्प्रेतकर्मणि कृते पितृभिः सोऽप्यशोचनः ।
क्रमशोऽन्योऽन्यनिर्बाधं पुरुषार्थानसाधयत् ॥९८॥

श्री**वीर**वदनाद् धर्मं श्रुत्वा वैराग्यरञ्जितः ।
प्रव्रज्यैकादशाङ्गज्ञः **सौधर्मे** त्रिदशोऽभवत् ॥९९॥

च्युत्वा पूर्णायुरुत्पद्य **विदेहे**षु शुभे कुले ।
अङ्गीकृतव्रतः सिद्धिं याता स **जिनपालितः** ॥१००॥

यत् सम्पत्पात्रमाद्योऽभूत् कष्टवांश्च कनिष्ठकः ।
जिताजितान्यवैह्यत्र हृषीकाण्येव कारणम् ॥१०१॥

लाभार्थौ वणिजौ सुखैकमनसौ जीवाः भवो नीरधि-
र्देवी चाविरतिर्निबन्धनमसत् सर्वेन्द्रियोत्थापदाम् ।
शूलास्थः पुरुषो हितावहगुरुः यक्षेशपृष्टिर्व्रतं,
स्थैर्यं च क्रमवृद्धि शर्म समयादित्यन्वयः साध्यताम् ॥१०२॥

॥ इति इन्द्रियफले कथा ॥१००॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

किञ्च—

न कामभोगा समयं उवेंति न यावि भोगा विगइं उविंति ।
जे तप्पओसी य परिग्गही य सो तेसु मोहा विगइं उवेइ ॥१०१॥

व्याख्या—न नैव **कामभोगाः समतां** राग-द्वेषाभावरूपा**मुपयात्यु**पगच्छन्ति 'हेतुत्वेनेति गम्यम्' तद्धेतुत्वे हि तेषां न कश्चिद् राग—द्वेषवान् स्याद् । **न चापि भोगाः** शब्दादयो भुज्यमानतया **विकृतिं** क्रोधादिरूपाम् 'इहापि हेतुत्वेन [इति गम्यम्]' **उपयान्ति,** अन्यथा न कश्चिद् रागद्वेषरहितः स्यात् । तर्हि कोऽनयोर्हेतुरित्याह—**यस्तत्प्रदोषी च** तेष्वपि विषयेषु प्रद्वेषवान्, **परिग्रही च** परिग्रहबुद्धिमांस्तेष्वेव रागीत्युक्तं भवति **स तेषु** विषयेषु **मोहाद्** रागा-द्वेषात्मकान्मोहनीयाद् **विकृतिमुपैति** । राग-द्वेषरहितस्तु समतामित्यर्थादुक्तमिति ॥१०१॥

किंस्वरूपा विकृतिः ? या राग—द्वेषवशादुपैतीत्याह—

कोहं च माणं तहेव मायं लोभं दुगुंछं अरइं रइं च ।
हासं भयं सोग-पुमित्थिवेयं नपुंसवेयं विविहे य भावे ॥१०२॥

आवज्जई एवमणेगरूवे एवंविहे कामगुणेसु सत्तो ।
अन्ने य एयप्पभवे विसेसे कारुण्णदीणे हिरिमे वइस्से ॥१०३॥

अनयोर्व्याख्या—क्रोधादि भयान्तं स्पष्टम् । 'सोग—पुमित्थिवेयं'ति **शोकं** प्रियविप्रयोगजं मनोदुःखरूपम्, पुंवेदं स्त्रीविषयाभिलाषम्, स्त्रीवेदं पुंसोऽभिष्वङ्गम् 'ततो द्वन्द्वे' **शोक—पुं-स्त्रीवेदम्, नपुंसकवेद**मुभयाभिलाषम्, **विविधांश्च भावान्** हर्ष—विषादादीनभिप्रायान् **आपद्यते** प्राप्नोति । **एवम**मुना राग—द्वेषवता लक्षणेन प्रका**रेणानेक-रूपान**नन्तानुबन्ध्यादिभेदेन तारतम्यभेदेन **चैवंविधान्** 'विकारानिति गम्यते' **कामगुणेषु** शब्दादिषु **सक्तो**ऽभिष्वङ्गवान् 'उपलक्षणाद् द्विष्टश्च' **अन्यांश्चैतत्प्रभवान् विशेषान्** क्रोधादिजनितान् परिताप—दुर्गतिपातादीन् । कीदृशः सन् ? इत्याह—कारुण्यास्पदीभूतो दीनः **कारुण्यदीनः** 'मध्यपदलोपी समासः' अत्यन्तदीन इत्यर्थः । 'हिरिमे'त्ति **ह्रीमान्** लज्जावान् । कोपाद्यापन्नो हीहैवाप्रीत्यादिकमनुभवन् परत्र तद्विपाकमतिकटुकं भावयन् प्रायः कारुण्यं दैन्यं लज्जां च भजते । तथा 'वइस्से'त्ति आर्षत्वाद् **द्वेष्यस्त**द्दोषदुष्टत्वात् सर्वेषामप्रीत एवेति सूत्रद्वयार्थः ॥१०२-१०३॥

राग—द्वेषोद्धरणोपायं, तदनुद्धरणे प्रकारान्तरेण दोषं चाह—

कप्पं न इच्छेज्ज सहायलिच्छू पच्छाणुतावेण तवप्पभावं ।
एवं वियारे अमियप्पयारे आवज्जई इंदियचोरवस्से ॥१०४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—कल्पते स्वाध्यायादिक्रियासु समर्थो भवतीति **कल्पो** योग्य**स्तम्** 'अपेर्गम्यत्वात्' कल्पमपि किं पुनरकल्पं 'शिष्यादीनिति गम्यते' **न इच्छेन्ना**भिलषेत् **सहायलिप्सु**र्ममाङ्गविश्रामणादिसाहाय्यं करिष्यतीत्यभिलाषुकः सन् । तथा पश्चादिति 'प्रस्तावाद् व्रतस्य तपसोऽङ्गीकाराद् वा' उत्तरकालमनुतापः, किमेतावन्मया कष्टमङ्गीकृतम्? इति चित्तबाधात्मकः **पश्चादनुतापस्तेन** हेतुना 'उपलक्षणत्वादन्यथा वा' **तपःप्रभावं** तपःफलमिहैवामर्षौषध्यादिलब्धिप्रार्थनेन, भवान्तरे भोगादिनिदानकरणेन वा **सम्भूत**यतिवत् 'नेच्छेदिति प्रक्रमः' । किमेवं निषिध्यते ? इत्याह—**एवम**मुना प्रकारेण **विकारान्** दोषा**नमितप्रकारान**नेकभेदा**नापद्येत** प्राप्नोति । इन्द्रियाणि चौरा इव धर्मस्वापहरणा**दिन्द्रियचौरास्तद्वश्यः** । अयमाशयः—तदनुग्रहबुद्ध्या कल्पं पुष्टालम्बनेन च तपःप्रभावं वाञ्छतोऽपि न दोषः । यस्तु विश्रामणाद्यर्थं कल्पं, भोगाद्यर्थं च तपोऽभिलषति तस्यावश्यमिन्द्रियचौरवश्यस्य विकारापत्तिरिति । एतेन च रागस्य हेतुद्वयपरिहार उद्धरणोपाय उक्तः 'उपलक्षणादन्येषामपि राग-द्वेषहेतूनां परिहारो ज्ञेयः' ॥१०४॥

पुनर्दोषान्तरहेतुतामाह—

तओ से जायंति पओअणाइं निमज्जिउं मोहमहण्णवंसि ।
सुहेसिणो दुक्खविणोयणट्ठा तप्पच्चयं उज्जमए अ रागी ॥१०५॥

व्याख्या—ततो विकारापत्तेरनन्तरं 'से' **तस्य जायन्ते प्रयोजनानि** विषयासेवन-प्राणिहिंसादीनि । **निमज्जितु**मित्यन्तर्भावितणिगर्थत्वान्निमज्जयितुं 'प्रक्रमात् तमेव जीवम्' मोहो महार्णव इवातिदुस्तरतया **मोहमहार्णवस्तिस्मिन्** । कीदृशस्य पुनरेतानि किमर्थं च जायन्ते ? इत्याह—**सुखैषिणः** सौख्याभिलाषिणो **दुःखस्य विनोदार्थं** परिहारार्थं । सुखैषितायां हि दुःखपरिहाराय विषयासेवनादिप्रयोजनसम्भव इति भावः । ततश्च **तत्प्रत्ययमु**क्तरूपप्रयोजननिमित्तं 'चस्यैवार्थत्वात्' **उद्यच्छत्येव** तत्प्रवृत्तावुत्सहत एवेत्यर्थः । **रागी** 'उपलक्षणत्वाद् द्वेषी च'सन् राग-द्वेषयोरेव सर्वानर्थहेतुत्वादिति ॥१०५॥

राग—द्वेषरहितस्य किं स्याद् ? इत्याह—

विरज्जमाणस्स य इंदियत्था सद्दाइया तावइयप्पयारा ।
न तस्स सव्वे वि मणुन्नयं वा निव्वत्तयंती अमणुन्नयं वा ॥१०६॥

व्याख्या—विरज्यमानस्य 'उपलक्षणादद्विषतश्च' **इन्द्रियार्थाः शब्दादिकाः** 'तावइय'त्ति यावन्तो लोके प्रतीताः तावन्तः प्रकाराः खर—मधुरादिभेदा येषां ते **तावत्प्रकारा** बहुप्रभेदा इत्यर्थः । **न तस्य** मनुजस्य **सर्वेऽपि मनोज्ञतां निर्वर्तयन्ति**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जनयन्ति, **अमनोज्ञां, वा** किन्तु राग-द्वेषवत एव । न हि स्वरूपेण रूपादयो मनोज्ञताममनोज्ञतां वा कर्तुमात्मनः क्षमाः, किन्तु प्रतिपन्नाध्यवसायवशादिति । ततो वीतरागस्य तन्निर्वर्तनहेत्वभावात् कथममी मनोज्ञताममनोज्ञतां वा निर्वर्तयेयुस्तदभावे च कथं विषयसेवनाक्रोशनादिप्रयोजनोत्पत्तिः ? इति ॥१०६॥

उपसंहरन्नाह—

एवं ससंकप्प-विकप्पणासुं संजायई समयमुवट्ठियस्स ।
अत्थे च संकप्पयओ तओ से पहीयए कामगुणेसु तण्हा ॥१०७॥

व्याख्या—एवमुक्तप्रकारेण स्वस्यात्मनः सङ्कल्पा राग-द्वेष-मोहरूपाध्यवसायास्तेषां विकल्पनाः सर्वदोषमूलत्वादिपरिभावनाः **स्वसङ्कल्प-विकल्पनास्तासूपस्थिस्यो**द्यतस्येति सम्बन्धः । किम् ? इत्याह—**सञ्जायते** उत्पद्यते, का ? इत्याह—'समयं'ति 'आर्षत्वात्' **समता** माध्यस्थ्यम् । **अर्थानिन्द्रियार्थान्** रूपादीन् 'चस्य भिन्नक्रमत्वात्' **सङ्कल्पयतश्च** यथा नैवैते पापहेतवः, किन्तु रागादय एवेति चिन्तयतस्तत इति समतायाः सकाशात् 'से' **तस्य** साधोः **प्रहीयते** प्रकर्षेण हानिं याति । कोऽसौ ? **कामगुणेषु तृष्णा**भिलाषो लोभ इति यावत् । समतायां हि प्राप्तायामुत्तरोत्तरगुणस्थानावाप्त्या क्षीयत एव लोभ इति भावः ॥१०७॥

ततः कीदृशः सन् किं विधत्ते ? इत्याह—

सो वीयरागो कयसव्वकिच्चो खवेइ नाणावरणं खणेणं ।
तहेव जं दरिसणमावरेइ जं चंतरायं पकरेइ कम्मं ॥१०८॥

व्याख्या—स इति प्रहीणतृष्णो **वीतराग-द्वेषो** भवति । तथा **कृतसर्वकृत्यो** मुक्तेः प्राप्तप्रायत्वात् । **क्षपयति ज्ञानावरणं** वक्ष्यमाणं **क्षणेन । तथैव यद् दर्शनं** चक्षुर्दर्शनाद्या**वरयति, यच्चान्तरायं** दानादिलब्धेर्विघ्नं **प्रकरोति कर्मा**न्तरायनामकमित्यर्थः । तदपि क्षपयतीति सम्बन्धः । स हि क्षपितमोहनीयोऽन्तर्मुहूर्तं विश्रम्य तद्द्विचरमसमये निद्राप्रचले देवगत्यादिनामप्रकृतीश्च क्षपयति । चरमसमये ज्ञानावरणादित्रयमिति भावः ॥१०८॥

तत्क्षयाच्च कं गुणमाप्नोति ? इत्याह—

सव्वं तओ जाणइ पासए य अमोहणे होइ निरंतराए ।
अणासवे झाण-समाहिजुत्ते आउक्खए मोक्खमुवेइ सुद्धे ॥१०९॥

व्याख्या—सर्वं ततो ज्ञानावरणादिक्षयाज्**जानाति** विशेषरूपतया, **पश्यति च** सामान्यरूपतया । '**च**शब्दो भिन्नविषयत्वात् पृथगुपयोगत्वं समुच्चिनोति' ततश्चैतेनानयोर्युगपदुपयोगत्वं निराकृतम् । तथा च **प्रज्ञप्तिः**—"[१]**जं समयं जाणति णो तं समयं**

---

१. यस्मिन् समये जानाति न तस्मिन् समये पश्यति ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पासति"। तथा "[1]केवली णं भंते ! इमं रयणप्पहं पुढविं आगारेहिं [हेऊहिं] पमाणेहिं संठाणेहिं परिवारेहिं जं समयं जाणइ णो तं समयं पासति ? । हंता ! गोयमा ! केवली णं" इत्यादि । तथा **अमोहनो** मोहरहितो **भवति** । तथा निष्क्रान्तोऽन्तरायान्**निरन्तरायः**, **अनाश्रवो** हिंसादिनिवृत्तः, ध्यानं शुक्लरूपं तेन, समाधिः परमस्वास्थ्यं तेन युक्तो **ध्यान-समाधियुक्तः**, आयुषः 'उपलक्षणत्वान्नाम—गोत्र—वेद्यानां च' क्षय **आयुःक्षयस्तस्मिन्** सति **मोक्षमुपैति** प्राप्नोति **शुद्धो**ऽपगतकर्ममल इति ॥१०९॥

मोक्षगतश्च यादृग् स्याद् तदाह—

सो तस्स सव्वस्स दुहस्स मुक्को जं बाहई सययं जंतुमेयं ।
दीहामयं विप्पमुक्को पसत्थो तो होइ अच्चंतसुही कयत्थो ॥११०॥

व्याख्या—स मोक्षं प्राप्तो जन्तुः 'तस्स'त्ति 'सुब्व्यत्ययात्' **तस्मा**ज्जाति-जरा-मरणादिरूपात् **सर्वस्माद् दुःखान्मुक्तः** पृथग्भूतः, **यद्** दुःखं **बाधते** पीडयति **सततं** निरन्तरं **जन्तुं** प्राणिन**मेतं** प्रत्यक्षमनुभवोपदर्शनमेतत् । दीर्घाणि स्थितितः 'प्रक्रमात् कर्माणि' तान्यामया इव रोगा इव नानाबाधाविधायितया दीर्घामयास्तेभ्यो विप्रमुक्तो **दीर्घामयविप्रमुक्तो**ऽत एव **प्रशस्तः** प्रशंसार्हः । 'तो' इति **ततो** दीर्घामयविप्रमोक्षाद् **भवत्यत्यन्तसुखी** । तत एव च **कृतार्थः** कृतसकलकृत्य इति ॥११०॥

निगमयितुमाह—

अणाइकालप्पभवस्स एसो सव्वस्स दुक्खस्स पमुक्खमग्गो ।
वियाहिओ जं समुविच्च सत्ता कमेण अच्चंतसुही हवंति ॥१११॥
त्ति बेमि ॥

व्याख्या—अनादिकालप्रभवस्यानादिकालोत्पन्नस्**यैषो**ऽनन्तरोक्तः **सर्वस्य दुःखस्य प्रमोक्षमार्गः** प्रमोक्षोपायो **व्याख्यातः । यं** दुःखप्रमोक्षमार्गं **समुपेत्य** सम्यक् प्रतिपद्य **सत्त्वाः** प्राणिनः **क्रमेणो**[त्तरो]त्तरगुणप्रतिपत्तिरूपे**णात्यन्तसुखिनो भवन्ती**ति । **इति ब्रवीमी**ति प्राग्वत् ॥१११॥ ग्रं० ६५२ अ० १४॥

इति श्रीकमलसंयमोपाध्यायविरचितायां सर्वार्थसिद्धौ श्रीउत्तराध्ययनटीकायां द्वात्रिंशत्तमं प्रमादस्थानाख्यमध्ययनं समाप्तम् ॥३२॥

• • •

१. केवली भदन्त ! इमां रत्नप्रभां पृथ्वीमाकारैः [हेतुभिः] प्रमाणैः संस्थानैः परिवारैर्यस्मिन् समये जानाति, न तस्मिन् समये पश्यति ? हन्त गौतम ! केवली ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

त्रयस्त्रिंशं कर्मप्रकृतिनामाध्ययनम्

इह पूर्वाध्ययने प्रमादस्थानान्युक्तानि । तैश्च कर्म बध्यते, तस्य च काः प्रकृतयः, कियती वा स्थितिः ? इत्याद्यभिधायकमिदं त्रयस्त्रिंशमध्ययनमारभ्यते—

अट्ठ कम्माइं वोच्छामि आणुपुव्विं जहक्कमं ।
जेहिं बद्धो अयं जीवो संसारे परिवत्तए ॥१॥

व्याख्या—अष्टेत्यष्टसङ्ख्यानि क्रियन्ते मिथ्यात्वादिहेतुभिर्जीवेनेति **कर्माणि तानि वक्ष्यामि** । 'आणुपुव्वि' ति 'सुब्व्यत्ययाद्' **आनुपूर्व्या**, इयं च पश्चानुपूर्व्यादिरपि स्यादत आह—**यथाक्रमं** क्रमानतिक्रमेण पूर्वानुपूर्व्येत्यर्थः । **यैः** कर्मभि**र्बद्धः** श्लिष्टो**ऽयं जीवः संसारे परिवर्तते** विविधपर्यायानुभवनेन परिभ्रमति ॥१॥

प्रतिज्ञातमाह—

नाणस्सावरणिज्जं दंसणावरणं तहा ।
वेयणिज्जं तहा मोहं आउकम्मं तहेव य ॥२॥
नामकम्मं च गोयं च अंतरायं तहेव य ।
एवमेयाइं कम्माइं अट्ठेव उ समासओ ॥३॥

व्याख्या—गाथाद्वयं स्पष्टम् । नवरं '**तथैव चे**ति सर्वत्रासदपि 'कर्म' इति योज्यम्' **एवमेतान्यष्टकर्माणि समासतः** संक्षेपेण । विस्तरतस्तु यावन्तो जन्तुभेदास्तान्यपि तावन्तीत्यनन्तान्येवेति भावः । अत्र च ज्ञान-दर्शनस्वभावोऽयमात्मेत्यन्तरङ्गत्वात् तयोरादित-स्तदावरणग्रहणम् । तयोश्च समानेऽप्यन्तरङ्गत्वे विशेषज्ञानोपयोगे एव सर्वलब्धीनामाप्तेर्ज्ञानस्य प्राधान्यदादौ तदावरणस्य । तदनु सामान्योपयोगत्वाद् दर्शनावरणस्य । एवं शेषकर्मणामपि क्रमोपन्यासकारणानि **बृहट्टीकातो**ऽवसेयानि ॥२-३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इत्थं कर्मणो मूलप्रकृतीरुक्त्वोत्तरप्रकृतीराह—

नाणावरणं पंचविहं सुयमाभिणिबोहियं ।
ओहिंनाणं तइयं मणनाणं च केवलं ॥४॥

व्याख्या—ज्ञानावरणं पञ्चविधं पञ्चप्रकारम् । तत् कथमिति ? आवार्यभेदादेवेहावरणस्य भेद इत्यावार्यस्य ज्ञानस्यैव भेदानाह—**श्रुतम्** १, **आभिनिबोधिकम्** २, **अविधज्ञानं तृतीयम्** ३, **मनोज्ञानम्** ४, **केवलम्** ५, एतत्स्वरूपं च प्राग् मोक्षमार्गाध्ययन एवोक्तम् ॥४॥

द्वितीयावरणमाह—

निद्दा तहेव पयला निद्दानिद्दा य पयलपयला य ।
तत्तो य थीणगिद्धी पंचमा होइ नायव्वा ॥५॥

चक्खुमचक्खुओहिस्स दरिसणे केवले य आवरणे ।
एवं तु नवविगप्पं नायव्वं दंसणावरणं ॥६॥

अनयोर्व्याख्या—निद्रा सुखप्रतिबोधोच्यते १। तथैव निद्रावत्, किञ्चित् प्रचलत्यस्यामासीनोऽपीति **प्रचला** २। अतिशायिनी निद्रैव दुःखप्रतिबोधात्मिका **निद्रानिद्रा** ३। प्रचलैवातिशायिनी चङ्क्रम्यमाणस्य **प्रचलाप्रचला** ४। ततश्चात्यन्ताशुभानुभावतया ताभ्य उपरवर्तिनी स्त्याना संहतोपचितेत्यर्थः, ऋद्धिर्गृद्धिर्वा यस्यां सा **स्त्यानर्द्धिः स्त्यानगृद्धिर्वा**, एतदुदये च वासुदेवार्धबलः प्रबलराग-द्वेषवांश्च जन्तुर्जायतेऽत एव दिनचिन्तितार्थसाधिन्यसौ **पञ्चमी भवति ज्ञातव्या** ५॥ "चक्खु'त्ति 'मकारोऽलाक्षणिकः' चक्षुश्चाचक्षुश्चावधिश्च 'समाहारे' **चक्षुरचक्षुरवधि तस्य दर्शने**, चक्षुषा रूपसामान्यग्रहणे, अचक्षूंषि शेषेन्द्रिय-मनांसि तद्दर्शने तेषां स्वस्वविषयसामान्यावबोधे, अवधिदर्शनेऽवधिना रूपिद्रव्याणां सामान्यग्रहणे । **केवले च** 'प्रक्रमात् केवलदर्शने' सर्वद्रव्य-पर्यायाणां सामान्यावबोधे । **आवरणमे**तच्चक्षुर्दर्शनादिविषयभेदाच्चतुर्विधमत एवाह—**एवमि**त्यनेन निद्रापञ्चविधत्वचक्षुर्दर्शनावरणादिचतुर्विधत्वात्मकेन प्रकारेण '**तुः** पूरणे' **नवविकल्पं** नवभेदं **ज्ञातव्यं दर्शनावरणमि**ति गाथाद्वयार्थः ॥५-६॥

तृतीयं कर्माह—

वेयणियं पि य दुविहं सायमसायं च आहियं ।
सायस्स उ बहू भेया एमेवासायस्स वि ॥७॥

व्याख्या—वेदनीयं 'प्रक्रमात् कर्म' **अपि च द्विविधं** द्विभेदम्, स्वाद्यते इति

नैरुक्तविधिना **सातं** सुखं शारीरं मानसं च 'इहोपचारात् तद्धेतुकर्मैवमुक्तम्' । **असातं च** तद्विपरीत**माख्यातं** कथितम् 'अर्हदादिभिरिति गम्यम्' । **सातस्यापि** 'तुरप्यर्थः' **बहवो भेदा**स्तद्धेतुभूतभूतानुकम्पादीनां बहुविधत्वात् । **एवमेवे**ति बहव एव भेदा **असातस्यापि,** दुःख–शोकादितद्धेतुबहुभेदत्वात् ॥७॥

चतुर्थमाह–

मोहणिज्जं पि दुविहं दंसणे चरणे तहा ।
दंसणे तिविहं वुत्तं चरणे दुविहं भवे ॥८॥

सम्मत्तं चेव मिच्छत्तं सम्मामिच्छत्तमेव य ।
एयाओ तिन्नि पयडीओ मोहणिज्जस्स दंसणे ॥९॥

चरित्तमोहणं कम्मं दुविहं तु वियाहियं ।
कसायमोहणिज्जं च नोकसायं तहेव य ॥१०॥

सोलसविहभेएणं कम्मं तु कसायजं ।
सत्तविह नवविहं वा कम्मं च नोकसायजं ॥११॥

आसां व्याख्या–मोहनीयमपि द्विविधम्, दर्शने तत्त्वश्रद्धानरूपे **चरणे** चारित्रे **तथा**। कोऽर्थः ? दर्शनमोहनीयं चारित्रमोहनीयं च । तत्र **दर्शने** दर्शनविषयं मोहनीयं **त्रिविधमुक्तम् । चरणे** चरणविषयं मोहनीयं **द्विविधं भवेत्** ॥ दर्शनमोहनीयभेदानाह– **सम्यक्त्वं** शुद्धदलिकरूपम्, यदुदये तत्त्वरुचिः स्यात् । **'चैवेति** पूरणे' **मिथ्यात्व**मशुद्धदलिकरूपम्, यतस्तत्त्वेऽतत्त्वरुचिरतत्त्वे तत्त्वरुचिरुत्पद्यते । **सम्यग्मिथ्यात्वमेव च** शुद्धाशुद्धदलिकरूपम्, यत उभयस्वभावता जन्तोः स्यात् । इह च सम्यक्त्वादयो जीवधर्मास्तद्धेतुत्वाद् दलिकेष्वेतद्व्यपदेशः । **एतास्तिस्रः प्रकृतयो मोहनीयस्य दर्शने** दर्शनविषयस्य ॥ चरित्रमोहनीयभेदानाह–**चरित्रमोहनं कर्म** यतो हि कथञ्चनाहमेतत् प्रतिपद्ये इति श्रद्दधानोऽपि तत्फलादि जानन्नपि न तत् प्रतिपद्यते । तत् **पुनर्द्विविधं व्याख्यातं** 'श्रुतधरैरिति शेषः' । कषायाः क्रोधादयस्तद्रूपेण वेद्यतेऽनुभूयते यत् तत् **कषायवेदनीयम्, 'चः** समुच्चये' नोकषायाः कषायसहवर्तिनो हास्यादयस्तद्रूपेण वेद्यते यत् तत् **नोकषायवेदनीयम्, 'तथैवे**ति पूरणे' ॥ अनयोरपि भेदानाह–**षोडशविधः** षोडशप्रकारो यो **भेदस्तेन कर्म** क्रियमाणत्वात् 'तु' पुनः कषायेभ्यो जातं **कषायजं** कषायमोहनीयम् । षोडशविधत्वं चास्य क्रोध–मान–माया–लोभानां चतुर्णामपि प्रत्येकमनन्तानुबन्ध्यप्रत्याख्यान–प्रत्याख्यानावरण–संज्वलनभेदतश्चतुर्विधत्वात् । तथा 'बिन्दु–

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

लोपात्' **सप्तविधं नवविधं वा कर्म** नोकषायेभ्यो जातत्वा**न्नोकषायजम्,** नो कषायवेदनीयमित्यर्थः । तच्च हास्यादिषट्केन सामान्यविवक्षयैकेन वेदेन सह **सप्त-विधम्** । तेनैव षट्केन वेदत्रयेण **नवविधं** स्यादिति गाथाचतुष्टयार्थः ॥८-११॥

आयुःकर्माह—

नेरइय-तिरिक्खाउं मणुस्साउं तहेव य ।
देवाउयं चउत्थं तु आउकम्मं चउव्विहं ॥१२॥

व्याख्या—'आयुः शब्दः प्रत्येकं योज्यते' **नैरयिकाणां** नवरकवासिना**मायुर्येन** तेषु ध्रियन्ते । तथा तिरश्चामेकेन्द्रियादीनामायु**स्तिर्यगायुर्ये**न तेषु स्थितिः स्यात् । तथा मनुष्याणामायु**र्मनुष्यायु**स्तद्भावावस्थितिहेतुतया । देवानां भवनपत्यादीनामायु**र्देवायुर्ये**न तेष्ववस्थीयते **चतुर्थं** '**तुः** पूरणे' । एवं **चायुःकर्म चतुर्विधम्** ॥१२॥

नामकर्माह—

णामं कम्मं दुविहं सुहमसुहं वियाहियं ।
सुहस्स उ बहू भेया एमेव असुहस्स वि ॥१३॥

व्याख्या—नामकर्म द्विविधम्, शोभते सर्वावस्थास्वनेनात्मेति **शुभं** तद्विपरीत**म-शुभमाख्यातम् । शुभस्य तु बहवो भेदाः । एवमेवाशुभस्यापि,** तदपि बहुभेदमिति भावः । तत्रोत्तरोत्तरभेदतः शुभनाम्नोऽनन्तभेदत्वेऽपि मध्यमापेक्षया सप्तत्रिंशद् भेदाः । तथाहि—मनुष्यगतिः १, देवगतिः २, पञ्चेन्द्रियजातिः ३, औदारिक—वैक्रियाहारक—तैजस-कार्मणशरीराणि ८, समचतुरस्रं संस्थानं ९, वज्रर्षभनाराचसंहननम् १०, औदारिक—वैक्रियाहारकाङ्गोपाङ्गानि त्रीणि १३, प्रशस्तवर्ण—गन्ध—रस—स्पर्शाश्चत्वारः १७, मनुष्य—देवानुपूर्वी [द्वयं] १९, अगुरुलघु २०, पराघातम् २१, उच्छ्वासम् २२, आतपः २३, उद्योतः २४, प्रशस्तविहायोगतिः २५, त्रसम् २६, बादरम् २७, पर्याप्तम् २८, प्रत्येकम् २९, स्थिरम् ३०, शुभम् ३१, सुभगम् ३२, सुस्वरम् ३३, आदेयम् ३४, यशःकीर्तिः ३५, निर्माणम् ३६, तीर्थकरनाम ३७ एताः सर्वा अपि शुभानुभावाच्छुभाः । तथा अशुभनाम्नोऽपि विमध्यमविवक्षया चतुस्त्रिंशद् भेदास्तद् यथा—नरकगतिः १, तिर्यगगतिः २, एक—द्वि—त्रि—चतुरिन्द्रियजातिः ६, ऋषभनाराच—नाराच—अर्धनाराच—कीलिका—सेवार्तसंहननानि ११, न्यग्रोधमण्डल—सादि—वामन—कुब्ज—हुण्डसंस्थानानि १६, अप्रशस्त-वर्ण—गन्ध—रस—स्पर्शाः २०, नरकानुपूर्वी २१, तिर्यगानुपूर्वी २२, उपघातः २३, अप्रशस्तविहायोगतिः २४, स्थावर २५, सूक्ष्म २६, साधारण २७, अपर्याप्त २८, अस्थिर

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

२९, अशुभ ३०, दुर्भग ३१, दुःस्वर ३२, अनादेय ३३, अयशोऽकीर्तिः ३४, एताश्चाशुभ-नारकत्वादिनिबन्धनत्वेनाशुभाः । अत्र च बन्धन–सङ्घाते शरीरेभ्यः, वर्णाद्यवान्तरभेदाश्च वर्णादिभ्यः पृथग् न विवक्ष्यन्ते इति नोक्तसङ्ख्यातिक्रमः ॥१३॥

गोत्रकर्माह–

गोयं कम्मं दुविहं उच्चं नीयं च आहियं ।
उच्चं अट्ठविहं होइ एवं नीयं पि आहियं ॥१४॥

व्याख्या–गोत्रं कर्म द्विविधम् । 'उच्च'त्ति इक्ष्वाकुजात्याद्यु**च्चै**र्व्यपदेशहेतुजाति-कुलाद्यष्टविधबन्धहेतुत्वा**दष्टविधमुच्चैर्गोत्रं भवति** । **एवमि**त्यष्टविधमेव जातिमदाद्यष्ट-बन्धहेतुत्वान्नीचमपि **नीचैर्गोत्रमपि** **नीचै**र्व्यपदेशहेत्**वाख्यातम्** ॥१४॥

अनन्तरायं कर्माह–

दाणे लाभे य भोगे य उवभोगे वीरिए तहा ।
पंचविहमंतरायं समासेण वियाहियं ॥१५॥

व्याख्या–दीयत इति **दानं तस्मिन्** । लभ्यत इति **लाभस्तस्मिन्** । सकृद् भुज्यते पुष्पाहारादीति **भोगस्तस्मिन्** । उप इति पुनः पुमर्भुज्यते भवनाङ्गनादीत्**युपभोगस्तस्मिन्** । तथा विशेषेण ईर्यते चेष्ट्यतेऽनेनेति **वीर्यं तस्मिन् 'तथा** समुच्चये' सर्वत्रान्तरायमिति प्रक्रमः' । ततो विषयभेदात् **पञ्चविधमन्तरायं समासेन व्याख्यातम्** । तत्र यत् सति चतुरे ग्रहीतरि देये च वस्तुनि तत्फलमवगच्छन्नपि न दाने प्रवर्तते तद् दानान्तरायम् । यत् पुनर्विशिष्टेऽपि दातरि याचननिपुणोऽपि याचको न लभते तल्लाभान्तरायम् । सति विभवादौ यद्वशादाहार-माल्यादि न भुङ्क्ते तद् भोगान्तरायम् । यस्योदयात् सदपि वस्त्रालङ्कारादि नोपभु ङ्क्ते तदुपभोगान्तरायम् । यद्वशाद् बलवान् नीरुग् वयःस्थस्तृणमपि कुब्जीकर्तुं न क्षमते तद् वीर्यान्तरायमिति ॥१५॥

उक्तार्थनिगमनायोत्तरग्रन्थयोजनाय चाह–

एयाओ मूलपयडीओ उत्तराओ य आहिया ।
पएसग्गं खित्त-काले य भावं च अदुत्तरं सुण ॥१६॥

व्याख्या–एता अनन्तरोक्ता ज्ञानावरणाद्या **मूलप्रकृतयः** । **उत्तरा** इत्युत्तरप्रकृतयः श्रुतावरणाद्याः '**चशब्दः** श्रुतादीनामप्यक्षरानक्षरादिभेदतो बहुविधत्वसूचकः' **आख्याताः** कथिताः । अथ प्रदेशाः परमाणवस्तेषामग्रं परिमाणं **प्रदेशाग्रम्** । **क्षेत्र-कालौ च** तत्र क्षेत्रमाकाशम्, कालो बद्धस्य कर्मणो जीवप्रदेशाविचटनात्मकः स्थितिकालः । **भावं**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

चानुभागलक्षणं चतुःस्थानिक—त्रिस्थानिकरसमित्यर्थः । **अतः** प्रकृत्यभिधानात् **उत्तरमि**-त्यूर्ध्वं **शृणु** ॥१६॥

प्रदेशाग्रमाह—

सव्वेसिं चेव कम्माणं पएसग्गमणंतगं ।
गंठियसत्ताईयं अंतो सिद्धाण आहियं ॥१७॥

व्याख्या—सर्वेषामपि न पुनः केषांचिदेव **कर्मणाम्** '**च**ः पूरणे, **एवो**ऽपिशब्दार्थः' ज्ञानावरणादीनां **प्रदेशाग्रं** परमाणुपरिमाण**मनन्तकम्**, अनन्तपरमाणुनिष्पन्नत्वात् वर्गणानाम् । तच्चानन्तकं ग्रन्थिगसत्त्वा ये ग्रन्थिं यावद् गत्वाऽपि तद्भेदाकरणेन कदाचिदपि नोपरिष्टाद् गन्तारस्ते चाभव्या एव तानतीतं तेभ्योऽनन्तगुणत्वेनातिक्रान्तं **ग्रन्थिगसत्त्वातीतम्** । तथाऽन्तर्मध्ये **सिद्धानामाख्यातं** कथितम् 'अर्हदादिभिरिति गम्यते' । सिद्धेभ्यो हि कर्माणवोऽनन्तभाग एव, तदपेक्षया सिद्धानामनन्तगुणत्वात् । अतः सङ्ख्यामपेक्ष्य सिद्धान्तर्वर्ति तदनन्तकमुक्तम् । एकसमयग्राह्यकर्मपरमाण्वपेक्षं चैतत्सङ्ख्यानमिति ॥१७॥

क्षेत्रमाह—

सव्वजीवाण कम्मं तु संगहे छद्दिसागयं ।
सव्वेसु वि पएसेसु सव्वं सव्वेण बद्धगं ॥१८॥

व्याख्या—सर्वजीवानामेकेन्द्रियाद्यशेषभेदानां **कर्म** ज्ञानावरणादि '**तुः** पूरणे' **सङ्ग्रहे** सङ्ग्रहक्रियायां 'योग्यं स्यादिति शेषः' कीदृशं सद् ? इत्याह—'छद्दिसागय'त्ति षण्णां दिशां समाहारः **षड्दिशं तत्र गतम्** । तत्र चतस्रो दिशः पूर्वाद्या ऊर्ध्वाधो दिग्द्वयमिति षट् स्युरिति । यत्र ह्याकाशे जीवोऽवगाढस्तत्रैव ये कर्मपुद्गलास्ते रागादि-स्नेहयोगत आत्मनि लगन्ति । न क्षेत्रान्तरावगाढा भिन्नदेशस्थानां तद्भावायोग्यत्वात् । यथा ह्यग्निः स्वदेशस्थान् प्रायोग्यपुद्गलानात्मसात् करोत्येवं जीवोऽपि स्वदेशस्थान् कर्मपुद्गलानिति । किञ्चिद् विदिग्व्यवस्थितमपि कर्म आत्मा गृह्णाति, परमल्पत्वान्न विवक्षितमिति । तता क्षेत्रप्रस्तावे यद् दिगभिधानं तत् तासामाकाशादभेदज्ञापनार्थं तद्भेदाप्रतीतेः । तथा षड्दिगतत्वं द्वीन्द्रियादीन् पञ्चेन्द्रियान्तानेवाधिकृत्य नियमेन ज्ञेयम् । एकेन्द्रियाणामन्यथापि सम्भवात् । यदागमः—"[१]**एगिंदिया णं भंते ! तेयाकम्मपुग्गलाणं**

---

१. एकेन्द्रियो भदन्त ! तेजःकर्मपुद्गलानां ग्रहणं कुर्वन् किं त्रिदिशं करोति यावत् षड्दिशं करोति ? । गौतम ! स्यात् त्रिदिशं स्याच्चतुर्दिशं स्यात् पञ्चदिशं स्यात् षड्दिशं करोति । द्वीन्द्रियो भदन्त ! पृच्छा ? गौतम ! द्वीन्द्रियो यावत् पञ्चेन्द्रियो नियमात् षड्दिशं करोति ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

गहणं करेमाणे किं तिदिसिं करेइ जाव छद्दिसिं करेइ ? गोयमा ! सिय तिदिसिं सिय चउदिसिं सिय पंचदिसिं सिय छद्दिसिं करेइ। बेंदिया णं भंते ! पुच्छा ? गोयमा ! बेंदिया जाव पंचिंदिया नियमा छद्दिसिं करेइ'' इत्यादि। तच्च गृहीतं सत् केन सह, कियत्, कथं वा स्याद् ? इत्याह—'सव्वेसु'त्ति 'सुब्व्यत्ययात्' **सर्वैरपि प्रदेशै**रात्मसम्बन्धिभिः, **सर्वं** ज्ञानावरणादि न त्वन्यतरदेव। आत्मा हि सर्वप्रकृतिप्रायोग्यपुद्गलान् सामान्येनादाय तान्येवाध्यवसायविशेषात् पृथग् ज्ञानावरणादिरूपत्वेन परिणमयति। **सर्वेण** 'गम्यमानत्वात् प्रकृति—स्थित्यादिना प्रकारेण', **बद्धं** अनन्ययोन्यसम्बद्धतया हि शृङ्खलावयवानामिव क्षीरोदकवद् वात्मप्रदेशैः श्लिष्टं तदेव बद्धकमिति ॥१८॥

कालमाह—

उदहीसरिनामाणं तीसई कोडिकोडीओ ।
उक्कोसिया ठिई होइ अंतमुहुत्तं जहन्निया ॥१९॥

आवरणिज्जाण दुन्हं पि वेयणिज्जे तहेव य ।
अंतराए य कम्मंमि ठिई एसा वियाहिया ॥२०॥

उदहिसरिसनामाणं सत्तरिं कोडिकोडीओ ।
मोहणिज्जस्स उक्कोसा अंतोमुहुत्तं जहन्निया ॥२१॥

तित्तीसा सागरोवम उक्कोसेणं वियाहिया ।
ठिई उ आउकम्मस्स अंतमुहुत्तं जहन्निया ॥२२॥

उदहिसरिसनामाणं वीसई कोडिकोडीओ ।
नाम-गोयाण उक्कोसा अट्ठमुहुत्ता जहन्निया ॥२३॥

आसां व्याख्या—उदधिः समुद्रस्तेन सदृग् नाम येषां तान्यु**दधिसदृग्नामानि** सागरोपमाणि तेषां **त्रिंशत् कोटीकोट्य** उत्कृष्टा स्थितिर्भवति। तथा मुहूर्तस्यान्तर**न्तर्मुहूर्तम्,** मुहूर्तमपि न्यूनमित्यर्थो **जघन्यिका** 'प्रक्रमात् स्थितिः' ॥ केषाम् ? इत्याह—**आवरणीय-योर**न्यत्रैतद्व्यपदेशाश्रवणात् ज्ञानावरणीय—दर्शनावरणीययो**र्द्वयोरपि, वेदनीये तथैव चान्तराये** च **कर्मणि स्थितिरेषा व्याख्याता**। इह वेदनीयस्यापि जघन्या स्थितिरन्त-र्मुहूर्तमाना सूत्रकृतोक्ता। अन्ये तु द्वादशमुहूर्तमानामेव तां वेदनीयस्येच्छन्ति, तदभिप्रायं न विद्मः ॥ **उदधिसदृशनाम्नां सप्ततिकोटीकोट्यो मोहनीयस्योत्कृष्टाऽन्तर्मुहूर्तं जघन्यिका** स्थितिः ॥ **त्रयस्त्रिंशत् सागरोपमाणि** 'आर्षत्वात् सुपोर्लुक्' **उत्कृष्टेन व्याख्याता स्थितिः**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

'**तुः** पूरणे' **आयुःकर्मणोऽन्तर्मुहूर्तं जघन्यिका** ॥ **उदधिसदृशनाम्नाम**र्थात् सागरोपमानां **विंशतिः कोटीकोट्यो नाम-गोत्रयोरुत्कृष्टाऽष्टमुहूर्ता जघन्यिके**ति गाथापञ्चकार्थः ॥१९-२३॥ मूलप्रकृतीनामुत्कृष्टादिस्थितिरुक्तोत्तरप्रकृतीनां **बृहट्टीकातो**ऽवसेया ॥

सम्प्रति भावमाह—

सिद्धाणणंतभागो अणुभागा हवंति उ ।
सव्वेसु वि पएसग्गं सव्वजीवे अइच्छियं ॥२४॥

व्याख्या—सिद्धानाममन्तभागवर्तित्वात् तद**नन्तभागोऽनुभागा** रसविशेषा **भवन्ति**। '**तुः** पूरणे' अयं चानन्तभागोऽनन्तसङ्ख्य एवेत्यनेनैषामानन्त्यमेवेत्थमुक्तम् । तथा **सर्वेष्वपि** 'प्रक्रमादनुभागेषु' प्रदेशा बुद्ध्या विभज्यमानास्तदविभागैकदेशास्तेषामग्रं **प्रदेशाग्रम्**, 'सव्वजीवे अइच्छियं'ति **सर्वजीवेभ्यो** भव्याभव्येभ्यो**ऽतिक्रान्तम्**, ततोऽपि तेषामनन्तगुणत्वेनाधिकत्वादिति ॥२४॥

उपसंहारमाह—

तम्हा एएसि कम्माणं अणुभागा वियाणिया ।
एएसिं संवरे चेव खवणे य जए बुहे ॥२५॥ त्ति बेमि ॥

व्याख्या—यस्मादेवंविधाः प्रकृतिबन्धादय**स्तस्मादेतेषाम**नन्तरोक्तानां **कर्मणां** ज्ञानावरणादीना**मनुभागान्** 'उपलक्षणात् प्रकृतिबन्धादींश्च' **विज्ञाय** विशेषेण कटुकविपाक-बन्धत्वलक्षणेन भवहेतुत्वलक्षणेन वाऽवबुध्य**ैतेषां** कर्मणां **संवरे** अनुपातानामुपादाननिरोधे '**चैवे**ति समुच्चयावधारणे' **क्षपणे चो**पात्तानां निर्जरे 'जए' त्ति **यतेतैव** यत्नं कुर्यादेव **बुध**स्तत्त्वावगमवान् । **इति ब्रवीमी**ति पूर्ववत् ॥२५॥ ग्रं० १६० अ० ७॥

इति श्रीकमलसंयमोपाध्यायविरचितायां सर्वार्थसिद्धौ श्रीउत्तराध्ययनटीकायां त्रयस्त्रिंशं कर्मप्रकृतिनामाध्ययनं समाप्तम् ॥३३॥

• • •

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

चतुस्त्रिंशं लेश्याध्ययनम्

अत्र पूर्वाध्ययने कर्मप्रकृतय उक्तास्तत्स्थितिश्च लेश्यावशत इत्यतस्तदभिधायकं चतुस्त्रिंशमध्ययनमारभ्यते ।

लेसज्झयणं पवक्खामि आणुपुव्विं जहक्कमं ।
छण्हं पि कम्मलेसाणं अणुभावे सुणेह मे ॥१॥

व्याख्या—लेश्याभिधायकमध्ययनं **लेश्याध्ययनं प्रवक्ष्यामि** प्रकर्षेण तासामेव नाम—वर्णादिनिरूपणात्मकेनाभिधास्ये । **आनुपूर्व्या यथाक्रममि**ति च प्राग्वत् । तत्र **षण्णामपि** षट्सङ्ख्यानामपि **कर्मलेश्यानां** कर्मस्थितिविधातृतत्तद्विशिष्टपुद्गलरूपाणा- **मनुभावान्** रसविशेषान् **शृणुत** 'मे' **मम** 'कथयत इति शेषः' ॥१॥

एतदनुभावाश्च नामादिप्ररूपणात एव स्युरिति तत्प्ररूपणाय द्वारमाह—

नामाइं वण्ण-रस-गंध-फास-परिणाम-लक्खणं ।
ठाणं ठिई गई च आउं लेसाणं तु सुणेह मे ॥२॥

व्याख्या—नामानि वर्ण-रस-गन्ध-स्पर्श-परिणाम-लक्षणमिति पदषट्कस्य समाहारः, तत्र परिणामो जघन्यादिः, लक्षणं पञ्चाश्रवासेवादि । **स्थानमु**त्कर्षापकर्षरूपम् । **स्थितिम**वस्थानकालम् । **गतिं च** नरकादिकाम्, यतो या अवाप्यते । **आयुर्या**वति तस्मिन्नवशिष्यमाणे आगामिभवलेश्यापरिणामस्तदिह गृह्यते । **लेश्यानां** '**तुः** पूरणे' '**सुणेह मे**'त्ति प्राग्वत् ॥२॥

नामान्याह—

किण्हा नीला य काऊ य तेऊ पम्हा तहेव य ।
सुक्कलेसा य छट्ठा उ नामाइं तु जहक्कमं ॥३॥

व्याख्या—स्पष्टा ॥३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

वर्णमाह—

जीमूयनिद्धसंकासा गवल-रिट्ठगसंनिभा ।
खंजंजण-नयणनिभा किण्हलेसा उ वण्णओ ॥४॥

नीलासोगसंकासा चासपिच्छसमप्पभा ।
वेरुलियनिद्धसंकासा नीललेसा उ वण्णओ ॥५॥

अयसीपुप्फसंकासा कोइलच्छविसंनिभा ।
पारेवयगीवनिभा काउलेसा उ वण्णओ ॥६॥

हिंगुलुयधाउसंकासा तरुणाइच्चसंनिभा ।
सुयतुंड-पईवनिभा तेउलेसा उ वण्णओ ॥७॥

हरियालभेयसंकासा हलिद्दाभेयसन्निभा ।
सणासणकुसुमनिभा पम्हलेसा उ वण्णओ ॥८॥

संखंक-कुंदसंकासा खीरपूरसमप्पभा ।
रयय-हारसंकासा सुक्कलेसा उ वण्णओ ॥९॥

आसां व्याख्या—'जीमूयनिद्ध' त्ति 'प्राकृतत्वात्' स्निग्धश्चासौ सजलत्वेन जीमूतश्च मेघः **स्निग्धजीमूत**स्तद्वत् सं सम्यक् काशते वर्णतः प्रकाशते इति **संकाशा** तत्सदृशीत्यर्थः । तथा **गवलं** माहिषं शृङ्गम्, **रिष्टो** द्रोणकाकोरिष्टकं फलविशेषो वा **तत्सन्निभा** । 'खंज'त्ति **खञ्जनं** स्नेहात्यक्तशकटाक्षघर्षणोद्भूतम्, **अञ्जनं** च कज्जलम्, **नयनं** चक्षुरिहोपचारात् तदेकदेशस्तन्मध्यवर्ती कृष्णसार**स्तन्निभा** तत्समाना **कृष्णलेश्या** '**तु**र्विशेषार्थे' **वर्णतो** वर्णमाश्रित्यैव, न रसादीन्येवमग्रेऽपि ४। नीलश्चासावशोकश्च वृक्ष-विशेषो **नीलाशोकस्तत्सङ्काशा** रक्ताशोकव्यवच्छेदार्थं नीलग्रहणम् । **चासः** पक्षिविशेष-स्तस्य **पिच्छं** पक्षं **तत्समप्रभा** । **स्निग्धो** दीप्तो **वैडूर्यो** मणिविशेष**स्तत्सङ्काशा** तत्सदृशी 'पदविपर्ययः प्राग्वत्' **नीललेश्या तु वर्णतो** नीलेत्यर्थः ।५। **अतसी** धान्यविशेष-**स्तत्पुष्पसङ्काशा** । **कोकिलः** परभृतस्तस्य **छविस्तत्सन्निभा** । **पारापतः** पक्षिविशेषस्तस्य **ग्रीवा** कण्ठ**स्तन्निभा कापोतलेश्या तु वर्णतः** किञ्चित् कृष्णा किञ्चिच्च लोहितेति भावः । तथा च प्रज्ञापना—[१]'**काऊलेसा काललोहिएणं वण्णेणं वणिज्जइ**' त्ति । ६। **हिङ्गुलुकः** प्रतीतो **धातुः** पाषाणविशेष**स्तत्सङ्काशा** । **तरुणो** नवोदित **आदित्यस्त**-

१. कापोतलेश्या काललोहितेन वर्णेन वर्ण्यते इति ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

त्सन्निभा । **शुकः** कीरस्तस्य **तुण्डं** मुखं चञ्चूः तच्च **प्रदीपश्च तन्निभा** । **तेजोलेश्या तु वर्णतो** रक्तेति भावः । ७। **हरितालो** धातुविशेषस्तस्य **भेदो** द्विधाभावस्**तत्सङ्काशा** भेदे हि वर्णप्रकर्षो दृश्यते । **हरिद्रा** प्रसिद्धा तस्या **भेदस्तत्सन्निभा** । **शणो** धान्यविशेषो**ऽशनो** बीयकस्तयोः **कुसुमं तन्निभा पद्मलेश्या तु वर्णतः** पीतेति भावः । ८। **शङ्खः** प्रतीतो-**ऽङ्को** रत्नविशेषः, **कुन्दं** कुन्दपुष्पं **तत्सङ्काशा** । **क्षीरं** दुग्धं तस्य **पूरः** प्रवाहस्**तत्समप्रभा** । **रजतं** रूप्यम्, **हारो** मुक्ताकलापस्**तत्सङ्काशा शुक्ललेश्या** 'तुः पूरणे' **वर्णतः** शुक्लेति तत्त्वम् । ९। इति गाथाषट्कार्थः ॥४-९॥

रसमाह—

जह कडुयतुंबगरसो निंबरसो कडुयरोहिणिरसो वा ।
इत्तो वि अणंतगुणो रसो उ किण्हाइ नायव्वो ॥१०॥

जह तिगडुयस्स रसो तिक्खो जह हत्थिपिप्पलीए वा ।
इत्तो वि अणंतगुणो रसो उ नीलाइ नायव्वो ॥११॥

जह तरुणअंबयरसो तुवरकविट्ठस्स वा वि जारिसओ ।
इत्तो वि अणंतगुणो रसो उ काऊइ नायव्वो ॥१२॥

जह परिणयंबगरसो पक्ककविट्ठस्स वा वि जारिसओ ।
इत्तो वि अणंतगुणो रसो उ तेऊए नायव्वो ॥१३॥

वरवारुणीइ व रसो विविहाण व आसवाण जारिसओ ।
महु-मेरयस्स व रसो इत्तो पम्हाइ परएणं ॥१४॥

खज्जूर-मुद्दियरसो खीररसो खंड-सक्कररसो वा ।
इत्तो वि अणंतगुणो रसो उ सुक्काइ नायव्वो ॥१५॥

आसां व्याख्या—'**यथे**ति सादृश्ये' ततो यादृक् **कटुकतुम्बकरसः, निम्बरसः,** कटुका चासौ रोहिणी च तरुविशेषत्वक् **कटुकरोहिणी तद्रसो वा, इतोऽपि** कटुक-तुम्बरसादे**रनन्तगुणो** रसास्वादः **कृष्णायाः** कृष्णलेश्याया **ज्ञातव्यो**ऽतिकटुक इत्यर्थः । १०। यथा यादृश**स्त्रिकटुकस्य** शुण्ठि-मिरिच-पिप्पलया **रसस्तीक्ष्णो यथा हस्तिपिप्पल्या** गजपिप्पल्या **वा** रसो**ऽतोऽप्यनन्तगुणो रसस्तु नीलाया** [**ज्ञातव्यः**] अतितीक्ष्ण इति भावः । ११। **यथा तरुणम**परिपक्वं यदाम्रक**माम्रफलं तद्रसः, तुवरं** सकषायमर्थादपक्वं यत् **कपित्थं** कपित्थफलं **तस्य वा** '**अपिः** पूरणे' **यादृशः** 'रस इति प्रक्रमः',

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अतोऽप्यनन्तगुणो रसस्तु कापोताया ज्ञातव्योऽतिकषाय इति हृदयम् । १२। **यथा परिणतं** परिपक्वं **यदाम्रकं तद्रसः, पक्वकपित्थस्यापि यादृशो** रसो**ऽतोऽप्यनन्तगुणो रसस्तु तैजस्या ज्ञातव्यो**ऽम्लः किञ्चिन् मधुरश्चेति तात्पर्यम् । १३। **वरवारुणी** प्रधानमदिरा **तस्या वा रसः, विविधानामासवानां** पुष्पप्रभवमद्यानां **यादृशको** रसः, मधु मद्यविशेषो मैरेयं सरकस्तयोः समाहारे **मधु-मैरेयं तस्य वा रसोऽतो** वरवारुणीरसात् **पद्मायाः** 'प्रक्रमाद् रसः' '**परकेण**'त्ति अनन्तगुणत्वात् तदतिक्रमेण 'वर्तते इति गम्यम्' अयं च किञ्चिदम्लकषायो मधुरश्चेति भावनीयम् । १४। **खर्जूरं** पिण्डखर्जूरादि, **मृद्वीका** द्राक्षा **एतद्रसस्तथा क्षीररसः, खण्डं** चेक्षुविकारः **शर्करा** च तत्प्रभवा **तद्रसो वा** 'यादृश इति शेषः' **अतोऽप्यनन्तगुणो रसस्तु शुक्लाया ज्ञातव्यो**ऽत्यन्तमधुरः । १५। इति गाथाषट्कार्थः ॥१०-१५॥

गन्धमाह—

जह गोमडस्स गंधो सुणगमडस्स व जहा अहिमडस्स ।
इत्तो वि अणंतगुणो लेसाणं अप्पसत्थाणं ॥१६॥

जह सुरहिकुसुमगंधो गंधवासाण पिस्समाणाणं ।
इत्तो वि अणंतगुणो पसत्थलेसाण तिण्हं पि ॥१७॥

अनयोर्व्याख्या—यथा गवां मृतकं मृतकशरीरं कलेवरं **तस्य गन्धः, श्वा** सारमेयं **तस्य मृतकस्य वा, यथाऽहिः सर्पस्तन्मृतकस्य** 'गन्ध इति सम्बन्धः' 'सूत्रत्वान्मृतक-शब्दे कलोपः' । अतोऽप्येतत्प्रकारादपि गन्धा**दनन्तगुणो**ऽतिदुर्गन्धितया **लेश्यानाम**-प्रशस्तानामशुभानां कृष्ण-नील-कापोतानां 'गन्ध इति प्रक्रमः' । इह लेश्यानामप्रशस्तत्वं गन्धाद्यशुभत्वादिति ॥ **यथा** सुरभिकुसुमानां जाति—चम्पकादीनां पुष्पाणां गन्धः **सुरभि-कुसुमगन्धः**, तथा गन्धाश्च कोष्ठपुटपाकनिष्पन्ना वासाश्चेतरे **गन्धवासास्तेषां पिष्यमाणानां** चूर्ण्यमानानां वा यथा गन्धो**ऽतोऽप्ये**वंविधादपि गन्धा**दनन्तगुणो**ऽतिसुगन्धितया **प्रशस्त-लेश्यानां तिसृणामपि** तैजसी-पद्म-शुक्लानां 'गन्ध इति प्रक्रमः' । इहापि प्रशस्तत्वं गन्धस्य शुभत्वादिति गाथाद्वयार्थः ॥१६-१७॥

स्पर्शमाह—

जह करगयस्स फासो गोजिब्भाए य सागपत्ताणं ।
इत्तो वि अणंतगुणो लेसाणं अप्पसत्थाणं ॥१८॥

जह बूरस्स वि फासो नवणीयस्स व सिरीसकुसुमाणं ।
इत्तो वि अणंतगुणो पसत्थलेसाण तिण्हं पि ॥१९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अनयोर्व्याख्या—यथा क्रकचस्य करपत्रस्य **स्पर्शः**, गोर्जिह्वा **गोजिह्वा तस्याः**, तथा **शाको** वृक्षविशेषस्**तत्पत्राणां** 'स्पर्श इति प्रक्रमः' **अतोऽप्येत**त्प्रकारादपि स्पर्शाद**नन्तगुणो**ऽतिशायितया यथाक्रममाद्यानां तिसृणां **लेश्यानामप्रशस्तानां** स्पर्शोऽतिकर्कश इति हृदयम् ॥ **यथा बूरस्य** वनस्पतिविशेषस्य **स्पर्शः, नवनीतस्य** म्रक्षणस्य, यथा वा **शिरीषकुसुमानां** स्पर्शो**ऽतोऽपि** स्पर्शा**दनन्तगुणो**ऽतिसुकुमारतया यथाक्रमं **प्रशस्तलेश्यानां तिसृणामप्यन्**त्यानां 'स्पर्श इति प्रक्रमः' ॥ इहोक्तेषु दृष्टान्तेषु यथा वर्णादितारतम्यं तथा लेश्यानां स्वस्थानेऽपि वर्णादिवैचित्र्यं ज्ञेयमिति गाथाद्वयार्थः ॥१८-१९॥

परिणाममाह—

तिविहो व नवविहो वा सत्तावीसइविहेक्कसीओ वा ।
दुसओ तेयालो वा लेसाणं होइ परिणामो ॥२०॥

व्याख्या—त्रिविधो नवविधो वा सप्तविंशतिविधो वा 'विधशब्दस्य सम्बन्धाद्' **एकाशीतिविधो वा त्रिचत्वारिंशदधिकद्विशतविधो वा लेश्यानां भवति परिणाम**स्तत्तद्रूपगमनात्मकः । इह च त्रिविधो जघन्य-मध्यमोत्कृष्टभेदेन, नवविधो यदेषामपि जघन्यादीनां स्वस्थानतारतम्यचिन्तायां प्रत्येकं जघन्यादित्रयेण गुणनात् । एवं पुनः पुनस्त्रिकगुणनया सप्तविंशतिविधत्वमेकाशीतिविधत्वं त्रिचत्वारिंशदधिकद्विशतविधत्वं च भावनीयम् । उपलक्षणं चैतद्, एवं तारतम्यचिन्तायां सङ्ख्यानियमस्याभावात्, बहु-बहुविधभेदत्वादेतत्सङ्ख्यानाञ्च । तथा च प्रज्ञापना—"[1]**किण्हलेसा णं भंते ! कतिविधं परिणामं परिणमति ? गोयमा ! तिविहं वा नवविहं वा सत्तावीसइविहं वा इक्कासीइविहं वा तेयालब्भहियदुसयविहं वा बहुं वा बहुविहं वा परिणामं परिणमति । एवं जाव सुक्कलेसा**" इति ॥२०॥

कृष्णलेश्यालक्षणमाह—

पंचासवप्पवत्तो तीहिं अगुत्तो छसु अविरओ य ।
तिव्वारंभपरिणओ खुद्दो साहस्सिओ नरो ॥२१॥
निद्धंधसपरिणामो निस्संसो अजिइंदिओ ।
एयजोगसमाउत्तो किण्हलेसं तु परिणमे ॥२२॥

---

१. कृष्णलेश्या भदन्त ! कतिविधं परिणामं परिणमति ? गौतम ! त्रिविधं वा नवविधं वा सप्तविंशतिविधं वा एकाशीतिविधं वा त्रिचत्वारिंशदभ्यधिकद्विशतविधं वा बहुं वा बहुविधं वा परिणामं परिणमति । एवं यावत् शुक्ललेश्या ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अनयोर्व्याख्या—पञ्चाश्रवा हिंसादयस्तत्र **प्रवृत्तः** । **त्रिभिः** 'प्रस्तावान्मनो—वाक्—कायैः' **अगुप्तो**ऽनियन्त्रितो मनोगुप्त्यादिरहित इत्यर्थः । **षट्सु** पृथिवीकायादिष्व—**विरतो**ऽनिवृत्तः 'तदुपमर्दकत्वादेरिति गम्यम्' । **तीव्रा** उत्कटा **आरम्भाः** सावद्यव्यापारा—**स्तत्परिणतः** तदात्मतां गतः । **क्षुद्रः** सर्वेषामहितैषी कृपणो वा । सहसा गुण—दोषानविचार्य प्रवर्तते इति **साहसिकश्चौ**रादिवदित्यर्थः । **नरः** पुमान् 'उपलक्षणत्वात् स्त्र्यादिर्वा' ॥ **निद्धंधसो**ऽत्यन्तमैहिकामुष्मिकाषायशङ्काविकलः **परिणामो**ऽध्यवसायो यस्य **स** तथा । 'निस्संसो'त्ति **नृशंसो** निस्तृंशो जीवान् हिंसन् न मनागपि शङ्कते । **अजितेन्द्रियः** । एते च योगाश्च काय-वाग्-मनोव्यापार **एतद्योगाः** पञ्चाश्रवप्रवृत्तत्वादयस्तैः **समायुक्तः कृष्णलेश्यामेव 'तुरेवार्थे' परिणमेत्** तद्‌द्रव्यसाचिव्येन, तथाविधद्रव्य-सम्पर्कात् स्फटिकवत् तदुपरञ्जनात् तद्रूपतां भजेत् । उक्तं हि—

"कृष्णादिद्रव्यसाचिव्यात् परिणामो य आत्मनः ।
स्फटिकस्येव तत्रायं लेश्याशब्दः प्रयुज्यते" ॥१॥

एतेन पञ्चाश्रवप्रवृत्तादीनां भावे एव कृष्णलेश्यायाः सद्भावोपदर्शनादमीषां लक्षणत्वमुक्तम् । यो हि यत्सद्भावे भवति स तस्य लक्षणम्, यथौष्ण्यमग्नेः । एवमुत्तरत्रापि लक्षणत्वभावना कार्या । इति गाथाद्वयार्थः ॥२१-२२॥

नीललेश्यालक्षणमाह—

ईसा-अमरिस-अतवो अविज्ज माया अहीरिया ।
गिद्धी पओसे य सढे पमत्ते रसलोलुए ॥२३॥
सायगवेसए य आरंभाविरओ खुद्दो साहस्सिओ नरो ।
एयजोगसमाउत्तो नीललेसं तु परिणमे ॥२४॥

अनयोर्व्याख्या—ईर्ष्या परगुणासहनम् । **अमर्षश्चा**त्यन्ताभिनिवेशः । **अतपश्च** तपोविपर्ययः'अमीषां समाहारः' । 'अविज्ज'त्ति **अविद्या** कुशास्त्ररूपा । **माया** वञ्चनात्मिका । **अह्रीकता** चासदाचारविषया निर्लज्जता । **गृद्धिर**भिकाङ्क्षा 'विषयेष्विति गम्यते' । **प्रदोषश्च** प्रद्वेषः । मत्वर्थीयलोपादभेदोपचाराद् वा सर्वत्र तद्वान् जन्तुरेव ज्ञेयः । अत एव **शठो**ऽलीकभाषी । **प्रमत्तः** प्रकर्षेण जात्यादिमदावलिप्तः । तथा **रसलोलुपो** रसलम्पटः ॥ **सातं** सुखं **तद्‌गवेषकश्च** कथं मम सुखं स्यादिति बुद्धिमान् । **आरम्भात्** प्राण्युपमर्दादा**वविरतो**ऽनिवृत्तः । तथा **क्षुद्रः** सकपटी । **साहसिकः** साहसवान् । **एतद्योगसमायुक्तो** नरः स्त्री वा **नीललेश्यां** तु **परिणमे**दिति गाथायुग्मार्थः ॥२३-२४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कापोतलेश्यालक्षणमाह—

वंके वंकसमायारे नियडिल्ले अणुज्जुए ।
पलिउंचग ओवहिए मिच्छद्दिट्ठी अणारिए ॥२५॥
उप्पासगदुट्ठवाई य तेणे यावि य मच्छरी ।
एयजोगसमाउत्तो काउलेसं तु परिणमे ॥२६॥

अनयोर्व्याख्या—वक्रो वचसा, **वक्रसमाचारः** क्रियया, **निकृतिः** शाठ्यं **तद्वान्** मनसा, **अनृजुकः** कथञ्चिद् ऋजूकर्तुमशक्यतया, 'पलिउंचग'त्ति **प्रतिकुञ्चकः** स्वदोष-प्रच्छादकतया, उपधिना छद्मना चरत्यौ**पधिकः** सर्वत्र व्याजतः प्रवृत्तेः, एकार्थिकानि वैतानि नानादेशजशिष्यानुग्रहायोपात्तानि । **मिथ्यादृष्टिरनार्यः** प्राग्वत् ॥ 'उप्पासग'त्ति उत्प्रासकं यथा उत्प्रास्यते, दुष्टं च रागादिदोषवद् यथा स्यादित्येवंवदनशील **उत्प्रासक-दुष्टवादी**, '**चः** समुच्चये' **स्तेनश्चौरः**, '**अपि चे**ति पूरणे' मत्सरः परसम्पदसहनं स विद्यतेऽस्येति **मत्सरी** । **एतद्योगसमायुक्तः कापोतलेश्यां परिणमेत्** '**तुः** पुनः' इति सूत्रद्वयार्थः ॥२५-२६॥

तेजोलेश्यालक्षणमाह—

नीयावत्ती अचवले अमाई अकुतूहले ।
विणीयविणए दंते जोगवं उवहाणवं ॥२७॥
पियधम्मे दढधम्मेऽवज्जभीरू हिएसए ।
एयजोगसमाउत्तो तेउलेसं तु परिणमे ॥२८॥

अनयोर्व्याख्या—नीचैर्वृत्तिः काय-मनो-वाग्भिरनुत्सिक्तो**ऽचपलोऽमायी । अकुतूहलः** कुहुकादिष्वकौतुकवान् । **विनीतविनयः** कृतगुर्वाद्युचितप्रतिपत्तिः । **दान्त** इन्द्रिय-नोइन्द्रियदमेन । **योगः** स्वाध्यायादिव्यापारस्त**द्वान्** । **उपधानं** श्रुतोपचारस्तद्वान् । **प्रियधर्मा**ऽभीष्टधर्मानुष्ठानो **दृढधर्मा**ऽङ्गीकृतव्रतादिनिर्वाहकः । यतो**ऽवद्यभीरुः** पापभीरुः पापभीलको **हितैषको** मुक्ति-गवेषकः । **एतद्योगसमायुक्तः तेजोलेश्यां तु परिणमे**दिति गाथायुगलार्थः ॥२७-२८॥

पद्मलेश्यालक्षणमाह—

पयणुक्कोह-माणे य मायालोभे य पयणुए ।
पसंतचित्ते दंतप्पा जोगवं उवहाणवं ॥२९॥
तहा य पयणुवाई य उवसंते जिइंदिए ।
एयजोयसमाउत्तो पम्हलेसं तु परिणमे ॥३०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अनयोर्व्याख्या–प्रतनू अतीवाल्पौ **क्रोध-मानौ** यस्य स तथा । **माया लोभश्च प्रतनुकौ** 'यस्येति शेषः' । **प्रशान्तं** प्रशमवच्चित्तं यस्य **स** तथा । **दान्तो**ऽहितप्रवृत्ति-निवारकत्वेन वशीकृत **आत्मा** येन स तथा । शेषं प्राग्वत् ॥ **तथा प्रतनुवादी** स्वल्पभाषकः । **'चो**ऽग्रे योक्ष्यते' **उपशान्तो** जितेन्द्रियश्च । **एतद्योगसमायुक्तः पद्मलेश्यां तु परिणमेदि**ति सूत्रयुग्मार्थः ॥२९-३०॥

शुक्ललेश्यालक्षणमाह–

अट्ट-रुद्दाणि वज्जित्ता धम्म-सुक्काणि झायए ।
पसंतचित्ते दंतप्पा समिए गुत्ते य गुत्तिसु ॥३१॥

सरागे वीयरागे वा उवसंते जिइंदिए ।
एयजोगसमाउत्तो सुक्कलेसं तु परिणमे ॥३२॥

अनयोर्व्याख्या–आर्त–रौद्रध्याने वर्जयित्वा धर्म–शुक्ले शुभध्याने **ध्यायेद्** । **प्रशान्तचित्तो दान्तात्मेति** च पूर्ववत् । **समितः** पञ्चभिः समितिभिः । **गुप्तश्च** निरुद्धसर्वात्मव्यापारो **गुप्तिभिर्मनोगुप्त्यादिभिः** 'तृतीयाऽर्थे सप्तमी' ॥ स च **सरागो-**ऽक्षीणानुपशान्तकषायः, **वीतरागस्ततो**ऽन्यः । **उपशान्तो जितेन्द्रियश्च** प्राग्वत् । **एतद्योगसमायुक्तः शुक्ललेश्यां तु परिणमेत्** । इह च शुभलेश्यासु केषाञ्चिद् विशेषणानां पुनर्ग्रहणेऽपि लेश्यान्तरविषयत्वान्न पौनरुक्त्यम्, पूर्वपूर्वापेक्षयोत्तरोत्तरेषां विशुद्धितः प्रकृष्टत्वं भावनीयम्। विशिष्टलेश्याश्चापेक्ष्यैवं लक्षणाभिधानमिति न देवादिभिर्व्यभिचारः । अत्र लेश्यालक्षणेषु दृष्टान्तः–

क्वचिज्जम्बूतरुदृष्टः षड्भिः पुम्भिः क्षुधालुभिः ।
महान् पक्वफलाकीर्णस्तत्फलानि बुभुक्षुभिः ॥१॥

तेष्वेकः प्रोचिवानेनं मूलाच्छित्त्वा प्रपात्य च ।
फलान्यद्मः सुखेनैव, द्वैतीयीकोऽवदत् किल ॥२॥

छिन्नेन तरुणा किं ते कार्यम् ? शाखा महत्तमाः ।
छित्त्वाऽऽस्वाद्य फलव्यूहं भविष्यामः सुतृप्तिकाः ॥३॥

तार्तीयीकोऽब्रवीदेवं प्रशाखाभ्यः क्षुधाशमः ।
कार्यस्तुर्योऽवदद् गुच्छा ग्राह्याः स्वोदरपूरकाः ॥४॥

पञ्चमोऽवददात्रोट्य फलौघ इह खाद्यते ।
षष्ठोऽवक् पतितैस्तैस्तु भवितास्मः क्षुधाच्छिदः ॥५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

दृष्टान्तोपनयश्चैवं यस्तरुच्छेदकः स तु ।
कृष्णलेश्यो महाशाकाच्छेत्ताऽसौ नीललेश्यकः ॥६॥
प्रशाखाच्छित् स कापोती गुच्छच्छेत्ता स तैजसः ।
पद्मलेश्यः फलत्रोटी शुक्लः पतितभक्षकः ॥७॥

॥ इति षड्लेश्याज्ञापकोदाहरणम् ॥३१-३२॥

असंखिज्जाणोसप्पिणीण उस्सप्पिणीण जे समया ।
संखाईया लोगा लेसाण हवंति ठाणाइं ॥३३॥

व्याख्या—असङ्ख्येयानामवसर्पिणीनामत्सर्पिणीनां च ये समयाः । कियन्तः ? इत्याह—**सङ्ख्यातीता लोकाः** । कोऽर्थः ? असङ्ख्येयलोकाकाशप्रदेश-परिमाणानि **लेश्यानां भवन्ति स्थानानि** प्रकर्षापकर्षकृतानि, अशुभानां सङ्क्लेशरूपाणि, शुभानां च विशुद्धिरूपाणि 'तत्प्रमाणानीति शेषः' ॥३३॥

स्थितिमाह—

मुहुत्तद्धं तु जहन्ना तित्तीसा सागरा मुहुत्तहिया ।
उक्कोसा होइ ठिई नायव्वा किण्हलेसाए ॥३४॥

मुहुत्तद्धं तु जहन्ना दस उदही पलियमसंखभागमब्भहिया ।
उक्कोसा होइ ठिई नायव्वा नीललेसाए ॥३५॥

मुहुत्तद्धं तु जहन्ना तिण्णुदही पलियमसंखभागमब्भहिया ।
उक्कोसा होइ ठिई नायव्वा काउलेसाए ॥३६॥

मुहुत्तद्धं तु जहन्ना दोन्नुदही पलियमसंखभागमब्भहिया ।
उक्कोसा होइ ठिई नायव्वा तेउलेसाए ॥३७॥

मुहुत्तद्धं तु जहन्ना दस उदही हुंति मुहुत्तमब्भहिया ।
उक्कोसा होइ ठिई नायव्वा पम्हलेसाए ॥३८॥

मुहुत्तद्धं तु जहन्ना तित्तीसं सागरा मुहुत्तहिया ।
उक्कोसा होइ ठिई नायव्वा सुक्कलेसाए ॥३९॥

आसां व्याख्या—मुहूर्तस्यार्धो **मुहूर्तार्धस्तं** 'कालात्यन्तसंयोगे द्वितीया' '**तुरेवार्थे**' अन्तर्मुहूर्तमेव **जघन्या, त्रयस्त्रिंशत् सागरोपमाणि मुहूर्ताधिकान्युत्कृष्टा स्थितिः कृष्ण-**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

लेश्यायाः । इहोत्तरत्र च समप्रविभागलक्षणस्यार्धशब्दार्थस्याविवक्षितत्वान्मुहूर्तार्धशब्देनान्तर्मुहूर्तमेव ज्ञेयम् । मुहूर्तशब्देन च पूर्वोत्तरसम्भवसम्बन्ध्यन्तर्मुहूर्तद्वयं द्रष्टव्यम् ॥ **मुहूर्तार्धं तु जघन्या, दशेति** दशसङ्ख्यानि **उदधय** इत्युदध्युपमानि सागरोपमाणीत्यर्थः । **पल्योपमासङ्ख्येयभागाभ्यधिकान्युत्कृष्टा भवति स्थितिर्नीललेश्यायाः** । इह पूर्वोत्तरभवान्तर्मुहूर्तद्वयप्रक्षेपेऽपि पल्योपमासङ्ख्येयभाग एव । असङ्ख्येयभागानामसङ्ख्येयभेदत्वादिति भावः । एवमुत्तरत्रापि भावनीयम् ॥ उत्तरसूत्रेष्वक्षरसंस्कारस्तु कृत एव, नवरं **त्रय उदधयः** सागरोपमाणि ॥ **द्वावुदधी** द्वे सागरोपमे ॥ **दशोदधयो** दश सागरोपमामि ॥ **मुहूर्ताऽर्धं तु जघन्या, त्रयस्त्रिंशत् सागरोपमाणि मुहूर्ताधिकानि** । मुहूर्तार्धशब्देनान्तमुहूर्तकालमेव प्राग्वत् । इति गाथाषट्कार्थः ॥३४-३९॥

पूर्वोक्तमुपसंहरन्नुत्तरग्रन्थसम्बन्धमाह—

एसा खलु लेसाणं ओहेण ठिई उ वन्निया होइ ।
चउसु वि गईसु इत्तो लेसाण ठिई उ वुच्छामि ॥४०॥

व्याख्या—स्पष्टा । नवर**मोघेन** सामान्येन गत्यविवक्षयेत्यर्थः । **चतसृष्वपि गतिषु** नरकादिषु 'प्रत्येकमिति शेषः' । **अत** ओघस्थित्यनन्तरं **लेश्यानां स्थितीर्वक्ष्ये** ॥४०॥

तामेवाह—

दस वाससहस्साइं काऊए ठिई जहन्निया होइ ।
तिन्नुदही पलियमसंखभागं च उक्कोसा ॥४१॥

तिण्णुदही पलियमसंखभागो उ जहन्न नीलठिई ।
दस उदही पलियवमसंखभागं च उक्कोसा ॥४२॥

दस उदही पलियमसंखभागं जहन्निया होइ ।
तित्तीससागराइं उक्कोसा होइ किण्हाए ॥४३॥

आसां व्याख्या—दश वर्षसहस्त्राणि कापोतायाः स्थितिर्जघन्यिका भवति, त्रय उदधयः सागरोपमाणि पल्योपमासङ्ख्येयभागश्चोत्कृष्टा । इयं च जघन्या रत्नप्रभायाः, तस्यां जघन्यतो दशवर्षसहस्त्रायुष्ट्वात् । उत्कृष्टा च वालुकाप्रभोपरितनप्रस्तटनारकाणामेतावत्स्थितिकानामिति ॥ **त्रय उदधयः पल्योपमासङ्ख्येयभागश्च** 'मकारोऽलाक्षणिकः' **जघन्या स्थितिर्नीलाया** वालुकायामेतावत्स्थितिकानामेव । **उत्कृष्टा च दशोदधयः पल्योपमासङ्ख्येयभागश्च** धूमप्रभोपरितनप्रस्तटनारकाणामेतावत्स्थितीनाम् ॥ **दशोदधयः पल्योपमासङ्ख्येयभागश्च जघन्यिका भवति** स्थितिर्धूमप्रभाया-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मेतावत्स्थितिकानामेव । **त्रयस्त्रिंशत् सागरोपमाण्युत्कृष्टा भवति कृष्णायाः** 'स्थितिरिति प्रक्रमः' । इयं च महातमःप्रभायामेतावदायुषामेव । इह च नारकाणामुत्तरत्र देवानां द्रव्यलेश्यास्थितिरेवैवं चिन्त्यते, तद्भावलेश्यानां परिवर्तमानतयाऽन्यथाऽपि स्थितेः सम्भवात् । उक्तं हि—

> "[1]देवाण णारयाण य दव्वलेसा हवंति एयाओ ।
> भावपरावत्तीए सुरः णेरइयाण छल्लेसा" ॥१॥

इति गाथात्रयार्थः ॥४१-४३॥

पूर्वोक्तं निगमयन्नुत्तरग्रन्थं प्रस्तावयन्नाह—

> **एसा नेरइयाणं लेसाणं ठिई उ वन्निया होइ ।**
> **तेण परं वुच्छामि तिरिय-मणुस्साण देवाणं ॥४४॥**

व्याख्या—स्पष्टा, नवरं 'तेण परं'ति **ततः परम्** ॥४४॥

प्रतिज्ञातमेवाह—

> **अंतोमुहुत्तमद्धं लेसाण ठिई जहिं जहिं जा उ ।**
> **तिरियाण नराणं वा वज्जित्ता केवलं लेसं ॥४५॥**

व्याख्या—अन्तर्मुहूर्ताद्धा अन्तर्मुहूर्तकालं **लेश्यानां स्थितिः** 'जघन्योत्कृष्टा चेति शेषः' । कासाम् ? इत्याह—**यस्मिन् यस्मिन्निति** पृथ्वीकायादौ सम्मूर्छितमनुष्यादौ च **याः** कृष्णाद्याः '**तुः** पूरणे' **तिरश्चां मनुष्याणां च** मध्ये सम्भवन्ति । तत्र तासामेतावती स्थितिरित्यर्थः । ननु शुक्लाया अपि किमेवं स्थितिः ? न, इत्याह—**वर्जयित्वा केवलां शुद्धां** शुक्ललेश्यामित्यर्थः ॥४५॥

अस्याः स्थितिमाह—

> **मुहुत्तद्धं तु जहन्ना उक्कोसा होइ पुव्वकोडी उ ।**
> **नवहिं वरिसेहिं ऊणा नायव्वा सुक्कलेसाए ॥४६॥**

व्याख्या—मुहूर्तार्धं प्राग्वदन्तर्मुहूर्त**मेव जघन्या । उत्कृष्टा भवति पूर्वकोटी** 'तुर्विशेषणे' को विशेषः ? इत्याह—**नवभिर्वर्षैर्न्यूना ज्ञातव्या शुक्ललेश्यायाः** 'स्थितिरिति प्रक्रमः' । इह पूर्वकोट्यायुषोऽष्टवार्षिकस्य व्रतपरिणामे सत्यपि न शुक्ल-लेश्यासम्भव इति नववर्षोनत्वमुक्तम् ॥४६॥

---

१. देवानां नारकाणां च द्रव्यलेश्या भवन्त्येताः ।
भावपरावृत्त्या सुर-नैरयिकाणां षड्लेश्याः ॥१॥

Jain Education International 2010_02   For Private & Personal Use Only   www.jainelibrary.org

एसा तिरियनराणं लेसाण ठिई उ वन्निया होइ ।
तेण परं वुच्छामि लेसाण ठिई उ देवाणं ॥४७॥

व्याख्या—सुगमा ॥४७॥

तत्स्थितिमाह—

दस वाससहस्साइं किण्हाए ठिई जहन्निया होइ ।
पलियमसंखिज्जइमो उक्कोसा होइ किण्हाए ॥४८॥

व्याख्या—दश वर्षसहस्राणि कृष्णायाः स्थितिर्जघन्यिका भवति । भवनपति-व्यन्तराणां जघन्यतोऽप्येतावत्स्थितिकानामेवास्याः सम्भवात् । **पल्योपमासङ्ख्येयतमः** 'प्रस्तावाद् भागश्च' **उत्कृष्टा भवति कृष्णायाः** 'स्थितिरिति [प्रक्रमः]' एवंविधविमध्यमायुषामेव भवनपति-व्यन्तराणामुत्कृष्टा द्रष्टव्या ॥४८॥

नीलायाः स्थितिमाह—

जा किण्हाइ ठिई खलु उक्कोसा सा उ समयमब्भहिया ।
जहन्नेणं नीलाए पलियमसंखं च उक्कोसा ॥४९॥

व्याख्या—या कृष्णायाः स्थितिः 'खलुरलङ्कारे' **उत्कृष्टा**ऽनन्तरोक्ता **सा तु** सैव **समयाभ्यधिका जघन्येन नीलायाः**, तेषां जघन्यतोऽप्येतावत्स्थितिकत्वात् । 'पलियमसंखं च'त्ति **पल्योपमासङ्ख्येयभागश्चोत्कृष्टा** स्थितिर्नवरं बृहत्तरोऽयं भागः ॥४९॥

जा नीलाइ ठिई खलु उक्कोसा सा उ समयमब्भहिया ।
जहन्नेणं काऊए पलियमसंखं च उक्कोसा ॥५०॥

व्याख्या—या नीलायाः स्थितिरुत्कृष्टा सैव समयाभ्यधिका जघन्येन कापोतायाः । पल्योपमासङ्ख्येयभागश्चोत्कृष्टस्थितिरेतावदायुषां भवनपति-व्यन्तराणामिहापि पूर्वस्माद् बृहत्तमा भागो ज्ञेयः ॥५०॥

इत्थं निकायद्वस्याद्यलेश्यात्रयमुक्त्वा चतुर्निकायसम्भाविनीं तेजोलेश्यास्थितिमाह—

तेण परं वोच्छामि तेऊलेसा जहा सुरगणाणं ।
भवणवइ-वाणमंतर-जोइस-वेमाणियाणं च ॥५१॥

व्याख्या—ततः परं प्रवक्ष्यामि तेजोलेश्यां यथा येनावस्थानप्रकारेण **सुरगणानां** भवति 'तथेत्युपस्कारः' । केषाम् ? इत्याह—**भवनपति-व्यन्तर-ज्योतिर्वैमानिकानाम्** '**चः** पूरणे' ॥५१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

प्रतिज्ञातमाह—

पलिओवमं जहन्ना उक्कोसा सागरा उ दुन्नहिया ।
पलियमसंखिज्जेणं होइ भागेण तेऊए ॥५२॥

व्याख्या—पल्योपमं जघन्या । तथोत्कृष्टा सागरे तु सागरोपमे **द्वे** द्विसङ्ख्ये **अधिके पल्योपमासङ्ख्येयेन भागेन भवति तैजस्या**स्तेजोलेश्यायाः 'स्थितिरिति प्रक्रमः'। इयं च सामान्योपक्रमेऽपि वैमानिकनिकायविषयतया नेया । तत्र सौधर्मेशान-देवानां जघन्योत्कृष्टाभ्यामेतावदायुषः सम्भवात् । उपलक्षणाच्छेषनिकायानामपि तेजोलेश्या स्थितिर्ज्ञेया ॥५२॥

दस वाससहस्साइं तेऊए ठिई जहन्निया होइ ।
दुन्नुदही पलिओवमअसंखभागं च उक्कोसा ॥५३॥

व्याख्या—स्पष्टा, नवरमनेन निकायभेदमनङ्गीकृत्यैव लेश्यास्थितिरुक्ता । **तैजस्या दशवर्षसहस्रात्मिका जघन्या स्थिति**र्भवनपति-व्यन्तराणाम् । उत्कृष्टा त्वीशाने एवेति ॥५३॥

पद्मायाः स्थितिमाह—

जा तेऊइ ठिई खलु उक्कोसा सा उ समयमब्भहिया ।
जहन्नेणं पम्हाए दस उ मुहुत्ताहियाइं उक्कोसा ॥५४॥

व्याख्या—या तैजस्याः स्थितिः खलूत्कृष्टा 'सा उ'त्ति 'तुरेवार्थे' **सैव समयाधिका जघन्येन पद्मायाः** 'स्थितिरिति प्रक्रमः' । **दशैव** 'प्रस्तावात् सागरोपमाणि' **मुहूर्ताधिकान्युत्कृष्टा** । इयं च जघन्या सनत्कुमारे, उत्कृष्टा च ब्रह्मलोके, अनयोरेवैतदा-युष्कसम्भवात् ॥५४॥

शुक्ललेश्यास्थितिमाह—

जा पम्हाइ ठिई खलु उक्कोसा सा उ समयमब्भहिया ।
जहन्नेणं सुक्काए तित्तीसमुहुत्तमब्भहिया ॥५५॥

व्याख्या—या पद्मायाः स्थितिः खलूत्कृष्टा सैव समयाभ्यधिका जघन्येन शुक्लायाः 'स्थितिरिति प्रक्रमः' । **त्रयस्त्रिंशन् मुहूर्ताभ्यधिकानि** सागरोपमाणि 'उत्कृष्टेति गम्यते' । अस्याश्च लान्तकाख्यषष्ठदेवलोकादारभ्य सर्वार्थसिद्धिं यावत् सम्भवादत्रैवैताव-दायुषो भाव इति कृत्वा ॥५५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

गतिद्वारमाह—

किण्हा नीला काऊ तिन्नि वि एयाओ अहम्मलेसाओ ।
एयाहिं तिहिं वि जीवो दुग्गइं उववज्जई ॥५६॥
तेऊ पम्हा सुक्का तिन्नि वि एयाओ धम्मलेसाओ ।
एयाहिं तिहिं वि जीवो सुग्गइं उववज्जई ॥५७॥

अनयोर्व्याख्या—कृष्णाद्यास्तिस्रो लेश्या **अधर्मलेश्या** पापोपादानहेतुत्वात्, **अधमलेश्या** वा अविशुद्धत्वेन । **एताभिस्तिसृभिर्लेश्याभिर्जीवो दुर्गतिं** नरक—तिर्यग्गति-रूपा**मुपपद्यते** 'धातूनामनेकार्थत्वात्' प्राप्नोति ॥ **तैजस्याद्यास्तिस्रोऽप्येता** लेश्या **धर्मलेश्या** विशुद्धत्वेनासां धर्महेतुत्वात् । अत **एवैताभिस्तिसृभिर्लेश्याभिर्जीवः सुगतिं** देवमनुष्यगतिलक्षणां **मुक्तिं वोपपद्यते** तथाविधायुर्बन्धत इति गाथाद्वयार्थः ॥५६-५७॥

ननु जन्मान्तरभाविलेश्यायाः किं प्रथमसमये परभवायुष उदयः ? उत चरमसमयेऽथान्यथा वा ? इत्याशङ्क्यायुर्द्वारावसर एव तदुत्तरमाह—

लेसाहिं सव्वाहिं पढमे समयंमि परिणयाहिं तु ।
न हु कस्सइ उववाओ परभवे अत्थि जीवस्स ॥५८॥
लेसाहिं सव्वाहिं चरमे समयंमि परिणयाहिं तु ।
न हु कस्स उववाओ परभवे अत्थि जीवस्स ॥५९॥

अनयोर्व्याख्या—सर्वाभिर्लेश्याभिः षड्भिरपि **प्रथमे समये** तत्प्रतिपत्ति-कालापेक्षया **परिणताभि**रात्मरूपतामापन्नाभिः '**तुः** पूरणे' 'न हु'त्ति **नैव कस्याप्युत्पत्तिः परभवेऽस्ति जीवस्य** ॥ [सर्वाभिः] **लेश्याभिश्चरमसमये**ऽन्त्यसमये **परिणताभिस्तु** 'न हु' **नैव कस्याप्युत्पत्तिः परभवे भवति जीवस्य** ॥५८-५९॥

कदा तर्हि ? इत्याह—

अंतोमुहत्तंमि गए अंतमुहुत्तंमि सेसए चेव ।
लेसाहिं परिणयाहिं जीवा गच्छंति परलोयं ॥६०॥

व्याख्या—अन्तर्मुहूर्ते गते एवातिक्रान्ते, तथा**ऽन्तर्मुहूर्ते शेषके चैवा**वतिष्ठमाने एव, **लेश्याभिः परिणताभि**रुपलक्षिता **जीवा गच्छन्ति परलोकं** भवान्तरम् । इत्थं चैतत्, मृतिकाले भाविभवलेश्यायाः, उत्पत्तिकाले चातीतभवलेश्याया अन्तर्मुहूर्तमवश्यम्भावात् । न चैतदन्यथा, नर-तिरश्चां देव-तिरश्चां देव-नारकेषूत्पत्स्यमानानां मृतिकालेऽन्त-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मुहूर्तमुत्तरभवलेश्यायाः सद्भावात् । देवानां नारकाणां च च्यवनानन्तरं नर-तिर्यक्षूत्पन्नानां प्राग्भवलेश्यायास्तावत्कालमवस्थिततत्वात् । उक्तं च—

"[1]तिरि नर आगामिभवलेसाए अइगए सुरा निरया ।
पुव्वभवलेससेसे अंतमुहुत्ते मरणमिंति" ॥१॥

अत एव देव-नारकाणां लेश्यायाः प्रागुत्तरभवान्तर्मुहूर्तद्वयसहितनिजायुःकालं यावदवस्थित्वमुक्तमागमे । तथा च प्रज्ञापनासूत्रम्—"[2]**जल्लेसाइं दव्वाइं आयइत्ता कालं करेइ, तल्लेसेसु उववज्जइ । तथा कण्हलेसे नेरइए उववज्जति, कण्हलेसे उव्वट्टइ**" ॥ इत्यादि । देवालापकोऽप्येवम् । अनेनान्तर्मुहूर्तावशेषे आयुषि परभवलेश्यापरिणाम इति भावः ॥६०॥

सम्प्रत्यध्ययनार्थमुपसंजिहीर्षुराह—

तम्हा एयासि लेसाणं अणुभागे वियाणिया ।
अप्पसत्थाओ वज्जित्ता पसत्थाओ अहिट्ठिए मुणि ॥६१॥
त्ति बेमि ॥

व्याख्या—यस्मादप्रशस्ता एता दुर्गतिहेतवः प्रशस्ताश्च सुगतिहेतवः । **तस्मादेतासाम**नन्तरमुक्तानां **लेश्यानामनुभागं विज्ञायाप्रशस्ताः** कृष्णाद्यास्तिस्रो **वर्जयित्वा प्रशस्तास्**तैजस्याद्यास्तिस्रो**ऽधितिष्ठेत** भावप्रतिपत्त्याश्रयेन्**मुनिरि**ति **ब्रवीमी**ति प्राग्वत् ॥६१॥ ग्रं० २६९ अ० १६॥

इति श्रीकमलसंयमोपाध्यायविरचितायां सर्वार्थसिद्धौ श्रीउत्तराध्ययनटीकायां चतुस्त्रिंशं लेश्याध्ययनं समाप्तम् ॥३४॥

● ● ●

---

१. तिर्यञ्चो नरा आगामिभवलेश्याया अतिगते, सुरा नैरयिकाः ।
पूर्वभवलेश्याशेषेऽन्तर्मुहूर्ते मरणं यान्ति ॥१॥

२. यल्लेश्यानि द्रव्याण्यादाय कालं करोति, तल्लेश्येषूपपद्यते ।
तथा कृष्णलेश्यो नैरयिक उपपद्यते, कृष्णलेश्य उद्वर्तते ॥२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पञ्चत्रिंशमनगारगतिनामकाध्ययनम्

अनन्तराध्ययने लेश्या उक्तास्ताश्चाप्रशस्तास्त्याज्याः, प्रशस्ताश्चाधिष्ठातव्याः । एतच्च भिक्षुगुणवतैव कर्तुं शक्यमिति भिक्षुगुणाभिधायकं पञ्चत्रिंशमध्ययनमारभ्यते—

सुणेह मे एगग्गमणे(णा) मग्गं बुद्धेहिं देसियं ।
जमायरंतो भिक्खू दुक्खाणंतकरो भवे ॥१॥

व्याख्या—शृणुत 'मे' **मम** 'कथयत इति शेषः' **एकाग्रमनसः** 'शिष्या इति शेषः' । किम् ? इत्याह—**मार्गं** 'प्रक्रमान्मुक्तेः' **बुद्धै**रवगतसम्यक्तत्वैरर्हादादिभिरर्थतः, सूत्रतो गणधरादिभि**र्देशितम्** । **यं** मार्ग**माचरन्**नासेवमानो **भिक्षु**रनगारो **दुःखानां** मानसादीनामन्तः पर्यन्तस्तत्करणशीलो**ऽन्तकरो भवेत्** सर्वकर्मनिर्मूलनादिति भावः ॥१॥

यथाप्रतिज्ञातमाह—

गिहवासं परिच्चवज्ज पव्वज्जामस्सिए मुणी ।
इमे संगे वियाणिज्जा जेहिं सज्जंति माणवा ॥२॥

तहेव हिंसं अलियं चोज्जं अब्बंभसेवणं ।
इच्छा कामं च लोहं च संजओ परिवज्जए ॥३॥

अनयोर्व्याख्या—गृहवासं गृहावस्थानं **परित्यज्य प्रव्रज्यां** सर्वसङ्गत्यागलक्षणां दीक्षा**माश्रितो मुनिरिमान्** प्रत्यक्षान् **सङ्गान्** पुत्रादिप्रतिबन्धान् **विजानीयाद्** भवहेतवोऽमीति विशेषेणावबुध्येत । ज्ञानस्य विरतिफलत्वात् प्रत्याचक्षीतेत्युक्तं स्यात् । सङ्गस्वरूपमाह—'जेहिं'ति 'सुब्व्यत्ययाद्' **येषु सज्यन्ते** प्रतिबध्यन्ते **मानवाः** 'उपलक्षणत्वादन्येऽपि जीवाः' ॥ **तथैव हिंसां** प्राणनाशम्, **अलीकं**, **चौर्यं** च स्पष्टम्, **अब्रह्मसेवनं** मैथुनाचरणम्, **इच्छा, काम**मप्राप्तवस्तुकाङ्क्षारूपम्, **लोभं च** लब्धवस्तुगृद्ध्यात्मकमनेनोभयेनापि परिग्रह उक्तस्तं च **संयतो** यतिः **परिवर्जयेत्** । अनेन मूलगुणा उक्ताः । इति गाथाद्वयार्थः ॥२-३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अथोपाश्रयाचारविधिमाह—

मणोहरं चित्तघरं मल्लधूवेण वासियं ।
सकवाडं पंडुरुल्लोयं मणसा वि न पत्थए ॥४॥

व्याख्या—मनोहरं चित्ताक्षेपकम्, चित्रप्रधानं गृहं **चित्रगृहम्**, कीदृशं ? **माल्यै**-र्ग्रथितपुष्पै**र्धूपनै**श्चागुरु-तुरुष्कादिभि**र्वासितं** सुरभीकृतम्, सह कपाटेन वर्तत इति **सकपाटम्**, तदपि **पाण्डुरोल्लोचं** श्वेतचन्द्रोदयं **मनसाऽप्या**स्तां वचसा **न प्रार्थयेन्ना**-भिलषेत् किं पुनस्तत्र तिष्ठेदिति भावः ॥४॥

कुतः ? इत्याह—

इंदियाणि उ भिक्खुस्स तारिसंमि उवस्सए ।
दुक्कराइं निवारेउं (तु धारेउं) कामरागविवड्ढणे ॥५॥

व्याख्या—इन्द्रियाणि 'तुः' यस्माद् **भिक्षोर्यतेस्तादृशे उपाश्रये दुष्कराणि** 'करोतेः सर्वधात्वर्थत्वाद्' दुःशकानि 'तुरेवार्थे' **निवारयितुं** नियन्त्रयितुं 'स्वस्वविषय-प्रवृत्तेरिति गम्यते' किम्भूते ? **कामा** मनोज्ञा इन्द्रियविषयास्**तेषु रागस्तस्य विवर्धने** । तथा च तथाविधचित्तव्याक्षेपसम्भवान्मूलगुणस्यातीचारदोषसम्भव इत्युपदेश इति भावः ॥५॥

तर्हि कीदृशे स्थेयम् ? इत्याह—

सुसाणे सुन्नगारे वा रुक्खमूले व एगओ ।
पइरिक्के परकडे वा वासं तत्थाभिरोयए ॥६॥

फासुयंमि अणाबाहे इत्थीहिं अणभिद्दुए ।
तत्थ संकप्पए वासं भिक्खू परमसंजए ॥७॥

अनयोर्व्याख्या—श्मशाने शून्यागारे वा वृक्षमूले वा 'एगाउ' त्ति **एकको** राग-द्वेषरहितोऽसहायो वा । 'पइरिक्के'त्ति देशीभाष**यैकान्ते** स्त्र्याद्यसङ्कुले **परकृते** परैरन्यैर्निष्पादिते 'स्वार्थमिति गम्यम्' । **वासम**वस्थानं **तत्र** श्मशानादा**वभिरोचयेत्** प्रतिभासयेद् 'अर्थादात्मन' 'भिक्षुरिति योगः' ॥ **प्रासुके**ऽचित्तीभूते भूभागे**ऽनाबाधे** स्वस्य परेषां च बाधारहिते स्त्री-पण्डकादिभि**रनभिद्रुते** तदुपद्रवरहिते **तत्र** प्रागुक्तश्मशानादौ **सङ्कल्पयेत्** सम्यक् कुर्याद् **वासम**वस्थानं **भिक्षुः** । स च शाक्यादिरपि स्यादत आह—**परमसंयतो** मोक्षोद्यतोऽर्हन्मार्गाश्रित इति । प्रागभिरोचयेदित्युक्ते कश्चिद् रुचिमात्रेणैव तुष्येदित्यत्र सङ्कल्पयेत् कुर्यादित्युक्तम् ॥६-७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

परकृत इति किमुक्तम् ? अत आह—

न सयं गिहाइं कुव्विज्जा नेव अन्नेहिं कारए ।
गिहकम्मसमारंभे भूयाणं दिस्सए वहो ॥८॥

व्याख्या—न स्वयं गृहाणि कुर्वीत । नैवान्यैर्गृहस्थादिभिः **कारयेद्** 'उपलक्षणत्वान्नापि कुर्वन्तमनुमन्येत' । यतो **गृहकर्मे**ष्टका-मृदानयनादि तस्य **समारम्भस्तस्मिन् भूतानामे**केन्द्रियादीनां **दृश्यते वधो** विनाशः ॥८॥

पुनः केषाम् ? इत्याह—

तसाणं थावराणं च सुहुमाणं बायराण य ।
तम्हा गिहसमारंभं संजओ परिवज्जए ॥९॥

व्याख्या—त्रसाणां द्वीन्द्रियादीनाम्, **स्थावराणां** पृथिव्यादीनां '**च**ः समुच्चये', **सूक्ष्माणां** श्लक्ष्णानामङ्गापेक्षया, **बादराणां** स्थूलानां तथैव । यस्मादेवं वध**स्तस्माद् गृहसमारम्भं संयतः परिवर्जयेदि**ति गाथाऽर्थः ॥९॥

अथाहारचिन्तामाह—

तहेव भत्त-पाणेसु पयणे पयावणेसु य ।
पाण-भूयदयट्ठाए न पए न पयावए ॥१०॥

जल-धन्ननिस्सिया जीवा पुढवी-कट्ठनिस्सिया ।
हम्मंति भत्त-पाणेसु तम्हा भिक्खू न पयावए ॥११॥

अनयोर्व्याख्या—तथैव भक्तान्योदनादीनि, **पानानि** पयःप्रभृतीनि **तेषु** पचनानि स्वयं क्वथनादीनि, पाचनानि च तान्येवान्यैः **पचन—पाचनानि तेषु** च 'भूतवधो दृश्यत इति प्रक्रमः' । ततः किम् ? इत्याह**—प्राणा** द्वीन्द्रियादयः, **भूताः** पृथ्व्यादयस्**तेषां दयार्थं** रक्षार्थं **न पचेत्** स्वयं, **न पाचयेद**न्यैरिति ॥ अमुमेवार्थं स्पष्टतरमाह**—जलं** च **धान्यं च तेषु** निश्रितास्तत्रान्यत्र चोत्पन्ना वा **तन्निश्रिता जीवाः पृथिवी-काष्ठनिश्रिता हन्यन्ते भक्त-पानेषु** पच्यमानेषु । यत एवं **तस्माद् भिक्षुर्न पाचयेद्** 'अपेर्गम्यत्वान्न स्वयं पचेदन्यं वा पचन्तं नानुमन्येत' इति गाथाद्वयार्थः ॥१०-११॥

अपरं च—

विसप्पे सव्वओ-धारे बहुपाणविणासणे ।
नत्थि जोइसमे सत्थे तम्हा जोइं न दीवए ॥१२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या–विसर्पतीति **विसर्पं** यत् स्वल्पमपि बहु भवति । सर्वतः सर्वासु दिक्षु धारा जीवनाशिनी शक्तिरस्येति **सर्वतोधारं** सर्वदिगवस्थितजन्तूपघातकत्वादत एव **बहुप्राणविनाशनं नास्ति ज्योतिःसमम**ग्नितुल्यं **शस्त्रम**न्यदिति । 'सर्वत्र लिङ्गव्यत्ययः प्राकृतत्वात्' । **तस्माज्ज्योतिर्वह्निं न दीपयेन्न** ज्वालयेदनेन पचनस्याग्निज्वलनाविनाभावित्वात् तत्त्याग एव समर्थितः । तत्प्रसङ्गतः शीतापनोदाद्यर्थमपि तदारम्भनिषेध एवावसेयः ॥१२॥

पचनादौ जीवघातहेतुत्वान्निषेधोऽस्तु, तदभावमिच्छता क्रय-विक्रयाभ्यां निर्वाहः क्रियत इत्याशङ्क्याह–

हिरण्णं जायरूवं च मणसा वि न पत्थए ।
समलेट्ठु-कंचणे भिक्खू विरए कय-विक्कए ॥१३॥
किणंतो कइओ होइ विक्किणंतो य वाणिओ ।
कय-विक्कयंमि वट्टंतो भिक्खू हवइ न तारिसो ॥१४॥
भिक्खियव्वं न केयव्वं भिक्खुणा भिक्खवित्तिणा ।
कय-विक्कओ महादोसो भिक्खावित्ती सुहावहा ॥१५॥

आसां व्याख्या–**हिरण्यं** हेम, **जातरूपं** रूप्यं '**च**शब्दाद् धन-धान्यादि' **मनसाप्यास्तां** वाचा **न प्रार्थयेन्**ममामुकं स्यादिति । 'अपेर्गम्यत्वात्' प्रार्थयेदपि न, किं पुनः परिगृह्णीयाद् '**भिक्षु**रिति योगः' । कीदृशः ? **समलेष्टु-काञ्चनः । विरतो** निवृत्तः । कुतः ? **क्रयो** मूल्येनान्यस्माद् वस्तुग्रहणम्, **विक्रयो** मूल्येनान्यस्य स्ववस्तुदानं ततः समाहारस्**तस्मात्** 'पञ्चम्यर्थे सप्तमी' ॥ किमित्येवम् ? अत आह–**क्रीणन् क्रयिको भवती**तरलोकवत् । **विक्रीणानश्च वणिग् भवति** । वाणिज्यप्रवृत्तत्वादिति भावः । अत एव **क्रय-विक्रये वर्तमानो भिक्षुर्भवति न तादृशो** यादृश सूत्रोक्तो भावभिक्षुरिति भावः ॥ ततः किम् ? इत्याह–**भिक्षितव्यं** याचितव्यं 'तथाविधं वस्तित्वति गम्यम्,' **न क्रेतव्यं** मूल्येन गृहीतव्यम्, केन ? **भिक्षुणा** । कीदृशा ? भिक्षयैव वृत्तिर्निर्वाहोऽस्येति **भिक्षावृत्तिस्तेन** । यतः **क्रय-विक्रयो महादोषो भिक्षावृत्तिः शुभावहा सुखावहा** वा इहलोक-परलोकयोरिति गाथात्रयार्थः ॥१३-१५॥

भिक्षितव्यमित्युक्तं तच्चैकत्रैवापि स्यादत आह–

समुयाणं उंछमेसिज्जा जहासुत्तमणिंदियं ।
लाभालाभंमि संतुट्ठे पिंडवायं चरे मुणी ॥१६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—समुदानं भैक्ष्यं तच्चोञ्छमिवोञ्छमन्यान्यगृहादल्पाल्पमीलनान्मधुकर-वृत्त्या हि भ्रमत एव स्यादिति, **एषयेद्** गवेषयेद् **यथासूत्रं** श्रुतानतिक्रमेणात् **एवानिन्दि-तम**जुगुप्सितं जात्यादिजुगुप्सितजनसम्बन्धि वा न स्यात् तथा **लाभालाभे**ऽशनादेः प्राप्तावप्राप्तौ च **सन्तुष्टः** सन्तोषवान् **पिण्डपातं** भिक्षाऽटनं **तच्चरेदा**सेवेत **मुनिः** ॥१६॥

यथा भुञ्जीत तथाऽऽह—

अलोलो न रसे गिद्धो जिब्भादंतो अमुच्छिए ।
न रसट्ठाए भुंजिज्जा जवणट्ठाए महामुणी ॥१७॥

व्याख्या—अलोलः सरसाहारे प्राप्ते न लाम्पट्यवान्, **न रसे** स्निग्ध—मधुरादौ **गृद्धः**। 'जिब्भादंतो'त्ति 'प्राकृतत्वात् दान्तस्य परनिपाते' दान्ता वशीकृता जिह्वा येन स **दान्तजिह्वो**ऽत **एवामूर्च्छितः** सन्निधेरकरणेन **तत्काले** वाऽभिष्वङ्गाभावेन । एवंविधश्च न नैव 'रसट्ठाए'त्ति **रसो** धातुविशेषः 'स चाशेषधातूपलक्षणम्' ततो यथा तदुपचयः स्यात् **तदर्थं** न **भुञ्जीत** । तर्हि किमर्थम् ? इत्याह—**यापना** निर्वाहोऽर्थात् संयमस्य **तदर्थं महामुनिर्भुञ्जीते**ति ॥१७॥

अर्चनादिनिषेधमाह—

अच्चणं रयणं चेव वंदणं पूयणं तहा ।
इड्ढी-सक्कार-सम्माणं मणसा वि न पत्थए ॥१८॥

व्याख्या—अर्चनां पुष्पादिभिः पूजाम्, **रचनां** निषद्यादिविषयां स्वस्थिकादिन्या-सात्मिकां वा । '**चैवे**ति समुच्चयावधारणयोः' 'नेत्यत्र सम्भन्त्स्यते' **वन्दनं** नमस्तुभ्यमिति वाचाभिष्टवनम्, **पूजनं** वस्त्रादिभिः प्रतिलाभनम्, तथा **ऋद्धि**रामर्षौषध्यादिरूपा, **सत्कारो**ऽर्थदानादि, **सन्मानो**ऽभ्युत्थानादिरित्यादि **मनसाप्यास्तां** वाचा **न प्रार्थये**न्ममैवं स्यादिति नैवाभिलषेत् ॥१८॥

किं पुनः कुर्यात् ?—

सुक्कज्झाणं झियाइज्जा अनियाणे अकिंचणे ।
वोसट्ठकाए विहरिज्जा जाव कालस्स पज्जओ ॥१९॥

व्याख्या—शुक्लध्यानं प्रागुक्तं यथा स्यात् तथा **ध्यायेदनिदानो** निदानरहितो-**ऽकिञ्चनो** निष्परिग्रहो **व्युत्सृष्टः** कायो येन स तथा **विहरेद्** 'अप्रतिबद्धविहारितयेति गम्यम्' '**यावदिति** मर्यादायाम्' **कालस्य** मृत्योः **पर्याय** प्रस्तावो यावन्मरणसमयः क्रमप्राप्तः स्यादिति ॥१९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

काले प्राप्ति विधिं फलं चाह—

णिज्जूहिऊण आहारं कालधम्मे उवट्ठिए ।
चइऊण माणुसं बोंदिं पहू दुक्खे विमुच्चई ॥२०॥

व्याख्या—'णिज्जूहिऊणं'त्ति **परित्यज्याहारं** संलेखनाक्रमेण, झगिति तत्त्यागे बहुदोषसम्भवाद् । उक्तं च—

"[1]**देहंमि असंलिहिए सहसा धाऊहिं खिज्जमाणेहिं ।**
जायइ अट्टज्झाणं सरीरिणो चरमकालंमि" ॥१॥

कदा ? इत्याह—**कालधर्मे** आयुःक्षयलक्षणे **उपस्थिते** प्रत्यासन्नीभूते **त्यक्त्वा मानुषीं** मनुष्यसम्बन्धिनीं **'बोंदिं' शरीरं प्रभु**र्वीर्यान्तरायक्षयतो विशिष्टसामर्थ्यवान् **दुःखैः** शारीरादिभि**र्विमुच्यते** तद्धेतुकर्मापगमत इति भावः ॥२०॥

कीदृशः सन् ? इत्याह—

निम्ममो निरहंकारो वीयरागो अणासवो ।
संपत्तो केवलं नाणं सासयं परिनिव्वुडे ॥२१॥ त्ति बेमि ॥

व्याख्या—निर्ममोऽपगतममकारः, **निरहङ्कारः** प्राग्वत् । यतो **वीतरागः** 'उपलक्षणाद् वीतद्वेषश्च' । **अनाश्रवः** कर्माश्रवरहितः । **सम्प्राप्तः केवलं ज्ञानं शाश्वतं** कदाचिदप्यव्यवच्छेदात्, **परिनिर्वृतो**ऽस्वास्थ्यहेतुकर्माभावतः सर्वथा स्वस्थीभूत **इति ब्रवीमी**ति पूर्ववत् ॥२१॥ ग्रं० १०२॥

इति श्रीकमलसंयमोपाध्यायविरचितायां सर्वार्थसिद्धौ श्रीउत्तराध्ययनटीकायामं पञ्चत्रिंशमनगारगतिनामकाध्ययनं समाप्तम् ॥३५॥

● ● ●

१. देहेऽसंलिखिते सहसा धातुषु क्षीयमाणेषु ।
जायते आर्तध्यानं शरीरिणश्चरमकाले ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

षट्त्रिंशं जीवाजीवविभक्तिसंज्ञमध्ययनम्

अनन्तराध्ययने भिक्षुगुणा उक्तास्ते च जीवाजीवस्वरूपपरिज्ञानत एवासेवितुं शक्यन्त इति तज्ज्ञापनार्थमधुना षट्त्रिंशमध्ययनमारभ्यते–

जीवाजीवविभत्तिं सुणेह मे एगमणा इओ ।
जं जाणिऊण भिक्खू सम्मं जयइ संजमे ॥१॥

व्याख्या–जीवाश्चोपयोगलक्षणा अजीवाश्च तद्विपरीता जीवाजीवास्तेषां विभक्ति-स्तत्तद्भेदादिदर्शनाद् विभागेनावस्थापनं **जीवाजीवविभक्तिं** 'मे' **मम** 'कथयत इति गम्यते' **शृणुत** 'हे शिष्या इति शेषः' किम्भूताः सन्तः ? **एकमनस** एकाग्रचित्ता इत इत्यस्मादनन्तराध्ययनश्रवणादनन्तरम् । **यां** जीवाजीवविभक्तिं **ज्ञात्वा भिक्षुः सम्यक्** प्रशस्तं यथा स्यादेवं **यतते** यत्नं कुरुते । क्व ? **संयमे** ॥१॥

तामेवाह–

जीवा चेव अजीवा य एस लोए वियाहिए ।
अजीवदेसमागासे अलोए से वियाहिए ॥२॥

व्याख्या–जीवाश्चैवाजीवाश्च । कोऽर्थः ? जीवाजीवरूप **एष** प्रतिप्राणिप्रतीतो **लोको व्याख्यातो**ऽर्हदादिभिरिति । जीवाजीवानामेव यथायोगमाधाराधेयतया व्यवस्थितानां लोकत्वात् । अजीवो धर्माधर्माकाश-पुद्गलात्मकस्तस्य देशोंऽशो**ऽजीवदेश आकाशम-लोकः स व्याख्यातो** धर्मास्तिकायादिवृत्तिरहितस्याकाशस्यैवालोकत्वात् । उक्तं च–

"धर्मादीनां वृत्तिर्द्रव्याणां भवति यत्र तत् क्षेत्रम् ।
तैर्द्रव्यैः सह लोकस्तद्विपरीतं ह्यलोकाख्यम्" ॥१॥

इति जीवाजीवाविभक्तिप्रसङ्गतो लोकालोकविभक्तिरप्युक्तेति भावः ॥२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जीवाजीवविभक्तिर्यथा स्यात् तथाऽऽह—

दव्वओ खित्तओ चेव कालओ भावओ तहा ।
परूवणा तेसिं भवे जीवाणमजीवाण य ॥३॥

व्याख्या—द्रव्यतो द्रव्यमाश्रित्येदमियद्भेदं द्रव्यमिति । **क्षेत्रतश्चै**वेदमियति क्षेत्र इति। **कालत** इदमियत्कालस्थितिकमिति । **भावत** इमे अस्य पर्याया इति । **प्ररूपणा तेषां** विभजनीयत्वेन प्रक्रान्तानां **भवेज्जीवानामजीवानां चे**ति ॥३॥

स्वल्पवक्तव्यामजीवप्ररूपणां द्रव्यत आह—

रूविणो चेवरूवी य अजीवा दुविहा भवे ।
अरूवी दसहा वुत्ता रूविणो वि चउव्विहा ॥४॥

व्याख्या—रूपं स्पर्शाद्याश्रया मूर्त्तिस्तदेषामस्तीति **रूपिणः**, '**च**ः समुच्चये' 'रूविणो चेव' इत्यतो वकारादकारप्रश्लेषाद् वचनव्यत्ययाच्च**ारूपिणश्च** नैषां तादृग् रूपमस्तीति कृत्वा । **अजीवा द्विविधा** 'भवे'त्ति **भवेयुस्तत्राप्यरूपिणो दशधा** दशप्रकारा **उक्ता**ः 'अर्हदादिभिरिति शेषः' । **रूपिणः पुनश्चतुर्विधा** 'उभयत्राजीवा इति प्रक्रमः' ॥४॥

अरूपिणो दशविधत्वमाह—

धम्मत्थिकाए तद्देसे तप्पएसे य आहिए ।
अहम्मे तस्स देसे य तप्पएसे य आहिए ॥५॥

आगासे तस्स देसे य तप्पएसे य आहिए ।
अद्धासमए चेव अरूवी दसहा भवे ॥६॥

अनयोर्व्याख्या—धर्मास्तिकायो गत्युषष्टम्भलक्षणः सर्वदेशप्रदेशानुगतसमान-परिणतिमद् द्रव्यम् १। तस्य धर्मास्तिकायस्य देशस्त्रिभाग-चतुर्भागादिस्**तद्देशः** २। तस्यैव प्रदेशो निरंशो भागस्**तत्प्रदेशः** ३। **आख्यातः** कथितः । **अधर्मास्तिकायः** स्थित्युपष्टम्भक-लक्षणः ४। तस्याधर्मास्तिकायस्य **देशश्चो**क्तरूपः ५। तस्यैव प्रदेशस्तथाविध एव **तत्प्रदेशः** ६। **आकाशास्तिकायो**ऽवकाशावष्टम्भकः ७। **तद्देशः** ८। **तत्प्रदेशः** ९। **आख्यातः** । अद्धा कालो वर्तनालक्षणस्तद्रूपः समयोऽ**द्धासमयो** निर्विभागत्वाच्चास्य न देशप्रदेशसम्भवः १०। एवमरूपिणो दशधा भवेयुरिति गाथाद्वयार्थः ॥५-६॥

एतानेव क्षेत्रत आह—

धम्माधम्मे य दो एए लोगमित्ता वियाहिया ।
लोगालोगे य आगासे समए समयखेत्तिए ॥७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—धर्माधर्मौ धर्मास्तिकायाधर्मास्तिकायौ **च द्वावप्येतौ लोकमात्रौ** लोक-परिमाणौ **व्याख्यातौ** । तथा **लोकेऽलोके चाकाशं** सर्वगतत्वात् तस्य । **समय** इत्यद्धासमयः समयोपलक्षितं क्षेत्रमर्धतृतीयद्वीप-समुद्रास्तद्विषयभूतमस्यास्तीति **समय-क्षेत्रिकस्**तत्परतस्तस्यासम्भवात् । आवलिकादयोऽपि कालभेदाः समयमूलत्वादेतत्क्षेत्रवर्तिन एव ज्ञेयाः ॥७॥

एतानेव कालत आह—

धम्माधम्मागासा तिन्नि वि एए अणाइया ।
अपज्जवसिया चेव सव्वद्धं तु वियाहिया ॥८॥

समए वि संतइं पप्प एवमेव वियाहिये ।
आएसं पप्प साईए सपज्जवसिए वि य ॥९॥

अनयोर्व्याख्या—धर्माधर्माकाशानि त्रीण्यप्येतान्यनादिकानि, इतः कालात् प्रभृत्यमूनि प्रवृत्तानीत्यसम्भवात्, **अपर्यवसितान्य**नन्तानीत्यर्थः, न हि कुतश्चित् कालात् परत एतेषामसम्भव इति । '**चैवा**ववधारणे' । **सर्वाद्धां तु** सर्वकालमेव सर्वदा स्वरूपापरित्यागतो नित्यानीति यावद् **व्याख्याता**नीति 'लिङ्गव्यत्ययः प्राकृतत्वात्' ॥ **समयोऽपि सन्ततिम**परापरोत्पत्तिरूपप्रवाहात्मिकां **प्राप्या**श्रित्य**ैवमेवा**नाद्यपर्यवसितत्व-लक्षणेन प्रकारेण **व्याख्यातः**। **आदेशं** विशेषं प्रतिनियतव्यक्त्यात्मकं **प्राप्या**ङ्गीकृत्य **सादिकः सपर्यवसितोऽपि च** 'समय इति योज्यम्' । विशेषापेक्षया ह्यभूत्वाऽयं भवति, भूत्वा च न भवतीति सादिनिधन उच्यते इति गाथाद्वयार्थः ॥८-९॥

इत्थमजीवानामरूपिणां द्रव्य-क्षेत्र-कालैः प्ररूपणा कृता । सम्प्रति भावप्ररूपणायां प्रस्तुतायामप्यमीषाममूर्तत्वेन वर्णादिपर्यायाः प्ररूप्यमाणा अपि नावगन्तुं शक्याः । अनुमानतस्तु द्रव्याणां पर्यायावियुतत्वेन भावा गम्यन्त एवेति भावप्ररूपणामनादृत्य रूपिणो द्रव्यतः प्ररूपयितुमाह—

खंधा य खंधदेसा य तप्पएसा तहेव य ।
परमाणुणो य बोद्धव्वा रूविणो य चउव्विहा ॥१०॥

व्याख्या—स्कन्धाः १ '**चः** समुच्चये' । स्कन्धानां देशा भागाः **स्कन्धदेशाः** २। स्कन्धानां प्रदेशा निरंशा भागास्**तत्प्रदेशाः** ३। **तथैव च परमाणवो** निर्विभागद्रव्यरूपाश्च ४। **बोद्धव्या** ज्ञातव्या **रूपिणः** '**च** पुनः' **चतुर्विधाश्च**तुष्प्रकारा इति ॥१०॥

इह देश—प्रदेशानां स्कन्धेष्वेवान्तर्भावात् स्कन्धाः परमाणवश्चेति समासतो द्वावेव

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

रूपिद्रव्यभेदौ । तयोश्च किं लक्षणम् ? इत्याह—

एगत्तेण पुहुत्तेण खंधा य परमाणुणो ।
लोएगदेसे लोए य भइयव्वा ते उ खेत्तओ ।
इत्तो कालविभागं तु तेसिं वुच्छं चउव्विहं ॥११॥

व्याख्या—एकत्वेन समानपरिणतिरूपेण, **पृथक्त्वेन** परमाण्वन्तरैरसङ्घातरूपेण 'लक्ष्यन्ते इति शेषः' के ? इत्याह—**स्कन्धाः परमाणवश्च** । स्कन्धा हि संहतानेक-परमाणुरूपाः । परमाणवश्च परमाण्वन्तरैरसंहतिभाजः । एतानेव क्षेत्रत आह—'लोए'त्ति लोकस्य चतुर्दशरज्ज्वात्मकस्यैकदेश एक—द्व्यादिसङ्ख्यातासङ्ख्यातप्रदेशात्मकः प्रतिनियतो भागो **लोकैकदेशस्तस्मिन् लोके च भक्तव्या** भजनीयास्ते स्कन्धाः परमाणवश्च **'तुः पूरणे' क्षेत्रतः** क्षेत्रमाश्रित्य । अत्र च सामान्योक्तावपि परमाणूनामेकप्रदेशे एवावस्थानात् । स्कन्धाश्च बहुप्रदेशोपचिता अपि केचिदेकप्रदेशे तिष्ठन्ति, अन्ये तु सङ्ख्येयेष्वसङ्ख्येयेषु च प्रदेशेषु, यावत् सकललोके तथाविधाचित्तमहास्कन्धवद् भवेयुरिति भजनीयाः परिणतेर्विचित्रत्वात् ॥ 'इत्तो'त्ति **इतः** क्षेत्रप्ररूपणानन्तरं **कालविभागं तु** कालभेदं पुनस्**तेषां** स्कन्धादीनां **वक्ष्ये चतुर्विधं** साद्यनादि—सपर्यवसितापर्यवसित-भेदेनानन्तरमेव वक्ष्यमाणेनेति । इयं षट्पादरूपा गाथा ॥११॥

प्रतिज्ञामाह—

संतइं पप्प तेऽणाईया अपज्जवसिया वि य ।
ठिइं पडुच्च साईया सप्पज्जवसिया वि य ॥१२॥

व्याख्या—सन्ततिमपरापरोत्पत्तिप्रवाहरूपां **प्राप्य ते स्कन्धाः** परमाणवश्चानादयो-**ऽपर्यवसिता अपि च** न हि ते कदापि प्रवाहतो न भूता न भविष्यन्तीति । **स्थितिं** प्रतिनियतक्षेत्रावस्थानरूपां **प्रतीत्या**ङ्गीकृत्य **सादिकाः सपर्यवसिता अपि च** ॥१२॥

सादि—सपर्यवसितत्वेऽपि कियत्कालमेषां स्थितिः ? इत्याह—

असंखकालमुक्कोसा इक्कं समओ जहन्नयं ।
अजीवाण य रूवीणं ठिई एसा वियाहिया ॥१३॥

व्याख्या—असङ्ख्यकालमुत्कृष्टा, एकसमयं जघन्यिका, अजीवानां रूपिणां पुद्गलानामित्यर्थः **स्थितिरेषा व्याख्याता** । जघन्यत एकसमयादुत्कृष्टतश्चासङ्ख्येयकालात् परतोऽवश्यमेव विचटनात् ॥१३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कालतः स्थितिमुक्त्वा तदनन्तर्गतमेवान्तरमाह—

अणंतकालमुक्कोसं इक्को समओ जहन्नयं ।
अजीवाण य रूवीणं अंतरेयं वियाहियं ॥१४॥

व्याख्या—अनन्तकालमुत्कृष्टम्, एकसमयं जघन्यकमजीवानां रूपिणामन्तरं विवक्षितक्षेत्रावस्थितेः प्रच्युतानां पुनस्तत्प्राप्तेर्व्यवधानमेतदुक्तरूपं **व्याख्यातम्**, तेषां हि विवक्षितक्षेत्रावस्थितितः प्रच्युतानां कदाचित् समयावलिकादिसङ्ख्यातकालतोऽसङ्ख्यात-कालाद् वा पल्योपमादेर्यावदनन्तकालादपि तत्क्षेत्रावस्थितिः सम्भवतीति भावः ॥१४॥

एतानेव भावतोऽभिधातुमाह—

वण्णओ गंधओ चेव रसओ फासओ तहा ।
संठाणओ य विण्णेओ परिणामो तेसि पंचहा ॥१५॥

व्याख्या—वर्णतो गन्धतो रसतः स्पर्शतस्तथा संस्थानतश्च । कोऽर्थः ? वर्णादीन् पञ्चाश्रित्य **विज्ञेयो** ज्ञातव्यः **परिणामः** स्वरूपावस्थितानामेव वर्णाद्यन्यथाभवन-रूप**स्तेषामि**ति परमाणूनां **पञ्चधा** पञ्चप्रकारः ॥१५॥

एषामेव प्रत्येकमुत्तरभेदानाह—

वण्णओ परिणया जे उ पंचहा ते पकित्तिया ।
किण्हा नीला य लोहिया हालिद्दा सुक्किला तहा ॥१६॥

गंधओ परिणया जे उ दुविहा ते वियाहिया ।
सुब्भिगंधपरिणामा दुब्भिगंधा तहेव य ॥१७॥

रसओ परिणया जे उ पंचहा ते पकित्तिया ।
तित्त-कडुय-कसाया अंबिला महुरा तहा ॥१८॥

फासओ परिणया जे उ अट्ठहा ते पकित्तिया ।
कक्खडा मउया चेव गुरुया लहुया तहा ॥१९॥

सीया उण्हा य निद्धा य तहा लुक्खा य आहिया ।
इइ फासपरिणया एए पुग्गला समुदाहिया ॥२०॥

संठाणपरिणया जे उ पंचहा ते पकित्तिया ।
परिमंडला य वट्टा य तंसा चउरंसमायया ॥२१॥

आसां व्याख्या—वर्णतः परिणता वर्णपरिणामभाजो **ये**ऽण्वादयः 'तुः पूरणे' **पञ्चधा ते प्रकीर्त्तिताः** कथिताः । तानेवाह—**कृष्णाः** कज्जलादिवत् । **नीला** नील्यादिवत् । **लोहिता** हिङ्गुलादिवत् । **हारिद्रा** हरिद्रादिवत् । **शुक्लाः** शङ्खादिवत् 'तथेति समुच्चये' ॥ **गन्धतः** 'सुब्भि' त्ति सुरभिर्गन्धो यस्मिन्नेवंविधः परिणामो येषां ते **सुरभिगन्धपरिणामाः** श्रीखण्डादिवत् । 'दुब्भि' त्ति दुरभिर्गन्धो येषां ते **दुरभिगन्धा** लशुनादिवत् । **रसतः** तिक्ताः कोशातक्यादिवत् । **कटुकाः** शुण्ठ्यादिवत् । **कषायाश्चा**-पक्वकपित्थादिवत् । **अम्ला** अम्लवेतसादिवत् । **मधुराः** शर्करादिवत् ॥ **स्पर्शतः कर्कशाः** पाषाणादिवत् । **मृदवो** हंसरुतादिवत् । **गुरवो** हीरकादिवत् । **लघवो**-ऽर्कतूलादिवत् । **शीता** मृणालादिवत् । **उष्णा** वह्न्यादिवत् । **स्निग्धा** घृतादिवत् । **रूक्षा** भूत्यादिवत् । इत्यमुना प्रकारेण स्पर्शपरिणता एते स्कन्धादयः पूरण-गलनधर्माणः पुद्गलाः **समुदाहृताः** सम्यगुपदिष्टास्तीर्थकृदादिभिः ॥ सन्तिष्ठन्ते एभिः स्कन्धादय इति **संस्थानानि**। तद्रूपेण **परिणताः परिमण्डलादयः** प्रागुक्तस्वरूपा एवेति गाथाषट्कार्थः ॥१६-२१॥

सम्प्रत्येषामेव परस्परसम्बन्धमाह—

वण्णओ जे भवे किण्हे भइए से उ गन्धओ ।
रसओ फासओ चेव भइए संठाणओ वि य ॥२२॥

वण्णओ जे भवे नीले भइए से उ गन्धओ ।
रसओ फासओ चेव भइए संठाणओ वि य ॥२३॥

वण्णओ लोहिए जे उ भइए से उ गंधओ ।
रसओ फासओ चेव भइए संठाणओ वि य ॥२४॥

वण्णओ पीइए जे उ भइए से उ गंधओ ।
रसओ फासओ चेव भइए संठाणओ वि य ॥२५॥

वण्णओ सुक्किले जे उ भइए से उ गंधओ ।
रसओ फासओ चेव भइए संठाणओ वि य ॥२६॥

आसां व्याख्या—वर्णतो यः स्कन्धादि**र्भवेत् कृष्णः** 'भइए' त्ति **भाज्यः स** पुन**र्गन्धतो** गन्धमाश्रित्य सुरभिगन्धिर्दुरभिगन्धिर्वा स्यान्न तु नियतगन्ध एवेति भावः । एवं **रसतः स्पर्शतश्चैव भाज्यः संस्थानतोऽपि च** । अन्यतररसादियोग्यो वाऽसौ भवेदिति हृदयम् । अत्र च गन्धौ द्वौ, रसाः पञ्च, स्पर्शा अष्टौ, संस्थानानि पञ्च, एते च मीलिता विंशतिरित्येक एव कृष्णवर्ण एतावतो भङ्गाँल्लभते २० । एवं नीलोऽपि २० । लोहितोऽपि

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

२० । पीतोऽपि २० । शुक्लोऽपि २० । एवं पञ्चभिर्वर्णैर्विंशत्या गुणितैः शतं भवति १०० । इति गाथापञ्चकार्थः ॥२२-२६॥

गंधओ जे भवे सुब्भी भइए से उ वण्णओ ।
रसओ फासओ चेव भइए संठाणओ वि य ॥२७॥

गंधओ जे भवे दुब्भी भइए से उ वण्णओ ।
रसओ फासओ चेव भइए संठाणओ वि य ॥२८॥

अनयोर्व्याख्या—गन्धतो यः स्कन्धादिर्भवेत् **सुरभिर्भाज्यः स तु वर्णतो**ऽन्यतरकृष्णादिवर्णवान् स्यादिति भावः । एवं **रसतः स्पर्शतश्चैव भाज्यः संस्थानतोऽपि च** । इह रसादयोऽष्टादश ते च पञ्चभिर्वर्णैर्मीलितास्त्रयोविंशतिर्भवन्ति २३ । एवं दुर्गन्धविषया अपि एतावन्त एव । ततश्च गन्धद्वयेन भङ्गानां षट्चत्वारिंशत् ४६ इति गाथाद्वयार्थः ॥२७-२८॥

रसओ तित्तए जे उ भइए से उ वण्णओ ।
गंधओ फासओ चेव भइए संठाणओ वि य ॥२९॥

रसओ कडुए जे उ भइए से उ वण्णओ ।
गंधओ फासओ चेव भइए संठाणओ वि य ॥३०॥

रसओ कसाए जे उ भइए से उ वण्णओ ।
गंधओ फासओ चेव भइए संठाणओ वि य ॥३१॥

रसओ अंबिले जे उ भइए से उ वण्णओ ।
गंधओ फासओ चेव भइए संठाणओ वि य ॥३२॥

रसओ महुरे जे उ भइए से उ वण्णओ ।
गंधओ फासओ चेव भइए संठाणओ वि य ॥३३॥

आसां व्याख्या—रसतस्तिक्तको यस्तु स्कन्धादिर्भाज्यः **स तु वर्णतो गन्धतः स्पर्शतः संस्थानतोऽपि च** । इह तिक्तेन भङ्गानां विंशतिः २० । एवं कटुकेन २० । कषायेण २० । अम्लेन २० । मधुरेण २० । एवं रसपञ्चकसंयोगे शतं १०० गाथापञ्चकार्थः ॥२९-३३॥

फासओ कक्खडे जे उ भइए से उ वण्णओ ।
गंधओ फासओ चेव भइए संठाणओ वि य ॥३४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

फासओ मउए जे उ भइए से उ वण्णओ ।
गंधओ रसओ चेव भइए संठाणओ वि य ॥३५॥

फासओ गरुए जे उ भइए से उ वण्णओ ।
गंधओ रसओ चेव भइए संठाणओ वि य ॥३६॥

फासओ लहुए जे उ भइए से उ वण्णओ ।
गंधओ रसओ चेव भइए संठाणओ वि य ॥३७॥

फासओ सीयए जे उ भइए से उ वण्णओ ।
गंधओ रसओ चेव भइए संठाणओ वि य ॥३८॥

फासओ उण्हए जे उ भइए से उ वण्णओ ।
गंधओ रसओ चेव भइए संठाणओ वि य ॥३९॥

फासओ निद्धए जे उ भइए से उ वण्णओ ।
गंधओ रसओ चेव भइए संठाणओ वि य ॥४०॥

फासओ लुक्खए जे उ भइए से उ वण्णओ ।
गंधओ रसओ चेव भइए संठाणओ वि य ॥४१॥

आसां व्याख्या—स्पर्शतः कर्कशो यस्तु स्कन्धादिर्भाज्यः **स तु वर्णतो गन्धतो रसतः संस्थानतोऽपि च** । इह वर्णादयः सप्तदश तद्योगात् तावन्त एव भङ्गाः स्युः । एवं मृदु १७, गुरु १७, लघु १७, रूक्ष १७, स्निग्ध १७, शीत १७, उष्ण १७ एतन्मीलने च जातं षट्त्रिंशं शतम् १३६ इति गाथाष्टकार्थः ॥३४-४१॥

परिमंडलसंठाणे भइए से उ वण्णओ ।
गंधओ रसओ चेव भइए फासओ वि य ॥४२॥

संठाणओ भवे वट्टे भइए से उ वण्णओ ।
गंधओ रसओ चेव भइए फासओ वि य ॥४३॥

संठाणओ भवे तंसे भइए से उ वण्णओ ।
गंधओ रसओ चेव भइए फासओ वि य ॥४४॥

संठाणओ य चउरंसे भइए से उ वण्णओ ।
गंधओ रसओ चेव भइए फासओ वि य ॥४५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जे आययसंठाणे भइए से उ वण्णओ ।
गंधओ रसओ चेव भइए फासओ वि य ॥४६॥

आसां व्याख्या–परिमण्डले संस्थाने 'वर्तत इति शेषः' **भाज्यः स तु** सामान्य-प्रक्रमेऽपि परमाणूनां संस्थानाभावात् स्कन्ध एव ग्राह्यः । **वर्णतो गन्धतो रसतः स्पर्शतोऽपि च** । अत्र च वर्णादियोगाद् विंशतिर्भङ्गाः स्युः २०, एवं वृत्तेन २०, त्र्यस्रेण २०, चतुरस्रेण २०, आयतेन च २० । एवं संस्थानपञ्चकभङ्गसंयोगे लब्धं शतम् १०० । एवं वर्ण-गन्ध-रस-स्पर्श-संस्थानानां सकलभङ्गकसङ्कलनातो जातानि द्व्यशीत्यधिकानि चत्वारि शतानि–अङ्कतोऽपि ४८२ । सर्वत्र जातावेकवचनम् । परिस्थूरन्यायेनैतदुक्तमन्यथा प्रत्येकमप्येषां तारतम्यतोऽनन्तत्वादनन्ता एव भङ्गाः सम्भवन्ति । इति गाथापञ्चकार्थः ॥४२-४६॥

अथोपसंहारद्वारेणोत्तरग्रन्थसम्बन्धमाह–

एसा अजीवविभत्ती समासेण वियाहिया ।
इत्तो जीवविभत्तिं वुच्छामि आणुपुव्वसो ॥४७॥

व्याख्या–एषाऽनन्तरोक्ताऽ**जीवविभक्तिः समासेन** सङ्क्षेपेण **व्याख्याता । इत** इत्येतदनन्तरं **जीवविभक्तिं वक्ष्यामि आनुपूर्व्या** ॥४७॥

यथाप्रतिज्ञातमाह–

संसारत्था य सिद्धा य दुविहा जीवा वियाहिया ।
सिद्धा णेगविहा वुत्ता तं मे कित्तयओ सुण ॥४८॥

व्याख्या–संसारो गतिचतुष्टयात्मकस्तत्र तिष्ठन्तीति **संसारस्थास्ते च सिद्धाश्च द्विधा** द्विभेदा **जीवा व्याख्याताः** । तत्र **सिद्धा अनेकधा उक्ताः** । 'तमिति सूत्रत्वात्' **तान्** 'मे' **मम कीर्तयतः शृणुत** । अल्पवक्तव्यत्वात् पश्चान्निर्देशेऽपि पूर्वं सिद्धभेदाभिधानमदुष्टम् ॥४८॥

एषामनेकविधत्वमाह–

इत्थी पुरिस सिद्धा य तहेव य नपुंसगा ।
सलिङ्गे अन्नलिंगे य गिहिलिङ्गे तहेव य ॥४९॥

व्याख्या–स्त्रियश्च पूर्वपर्यायापेक्षया सिद्धाश्च **स्त्रीसिद्धाः** । एवं **पुरुषसिद्धाश्च । तथैव** सिद्धशब्दयोगा**न्नपुंसकसिद्धाः** । स्वलिङ्गं रजोहरण-मुखवस्त्रिकारूपं तस्मिन् सिद्धाः **स्वलिङ्गसिद्धाः** । अन्यदेतदपेक्षया लिङ्ग**मन्यलिङ्गं** शाक्यादिसम्बन्धि **तस्मिन्** सिद्धाः । **गृहिलिङ्गे** गृहस्थवेषे सिद्धा मरुदेवास्वामिनीवत् । **तथैवे**ति समुच्चये । **चकार**स्तीर्थसिद्धाद्यनुक्तभेदसूचकः ॥४९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सिद्धानेवावगाहनातः क्षेत्रतश्चाह–

उक्कोसोगाहणाए य जहन्न-मज्झिमाइ य ।
उड्ढं अहेयं तिरियं च समुद्दंमि जलंमि य ॥५०॥

व्याख्या–उत्कृष्टा चासाववगाहना च शरीर**मुत्कृष्टावगाहना** पञ्चधनुःशतप्रमाणा तस्यां सिद्धाः । '**च**ः समुच्चये' 'जहन्न-मज्झिमाइ य'त्ति अवगाहनायामिति प्रत्येकं योगा**ज्जघन्या**वगाहनायां द्विहस्तमानायां सिद्धाः । **मध्यमा**वगाहनायामुत्कृष्ट-जघन्यान्तराल-वर्तिन्यां सिद्धाः । **ऊर्ध्वमि**त्यूर्ध्वलोके मेरुचूलिकादौ चैत्यवन्दकचारणश्रमणानां केषाञ्चिन्मुक्त्यवाप्तेः **अधश्चा**धोलोकग्रामे सिद्धाः । **तिर्यक् च** तिर्यग्लोके चार्धतृतीय-द्वीपसमुद्ररूपे । **समुद्रे जले च** नद्यादेः 'भू-भूधरादीनामुपलक्षणम्' । इत्थं स्त्रीसिद्धा-दीनभिदधता स्त्रीत्वादिषु सिद्धिः समर्थिता ॥५०॥

तत्रापि क्व कियन्तः सिध्यन्ति ? इत्याह–

दस य नपुंसएसुं वीसं इत्थियासु य ।
पुरिसेसु य अट्ठसय समएणेगेण सिज्झई ॥५१॥

चत्तारि य गिहिलिङ्गे अन्नलिङ्गे दसेव य ।
सलिङ्गेण य अट्ठसयं समएणेगेण सिज्झई ॥५२॥

उक्कोसोगाहणाए उ सिज्झंते जुगवं दुवे ।
चत्तारि जहन्नाए जवमज्झट्ठुत्तरं सयं ॥५३॥

चउरुड्ढलोए य दुवे समुद्दे तओ जले वीसमहे तहेव [य] ।
सयं च अट्ठुत्तर तिरियलोए समएणेगेण [उ] सिज्झई धुवं ॥५४॥

आसां व्याख्या–दशेति दशसङ्ख्याः । '**च**शब्दः समुच्चये' **नपुंसकेषु 'सिध्य-न्तीति** संटङ्कः' । **विंशतिः स्त्रीषु च** । **पुरुषेषु** चाष्टभिरधिकं शत**मष्टशतं समयेनैकेन सिध्यति** निष्ठितार्थं भवति ॥ **चत्वारो गृहिलिङ्गे । दशैव चान्यलिङ्गे । अष्टशतं स्वलिङ्गे च समयेनैकेन सिध्यति ॥ उत्कृष्टावगाहनायां** तूक्तरूपायां **सिध्यतो युगपदेककालं द्वौ । चत्वारो जघन्यावगाहनायाम्** । 'जवमज्झ'त्ति यवमध्यमिव **यवमध्यं** मध्यमावगाहना तस्या**मष्टोत्तरं शतम्** । यवमध्यत्वं चैषां मध्यमावगाहनायामुत्कृष्ट–जघन्यावगाहन-योर्मध्यवर्तित्वात् ॥ **चत्वार ऊर्ध्वलोके च । द्वौ समुद्रे । त्रयो जले । विंशतिरध** इत्यधोलोके । तथैव **शतं चाष्टोत्तरं तिर्यग्लोके समयेनैकेन सिध्यति** । '**तु**शब्दः पुनरर्थे'

Jain Education International 2010_02   For Private & Personal Use Only   www.jainelibrary.org

ध्रुवमिति निश्चितमिति गाथाचतुष्टयार्थः ॥५१-५४॥

तेषामेव प्रतिघातादिप्रतिपादनायाह—

कहिं पडिहया सिद्धा कहिं सिद्धा पइट्ठिया ? ।
कहिं बोंदिं चइत्ता णं कत्थ गंतूण सिज्झई ? ॥५५॥

अलोए पडिहया सिद्धा लोयग्गे य पइट्ठिया ।
इहं बोंदिं चइत्ता णं तत्थ गंतूण सिज्झई ॥५६॥

अनयोर्व्याख्या—कस्मिन् प्रतिहताः स्खलिताः कोऽर्थः ? निरुद्धगतयः **सिद्धाः** ?। **कस्मिन् सिद्धाः प्रतिष्ठिताः** साद्यपर्यवसितं कालं स्थिताः ? । अन्यच्च **क्व बोन्दिं** शरीरं **त्यक्त्वा कुत्र गत्वा** 'सिज्झइ' त्ति 'वचनव्यत्ययात्' **सिध्यन्ति** निष्ठितार्था भवन्ति ? । एतदुत्तरमाह—**अलोके** केवलाकाशलक्षणे **प्रतिहताः** स्खलिताः । तत्र धर्मास्तिकायाभावेन तेषां गतेरसम्भवात् । तथा **लोकाग्रे गत्वा सिध्यन्ति** । पूर्वापरकाल-स्यासम्भवाद् यत्रैव समये भवक्षयतस्तस्मिन्नेव मोक्षस्तत्र गतिश्चेति भाव इति गाथाद्वयार्थः ॥५५-५६॥

लोकाग्रं चेषत्प्राग्भाराया उपरीति यावति प्रदेशे, यत्संस्थाना, यत्प्रमाणा, यद्वर्णा चासौ तद् वक्तुमाह—

बारसहिं जोयणेहिं सव्वट्ठस्सुवरिं भवे ।
ईसीपब्भारनामा पुढवी छत्तसंठिया ॥५७॥

पणयालसयसहस्सा जोयणाणं तु आयया ।
तावइयं चेव वित्थिन्ना तिगुणो तस्सेव परिरओ ॥५८॥

अट्ठजोयणबाहल्ला सा मज्झंमि वियाहिया ।
परिहायंती चरिमंते मच्छियपत्ताउ तणुयरी ॥५९॥

अज्जुणसुवन्नगमई सा पुढवी निम्मला सहावेणं ।
उत्ताणयछत्तयसंठिया य भणिया जिणवरेहिं ॥६०॥

संखंक-कुंदसंकासा पंडुरा निम्मला सुभा ।
सीयाए जोयणे तत्तो लोयंतो उ वियाहिओ ॥६१॥

आसां व्याख्या—द्वादशभिर्योजनैः सर्वार्थस्य सर्वार्थनाम्नो विमानस्यो**परि**ऊर्ध्वं

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भवेदीषत्प्राग्भारनामा पृथिवी भूमिः । छत्रं प्रतीतं तद्वत् संस्थितं संस्थानमस्या इति **छत्रसंस्थिता** । इह सामान्योक्तावप्युत्तानमेव छत्रं ज्ञेयम् ॥ **पञ्चचत्वारिंशच्छतसहस्राणि योजनानां 'तुः पूरणे' आयता** दीर्घा । 'तावइयं चेव'ति **तावतश्चैव** 'प्रक्रमाच्छतसहस्रान् **विस्तीर्णा** विस्तरतोऽपि पञ्चत्वारिंशच्छतसहस्रप्रमाणेति भावः । **परिरयः** परिधिरिहायामात् **त्रिगुणः** साधिकः किञ्चिदधिक इति ॥ अष्टावष्टसङ्ख्यानि योजनानि बाहल्यं स्थौल्यमस्या इत्य**ष्टयोजनबाहल्या ईषत्प्राग्भारा मध्ये** मध्यप्रदेशे **व्याख्याता** । किमित्येवम् ? अत आह—**परि** समन्ताद् **हीयमाना चरमान्तेषु** सर्वदिग्वर्तिषु पर्यन्तप्रदेशेषु मक्षिकायाः पत्रं पक्षो **मक्षिकापत्रम्** 'अपेर्गम्यत्वात्' तस्मादपि **तनुतरा** इति कृशेति यावत् । हानिश्चात्र विशेषानभिधानेऽपि प्रतियोजनमङ्गुलपृथक्त्वं द्रष्टव्या ॥ अर्जुनं शुक्लं तच्च तत् सुवर्णकं चार्जुनसुवर्णकं तेन निर्वृत्ता**ऽर्जुनसुवर्णकमयी से**तीषत्प्राग्भारा निर्मला स्वच्छा स्वभावेन नोपाधित इति । **उत्तानकमू**र्ध्वमुखं **यच्छत्रकं** तत्**संस्थिता च भणिता जिनवरैः** । प्राक् सामान्यतश्छत्रसंस्थितेत्युक्त्वा यदिहोत्तानत्वमुक्तं तद् विशेषत इति न पौनरुक्त्यमथवा-ऽन्यकर्तृकेयं गाथेति ॥ **शङ्खाङ्क-कुन्दानि** प्रतीतानि **तत्सङ्काशा** वर्णतस्तत्सदृशी । अत एव **पाण्डुरा** श्वेता, **निर्मला** निष्कलङ्का, **शुभा**ऽतिकल्याणावहेति । यदीदृशी सा पृथिवी ततः किम् ? इत्याह—'सीयाए'त्ति **शीतायाः** शीतानाम्न्याः 'पृथ्व्या उपरीति शेषः' **योजने ततस्तस्या** उक्तरूपायाः पृथ्व्यास्ततो योजनमतिक्रम्येत्यर्थः । **लोकान्तस्तु व्याख्यात** इति गाथापञ्चकार्थ ॥५७-६१॥

यदि योजने लोकान्तस्तर्हि तत्र सर्वत्र सिद्धाः सन्तीत्याशङ्क्याह—

जोयणस्स उ जो तत्थ कोसो उवरिमो भवे ।
तस्स कोसस्स छब्भाए सिद्धाणोगाहणा भवे ॥६२॥

व्याख्या—योजनस्य 'तुः पुनः' यस्तत्र क्रोशो गव्यूतमु**परिवर्त्ती भवेत्** । **तस्य क्रोशस्य षट्भागे** सत्रिभागत्रयस्त्रिंशदधिकधनुःशतत्रितयरूपे **सिद्धानामवगाहना-**ऽवस्थिति-र्भवेदिति ॥६२॥

अवगाहना च चलनसम्भवेऽपि स्यादत आह—

तत्थ सिद्धा महाभागा लोयग्गंमि पइट्ठिया ।
भवप्पवंचउम्मुक्का सिद्धिं वरगइं गया ॥६३॥

व्याख्या—तत्र सिद्धा महाभागा अचिन्त्यशक्तयो **लोकाग्रे प्रतिष्ठिताः । भवा** नारकादय**स्तेषां प्रपञ्चो** विस्तारस्ते**नोन्मुक्ता**स्ततः **सिद्धिं** वरा चेतरगत्यपेक्षया प्रधाना गतिश्च

वरगतिस्तां गताः । अयं भावः, किल चलने भवप्रपञ्च एव हेतुः, सिद्धानां हि तद्रहितत्वात् कुतस्तत्सम्भव इति ॥६३॥

तेषां तत्र कियत्यवगाहना ? इत्याह—

उस्सेहो जस्स जो होइ भवंमि चरिमंमि उ ।
तिभागहीणा तत्तो य सिद्धाणोगाहणा भवे ॥६४॥

व्याख्या—उत्सेध उच्छ्रयः 'प्रक्रमाच्छरीरस्य' 'जस्स'त्ति 'वचनव्यत्याद्' **येषां** सिद्धानां **य** इति यत्परिमाणो **भवेद् भवे चरमे** पर्यन्तवर्त्तिनि 'तुर्विशेषणे' । **त्रिभागहीना** त्रिभागोना **ततश्च** चरमभवोत्सेधात् **सिद्धानामवगाहना** स्वप्रदेशनिचितिर्**भवेदे**वं च शरीर-विवरणपूरण एतावतीत्यवगन्तव्यम् । उक्तं हि—'[1]**देहतिभागे सुसिरं तत्पूरणओ तिभागहीण**' त्ति ॥६४॥

एतानेव कालतो वक्तुमाह—

एगत्तेण साईया अपज्जवसिया वि य ।
पुहुत्तेण अणाईया अपज्जवसिया वि य ॥६५॥

व्याख्या—एकत्वेनासहायत्वेन ते **सादिका अपर्यवसिता अपि च** । यत्र हि काले ते सिध्यन्ति स तेषामादिर्न तु कदाचिन्मुक्तेर्भ्रश्यन्ति, अतो न पर्यवसानमिति । **पृथक्त्वेन** बहुत्वेन सामस्त्यापेक्षयेति याव**दनादिका अपर्यवसिता अपि च** । न हि कदाचित् ते नाभूवन् न भविष्यन्ति चेति ॥६५॥

एषामेव स्वरूपमाह—

अरूविणो जीवघणा नाण-दंसणसन्निया ।
अउलं सुहं संपत्ता उवमा जस्स नत्थि उ ॥६६॥

व्याख्या—अरूपिणस्तेषां रूपाद्यभावात् । जीवाश्च ते सततोपयुक्तया घनाश्च शुषिरपूरणतो **जीवघनाः** । ज्ञानदर्शने एव संज्ञा सम्यगवबोधरूपा सञ्जातैषामिति **ज्ञान-दर्शनसंज्ञिता** ज्ञान—दर्शनोपयोगवन्त इत्यर्थः । **अतुलम**परिमितं **सुखं सम्प्राप्ताः** । **उपमा यस्य** सुखस्य **नास्ति** '**तुरेवार्थे**' न विद्यत एव । यतः—'**कर्मक्लेशविमोक्षाच्च मोक्षे सुखमनुत्तमम्**' इति ॥६६॥

---

१. 'देहत्रिभागः शुषिरं तत्पूरणतस्त्रिभागहीना' इति ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पुनस्तेषां क्षेत्रं स्वरूपं चाह—

लोएगदेसे ते सव्वे नाण-दंसणसंनिया ।
संसारपारनित्थिन्ना सिद्धिं वरगइं गया ॥६७॥

व्याख्या—लोकैकदेशे ते सिद्धा इत्यनेन "**मुक्ताः सर्वत्र तिष्ठन्ति व्योमवत् तापवर्जिताः**" इति सर्वगतत्वमतमपास्तम् । तथात्वे सर्वत्र सर्वदा वेदनादिप्रसङ्गात् । **ज्ञान-दर्शनसंज्ञिता** इत्यनेन मा भूत् केषाञ्चित् ज्ञानसंज्ञा, केषाञ्चिद् दर्शनसंज्ञैव केवला किन्तूभे अपि सर्वेषामपीति । **संसारपारं निस्तीर्णाः** पुनरागमनाभावेनातिक्रान्ता इत्यनेन

"ज्ञानिनो धर्मतीर्थस्य कर्तारः परमं पदम् ।
गत्वाऽऽगच्छन्ति भूयोऽपि भवं तीर्थनिकारतः" ॥१॥

इति तेषां मतमनिष्ठितार्थत्वादिदोषप्रसङ्गेन निरस्तम् । **सिद्धिं वरगतिं गता** इत्येतेन क्षीण-कर्मणोऽपि लोकाग्रगमनस्वभावेनोत्पत्तिसमये सक्रियत्वमप्यस्तीति ख्याप्यते । इयं च गाथा प्रायः क्वापि न दृश्यते । यत्र प्रतौ भवति, तत्रैवं व्याख्यायते ॥६७॥

सिद्धानभिधाय संसारिणः प्राह—

संसारत्था उ जे जीवा दुविहा ते वियाहिया ।
तसा य थावरा चेव थावरा तिविहा तहिं ॥६८॥

व्याख्या—संसारस्था इति प्राग्वत् 'तुशब्दः सिद्धेभ्यः सङ्ख्याविशेषद्योतकः' **ये जीवास्ते द्विधा व्याख्याताः** । द्वैविध्यमेवाह—**त्रसाश्च स्थावराश्चैव** । **स्थावरास्त्रिविधाः** त्रिप्रकारा-**स्तस्मिन्**निति द्वैविध्ये सत्यल्पवक्तव्यत्वात् पश्चान्निर्देशेऽप्यादौ स्थावराभिधानम् ॥६८॥

तत् त्रैविध्यमेवाह—

पुढवी-आउ-जीवा य तहेव य वणस्सई ।
इच्चेए थावरा तिविहा तेसिं भेए सुणेह मे ॥६९॥

व्याख्या—जीवशब्दस्य प्रत्येकं सम्बन्धात् पृथिव्येव जीवाः **पृथिवीजीवाः** । आपो जलं ता एव जीवा **अब्जीवाश्च** । **तथैव वनस्पतिजीवाः** । जीव-शरीरयोरन्योऽन्यानुगतत्वेन कथञ्चिदभेदात् पृथिव्यादिषु जीवव्यपदेश इति । **इत्येते** पृथिव्यादयः **स्थावरास्त्रिविधास्तेषां** पृथिव्यादीनां **भेदान् शृणुत** 'मे' **मम** 'कथयत इति शेषः' ॥६९॥

पृथिवीभेदनाह—

दुविहा पुढविजीवा उ सुहुमा बायरा तहा ।
पज्जत्तमपज्जत्ता एवमेए दुहा पुणो ॥७०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या–द्विविधा द्विभेदाः **पृथिवीजीवाः** 'तुः प्राग्वत्' **सूक्ष्मा बादराश्च । तथा पर्याप्ता** आहार-शरीरेन्द्रियोच्छ्वास-वाक्-मनःपर्याप्तिषु चतसृभिस्ताभिः पर्याप्तिमन्त-स्तद्विपरीता**श्चापर्याप्ताः । एवमेते** सूक्ष्मा बादराश्च पर्याप्तापर्याप्तभेदेन **द्विधा पुनः** प्रत्येकमिति ॥७०॥

पुनरेषामुत्तरभेदानाह–

बायरा जे उ पज्जत्ता दुविहा ते वियाहिया ।
सण्हा खरा य बोधव्वा सण्हा सत्तविहा तहिं ॥७१॥

व्याख्या–बादरा ये पुनः पर्याप्ता द्विविधास्ते व्याख्याताः । कथम् ? इत्याह– श्लक्ष्णाश्चूर्णितलोष्टकल्पा मृदुपृथ्वीतदात्मकजीवा अप्युपचारात् **श्लक्ष्णाः** । एव मुत्तरत्रापि । **खराः** कठिनाः '**चः** समुच्चये' **बोद्धव्याः । श्लक्ष्णाः सप्तविधास्तस्मिन्** भेदद्वये ॥७१॥

सप्तविधत्वमेवाह–

किण्हा नीला य रुहिरा य हालिद्दा सुक्किला तहा ।
पंडु पणगमट्टिया खरा छत्तीसईविहा ॥७२॥

व्याख्या–कृष्णाः, नीलाश्च, रुधिराश्चेति लोहिता रक्ता इत्यर्थः, **हारिद्राः** पीताः, **शुक्लाः 'तथेति** समुच्चये' । 'पंडु'त्ति **पाण्डवः**–आपाण्डुरा ईषच्छुभ्रा इत्यर्थः । इत्थं वर्णभेदेन षड्विधत्वमुक्तम् । इह च पाण्डुग्रहणं कृष्णादिवर्णानामपि स्वस्थानभेदान्तरसम्भवसूचकम् । **पनको**ऽत्यन्तसूक्ष्मरजोरूपः स एव **मृत्तिका** । पनकस्य चाकाशे वर्तमानस्य लोके पृथिवीत्वेना-रूढत्वाद् भेदेनोपादानम् । **खरपृथिवीजीवाः षट्त्रिंशद्विधाः** ॥७२॥

तानेवाह–

पुढवी य सक्करा वालुया य उवले सिला य लोणूसे ।
अय-तउय-तंब-सीसग-रुप्प-सुवन्ने य वयरे य ॥७३॥
हरियाले हिंगुलए मणोसिला सासगंजण-पवाले ।
अब्भपडलब्भवालु य बायरकाये मणिविहाणा ॥७४॥
गोमिज्जए य रुयगे अंके फलिहे य लोहियक्खे य ।
मरगय-मसारगल्ले भुयमोयग-इंदनीले य ॥७५॥
चंदण-गेरुय-हंसगब्भ-पुलए सोगंधिए य बोधव्वे ।
चंदप्पभ-वेरुलिए जलकंते सूरकंते य ॥७६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

आसां व्याख्या—पृथिवी शुद्धा या कर्करादिरूपा न भवति । **शर्करा** लघूपल-शकलरूपा । **वालुका** प्रतीता । **उपलो** गण्डशैलादिः । **शिला च** दृषत् । **लवणं** समुद्रलवणादिः । **ऊषश्च** क्षारमृत्तिका । **अयो** लोहं **त्रपुक—ताम्र—सीसक—रूप्य—सुवर्णानि** प्रतीतानि । **वज्रश्च** हीरकः ।। **हरितालो हिङ्गुलको मनःशिलेति** च प्रतीता एव। **सासकश्च** धातुविशेषः । **अञ्जनं** सौवीरकम् । **प्रवालं** विद्रुमः । **अभ्रपटलं** प्रसिद्धम् । **अभ्रवालुका**ऽभ्रपटलमिश्रा वालुका **बादरा काये** इति बादरपृथिवीकाये 'अमी भेदा इति शेषः' । 'मणिविहाण'त्ति 'चस्य गम्यत्वाद्' **मणिविधानानि च** मणिभेदाः ।। तान्येवाह—**गोमेदकश्च रुचकोऽङ्कः स्फटिकश्च लोहिताक्षश्च मरकतो मसारगल्लश्च भुजमोचक इन्द्रनीलश्च** ।। **चन्दनो गैरिको हंसगर्भः पुलकः सौगन्धिकश्च बोद्धव्यः । चन्द्रप्रभो वैडूर्यको जलकान्तः सूर्यकान्तश्च** । इह च पृथिव्यादयश्चतुर्दश, हरितालादयोऽष्टौ, गोमेदकादयश्च क्वचित् कथञ्चिदन्तर्भावाच्चतुर्दशेत्यमी मीलिताः षट्त्रिंशद् भवन्तीति गाथाचतुष्टयार्थः ।।७३-७६।।

बादरपृथिवीकायोपसंहारपूर्वकं सूक्ष्मपृथिवीकायानाह—

एए खरपुढवीए भेया छत्तीसमाहिया ।
एगविहमनाणत्ता सुहुमा तत्थ वियाहिया ।।७७।।

व्याख्या—एते खरपृथिव्यास्तदविभागाच्च तत्स्थजीवानां **भेदाः षट्त्रिंशदाख्याताः** । 'एगविहमनाणत्त' त्ति **एकविधा** यतो न विद्यते नानात्वं भेदो येषां तेऽ**नानात्वाः** । **सूक्ष्मास्तत्रेति** तेषु सूक्ष्म-बादरपृथिवीजीवेषु मध्ये **व्याख्याताः** ।।७७।।

एतानेव क्षेत्रत आह—

सुहुमा य सव्वलोगंमि लोगदेसे य बायरा ।
इत्तो कालविभागं तु तेसिं वुच्छं चउव्विहं ।।७८।।

व्याख्या—सूक्ष्माः सर्वलोके चतुर्दशरज्ज्वात्मके तत्र सर्वत्र सर्वदा तेषां भावात् । लोकस्य देशो विभागो **लोकदेशस्तस्मिन्** '**चः** पुनरर्थे' **बादरास्तेषां** क्वचित् कदाचिद-सत्त्वेन सर्वव्याप्त्यसम्भवात् । अथैतान् गाथाऽर्धेन कालत आह—'इत्तो'त्ति **इतः** क्षेत्र-प्ररूपणानन्तरं **कालविभागं तु तेषां वक्ष्ये चतुर्विधम्** ।।७८।।

यथाप्रतिज्ञातमाह—

संतइं पप्प णाईया अपज्जवसिया वि य ।
ठिइं पडुच्च साईया सपज्जवसिया वि य ।।७९।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—**सन्ततिं** प्रवाहं **प्राप्यानादिका अपर्यवसिता अपि च,** तेषां प्रवाहतः सर्वदा सद्भावात् । **स्थितिं** भवस्थिति-कायस्थितिरूपां **प्रतीत्याश्रित्य सादिकाः सपर्यवसिता अपि च,** द्विविधाया अपि तस्या नियतकालत्वात् ॥७९॥

तथैवाह—

बावीस सहस्साइं वासाणुक्कोसिया भवे ।
आउठिई पुढवीणं अंतोमुहुत्तं जहन्निया ॥८०॥

असंखकालमुक्कोसं अंतोमुहुत्तं जहन्निया ।
कायठिई पुढवीणं तं कायं तु अमुंचओ ॥८१॥

अनयोर्व्याख्या—**द्वाविंशतिः सहस्राणि वर्षाणामुत्कृष्टा भवेदायुःस्थितिः पृथिवीनामिति** पृथिवीजीवानामन्त**मुहूर्तं जघन्यिका** ॥ **असङ्ख्यकालमुत्कृष्टा । अन्तमुर्हूर्तं जघन्यिका** । काये पृथिवीकाये स्थितिस्ततोऽनुद्वर्तनेनावस्थानं **कायस्थितिः पृथिवीनां तमिति** पृथिवीरूपं **कायं** 'तुरेवार्थे' ततो 'अमुंचउ'त्ति **अमुञ्चतामेवा**त्यजतामिति गाथाद्वयार्थः इत्थं द्विविधाया अपि स्थितेर्नैयत्यदर्शनेन सादि-सपर्यवसितत्वमेषाम् ॥८०-८१॥

कालस्य प्रक्रान्तत्वादन्तरकालमाह—

अणंतकालमुक्कोसं अंतोमुहुत्तं जहन्नयं ।
विजढंमि सए काए पुढवीजीवाण अंतरं ॥८२॥

व्याख्या—**अनन्तकालमुत्कृष्टमन्तर्मुहूर्तं जघन्यकम्** । 'विजढंमि'त्ति **त्यक्ते स्वकीये काये पृथिवीजीवानामन्तरम्** । किमुक्तं भवति ? यत् पृथिवीकायानामुद्वर्तनं या च पुनस्तत्रैवोत्पत्तिरनयोर्व्यवधानमिति ॥८२॥

एतानेव भावत आह—

एएसिं वण्णओ चेव गंधओ रस-फासओ ।
संठाणादेसओ वा वि विहाणाइं सहस्ससो ॥८३॥

व्याख्या—सुगमम् । नवरं **विधानानि** भेदाः 'सहस्र इति चोपलक्षणम्' **वर्णादि**तारतम्यस्य बहुभेदत्वेनासङ्ख्यभेदत्वात् । वर्णादीनां भावरूपत्वात् ॥८३॥

अथाप्कायमाह—

दुविहा आउजीवा उ सुहुमा बायरा तहा ।
पज्जत्तमपज्जत्ता एवमेए दुहा पुणो ॥८४॥

बायरा जे उ पज्जत्ता पंचहा ते पकित्तिया ।
सुद्धोदए य उस्से हरयणु-महिया-हिमे ॥८५॥

एगविहमनाणत्ता सुहुमा तत्थ वियाहिया ।
सुहुमा सव्वलोगंमि लोगदेसे य बायरा ॥८६॥

संतइं पप्प णाईया अपज्जवसिया वि य ।
ठिइं पडुच्च साईया सपज्जवसिया वि य ॥८७॥

सत्तेव सहस्साइं वासाणुक्कोसिया भवे ।
आउठिई आऊणं अंतोमुहुत्तं जहन्निया ॥८८॥

असंखकालमुक्कोसं अंतोमुहुत्तं जहन्निया ।
कायठिई आऊणं तं कायं तु अमुंचओ ॥८९॥

अणंतकालमुक्कोसं अंतोमुहुत्तं जहन्नयं ।
विजढंमि सए काए आउजीवाण अंतरं ॥९०॥

एएसिं वण्णओ चेव गंधओ रस-फासओ ।
संठाणादेसओ वा वि विहाणाइं सहस्ससो ॥९१॥

व्याख्या—गतप्राया एव । नवरं **शुद्धोदकं** मेघमुक्तं समुद्रादिजलम् । 'उस्से'त्ति **अवश्यायः** शरदादिषु प्राभातिकसूक्ष्मवर्षः । **हरतनुः** प्रातः सस्नेहभूम्युद्भवस्तृणाग्रोदकबिन्दुः । **महिका** धूमरी गर्भमासे सूक्ष्मवर्षः । **हिमं** प्रतीतम् ॥ **सप्तैव सहस्राणि वर्षाणामुत्कृष्टा भवेदायुः-स्थितिरपाम**ब्जीवानामिति सूत्राष्टकार्थः ॥८४-९१॥

अथ वनस्पतिजीवानाह—

दुविहा वणस्सईजीवा सुहुमा बायरा तहा ।
पज्जत्तमपज्जत्ता एवमेए दुहा पुणो ॥९२॥

बायरा जे उ पज्जत्ता दुविहा ते वियाहिया ।
साहारणसरीरा य पत्तेया य तहेव य ॥९३॥

पत्तेयसरीरा उ णेगहा ते पकित्तिया ।
रुक्खा गुच्छा य गुम्मा य लया वल्ली तणा तहा ॥९४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

वलय [लया] पव्वया कुहणा जलरुहा ओसही तहा ।
हरियकाया य बोधव्वा पत्तेया इति आहिया ॥९५॥

साहारणसरीरा उ णेगहा ते पकित्तिया ।
आलूए मूलए चेव सिंगबेरे तहेव य ॥९६॥

हरिली सरिली सिस्सरिली जावई केयकंदली ।
पलंडु-लसण-कंदे य कंदली य कुहव्वए ॥९७॥

लोहिणीहू य थीहू य तुहगा य तहेव य ।
कण्हे य वज्जकंदे य कंदे सूरणए तहा ॥९८॥

अस्सकन्नी य बोधव्वा सीहकन्नी तहेव य ।
मुसंढी य हलिद्दा य णेगहा एवमायओ ॥९९॥

एगविहमनाणत्ता सुहुमा तत्थ वियाहिया ।
सुहुमा सव्वलोगंमि लोगदेसे य बायरा ॥१००॥

संतइं पप्प णाईया अपज्जवसिया विय ।
ठिइं पडुच्च साईया सपज्जवसिया विय ॥१०१॥

दस चेव सहस्साइं वासाणुक्कोसियं भवे ।
वणस्सईण आउं तु अंतोमुहुत्तं जहन्नयं ॥१०२॥

अणंतकालमुक्कोसं अंतोमुहुत्तं जहन्निया ।
कायठिई पणगाणं तं कायं तु अमुंचओ ॥१०३॥

असंखकालमुक्कोसं अंतोमुहुत्तं जहन्नयं ।
विजढंमि सए काए पणगजीवाण अंतरं ॥१०४॥

एएसिं वन्नओ चेव गंधओ रस-फासओ ।
संठाणादेसओ वा वि विहाणाइं सहस्ससो ॥१०५॥

व्याख्या—एता गाथा व्याख्यातप्राया एव । नवरं साधारणमनन्तजीवानामपि समानमेकं शरीरं येषां ते **साधारणशरीराः** । 'उपलक्षणं चैतदाहारान्नपानग्रहणयोरपि तेषां साधारणत्वात्' । 'पत्तेया य' त्ति **प्रत्येकशरीराश्च** एकमेकं प्रति प्रत्येकमेकैकशो विभिन्नं

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

शरीमेषामिति प्रत्येकशरीरास्तेषां हि यदेकस्य शरीरं तदन्यस्य न भवतीति ॥ प्रत्येकशरीराश्च 'प्रक्रमाज्जीवाः, ये इति शेषः' **अनेकधा ते प्रकीर्त्तिताः । वृक्षा**श्चूतादयः । **गुच्छा** वृन्ताकीमुख्याः । **गुल्माश्च** नवमालिकादयः । **लताश्च**म्पकाद्याः । **वल्ल्यः** कूष्माण्ड्याद्याः । **तृणानि** कुशादीनि ॥ लतावलयानि नालिकेरी–कदल्यादीनि, इह तेषां शाखान्तराभावेन लतारूपत्वम्, त्वचो वलयाकारत्वेन च **वलयलता । पर्वजा** इक्ष्वादयः । **कुहुणा** भूमिस्फोटादयः । **जलरुहाः** पद्मादयः । **औषधयः** शाल्यादयः । **तथा** हरितानि तन्दुलीयकादीनि तान्येव कायाः शरीराणि येषामिति **हरितकायाश्च बोद्धव्याः प्रत्येका इत्याख्याताः** ॥ साधारणशरीरास्तु **आलुक–मूलकादयो हरिद्रा**पर्यन्ताः प्रायः कन्दविशेषास्तत्तद्देशप्रसिद्धा **एवमादयोऽनेकधा** ॥ साधारणलक्षणमिदम्—

"[1]गूढसिरागं पत्तं सच्छीरं जं च होइ निच्छीरं ।
जं पि य पणट्ठसंधिं अणंतजीवं वियाणाहि" ॥१॥

वनस्पतिनां प्रत्येकशरीरापेक्षयोत्कृष्टं **दशवर्षसहस्रमानमायु**रुक्तम् । साधारणानां जघन्यत उत्कृष्टतश्चान्तर्मुहूर्त्तायुष्कत्वात् । उक्तं च–'[2]**निगोयस्स णं भंते ! केवइयं कालं आउठिइ पन्नत्ता ? गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेण वि अंतोमुहुत्तं"** । 'पणगाणं आउ'त्ति पाठे पनका उल्लिजीवा इह तदुपलक्षिताः सामान्येन वनस्पतयो गृह्यन्ते ॥ **अनन्तकालमुत्कृष्टाऽन्तर्मुहूर्तं जघन्या कायस्थितिः पनकानाम्** । इहापि सामान्येन वनस्पतिजीवान् निगोदान् वाऽपेक्ष्योत्कृष्टतोऽनन्तकालमुच्यते । विशेषापेक्षया हि प्रत्येकवनस्पतीनां तथा निगोदानां बादराणां सूक्ष्माणां चासङ्ख्येयकालैव स्थितिः । उक्तं च–"[3]**पत्तेयसरीरबायरवणप्फत्तिकाइयाणं भंते ! केवइयं कालं कायट्ठिई पण्णत्ता ? । गोयमा ! जहण्णेणं अंतोमुहुत्तं, उक्कोसेणं सत्तरि सागरोवमकोडाकोडीओ । निओदेणं भंते ! निओदे त्ति कालतो केचिरं होंति ? । जहण्णेणं तं चेव, उक्कोसेणं अणंतं कालं अणंताओ**

---

१. गूढशिराकं पत्रं सक्षीरं यच्च भवति निःक्षीरम् ।
यदपि च प्रणष्टसन्धि अनन्तजीवं विजानीहि ॥१॥

२. निगोदस्य नु भदन्त ! कियन्तं कालमायुःस्थितिः प्रज्ञप्ता ? ।
गौतम ! जघन्योन्यान्तर्मुहूर्त्तमुत्कृष्टेनाप्यन्तर्मुहूर्त्तम् ।

३. प्रत्येकशरीरबादरवनस्तिकायिकानां भदन्त ! कियन्तं कालं कायस्थितिः प्रज्ञप्ता ? गौतम ! जघन्येनान्तर्मुहूर्त्तम्, उत्कर्षेण सप्ततिः सागरोपमकोटीकोट्यः । निगोदो नु भदन्त ! निगोद इति कालतः कियच्चिरं भवति ? । जघन्येन तच्चैव, उत्कर्षेणानन्तं कालमनन्ता उत्सर्पिण्यः । क्षेत्रतोऽर्धतृतीयाः पुद्गलपरावर्त्ताः । बादरनिगोदपृच्छा । जघन्येन तच्चैव, उत्कृष्टेन सप्ततिः सागरोपमकोटीकोट्यः । सूक्ष्मनिगोदपृच्छा । जघन्येन तच्चैव, उत्कृष्टेनासङ्ख्येयं कालमिति ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

उस्सप्परिणीओ । खेत्तओ अड्ढाइज्जा पुग्गलपरियट्टा । बायरनिगोदपुच्छा । जहण्णेणं तं चेव, उक्कोसेणं सत्तरि सागरोवमकोडाकोडीओ । सुहुमनिगोयपुच्छा । जहण्णेणं तं चेव, उक्कोसेणं असंखेज्जं कालं ति'' ॥ **असङ्ख्यकालमुत्कृष्टं पनकजीवानामन्तरम्** तत उद्वृत्य हि पृथिव्यादिषूत्पत्तव्यम् । तेषु चासङ्ख्येयकालैव कायस्थितिरिहापि तथाऽभिधानादिति सूत्रचतुर्दशकार्थः ॥९२-१०५॥

प्रकृतमुपसंहरन्नुत्तरग्रन्थं च सम्बन्धयन्नाह—

इच्चेए थावरा तिविहा समासेण वियाहिया ।
इत्तो उ तसे तिविहे वुच्छामि अणुपुव्वसो ॥१०६॥

व्याख्या—इत्येवम्प्रकारा एते पृथिव्यादयः स्थानशीलाः स्थावरा**स्त्रिविधाः समासेन** सङ्क्षेपेण **व्याख्याताः**, विस्तरतो ह्यमीषां बहुतरभेदत्वात् । त्रयाणामप्यमीषां स्वयमेवस्थितिस्वभावात्वात् । **इतः** स्थावरविभक्तेरनन्तरं '**तुः** पुनः' **त्रसांस्त्रि**विधान् **वक्ष्यामि** 'अणुपुव्वसो'त्ति **आनुपूर्व्ये**ति ॥१०६॥

तानेवाह—

तेऊ वाऊ य बोधव्वा उराला य तसा तहा ।
इच्चेए तसा तिविहा तेसिं भेए सुणेह मे ॥१०७॥

व्याख्या—तेजोयोगात् **तेजांस्य**ग्नयस्तद्वर्त्तिनो जीवा अपि तथोक्ताः । एवं **वायवश्च** बोद्धव्याः । 'उरालि'त्ति **उदारा** एकेन्द्रियापेक्षया प्रायः स्थूला द्वीन्द्रियादयश्च **त्रसास्तथा** । **इत्येते** त्रस्यन्ति देशाद् देशान्तरं सङ्क्रामन्तीति **त्रसास्त्रिविधाः** । तेजो-वाय्यवोश्च स्थावरनामकर्मोदयेऽप्युक्तरूपं त्रसनमस्तीति । ततस्तेजो-वाय्वोर्गतितः, उदाराणां च लब्धितोऽपि त्रसत्वमिति । **तेषां** तेजःप्रभृतीनां **भेदान् शृणुत मे** कथयत इति ॥१०७॥

तत्र तेजोजीवानाह—

दुविहा तेउजीवा उ सुहुमा बायरा तहा ।
पज्जत्तमपज्जत्ता एवमेए दुहा पुणो ॥१०८॥
बायरा जे उ पज्जत्ता णेगहा ते वियाहिया ।
इंगाले मुम्मुरे अगणी अच्चि-जाला तहेव य ॥१०९॥
उक्का विज्जू य बोधव्वा णेगहा एवमायओ ।
एगविहमणाणत्ता सुहुमा तत्थ वियाहिया ॥११०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सुहुमा सव्वलोगंमि लोगदेसे य बायरा ।
इत्तो कालविभागं तु तेसिं वुच्छं चउव्विहं ॥१११॥

संतइं पप्प णाईया अपज्जवसिया वि य ।
ठिइं पडुच्च साईया सपज्जवसिया वि य ॥११२॥

तिन्नेव अहोरत्ता उक्कोसेण वियाहिया ।
आउठिई तेऊणं अंतोमुहुत्तं जहन्निया ॥११३॥

असंखकालमुक्कोसं अंतोमुहुत्तं जहन्निया ।
कायठिई तेऊणं तं कायं तु अमुंचओ ॥११४॥

अणंतकालमुक्कोसं अंतोमुहुत्तं जहन्नयं ।
विजढंमि सए काए तेउजीवाण अंतरं ॥११५॥

एएसिं वन्नओ चेव गंधओ रस-फासओ ।
संठाणादेसओ वा वि विहाणाइं सहस्ससो ॥११६॥

व्याख्या—एताः प्रायः प्राग्वत् । नवरम्—**अङ्गारो** भास्वरेन्धनरूपः, **मुर्मुरो** भस्ममिश्राग्निकणरूपः, अग्निरुक्तभेदातिरिक्तः, **अर्चि**र्मूलप्रतिबद्धाग्निशिखा दीपशिखा वा, **ज्वाला** छिन्नमूलाऽग्निशिखैवेति गाथानवकार्थः ॥१०८-११६॥

वायुजीवानाह—

दुविहा वाउजीवा य सुहुमा बायरा तहा ।
पज्जत्तमपज्जत्ता एवमेए दुहा पुणो ॥११७॥

बायरा जे उ पज्जत्ता पंचहा ते पकित्तिया ।
उक्कलिया-मंडलिया-घण-गुंजा-सुद्धवाया य ॥११८॥

संवट्टगवाया य णेगहा एवमायओ ।
एगविहमणाणत्ता सुहुमा तत्थ वियाहिया ॥११९॥

सुहुमा सव्वलोगंमि लोगदेसे य बायरा ।
इत्तो कालविभागं तु तेसिं वुच्छं चउव्विहं ॥१२०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

संतइं पप्प णाईया अपज्जवसिया वि य ।
ठिइं पडुच्च साईया सपज्जवसिया वि य ॥१२१॥

तिन्नेव सहस्साइं वासाणुक्कोसिया भवे ।
आउठिई वाऊणं अंतोमुहुत्तं जहन्निया ॥१२२॥

असंखकालमुक्कोसा अंतोमुहुत्तं जहन्निया ।
कायठिई वाऊणं तं कायं तु अमुंचओ ॥१२३॥

अणंतकालमुक्कोसं अंतोमुहुत्तं जहन्नयं ।
विजढंमि सए काए वाउजीवाण अंतरं ॥१२४॥

एएसिं वन्नओ चेव गंधओ रस-फासओ ।
संठाणादेसओ वा वि विहाणाइं सहस्ससो ॥१२५॥

व्याख्या—एता अपि प्राग्वत् । **पञ्चधे**त्युपलक्षणमस्यानेकधेत्यभिधानात् । वात-शब्दस्य प्रत्येकमभिसम्बन्धादु**त्कलिकावाता** ये स्थित्वा स्थित्वा पुनर्वान्ति । **मण्डलिका-वाता** वातोलीरूपाः । **घनवाता** रत्नप्रभाद्यधोवर्त्तिनां घनोदधीनां विमानानां चाधारा हिमपटलकल्पा वायवः । **गुञ्जावाता** ये गुञ्जन्तो वान्ति । **शुद्धवाता** उत्कलिकादि-विकला मन्दानिलादयः ॥ **संवर्त्तकवाताश्च** ये बहिः स्थितमपि तृणादि विवक्षितक्षेत्रान्तः क्षिपन्ति । इति गाथानवकार्थः ॥११७-१२५॥

इत्थं तेजो-वायुत्रसानुक्त्वोदारत्रसानाह—

ओराला तसा जे उ चउहा ते पकित्तिया ।
बेइंदिय तेइंदिय चउरो पंचिंदिया चेव ॥१२६॥

व्याख्या—उदारास्त्रसा ये पुनश्चतुर्धा चतुष्प्रकारास्ते **प्रकीर्त्तिताः** । चतुर्धात्व-मेवाह—द्वे इन्द्रिये स्पर्शन-रसनाख्ये येषां ते **द्वीन्द्रियाः** । एतच्च निर्वृत्युपकरणाख्यं द्रव्येन्द्रियमभिप्रेत्योच्यते । भावेन्द्रियापेक्षयैकेन्द्रियाणामपीन्द्रियपञ्चकस्यापि सम्भवात् । एवं शेषेष्वपीन्द्रियेषु भावनीयम् । तथैव ते एव द्वे इन्द्रिये येषां तृतीयं घ्राणं ते **त्रीन्द्रियाः** । तान्येव त्रीणि चतुर्थं चक्षुश्च येषां ते **चतुरिन्द्रियाः** । येषां चत्वारि तानि पञ्चमं श्रोत्रमिति **पञ्चेन्द्रियाः** ॥१२६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तत्र द्वीन्द्रियभेदानाह–

बेइंदिया उ जे जीवा दुविहा ते पकित्तिया ।
पज्जत्तमपज्जत्ता तेसिं भेए सुणेह मे ॥१२७॥

किमिणो सोमंगला चेव अलसा माइवाहया ।
वासीमुहा य सिप्पीया संखा संखगणा तहा ॥१२८॥

पल्लोयाणुल्लया चेव तहेव य वराडगा ।
जलूगा जालगा चेव चंदणा य तहेव य ॥१२९॥

इइ बेइंदिया एए णेगहा एवमायओ ।
लोएगदेसे ते सव्वे न सव्वत्थ वियाहिया ॥१३०॥

संतइं पप्प णाईया अपज्जवसिया वि य ।
ठिइं पडुच्च साईया सपज्जवसिया वि य ॥१३१॥

वासाइं बारसेव उ उक्कोसेण वियाहिया ।
बेइंदियआउठिई अंतोमुहुत्तं जहन्निया ॥१३२॥

संखेज्जकालमुक्कोसा अंतोमुहुत्तं जहन्निया ।
बेइंदियकायठिई तं कायं तु अमुंचओ ॥१३३॥

अणंतकालमुक्कोसं अंतोमुहुत्तं जहन्नयं ।
बेइंदियजीवाणं अंतरेयं वियाहियं ॥१३४॥

एएसिं वन्नओ चेव गंधओ रस-फासओ ।
संठाणादेसओ वा वि विहाणाइं सहस्ससो ॥१३५॥

व्याख्या–एताः प्रायः पूर्ववदेव द्वीन्द्रियाभिलापेन व्याख्येयाः । नवरं **कृमयो**-ऽशुच्यादिभवाः । **अलसाः** प्रतीताः । **मातृवाहका** ये काष्ठशकलानि समोभयाग्रतया सम्बध्नन्ति । **वासीमुखा** वास्याकारमुखाः । 'सिप्पीय' त्ति **शुक्तयः । शङ्खाः** प्रसिद्धाः । **शङ्खनिकास्**तदाकृतय एवात्यन्तलघवो जीवाः ॥ **वराटकाः** कपर्दकाः । **जलौकसो** दुष्टरक्ताकर्षिण्यः । **चन्दनका** अक्षाः । शेषास्तु यथासम्प्रदायं वाच्याः ॥ वर्षाणि द्वादशैव तूत्कृष्टत इति गाथानवकार्थः ॥१२७-१३५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

त्रीन्द्रियानाह—

तेइंदिया उ जे जीवा दुविहा ते पकित्तिया ।
पज्जत्तमपज्जत्ता तेसिं भेए सुणेह मे ॥१३६॥

कुंथु-पिवीलिया दंसा उक्कलुद्देहिया तहा ।
तणहार-कट्ठहारा य मालूगा पत्तहारगा ॥१३७॥

कप्पासट्ठिमिंजा य तिंदुगा तउसमिंजगा ।
सदावरी य गुम्मी य बोधव्वा इंदगाइया ॥१३८॥

इंदगोवगमाइया णेगहा एवमायओ ।
लोएगदेसे ते सव्वे न सव्वत्थ वियाहिया ॥१३९॥

संतइं पप्प णाईया अपज्जवसिया वि य ।
ठिइं पडुच्च साईया सपज्जवसिया वि य ॥१४०॥

एगूणवन्नहोरत्ता उक्कोसेण वियाहिया ।
तेइंदिय-आउठिई अंतोमुहुत्तं जहन्निया ॥१४१॥

संखिज्जकालमुक्कोसा अंतोमुहुत्तं जहन्निया ।
तेइंदियकायठिई तं कायं तु अमुंचओ ॥१४२॥

अणंतकालमुक्कोसं अंतोमुहुत्तं जहन्नयं ।
तेइंदियजीवाणं अंतरेयं वियाहियं ॥१४३॥

एएसिं वन्नओ चेव गंधओ रस-फासओ ।
संठाणादेसओ वा वि विहाणाइं सहस्ससो ॥१४४॥

व्याख्या—एता अपि पूर्ववन्नवरं **कुन्थवो**ऽनुद्धरितसत्त्वप्रभृतयः । **पिपीलिका** कीटिका ॥ **गुम्मी** शतपदी खज्जूरकः । एवमन्येऽपि यथासम्प्रदायं ज्ञेयाः ॥ एकोनपञ्चाशदहोरात्राण्यायुः स्थितिः । इति गाथानवकार्थः ॥१३६-१४४॥

चतुरिन्द्रियानाह—

चउरिंदिया उ जे जीवा दुविहा ते पकित्तिया ।
पज्जत्तमपज्जत्ता तेसिं भेए सुणेह मे ॥१४५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अंधिया पुत्तिया चेव मच्छिया मसगा तहा ।
भमरे कीड-पयंगे य ढिंकुणे कुंकुणे तहा ॥१४६॥

कुकुडे सिंगिरीडी य नंदावत्ते य विंछिए ।
डोले य भिंगिरीडी य विरिली अच्छिवेहए ॥१४७॥

अच्छिले माहए अच्छिरोडए विचित्तचित्तए ।
उहिंजलिया जलकारी य तंनीया तंबगाइया ॥१४८॥

इइ चउरिंदिया एए णेगहा एवमायओ ।
लोगस्स एगदेसंमि ते सव्वे परिकित्तिया ॥१४९॥

संतइं पप्प णाईया अपज्जवसिया वि य ।
ठिइं पडुच्च साईया सपज्जवसिया वि य ॥१५०॥

छच्चेव य मासा उ उक्कोसेण वियाहिया ।
चउरिंदियआउठिई अंतोमुहुत्तं जहन्निया ॥१५१॥

संखिज्जकालमुक्कोसं अंतोमुहुत्तं जहन्निया ।
चउरिंदियकायठिई तं कायं तु अमुंचओ ॥१५२॥

अणंतकालमुक्कोसं अंतोमुहुत्तं जहन्नयं ।
विजढंमि सए काए अंतरेयं वियाहियं ॥१५३॥

एएसिं वन्नओ चेव गंधओ रस-फासओ ।
संठाणादेसओ वा वि विहाणाइं सहस्ससो ॥१५४॥

व्याख्या—एता अपि पूर्ववदेव । नवरमेतज्जीवभेदाः केचित् प्रसिद्धाः, केचित् तत्तद्देशप्रसिद्धाः सम्प्रदायादवसेयाः । तथा षण्मासानेवोत्कृष्टा स्थितिः । इति गाथा-दशकार्थः ॥१४५-१५४॥

पञ्चेन्द्रियानाह—

पंचिंदिया उ जे जीवा चउव्विहा ते वियाहिया ।
नेरइय तिरिक्खा य मणुया देवा य आहिया ॥१५५॥

व्याख्या—पञ्चेन्द्रियास्तु ये जीवाश्चतुर्विधास्ते व्याख्यातास्तद् यथा—**नैरयिकास्तिर्यञ्चश्च मनुजाश्च देवाश्चाख्यातास्तीर्थकरादिभिः** ॥१५५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तत्र तावन्नैरयिकानाह—

नेरइया सत्तविहा पुढवीसू सत्तसू भवे ।
रयणाभ-सक्कराभा वालुयाभा आहिया ॥१५६॥

पंकाभा धूमाभा तमा तमतमा तहा ।
इइ नेरइया एए सत्तहा परिकित्तिया ॥१५७॥

लोगस्स एगदेसंमि ते सव्वे उ वियाहिया ।
इत्तो कालविभागं तु तेसिं वुच्छं चउव्विहं ॥१५८॥

संतइं पप्प णाईया अपज्जवसिया वि य ।
ठिइं पडुच्च साईया सपज्जवसिया वि य ॥१५९॥

सागरोवममेगं तु उक्कोसेण वियाहिया ।
पढमाए जहन्नेणं दसवाससहस्सिया ॥१६०॥

तिन्नेव सागरा उ उक्कोसेण वियाहिया ।
दुच्चाए जहन्नेणं एगं तु सागरोवमं ॥१६१॥

सत्तेव सागरा उ उक्कोसेण वियाहिया ।
तईयाए जहन्नेणं तिन्नेव उ सागरोवमा ॥१६२॥

दससागरोवमा उ उक्कोसेण वियाहिया ।
चउत्थीए जहन्नेणं सत्तेव उ सागरोवमा ॥१६३॥

सत्तरससागरा उ उक्कोसेण वियाहिया ।
पंचमाए जहन्नेणं दस चेव उ सागरोवमा ॥१६४॥

बावीससागरा उ उक्कोसेण वियाहिया ।
छट्ठीए जहन्नेणं सत्तरससागरोवमा ॥१६५॥

तित्तीस सागरा उ उक्कोसेण वियाहिया ।
सत्तमाए जहन्नेणं बावीसं सागरोवमा ॥१६६॥

जा चेव उ आउठिई नेरइयाणं वियाहिया ।
सा तेसिं कायठिई जहन्नुक्कोसिया भवे ॥१६७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अणंतकालमुक्कोसं अंतोमुहुत्तं जहन्नयं ।
विजढंमि सए काए नेरइयाणं तु अंतरं ॥१६८॥
एएसिं वन्नओ चेव गंधओ रस-फासओ ।
संठाणादेसओ वा वि विहाणाइं सहस्ससो ॥१६९॥

आसां व्याख्या—नैरयिकाः सप्तविधाः सप्तप्रकाराः । यतः **पृथिवीषु सप्तसु** भवेयुस्ततस्तद्भेदात् तेषां सप्तविधत्वमिति भावः । कास्ताः सप्त ? इत्याह—'रयणाभ'त्ति रत्नानां वैडूर्यादीनामाभा स्वरूपतः प्रतिभासनमस्यामिति **रत्नाभा,** इत्थं चैतत् तत्र रत्न-काण्डस्य भवनपतिभवनानां च विविधरत्नवतां सम्भवात् । एवं सर्वत्र । नवरं **शर्करा** श्लक्ष्णपाषाणशकलरूपा **तदाभा** । 'धूमाभ'त्ति यद्यपि तत्र धूमासम्भवस्तथापि तदाकार-परिणतानां पुद्गलानां च सम्भवात् **धूमाभात्वम्** । तमोरूपत्वाच्च **तमःप्रभा** । प्रकृष्टतरतम-स्त्वाच्च **तमस्तमा** । **इत्यनेन** पृथिवीसप्तविधत्वप्रकारेण **नैरयिका एते सप्तधा परिकीर्त्तिताः** ॥ क्षेत्रतो **लोकस्यैकदेशे ते** नैरयिका व्याख्याताः । **इतो**ऽनन्तरं **कालविभागं वक्ष्ये चतुर्विधम्** ॥ चतुर्विधत्वमेवाह—कालतः **सन्ततिं प्राप्यानाद्यपर्यवसितत्वम् । स्थितिं प्राप्य सादिसपर्यवसितत्वमिति** ॥ **सागरोपममेकं तूत्कृष्टेन व्याख्याता प्रथमायां** नरकपृथिव्यां **जघन्येन दशवर्षसहस्रिका** 'प्रस्तावादायुः स्थितिर्नैरयिकाणाम्' इतीहोत्तरसूत्रेषु च द्रष्टव्यम् ॥ **त्रीण्येव सागरोपमाणि तूत्कृष्टेनाख्याता द्वितीयायां जघन्येन पुनरेकं सागरोपमम् । सप्त सागरोपमाणि तूत्कृष्टेन तृतीयायां जघन्येन पुनस्त्रीण्येव** तानि ॥ **दश सागरोपमाणि तूत्कृष्टेन चतुर्थ्यां जघन्येन सप्तैव ॥ सप्तदश सागरोपमाणि तूत्कृष्टेन पञ्चम्यां जघन्येन दशैव ॥ द्वाविंशतिसागरोपमाण्युत्कृष्टेन षष्ठ्यां जघन्येन सप्तदशैव ॥ त्रयस्त्रिंशत् सागरोपमाणि तूत्कृष्टेन व्याख्याता सप्तमनरकपृथिव्यां जघन्येन द्वाविंशतिसागरोपमा** ॥ आयुःस्थितिरुक्ता कायस्थितिमाह—**या चैव पुनरायुःस्थिति-र्नैरयिकाणां व्याख्याता सैव तेषां कायस्थितिर्जघन्योत्कृष्टा भवेद्** । यतस्ते तत उद्वृत्ताः पुनस्तत्र नोत्पद्यन्ते, किन्तु गर्भज-पर्याप्त-सङ्ख्येयवर्षायुषेष्वेवेति ॥ अन्तर-भावाभिधायकं सूत्रद्वयं प्राग्वत् । नवर**मन्तर्मुहूर्तं जघन्यमन्तरं** यदाऽन्यतरनरकादुद्वृत्य कश्चिज्जीवो गर्भज-पर्याप्ता-मत्स्यादिषूत्पद्यते । तत्रातिसङ्क्लिष्टाध्यवसायोऽन्तर्मुहूर्तमायुः प्रतिपाल्य मृत्वाऽन्यतमनरक एवोपजायते तदा लभ्यत इति भावः । इति चतुर्दशसूत्रार्थः ॥१५६-१६९॥

अथ तिरश्चामाह—

पंचिंदियतिरिक्खा उ दुविहा ते वियाहिया ।
संमुच्छिमतिरिक्खा उ गब्भवक्कंतिया तहा ॥१७०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—पञ्चेन्द्रियतिर्यञ्चो द्विधा ते व्याख्याताः सम्मूर्च्छनं सम्मूर्च्छा अतिशयमूढता तया निर्वृत्ताः सम्मूर्च्छिमास्ते च ते तिर्यञ्चश्च **सम्मूर्च्छिमतिर्यञ्चो** ये मनःपर्याप्त्यभावतः सदा सम्मूर्च्छिता इवावतिष्ठन्ते । **तथा** गर्भे व्युत्क्रान्तिरुत्पत्तिर्येषां ते **गर्भव्युत्कान्तिका** आख्याताः ॥१७०॥

तद्भेदानाह—

दुविहा वि ते भवे तिविहा जलयरा थलयरा तहा ।
खहयरा य बोधव्वा तेसिं भेए सुणेह मे ॥१७१॥

व्याख्या—द्विधाऽपि ते तिर्यञ्चो भवन्ति त्रिधा । जलचराः स्थलचराः खचराश्च बोधव्यास्तेषां भेदान् शृणुत मे 'कथयत इति शेषः' ॥१७१॥

तत्र जलचरभेदानाह—

मच्छा य कच्छभा य गाहा य मगरा तहा ।
सुंसुमारा य बोधव्वा पंचहा जलयराहिया ॥१७२॥

लोएगदेसे ते सव्वे न सव्वत्थ वियाहिया ।
इत्तो कालविभागं तु तेसिं वुच्छं चउव्विहं ॥१७३॥

संतइं पप्प णाईया अपज्जवसिया वि य ।
ठिइं पडुच्च साईया सपज्जवसिया वि य ॥१७४॥

इक्का य पुव्वकोडी उक्कोसेणं वियाहिया ।
आउठिई जलयराणं अंतोमुहुत्तं जहन्निया ॥१७५॥

पुव्वकोडीपुहत्तं तु उक्कोसेणं वियाहिया ।
कायठिई जलयराणं अंतोमुहुत्तं जहन्निया ॥१७६॥

अणंतकालमुक्कोसं अंतोमुहुत्तं जहन्नयं ।
विजढंमि सए काए जलयराणं तु अंतरं ॥१७७॥

एएसिं वन्नओ चेव गंधओ रस-फासओ ।
संठाणादेसओ वा वि विहाणाइं सहस्ससो ॥१७८॥

व्याख्या—मत्स्या मीनाः । **कच्छपाः** कूर्माः । **ग्राहा** जलचरविशेषाः । **मकराः** सुंसुमारा अपि तद्विशेषा एव ॥ 'लोएगदेसे' इत्यादि षट् सूत्राणि क्षेत्र-काल-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भावाभिधायीनि । तथेह **पृथक्त्वं** द्विप्रभृत्या नवान्तरम् ॥१७२-१७८॥

स्थलचरभेदानाह—

चउप्पया य परिसप्पा दुविहा थलयरा भवे ।
चउप्पया चउव्विहा उ ते मे कित्तयओ सुण ॥१७९॥

एगखुरा दुखुरा चेव गंडीपय सनप्पया ।
हयमाई गोणमाई गयमाइ सीहमाइणो ॥१८०॥

भु-उरगपरिसप्पा परिसप्पा दुविहा भवे ।
गोहाई अहिमाई इक्केक्का णेगहा भवे ॥१८१॥

लोएगदेसे ते सव्वे न सव्वत्थ वियाहिया ।
इत्तो कालविभागं तु तेसिं वोच्छं तु चउव्विहं ॥१८२॥

संतइं पप्प णाईया अपज्जवसिया वि य ।
ठिइं पडुच्च साईया सपज्जवसिया वि य ॥१८३॥

पलिउवमाइ तिन्नि उ उक्कोसेण वियाहिया ।
आउठिई थलयराणं अंतोमुहुत्तं जहन्निया ॥१८४॥

पलिउवमाइ तिन्नि उ उक्कोसेण साहिया ।
पुव्वकोडीपुहुत्तेणं अंतोमुहुत्तं जहन्निया ॥१८५॥

कायठिई थलयराणं अंतरं तेसिमं भवे ।
कालं अणंतमुक्कोसं अंतोमुहुत्तं जहन्नयं ॥१८६॥

एएसिं वन्नओ चेव गंधओ रस-फासओ ।
संठाणादेसओ वा वि विहाणाइं सहस्ससो ॥१८७॥

व्याख्या—प्राग्वत् । नवरं **चतुष्पदाः परिसर्पाश्चेति द्विविधाः स्थलचरा भवेयुः** । तत्र परि समन्तात् सर्पन्ति गच्छन्तीति परिसर्पाः ॥ तत्र चतुष्पदाश्चतुर्विधास्तानेवाह—एकखुरश्चरणाधोवर्त्यस्थिविशेषो येषां ते **एकखु** अश्वादयः । एवं **द्विखुरा** गवादयः । गण्डी पद्मकर्णिका तद्वद् वृत्ततया पदानि येषां ते **गण्डीपदा** गजादयः । 'सनप्पय'त्ति 'सूत्रत्वात्' सह नखैर्वर्तन्त इति सनखास्तथाविधानि पदानि येषां ते **सनखपदाः** सिंहादयः परिसर्पानाह—'भुउरग'त्ति भुजाः शरीरावयवविशेषास्तैः परिसर्पन्तीति **भुजपरिसर्पाः** । उरो

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

वक्षस्तेन परिसर्पन्तीत्युरःपरिसर्पाः । **गोधादयः अहयः** सर्पास्तदादयो यथाक्रम**मेकैको-ऽनेकधा** गोधेरक-नकुलादिभेदतो गोणसाजगरादिभेदतश्च **भवेयुः** ॥ **पल्योपमानि तु त्रीण्युत्कृष्टेन साधिकानि पूर्वकोटीपृथक्त्वेन** एतेषां **कायस्थितिः** । पल्योपमायुषो हि न पुनस्तत्रैवोत्पद्यन्ते । ये तु पूर्वकोट्यायुषो मृत्वा तत्रैवोपजायन्ते तेऽपि सप्ताष्टभवग्रहणानि यावत् । पञ्चेन्द्रियनर-तिरश्चामधिकनिरन्तरभवान्तरासम्भवात् । अत एतावत् एवाधिक्यस्य सम्भव इति भावः ॥ १७९-१८७॥

खचरानाह—

चम्मे उ लोमपक्खीया तइया समुग्गपक्खीया ।
वियय‍पक्खी य बोद्धव्वा पक्खिणो य चउव्विहा ॥१८८॥

लोएगदेसे ते सव्वे न सव्वत्थ वियाहिया ।
इत्तो कालविभागं तु तेसिं वुच्छं चउव्विहं ॥१८९॥

संतइं पप्प णाईया अपज्जवसिया वि य ।
ठिइं पडुच्च साईया सपज्जवसिया वि य ॥१९०॥

पलिओवमस्स भागो असंखिज्जइमो भवे ।
आउठिई खहयराणं अंतोमुहुत्तं जहन्निया ॥१९१॥

असंखभागो पलियस्स उक्कोसेण उ साहिओ ।
पुव्वकोडीपुहुत्तेणं अंतोमुहुत्तं जहन्निया ॥१९२॥

कायठिई खहयराणं अंतरं तेसिमं भवे ।
कालमणंतमुक्कोसं अंतोमुहुत्तं जहन्नयं ॥१९३॥

एएसिं वन्नओ चेव गंधओ रस-फासओ ।
संठाणादेसओ वा वि विहाणाइं सहस्ससो ॥१९४॥

व्याख्या—पूर्ववत् । नवरं **चर्मपक्षिणश्च**र्मचटिकाद्यास्तेषां चर्मरूपा एव पक्षा भवन्ति। **रोमपक्षिणो** राजहंसादयः । **समुद्गपक्षिणः** समुद्गकाकारपक्षवन्तस्ते च मानुषोत्तराद् बहिर्वर्त्तिनः । **विततपक्षिणो** ये सर्वदा विस्तारितपक्षा एवासते । इह यत्क्षेत्र-स्थित्यन्तरादि प्राक्तनसदृशमेव पुनः पुनरुच्यते, तद् विस्तारार्थिशिष्यानुग्रहार्थं यदेवंविधा अपि प्रज्ञापनीया इत्यदुष्टमिति ॥१८८-१९४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अथ मनुष्यानाह—

मणुया दुविहभेया उ ते मे कित्तयओ सुण ।
संमुच्छिमा य मणुया गब्भवक्कंतिया तहा ॥१९५॥

गब्भवक्कंतिया जे उ तिविहा ते वियाहिया ।
अकम्म-कम्मभूमा य अंतरद्दीवया तहा ॥१९६॥

पनरस-तीसइविहा भेया अट्ठवीसई ।
संखा उ कमसो तेसिं इइ एसा वियाहिया ॥१९७॥

संमुच्छिमाण एसेव भेओ होइ आहिओ ।
लोगस्स एगदेसंमि ते सव्वे वियाहिया ॥१९८॥

संतइं पप्प णाईया अपज्जवसिया वि य ।
ठिइं पडुच्च साईया सपज्जवसिया वि य ॥१९९॥

पलिओवमा उ तिन्नि उ उक्कोसेण वियाहिया ।
आउठिई मणुयाणं अंतोमुहुत्तं जहन्निया ॥२००॥

पलिओवमा उ तिन्नि उ उक्कोसेण साहिया ।
पुव्वकोडिपुहत्तेणं अंतोमुहुत्तं जहन्निया ॥२०१॥

कायठिई मणुयाणं अंतरं तेसिमं भवे ।
अणंतकालमुक्कोसं अंतोमुहुत्तं जहन्नगं ॥२०२॥

एएसिं वण्णओ चेव गंधओ रस-फासओ ।
संठाणादेसओ वा वि विहाणाइं सहस्ससो ॥२०३॥

व्याख्या—प्राग्वत् । नवरं 'अकम्म-कम्मभूमा य'त्ति भूमेत्यस्य प्रत्येकं सम्बन्धादकर्मभूमौ भवा **आकर्मभूमा** एवं **कार्मभूमाश्च** । अन्तरमिह समुद्रमध्यं तस्मिन् द्वीपा अन्तरद्वीपास्तेषु जाता **अन्तरद्वीपजाः** ॥ 'पनरस-तीसइविह'त्ति विधशब्दस्योभयत्र योगात् **पञ्चदशविधाः** कार्मभूमा भरतैरावत-विदेहाभिधानानां तिसृणां कर्मभूमीनां प्रत्येकं पञ्चसङ्ख्यत्वादमीषामपि तदाधारत्वात् पञ्चदशसङ्ख्यत्वम् । **त्रिंशद्विधा** आकर्मभूमाः । अत्रापि हैमवत-हरिवर्ष-रम्यकैरण्यवत-देवकुरूत्तरकुरुरूपाणां षण्णामप्यकर्मभूमीनां प्रत्येकं पञ्चसङ्ख्यया गुणितानां त्रिंशत्वात् । इह च **क्रमश** इत्युक्तावपि पश्चान्निर्दिष्टानामपि

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कार्मभूमानां मुक्तिसाधकत्वेन प्राधान्यादादौ भेदाभिधानम् । भेदा**श्चाष्टाविंशतिरन्तर**-द्वीपजानामिति विभक्तिविपरिणामेन सम्बन्धनीयम् । अन्तरद्वीपानां तत्सङ्ख्यत्वात् तद्भवत्वात् तेषाम् । ते चैवम्—क्षुल्लहिमवतः पूर्वस्यामपरस्यां च दिशि जम्बूद्वीपवेदि-कान्तात्परतः प्रत्येकं द्वे द्वे दंष्ट्रे विदिगभिमुखे विनिर्गते । तद् यथा—पूर्वस्यामेकेशान्यभि-मुखी दंष्ट्रा, द्वितीयाऽऽग्नेय्यभिमुखी, पश्चिमस्यामेका नैर्ऋत्यभिमुखी, द्वितीया वायव्यभि-मुखी । एवं चतसृषु विदिगभिमुखिषु दंष्ट्रासु प्रत्येकं त्रीणि त्रीणि योजनशतानि लवणसमुद्रमतिक्रम्य विदिक्ष्वेकैकभावेन चत्वारोऽन्तरद्वीपाः प्रत्येकं योजनशतत्रयविस्ताराः सन्ति । ततस्तत्परतस्तास्वेव चतसृषु दंष्ट्रासु प्रत्येककमेकैकयोजनशतवृद्ध्या वर्धिताः षट्षडन्तरद्वीपाश्चतुर्भिर्गुणिताश्चतुर्विंशतिद्वीपाः स्युस्ततश्चाद्यान्तरद्वीपचतुष्क सहिता अष्टाविंशतिरन्तरद्वीपाः सन्ति । एवं शिखरिणि पर्वतेऽप्यष्टाविंशतिरिति । सर्वसाम्याच्चैषां भेदेनाविवक्षित्वान्न सूत्रेऽष्टाविंशतिसङ्ख्याविरोध इति भावः । तेषु च युगलधार्मिकाः प्रतिवसन्ति । तच्छरीरमानाद्येवम्—

"[1]अंतरदीवेसु नरा धणुसयअट्ठूसिया सया मुइया ।
पालंति मिहुणभावं पल्लस्स असंखभागाऊ ॥१॥
चउसट्ठी पिट्ठकरंडयाण मणुयाण तेसिमाहारो ।
भत्तस्स चउत्थस्स उ उणसीतिदिणाणुपालणया" ॥२॥

नामायाम-परिध्यादि **क्षेत्रसमासबृहट्टीकातो**ऽवसेयम् ॥ **सम्मूर्च्छिमानामेष एव भेदो** यश्चाकर्मभूमादिगर्भजानामुक्तो **भवत्याख्यातः** । ते हि तेषामेव वान्त-पित्तादिषु सम्भव-न्त्यङ्गुलासङ्ख्येयभागमात्रावगाहना इति ॥ पल्योपमानि त्रीण्यायुःस्थितिरिति युगलधा-र्मिकापेक्षया ॥ कायस्थितिश्च **पल्योपमानि त्रीणि पूर्वकोटिपृथक्त्वेनाधिकानी**ति । एतच्च तिर्यक्-कायस्थित्यभिहिताभिप्रायेण ज्ञेयम् ॥ **अन्तरस्य चानन्तकालत्वं** साधारणवनस्पति-कायस्थित्यपेक्षयेति सूत्रनवकार्थः ॥१९५-२०३॥

देवानाह—

देवा चउव्विहा वुत्ता ते मे कित्तयओ सुण ।
भोमिज्ज-वाणमंतर-जोइस-वेमाणिया तहा ॥२०४॥

---

१. अन्तरद्वीपेषु नरा धनुःशताष्टोच्छ्रिताः सदा मुदिताः ।
पालयन्ति मिथुनभावं पल्यस्यासङ्ख्यभागायुषः ॥१॥
चतुःषष्टिः पृष्ठकरण्डकानां मनुजानां तेषामाहारः ।
भक्तेन चतुर्थेन तूनाशीतिदिनानुपालनता ॥२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—देवाश्चतुर्विधा उक्तास्तान् **मे कीर्त्तयतः शृणु । भौमेयका** भवनवासिनो रत्नप्रभापृथिव्या अशीतिसहस्रोत्तरयोजनलक्षबाहल्याया उपर्येकं योजनसहस्रमवगाह्याधश्चैकं योजनसहस्रं मुक्त्वा मध्येऽष्टसप्तत्युत्तरयोजनलक्षे भवनवासिदेवानां भवनसद्भावात् । 'वाणमंतर'त्ति 'आर्षत्वाद्' विविधा व्यन्तराण्युत्कर्षापकर्षात्मकविशेषरूपाणि निवासभूतानि गिरिकन्दर-विवरादीनि येषां ते **व्यन्तराः** । द्योतयन्ते इति द्योर्तींषि विमानानि तन्निवासिनो देवास्तु **ज्योतिष्काः** । विशेषेण मानयन्त्युपभुञ्जन्ति सुकृतिन एतानीति विमानानि तेषु भवा **वैमानिकाः । तथे**ति समुच्चये ॥२०४॥

एषामेवोत्तरभेदनाह—

दसहा उ भवणवासी अट्ठहा वणचारिणो ।
पंचविहा जोइसिया दुविहा वेमाणिया तहा ॥२०५॥

व्याख्या—'तुरेवार्थे' **दशधैव भवनवासिनः । अष्टधा**ऽष्टप्रकारा वनेषु क्रीडैकरसतया चरितुं शीलमेषां ते **वनचारिणो** व्यन्तराः । **पञ्चविधा ज्योतिष्काः । द्विविधा वैमानिकास्तथे**ति ॥२०५॥

एतेषामेव नामान्याह—

असुरा नाग-सुवन्ना विज्जू अग्गी य आहिया ।
दीवोदही-दिसा-वाया थणिया भवणवासिणो ॥२०६॥

पिसाय-भूया जक्खा य रक्खसा किन्नरा य किंपुरिसा ।
महोरगा य गंधव्वा अट्ठविहा वाणमंतरा ॥२०७॥

चंदा सूरा य नक्खत्ता गहा तारागणा तहा ।
दिसाविचारिणो चेव पंचहा जोइसालया ॥२०८॥

वेमाणिया य जे देवा दुविहा ते वियाहिया ।
कप्पोवगा य बोधव्वा कप्पाईया तहेव य ॥२०९॥

कप्पोवगा य बारसहा सोहम्मीसाणगा तहा ।
सणंकुमार-माहिंदा बंभलोगा य लंतगा ॥२१०॥

महासुक्का सहस्सारा आणया पाणया तहा ।
आरणा अच्चुया चेव इइ कप्पोवगा सुरा ॥२११॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कप्पाईया य जे देवा दुविहा ते वियाहिया ।
गेविज्जाणुत्तरा चेव गेविज्जा नव वियाहिया ॥२१२॥

हिट्ठिमा हिट्ठिमा चेव हिट्ठिमा मज्झिमा तहा ।
हिट्ठिमा उवरिमा चेव मज्झिमा हिट्ठिमा तहा ॥२१३॥

मज्झिमा मज्झिमा चेव मज्झिमा उवरिमा तहा ।
उवरिमा हिट्ठिमा चेव उवरिमा मज्झिमा तहा ॥२१४॥

उवरिमा उवरिमा चेव इइ गेविज्जगा सुरा ।
विजया वेजयंता य जयंता अपराजिया ॥२१५॥

सव्वट्ठसिद्धगा चेव पंचहाणुत्तरा सुरा ।
इइ वेमाणिया एए णेगहा एवमायओ ॥२१६॥

लोगस्स एगदेसंमि ते सव्वे परिकित्तिया ।
इत्तो कालविभागं तु तेसिं वुच्छं चउव्विहं ॥२१७॥

संतइं पप्प णाईया अपज्जवसिया वि य ।
ठिइं पडुच्च साईया सपज्जवसिया वि य ॥२१८॥

आसां व्याख्या—प्रायः प्रतता एव । नवरं **असुरा** इत्यसुरकुमाराः । एवं नागकुमारादिष्वपि कुमारशब्दः सर्वत्र योज्यः । सर्वेऽपि ह्यमी कुमाराकारधारिणः कुमारवन्मधुरललितगतयः शृङ्गाराभिजातरूपविक्रिया अद्भुतवेषाभरण-प्रहरण-यान-वाहना उल्बणरागाः क्रीडापराश्चेत्यसुरकुमारा इत्युच्यन्ते ॥ **तारागणाः** प्रकीर्णतारकसमूहाः । दिशासु विशेषेण मेरुप्रादक्षिण्यनित्यचारितालक्षणेन चरन्ति परिभ्रमन्तीत्येवंशीला **दिशाविचारिणः** । तद्विमानानि ह्येकविंशैरेकादशाधिकैर्योजनशतैर्मेरोश्चतसृष्वपि दिक्ष्वबाधया नित्यमेव प्रदक्षिणं चरन्तीति तेऽप्येवमुक्ताः । ज्योतींष्युक्तन्यायतो विमानान्यालया आश्रया येषां ते **ज्योतिरालयाः** ॥ कल्पन्ते इन्द्रसामानिकादि-दशप्रकारत्वेन विभज्यन्ते देवा एतेष्विति कल्पा देवलोकास्तानुपगच्छन्त्युत्पत्तिविषयतया प्राप्नुवन्तीति **कल्पोपगाः** । कल्पानुक्तरूपानतीतास्तदुपरिवर्तिस्थानोत्पत्तितयाऽतिक्रान्ताः **कल्पातीताः** ॥ सुधर्मा नामेन्द्रस्य सभाऽस्मिन्नस्तीति सौधर्मः कल्पः, स एषां स्थितिविषयोऽस्तीति **सौधर्मिणः** । एव**मीशाना**दिष्वपि व्युत्पत्तिः कार्या ॥ ग्रीवेव ग्रीवा लोकपुरुषस्य त्रयोदशरज्जूपरिवर्त्ती प्रदेशस्तां निविष्टतयाऽतिभ्राजिष्णुतयाभरणभूता ग्रैवेया देवावासास्तन्नवासिनो देवा अपि **ग्रैवेया** नवविधाः ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तद्यथा-'हेट्ठिम'त्ति अधस्तना उपरितनषट्कापेक्षया प्रथमास्त्रयस्तेष्वपि हेट्ठिम' त्ति **अधस्तना अधस्तनाधस्तनाः** प्रथमत्रिकाधोवर्त्तिनः । ततः प्रथमत्रिके **एवाधस्तन-मध्यमाः**। पुनस्तत्रैव**अधस्तनोपरितनाः** । एवं द्वितीयत्रिके मध्यवर्त्तिनि **मध्यमाधस्तनाः** ॥ **मध्यममध्यमाः** । **मध्यमोपरितनाः** । तथा तृतीयोपरितनत्रिके **उपरितनाधस्तनाः** । **उपरितनमध्यमाः** ॥ **उपरितनोपरितनाः** । **'इति**र्भेदसमाप्तौ' तत एतावद्भेदा एव **ग्रैवेयकाः सुराः** । अभ्युदयविघ्नहेतून् विजयन्ते इति **विजयास्तथा वैजयन्ता** एवं **जयन्ताः** । अपरैरन्यैरभ्युदयविघ्नहेतुभिरजिता **इत्यपराजिताः** ॥ सर्वेऽर्थाः सिद्धा इव सिद्धा येषां ते **सर्वार्थसिद्धाः** । ते हि जितप्रायकर्माणः भविष्यद्भद्रा एव तत्रोत्पद्यन्ते । **इती**त्येवम्प्रकारा **वैमानिका अनेकविधा एवमादय** इति ॥ क्षेत्र-कालाभिधायकं गाथाद्वयं **सादिसपर्य-वसितत्व**भावनया ज्ञेयमिति गाथात्रयोदशकार्थः ॥२०६-२१८॥

देवानामायुःस्थिति—कायस्थिती आह—

साहियं सागरं इक्कं उक्कोसेणं ठिई भवे ।
भोमिज्जाणं जहन्नेणं दसवाससहस्सिया ॥२१९॥

पलिओवममेगं तु एगं उक्कोसेणं ठिई भवे ।
वंतराणं जहन्नेणं दसवाससहस्सिया ॥२२०॥

पलिओवमं तु एगं वासलक्खेण साहियं ।
पलिओवमट्ठभागो जोइसेसु जहन्निया ॥२२१॥

दो चेव सागराइं उक्कोसेणं वियाहिया ।
सोहम्मंमि जहन्नेणं एगं च पलिओवमं ॥२२२॥

सागरा साहिया दुन्नि उक्कोसेणं ठिई भवे ।
ईसाणंमि जहन्नेणं साहियं पलिओवमं ॥२२३॥

सागराणि य सत्तेव उक्कोसेणं ठिई भवे ।
सणंकुमारे जहन्नेणं दुन्नि उ सागरोवमा ॥२२४॥

साहिया सागरा सत्त उक्कोसेणं ठिई भवे ।
माहिंदंमि जहन्नेणं साहिया दोन्नि सागरा ॥२२५॥

दस चेव सागराइं उक्कोसेणं ठिई भवे ।
बंभलोए जहन्नेणं सत्त उ सागरोवमा ॥२२६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

चउद्दस उ सागराइं उक्कोसेणं ठिई भवे ।
लंतगंमि जहन्नेणं दस उ सागरोवमा ॥२२७॥

सत्तरस सागराइं उक्कोसेणं ठिई भवे ।
महासुक्के जहन्नेणं चउद्दस सागरोवमा ॥२२८॥

अट्ठारस सागराइं उक्कोसेणं ठिई भवे ।
सहस्सारे जहन्नेणं सत्तरस सागरोवमा ॥२२९॥

सागरा अउणवीसं तु उक्कोसेणं ठिई भवे ।
आणयंमि जहन्नेणं अट्ठारस सागरोवमा ॥२३०॥

वीसं तु सागराइं उक्कोसेणं ठिई भवे ।
पाणयंमि जहन्नेणं सागरा अउणवीसई ॥२३१॥

सागरा एक्कवीसं तु उक्कोसेणं ठिई भवे ।
आरणंमि जहन्नेणं वीसई सागरोवमा ॥२३२॥

बावीस सागराइं उक्कोसेणं ठिई भवे ।
अच्चुयंमि जहन्नेणं सागरा इक्कवीसई ॥२३३॥

तेवीस सागराइं उक्कोसेणं ठिई भवे ।
पढमंमि जहन्नेणं बावीसं सागरोवमा ॥२३४॥

चउवीस सागराइं उक्कोसेणं ठिई भवे ।
बीयंमि जहन्नेणं तेवीसं सागरोवमा ॥२३५॥

पणवीस सागराइं उक्कोसेणं ठिई भवे ।
तइयंमि जहन्नेणं चउवीसं सागरोवमा ॥२३६॥

छव्वीस सागराइं उक्कोसेणं ठिई भवे ।
चउत्थंमि जहन्नेणं सागरा पणवीसई ॥२३७॥

सागरा सत्तवीसं तु उक्कोसेणं ठिई भवे ।
पंचमंमि जहन्नेणं सागरा उ छव्वीसई ॥२३८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सागरा अट्ठवीसं तु उक्कोसेणं ठिई भवे ।
छट्ठंमि जहन्नेणं सागरा सत्तवीसई ॥२३९॥

सागरा इगुणतीसं तु उक्कोसेणं ठिई भवे ।
सत्तमंमि जहन्नेणं सागरा अट्ठवीसई ॥२४०॥

तीसं तु सागराइं उक्कोसेणं ठिई भवे ।
अट्ठमंमि जहन्नेणं सागराइं उणतीसई ॥२४१॥

सागरा इक्कतीसं तु उक्कोसेणं ठिई भवे ।
नवमंमि जहन्नेणं तीसई सागरोवमा ॥२४२॥

तित्तीस सागराइं उक्कोसेणं ठिई भवे ।
चउसुं पि विजयाईसुं जहन्ना एक्कतीसई ॥२४३॥

अजहन्नमणुक्कोसं तित्तीसं सागरोवमा ।
महाविमाणसव्वट्ठे ठिई एसा वियाहिया ॥२४४॥

जा चेव य आउठिई देवाणं तु वियाहिया ।
सा तेसिं कायठिई जहन्नमुक्कोसिया भवे ॥२४५॥

अणंतकालमुक्कोसं अंतोमुहुत्तं जहन्नयं ।
विजढंमि सए काए देवाणं हुज्ज अंतरं ॥२४६॥

एएसिं वन्नओ चेव गंधओ रस-फासओ ।
संठाणादेसओ चेव विहाणाइं सहस्ससो ॥२४७॥

आसां व्याख्या—प्रायः सुगमा एव । नवरं **साधिकं** 'सागरमिति' **सागरोपममेकमुत्कृष्टेन स्थितिर्भवेद् भौमेयकानां** भवनवासिनाम् । इयं सामान्योक्तावप्युत्तरनिकायाधिपस्य बलेरेवावसेया । दक्षिणनिकाये त्विन्द्रस्यापि सागरोपममेव । **जघन्येन दशवर्षसाहस्त्रिका** । इयमपि सामान्योक्तावपि किल्बिषिकाणामेव स्थितिः । प्रभावादीनां देवेषु स्थित्या सहैव ह्रास इत्युत्तरत्रापि भावनीयम् ॥ **पल्योपमं वर्षलक्षाधिकं** ज्योतिषामुत्कृष्टस्थितिश्चन्द्रापेक्षं चैतत्, सूर्यस्य तु वर्षसहस्राधिकं पल्योपमायुः, ग्रहणामपि तदेव वर्षाधिक्याविशेषितम्, नक्षत्राणां तस्यैवार्द्धम्, तारकाणां तु चतुर्भागः । **पल्योपमाष्टभागो ज्योतिष्षु जघन्यस्थिति**रित्यपि तारकापेक्षमेव, शेषाणां पल्योपमचतुर्भागस्यैव जघन्य-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

स्थितित्वात् । इह चोक्तरूपयोरुत्कृष्ट-जघन्ययोरपान्तरालवर्त्तिनी मध्यमा स्थितिरिति सर्वत्र द्रष्टव्यम् ॥ तथा **प्रथमे** इति 'प्रक्रमात् ग्रैवेयके' अधस्तनाधस्तने । एवं द्वितीयादिग्रैवेयकेष्विति सम्बन्धनीयम् ॥ अविद्यमानं जघन्यमस्यामित्यजघन्या, तथा अविद्यमानमुत्कृष्टमस्यामित्यनुत्कृष्टा, **अजघन्या** चासाव**नुत्कृष्टा** च 'मोऽलाक्षणिकः' । महच्च तदायुःस्थित्यपेक्षया विमानं च महाविमानं तच्च तत् सर्वेऽर्था अनुत्तरसुखादयो यस्मिंस्तत् सर्वार्थं च **महाविमानसर्वार्थं तस्मिन्** । **स्थिति**रिति सर्वत्रायुःस्थितिः 'प्रक्रमाद् देवानाम्' ॥ तथाऽऽ**युःस्थितेरेव कायस्थिति**त्वाभिधानेन तत्रानन्तरमनुत्पत्तिरेवेत्यभिप्राय इति सप्तविंशतिगाथार्थः । अन्तर-विधानाभिधायि सूत्रद्वयं पूर्ववद् व्याख्येयम् ॥२१९-२४७॥

अथ निगमयितुमाह—

संसारत्था य सिद्धा य इई जीवा वियाहिया ।
रूविणो चेवरूवी य अजीवा दुविहा वि य ॥२४८॥

व्याख्या—संसारस्थाश्च सिद्धाश्चेतीत्येवं जीवा व्याख्याताः । रूपिणश्चैव 'रूवी य' त्ति अकारप्रश्लेषा**दरूपिणश्चाजीवा अपि च द्विधा** व्याख्याता इति ॥२४८॥

उपदेशमाह—

इइ जीवमजीवे य सुच्चा सद्दहिऊण य ।
सव्वनयाण अणुमए रमेज्जा संजमे मुणी ॥२४९॥

व्याख्या—इतीत्येवं **जीवाजीवान् श्रुत्वा**ऽवधार्य, **श्रद्धाय च** तथेति प्रतिपद्य । **सर्वनयानां** ज्ञान-क्रियानयान्तर्गतानां नैगमादीना**मनुमते**ऽभिप्रेते, कोऽर्थः ? ज्ञानसहित-सम्यक्चारित्ररूपे **रमेत** रतिं कुर्यात् **संयमे** पृथिव्याद्युपमर्दोपरमरूपे **मुनिः** ॥२४९॥

ततश्च यद् विधेयं तदाह—

तओ बहूणि वासाणि सामण्णमणुपालिय ।
इमेण कमजोगेण अप्पाणं संलिहे मुणी ॥२५०॥

व्याख्या—ततस्तदनन्तरं **बहूनि वर्षाणि श्रामण्यं** श्रमणभावम**नुपाल्यानेन** वक्ष्यमाणेन, क्रमः परिपाटी तेन योगस्तपोऽनुष्ठानरूपो व्यापारः **क्रमयोगस्तेनात्मानं संलिखेद्** द्रवयतो भावतश्च कृशीकुर्याद् **मुनि**रिति । यदुक्तम्—

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

"[1]परिपालिओ य दीहो परियाओ वायणा तहा दिण्णा ।
निप्फाइया य सीसा सेयं मे अप्पणो काउं" ॥१॥ ॥२५०॥

सम्प्रति संलेखनाभेदाभिधानपूर्वकं क्रमयोगमाह—

बारसेव उ वासाइं संलेहुक्कोसिया भवे ।
संवच्छरं मज्झिमया छम्मासा य जहन्निया ॥२५१॥

पढमे वासचउक्कंमि विगईनिज्जूहणं करे ।
बिइए वासचउक्कंमि विचित्तं तु तवं चरे ॥२५२॥

एगंतरमायामं कट्टु संवच्छरे दुवे ।
तओ संवच्छरद्धं तु नाइविगिट्टं तवं चरे ॥२५३॥

तओ संवच्छरद्धं तु विगिट्टं तु तवं चरे ।
परिमियं चेव आयामं तंमि संवच्छरे करे ॥२५४॥

कोडीसहियमायामं कट्टु संवच्छरे मुणी ।
मासद्ध-मासिएणं तु आहारेणं तवं चरे ॥२५५॥

व्याख्या—द्वादशैव न तु न्यूनाधिकानि **वर्षाणि संलेखनं** द्रव्यतः शरीरस्य, भावतः कषायाणां कृशतापादनं संलेखनेत्यर्थः । **उत्कृष्टा** सर्वगुर्वी भवेत् । **संवत्सरं** वर्षं **मध्यमिका । षण्मासा** च पुनस्ततो **जघन्यिका** ॥ इत्थं संलेखनायास्त्रैविध्ये उत्कृष्टायाः क्रमयोगमाह—**प्रथमे** आद्ये **वर्षचतुष्के विकृतिः** क्षीरादिस्तस्य **निर्यूहण**माचाम्लस्य निर्विकृतस्य वा करणेन परित्यागस्तं विचित्रतपसः पारणके 'करे'त्ति **कुर्यात् । द्वितीये वर्षचतुष्के विचित्रमेव** चतुर्थ-षष्ठाष्टमादिरूपं **तपश्चरेत्** । अत्र च पारणके सम्प्रदायः— '[2]**उग्गमविसुद्धं कप्पणिज्जं पारे**' इति ॥ एकेन चतुर्थलक्षणेन तपसाऽन्तरं व्यवधानं यस्मिंस्त**देकान्तरमायामम**माचाम्लं 'कट्टु'त्ति **कृत्वा संवत्सरौ द्वौ । ततस्त**दनन्तरं **संवत्सरार्धं** मासषट्कं 'तुः पूरणे' **नैवातिविकृष्टम**ष्टम-द्वादशादि **तपश्चरे**दासेवेत ॥ **ततः संवत्सरार्धं** षण्मासलक्षणं '**तुः** पुनः' **विकृष्टमेव** 'तुरेवार्थे' **तपश्चरेत्** । अत्रैव विशेषमाह— 'परिमियं चेव'त्ति '**चः** पूरणे' ततः **परिमितमेव** स्वल्पमेव **आयाममा**चाम्लं **तस्मिन्न**न्तरं

---

१. परिपालितश्च दीर्घः पर्यायो वाचना तथा दत्ता ।
निष्पादिताश्च शिष्याः श्रेयो मे आत्मनः कर्तुम् ॥१॥

२. उद्गमविशुद्धं कल्पनीयं पारयेत् ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

द्विधा विभज्योपदर्शिते **संवत्सरे कुर्यात्** । विकृष्टतपःपारणके कोटीसहितत्वाद्यविशेषित-माचाम्लं करोतीत्यर्थः ॥ इत्थमेकादशसु वर्षेष्वतिक्रान्तेषु द्वादशे वर्षे यत् कुर्यात् तदाह—कोटावग्रभागे प्रत्याख्यानाद्यान्तकोणरूपे सहिते मिलिते यस्मिंस्तत् कोटीसहितम् । का भावः ? विवक्षितदिने प्रात**राचाम्लं** प्रत्याख्यायतच्चाहोरात्रं प्रतिपाल्य पुनर्द्वितीयेऽह्नि आचाम्लमेव प्रत्याचष्टे । ततो द्वितीयस्यारम्भकोटिराद्यस्य तु पर्यन्तकोटिरुभे अपि मिलिते भवत इति तत् कोटीसहितमुच्यते । अन्ये त्वाहुः—आचाम्लमेकस्मिन् दिने कृत्वा द्वितीयदिने च तपोऽन्तरं कृत्वा तृतीयदिने आचाम्लमेव कुर्व्वतः कोटीसहितमुच्यते । उभयार्थसंवादिनी चेयं गाथा—

"[१]पट्ठवणओ य दिवसो पच्चक्खाणस्स निट्ठवणओ य ।
जहियं समिति दोन्नि उ तं भणइ कोडिसहियं तु" ॥१॥

इत्थं **कोटीसहितमाचाम्लं कृत्वा संवत्सरे** 'प्रक्रमाद् द्वादशे' **मुनिः** साधुः 'मासद्ध'त्ति 'सूत्रत्वात्' मासे कृतो **मासिकस्तेन** । एव**मर्धमासिकेन** 'आहारेणं' ति पारण**काशनेन** 'उपलक्षणत्वादा-हारत्यागेन च' । **तप** इति 'प्रस्तावाद् भक्तपरिज्ञादिकमनशनम्' **चरेद**नुतिष्ठेत् । एतद्विस्तरः श्री**निशीथचूर्णितो**ऽवसेयः । इति गाथापञ्चकार्थः ॥२५१-२५५॥

इत्थं प्रतिपन्नानशनस्याशुभभावनानां परिहार्यतामनर्थहेतुतां च दर्शयितुमाह—

कंदप्पमाभिओगं किव्विसियं मोहमासुरत्तं च ।
एयाओ दुग्गईओ मरणंमि विराहिया हुंति ॥२५६॥

व्याख्या—'पदैकदेशे पदसमुदायोपचारात्' **कन्दर्पेति** कन्दर्पभावना । एवमाभि-योग्यभावना । **किल्बिषिक**भावना । **मोह**भावना । **असुरत्व**भावना **च** । **एताः** सर्वा अपि भावना दुर्गतिहेतुत्वेन **दुर्गतयः** 'कारणे कार्यातिदेशात्' । दुर्गतिश्चेह 'अर्थाद् देवदुर्गतिः' तद्वशतो हि व्यवहारतश्चारित्रे सत्यप्येतद्विधसुरनिकायोत्पत्तिरेव चारित्रविकलतया नानागति-भाक्त्वमिति । उक्तं हि—

"[२]जो संजओ वि एयासु अप्पसत्थासु भावणं कुणइ ।
सो तव्विहेसु गच्छइ सुरेसु भईओ चरणहीणो" ॥१॥

कदा ? इत्याह—**मरणे** मरणसमये । कीदृश्यः सत्यो दुर्गतयो भवन्त्येताः ? **विराधिकाः**

१. प्रस्थापनकश्च दिवसः प्रत्याख्यानस्य निष्ठापनकश्च ।
यत्र समितः द्वौ तु तद् भण्यते कोटिसहितं तु ॥१॥

२. यः संयतोऽप्येताभिरप्रशस्ताभिः भावनां करोति ।
स तद्विधेषु गच्छति सुरेषु, भक्तश्चरणहीनः ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

'सम्यग्दर्शनादीनामिति गम्यते' **भवन्ति** । इह चर 'मरणे' इत्यभिधानम्, पूर्वमेतत्सत्तायामप्यन्तकाले शुभभावनासद्भावे सुगतेरपि सम्भवोपदर्शनार्थम् ॥२५६॥

मिच्छादंसणरत्ता सनियाणा हु हिंसगा ।
इय जे मरंति जीवा तेसिं पुण दुल्हा बोही ॥२५७॥

व्याख्या—मिथ्यादर्शनमतत्त्वे तत्वाभिनिवेषरूपं तस्मिन् रक्ता आसक्ता **मिथ्यादर्शनरक्ताः**, सह निदानेन साभिष्वङ्गप्रार्थनारूपेण वर्तन्त इति **सनिदानाः**, 'हुः पूरणे' **हिंसकाः** प्राण्युपमर्दकारिण **इत्येवंरूपा ये म्रियन्ते जीवास्तेषां पुनर्दुर्लभा बोधिः** प्रेत्य जिनधर्मप्राप्तिः ॥२५७॥

सम्मद्दंसणरत्ता अनियाणा सुक्कलेसमोगाढा ।
इय जे मरंति जीवा सुलहा तेसिं भवे बोही ॥२५८॥

व्याख्या—सम्यग्दर्शनं तत्त्वरुचिरूपं **तस्मिन् रक्ताः, अनिदानाः, शुक्ललेश्यामवगाढाः** प्रविष्टा **इति ये म्रियन्ते सुलभा तेषां बोधिः** ॥२५८॥

मिच्छादंसणरत्ता सनिआणा कण्हलेसमोगाढा ।
इय जे मरंति जीवा तेसिं पुण दुल्हा बोही ॥२५९॥

व्याख्या—प्राग्वत् । ननु पुनरुक्तत्वान्निरर्थकमिदं सूत्रम्, हिंसकत्वाभिधानेन कृष्णलेश्यावगाहकत्वस्याप्युक्तत्वात् । नैवम्, विशेषज्ञापनार्थत्वादस्य । विशेषश्च सर्वत्र तथाविधसंक्लिष्टपरिणामरूपता द्रष्टव्या । अन्यथा हि सामान्येन तद्विशेषणविशिष्टानामपि तद्भवे भवान्तरे वा बोधिदर्शनाद् व्यभिचार्येवेदं स्याद् । इह मिथ्यादर्शनरक्तत्वादीनामेव विशेषज्ञापनमिति गाथाऽर्थः ॥२५९॥

संलेखनादिमाहात्म्यमाह—

जिणवयणे अणुरत्ता जिणवयणं जे करिंति भावेणं ।
अमला असंकिलिट्ठा ते हुंति परित्तसंसारी ॥२६०॥

व्याख्या—जिनवचनेऽनुरक्ता जिनवचनं तदुक्तानुष्ठानं **ये कुर्वन्ति भावेना**ऽऽन्तरपरिणामेन, न तु बहिर्वृत्त्यैव । **अमला** मिथ्यात्वादिभावमलरहिताः । **असंक्लिष्टा** रागादिसंक्लेशरहिता**स्ते भवन्ति** 'परित्तः' समस्तदेवादिभवाल्पतापादनेन परिमितः स चासौ संसारश्च परित्तसंसारः स विद्यते येषां ते **परित्तसंसारिणः** कतिपयभवाभ्यन्तरमुक्तिभाज इत्यर्थः । 'प्राकृतत्वाद् वचनव्यत्ययः' ॥२६०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

बालमरणाणि बहुसो अकाममरणाणि चेव बहुयाणि ।
मरिहंति ते वराया जिणवयणं जे न याणंति ॥२६१॥

व्याख्या—'सुब्व्यत्ययात्' **बालमरणै**र्विषभक्षणोद्बन्धादिनिबन्धनै**र्बहुशो**ऽनेकधा, **अकाममरणै**रनिच्छामरणैश्च **बहुभिः** '**एवे**ति पूरणे' । **मरिष्यन्ति ते वराका** बहुदुःखभाजनतया-ऽनुकम्पनीया **जिनवचनं ये न जानन्ति** 'ज्ञानफलत्वादनुष्ठानस्य' न चानुतिष्ठन्तीति ॥२६१॥

अतो जिनवचनं भावतः कर्त्तव्यम् । तद् भावकरणं चालोचनया । सा च तच्छ्रवणार्हाणामेव देयाऽतस्तानाह—

बहुआगमविन्नाणा समाहिउप्पायगा य गुणगाही ।
एएण कारणेणं अरिहा आलोयणं सोउं ॥२६२॥

व्याख्या—बहुः सूत्रतोऽर्थतश्च स चासावागमश्च तस्मिन् विशिष्टं ज्ञानमेषामिति **बह्वागमविज्ञानाः** । **समाधे**श्चित्तस्वास्थ्य**स्योत्पादकाश्च** । को भावः ? देश—कालशयादि-विज्ञतया मधुर—गम्भीरप्रभृतिभणितिभिः समाधिमेवालोचनाऽऽदातॄणामुत्पादयन्तीति । **गुणग्राहिणश्च** परेषां सद्भूतगुणग्रहणशीलाः । **एतै**र्बह्वागमविज्ञानत्वादिभिः **कारणैरर्हा** योग्याः 'भवन्त्याचार्यादय इति गम्यते' । **आलोचनां** विकटनाम् 'अर्थात् परैर्दीयमानाम्' **श्रोतुम्** । एते एवालोचनाश्रवणफलं परेषां विशुद्धिलक्षणं सम्पादयितुमीशते इति ॥२६२॥

सम्प्रति कन्दर्पादिभावनानां यत् परिहार्यत्वमुक्तम् । तत्र यत् कुर्वता ताः कृताः स्युस्तत्परिहारेणैव तासां परिहार इति ज्ञापनार्थमाह—

कंदप्प-कोक्कुयाइं तह सील-सहाव-हास-विगहाहिं ।
विम्हाविंतो य परं कंदप्पं भावणं कुणइ ॥२६३॥

व्याख्या—कन्दर्पः-अट्टट्टहासहसनम्, अनिभृतालापाश्च गुर्वादिनाऽपि सह निष्ठुर—वक्रोक्त्यादिरूपाः, कामकथा, कामोपदेश—प्रशंसाश्च । यदुक्तम्—

"[१]कहकहकहस्स हसणं कंदप्पो अणिहुया य संलावा ।
कंदप्पकहाकहणं कंदप्पुवएस-संसा य" ॥१॥

कौत्कुच्यं द्विधा कायकौत्कुच्यं वाक्कौत्कुच्यं च, तत्राद्यं यत् स्वयमहसन्नेव भ्रू-नयन-वदनादि तथा करोति यथाऽन्यो हसति । द्वितीयं तज्जल्पति येनान्यो हसति, तथा

---

१. कहकहकहस्य हसनं कन्दर्पोऽनिभृताश्च संलापाः ।
कन्दर्पकथाकथनं कन्दर्पोपदेश-शंसा च ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

नानाजीवविरुतानि मुखातोद्यवाद्यतां च विधत्ते तद् वाक्कौत्कुच्यम् । ततः कन्दर्पश्च कौत्कुच्यं च **कन्दर्प-कौत्कुच्ये** 'कुर्वन्निति शेषः' । तथा शीलं च फलनिरपेक्षा वृत्तिः, स्वभावश्च परविस्मयोत्पादनाभिसन्धिनैव तत्तन्मुखविकारादि, हासश्चाट्टट्टहासादिः, विकथाश्च परविस्मापकविविधोल्लापाः, **शील-स्वभाव-हास-विकथास्ताभिर्विस्मापयंश्च** विस्मितं कुर्वन् **परमन्यम्** । कन्दर्पयोगात् कन्दर्पाः 'प्रस्तावाद् देवाः' तेषामियं तेषूत्पत्तिहेतुतया **कान्दर्पी** तां भाव्यते आत्मसान्नीयते आत्माऽनयेति **भावना** तद्भवाभ्यासरूपा **तां करोति** । एवमुत्तरत्रापि भावनीयम् ॥२६३॥

आभियोगिकीभावनामाह—

मंताजोगं काउं भूईकम्मं च जे पउंजंति ।
सायरसइड्ढिहेउं अभिओगं भावणं कुणइ ॥२६४॥

व्याख्या—मन्त्राः प्रागुक्तरूपास्तेषामायोगो व्यापारो **मन्त्रायोगः** । यदि वा मन्त्राश्च योगाश्च तथाविधद्रव्यसंयोगाः 'सूत्रत्वात्' **मन्त्रयोगं** तत् **कृत्वा** व्यापार्य, भूत्या भस्मना 'उपलक्षणत्वान्मृदा सूत्रेण वा' कर्म रक्षार्थं वसत्यादेः परिवेष्टनं **भूतिकर्म** '**च**शब्दात् कौतुकादि' च **यः प्रयुङ्क्ते** । किमर्थम् ? सातं सुखम्, रसा माधुर्यादयः, ऋद्धिरुपकरणादिसम्पद्, एता हेतवो यस्मिंस्तत् **सात-रसर्द्धिहेतु** । को भावः ? साताद्यर्थं मन्त्रयोगादि प्रयुङ्क्ते । एव**माभियोगीं भावनां करोति** । इह च साताद्यर्थाभिधानम्, निःस्पृहस्यापवादत एतत्प्रयोगे प्रवचनप्रभावनादिगुण एवेति ख्यापनार्थम् । उक्तं हि—

"[१]एयाणि गारवट्ठा कुणमाणो आभिओगियं बंधे ।
बीइओ गारवरहिओ कुव्वइ आराहओ अबंधा" ॥१॥ ॥२६४॥

किल्बिषिकीभावनामाह—

नाणस्स केवलीणं धम्मायरियस्स संघ-साहूणं ।
माई अवन्नवाई किब्बिसियं भावणं कुणइ ॥२६५॥

व्याख्या—ज्ञानस्य श्रुतज्ञानादेः, **केवलिनाम्, धर्माचार्यस्य** धर्मोपदेशकस्य, **सङ्घश्च साधवश्च तेषाम्, मायी** वञ्चकः । **अवर्णवादी** निन्दकः । तत्रावर्णोऽश्लाघारूपः स चैवम्—श्रुतज्ञानस्य, पुनःपुनस्त एव कायास्तान्येव व्रतानि, तावेव च प्रमादाप्रमादाविहाभिधेयौ । मोक्षाधिकारिणां च किं ज्योतिर्योनिपरिज्ञानेन ? इत्यादि भाषते । यदाह—

---

१. एतानि गौरवार्थं कुर्वाण आभियोगिकं बध्नाति ।
द्वितीयो गौरवरहितः करोत्याराधकोऽबन्धात् ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

"[१]काया वया य ते च्चिय ते चेव पमायमप्पमाया य ।
मोक्खाहिगारियाणं जोइस-जोणीहिं किं च पुणो" ? ॥१॥

केवलिनां च, ज्ञान-दर्शनयोः क्रमेणोपयोगे परस्परावरणता, युगपदुपयोगे चैक्यापत्तिः । उक्तं च—

"[२]एगतरसमुप्पाए अण्णोण्णावरणया दुवेण्हं पि ।
केवलदंसण-णाणाणमेगकाले च एगत्तं" ॥१॥

धर्मचार्यस्य, जात्यादिभिरधिक्षेपणादीति । उक्तं च—

"[३]जच्चाईहिं अवण्णं विहसइ वट्टइ ण यावि उववाए ।
अहिओ च्छिद्दप्पेही पगासवाई अणणुकूलो" ॥१॥

सङ्घस्य च, बहवः श्व-शृगालादिसङ्घाताः कोऽयमिह सङ्घः । साधूनां च, नामी परस्परमपि सहन्ते । तत एव देशान्तरयायिनोऽन्यथा त्वेकत्रैव संहत्या तिष्ठेयुः । अत्वरित-गतयो मन्दयायिन अत एव बकवृत्तिरियमेषामित्यादि । एवंविधमवर्णं वदितुं शीलमस्येत्य-वर्णवादी । मायाऽस्य स्वस्वभावविनिगूहनादिनाऽस्तीति मायी । यथोक्तम्—

"[४]गूहइ आयसहावं घायइ य गुणे परस्स संते वि ।
चोरो व्व सव्वसंकी गूढायारो वितहभासी" ॥१॥

कैल्बिषिकीं भावनां करोति ॥२६५॥

'विचित्रत्वात् सूत्रकृतेः' मोहीप्रस्तावेऽपि प्रागासुरीभावनामाह—

अणुबद्धरोसपसरो तह य निमित्तंमि होइ पडिसेवी ।
एएहिं कारणेहिं य आसुरियं भावणं कुणइ ॥२६६॥

व्याख्या—अनुबद्धः सन्ततोऽव्यवच्छिन्नो रोषस्य क्रोधस्य प्रसरोऽस्येत्य**नुबद्ध**-

---

१. काया व्रतानि च तान्येव तावेव प्रमादाप्रमादौ च ।
मोक्षाधिकारिणां ज्योतिर्योनिभिः किं च पुनः ? ॥१॥

२. एकतरसमुत्पादेऽन्योन्यावरणता द्वयोरपि ।
केवलदर्शन-ज्ञानयोरेककाले चैकत्वम् ॥१॥

३. जात्यादिभिरवर्णं विहसति वर्तते न चाप्युपपाते ।
अहितः च्छिद्रप्रेक्षी प्रकाशवादी अननुकूलः ॥१॥

४. गूहते आत्मस्वभावं घातयति च गुणान् परस्य सतोऽपि ।
चौर इव सर्वशङ्की गूढाकारो वितथभाषी ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

रोषप्रसरः । नित्यं विरोधशीलतया पश्चात्तापाकरणतया क्षामणादावपि मनःप्रसत्त्यप्राप्तेरिति भावः । यदुक्तम्—

"[1]**निच्चं वुग्गहसीलो काऊण ण याणुतप्पए पच्छा ।**
ण य खामिओ पसीयइ अवराहीणं दुवेण्हं पि" ॥१॥

तथा च **निमित्तम**तीतानागत-वर्त्तमानादिभेदात् त्रिधा तस्मिन् विषये **प्रतिसेवी**त्यवश्यं प्रतिसेवकोऽपुष्टालम्बनेऽपि तदासेवनात् । **एताभ्यां कारणाभ्यामासुरीं भावनां करोति** ॥२६६॥

मोहीभावनामाह—

सत्थग्गहणं विसभक्खणं च जलणं च जलपवेसो य ।
अणायारभंडसेवा जम्मण-मरणाणि बंधंति ॥२६७॥

व्याख्या—शस्त्रं खड्गादि तस्य ग्रहणम् 'उपलक्षणत्वादात्मनि वधार्थं व्यापारणम्' **शस्त्रग्रहणम्** । विषं तालपुटादि तस्य भक्षणं **विषभक्षणं च** । **ज्वलनं** भस्मीकरणम् 'आत्मन इति गम्यते' । जले प्रवेशो निमज्जनं **जलप्रवेशः** । '**च**शब्दोऽनुक्तभृगुपातादि-परिग्रहार्थः' । आचारः शास्त्रविहितो व्यवहारस्तदभावोऽनाचारस्तेन भाण्डस्योपकरणस्य सेवा हास्यमोहादिभिः परिभोगो**ऽनाचारभाण्डसेवा** 'गम्यमानत्वादेतानि कुर्वन्तो यतयः' **जन्म–मरणानि** 'उपचारात् तद्धेतुकर्माणि' **बध्नन्त्या**त्मना श्लेषयन्ति । संक्लेशजनकत्वेन शस्त्रग्रहणादीनामनन्तभवहेतुत्वात् । एतेन चोन्मार्गप्रतिपत्त्या सन्मार्गविप्रतिपत्तिराक्षिप्ता । तथा चार्थतो मोहीभावनोक्ता । यतस्तल्लक्षणं चेदम्—

"[2]**उम्मग्गदेसओ मग्गनासओ मग्गविप्पडीवत्ती य ।**
मोहेण य मोहित्ता संमोहं भावणं कुणति" ॥१॥ त्ति ।

एतासां च फलम् ? यदाहु—

"[3]**एयाओ भावणाओ भावित्ता देवदुग्गइं जंति ।**
तत्तो य चुया संता पडंति भवसागरमणंतं" ॥२॥ ॥२६७॥

---

१. नित्यं व्युद्ग्रहशीलः कृत्वा न चानुतप्यते पश्चात् ।
न च क्षामितः प्रसीदति अपराधिनोर्द्वयोरपि ॥१॥

२. उन्मार्गदेशको मार्गनाशको मार्गविप्रतिवर्त्ती च ।
मोहेन च मोहयित्वा सम्मोहीं भावनां करोति ॥१॥ इति ।

३. एता भावना भावयित्वा देवदुर्गतिं यान्ति ।
ततश्च च्युताः सन्तः पतन्ति भवसागरमनन्तरम् ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इइ पाउकरे बुद्धे नायए परिनिव्वुए ।
छत्तीसं उत्तरज्झाए भवसिद्धीयसंमए ॥२६८॥ त्ति बेमि ॥

व्याख्या—इतीत्यनन्तरमुपवर्णिताम् 'पाउकरे' त्ति 'सूत्रत्वात्' **प्रादुष्कृत्य** कांश्चिदर्थतः कांश्चन सूत्रतोऽपि प्रकाश्य प्रज्ञाप्येत्यर्थः । किम् ? इत्याह—**परिनिर्वृतो** निर्वाणं गत इति सम्बन्धः । कीदृशः सन् कः ? इत्याह—**बुद्धः** केवलज्ञानावगतसर्ववस्तुतत्त्वो **ज्ञातजो** ज्ञातकुलसम्भवः 'अर्थाद् भगवान् वर्द्धमानस्वामी' । **षट्त्रिंशत्**सङ्ख्यानुत्तराः प्रधाना अध्याया अध्ययनानि तत उत्तराश्च तेऽध्याया**श्चोत्तराध्यायास्तान्** विनयश्रुतादीन् । भवसिद्धिका भव्यास्तेषां समिति भृशं मता अभिप्रेता **भवसिद्धिकसंमतास्तान्** । अथवा 'पाउकरे'त्ति **प्रादुरकार्षीत्** प्रकाशितवान् । तत्र परिनिर्वृतः क्रोधाद्युपशमत स्वस्थीभूतः ॥ **निर्युक्तिकारो**ऽप्येतन्माहात्म्यमाह—

"जे किर भवसिद्धीया परित्तसंसारिया य जे भव्वा ।
ते किर पढंति एए छत्तीसं उत्तरज्झाए" ॥१॥

व्याख्या—ये इत्यनिर्दिष्टनिर्देशाः '**किलेति** सम्भावने' **भवसिद्धिका** भव्याः । 'परित्तः' परिमितश्चासौ संसारश्च परित्तसंसारः स विद्यते येषां ते **परित्तसंसारिका** आसन्नसिद्धिकाः । **भव्याः** सम्यग्दर्शनादिगुणयोग्या भिन्नग्रन्थय इत्यर्थः । 'चः समुच्चये' । **ते** एव '**किलेति** परोक्षाप्तवादे' **पठन्त्य**धीयन्ते । **एतानि षट्त्रिंशदुत्तरा-ध्ययनानि** विनयाख्यादीनि ॥१॥ ततो यद् विधेयं तदाह—

"तम्हा जिणपन्नत्ते अणंतगम—पज्जवेहि संजुत्ते ।
अज्झाए जहजोगं गुरुप्पसाया अहिज्जेज्जा" ॥२॥

व्याख्या—तस्माज्जिनैः श्रुतजिनादिभिः प्रज्ञप्ताः प्ररूपिता **जिनप्रज्ञप्तास्तान्** । अनन्ताश्च ते गमाश्चार्थावबोधप्रकाराः पर्यवाश्च शब्दपर्यवार्थपर्यवरूपा **अनन्तगमपर्यवास्तैः संयुक्तास्तान् अध्यायान्** 'प्रक्रमादुत्तराध्यायान्' 'जहाजोगं'ति योग उपधानाद्युचितव्यापार-स्तदनतिक्रमेण **यथायोगम्** । गुरूणां प्रसादश्चित्तप्रसन्नता **गुरुप्रसादस्तस्माद्** हेतो**रधीयेत** पठेन्न त्वेतदध्ययनयोग्यताऽवाप्तौ प्रमादं कुर्यादिति भावः । एतेनाध्ययनार्थिना हि गुरवोऽवश्यं प्रसादनीयास्तदधीनत्वात् तस्येति ॥२॥ **इति** परिसमाप्तौ । **ब्रवीमी**ति गणधरोपदेशेनेति ॥२६८॥ ग्रन्थाग्रम् ७०८॥

इति श्रीकमलसंयमोपाध्यायविरचितायां सर्वार्थसिद्धौ श्रीउत्तराध्ययनटीकायां षट्त्रिंशं जीवाजीवविभक्तिसंज्ञमध्ययनं समाप्तम् ॥३६॥

● ● ●

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

टीकाकृत्प्रशस्तिः

अस्ति **चान्द्रं** कुलं नित्यनिर्मलज्योतिरास्पदम् ।
तस्माद् दोषावहान्मन्दानुगादन्यत् कलङ्किनः ।।१।।

नैकेऽत्रासन् गुरवः कवयो ध्वान्तारयः समङ्गलकाः ।
छायाभुवो बुधा अपि न सतमसो न सभुजङ्गाश्च ।।२।।

तेष्वासीदुदयी **सुधर्म**गणभृत्पट्टानुपूर्वीभवः,
ख्यातः सूरिवरो **जिनेश्वर**गुरुर्वक्ता कविः संयमी ।
शुद्धं यत्समयानुयोगममलं यत्संयमं दुर्लभः,
क्ष्मापालो विनिरीक्ष्य सत्खरतरेत्याख्यां व्यधाद् यद्गणे ।।३।।

अजनि तदनु सूरियोगमार्गानुविद्ध—प्रकृति**रभय**देवो देवतार्च्यक्रमाच्छनः ।
भुवनमपि नवाङ्गीनूलवृत्तिप्रपञ्च—प्रजनितमधुनाऽपि क्षालयद् यद्यशोऽस्ति ।।४।।

विचारवद्वाङ्मयवारधाता, गुरुर्गरीयान् **जिनवल्लभो**ऽभूत् ।
सूत्रोक्तमार्गाचरणोपदेश-प्रावीण्यपात्रं न हि यादृशोऽन्यः ।।५।।

कूष्णाण्ड्याऽऽस्तिकनागदेवतपसा सन्तुष्टया यद्युग-
प्राधान्यं प्रकटीकृतं सुकृतिनामानन्दकन्दाम्बुदम् ।
सैष श्री**जिनदत्त**सूरिरखिलश्रामण्यविद्योऽभवद्,
यस्य श्लाघ्यचरित्रपङ्क्तिगणने नो पाटवं कस्यचित् ।।६।।

श्रीसङ्घ-भूपालसभासमक्ष-षट्त्रिंशदुद्दामविवादजेता ।
महानभूत् पण्डितचक्रवर्त्ती क्रमाद् गुरुश्री**जिनपति**सूरिः ।।७।।

जिनकुशलमुनीन्दोस्तस्य पादारविन्दं प्रचितकुशलवल्लीवारिदं संस्मरामः ।
यदनुगतिमिदानीमप्यमूः सौख्यलक्ष्म्यः सरभसमुपयान्ति प्रश्रयाभ्यासतो वा ।।८।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एवंविधाचार्यपरम्परायां बभूव स **श्रीजिनराज**सूरिः ।
यत्पट्टपूर्वाद्रिसहस्रभानुर्जज्ञे गुरुः **श्रीजिनभद्र**सूरिः ॥९॥

कीर्त्तिः **श्रीजिनभद्र**सूरिसुगुरोः सिद्धान्तकन्दोद्भवा,
व्याख्यानालवती जनोन्नतिदला विश्वद्रहव्यापिनी ।
संसेव्या बिसिनीव भव्यमधुपैः सौभाग्यसौगन्ध्यभाग्,
भाग्यादित्यमहोदयाद् विजयते नित्यप्रबुद्धाऽद्भुतम् ॥१०॥

षट्-सप्ताम्बुनिधि-क्षपाकरमिते [१४७६] संवत्सरे वैक्रमे,
तैरस्मि स्वकरेण मोहजलधिपोतं व्रतं ग्राहितः ।
शास्त्रं वा परमेष्ठिपञ्चकनमस्कारागमं पाठितो,
वात्सल्यं कथयामि वा कियदहं यत् प्रत्यहं तैः कृतम् ॥११॥

तत्पट्टनिर्दोषसुवर्णरत्नमुद्द्योतयामास चिरं जगन्ति ।
व्याख्यानविद्यानिरवद्यकीर्त्तिर्यतीश्वरः **श्रीजिनचन्द्र**सूरिः ॥१२॥

आसाद्य तदादेशं खेन्दुशतपञ्चदशाब्दकेऽकार्षम् [१५१०] ।
प्राचीविषयविहारं स्वं चात्मानं कृतार्थतरम् ॥१३॥

सद्धर्मयोजनेन च **चम्पा-साकेत-कुण्डपुर-काशी** ।
श्रीराजगृहाद्यर्हज्जन्मस्थानादियात्राभिः ॥१४॥ युग्मम् ।

अथोपशम-भारती-दम-दयाभिरभ्यर्चिता-
स्तदीयपदमद्भुतं समधिगम्य भाग्योदयात् ।
जयन्ति विधिना गणं समनुशासयन्तो,
युगप्रधानचरितागमा **जिनसमुद्र**सूरीश्वराः ॥१५॥

तेष्वन्वहं विजयवैभवराजिषूपा-
ध्यायाग्रणीः **कमलसंयम एष** सोऽहम् ।
अम्भोधि-वारिनिधि-बाण-शशाङ्कवर्षे [१५४४],
श्रीउत्तराध्ययवृत्तिमिमां चकार ॥१६॥

साहाय्यमत्र चक्रुः श्रीमन्**मुनिमेरु**वाचका वर्याः ।
यत् किञ्चिदिहोत्सूत्रं तच्छोध्यं श्रुतधरैः सकृपैः ॥१७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जेसलमेरौ दुर्गे विजयदशम्यां समर्थिता सेयम् ।
श्री**जिनभद्र**मुनीश्वरणस्मरणप्रसादेन ॥१८॥

उपजीव्य **बृहद्वृत्तिं** विहितेयं प्रायशः समासेन ।
संस्कृतकथाविशेषा यावज्जिनशासनं नन्द्यात् ॥१९॥

महागमोल्लासविशिष्टनन्दनः सद्भद्रशालिप्रभविष्णुनिर्जरः ।
सुवर्णरुक् योजनलक्षमानः ग्रन्थः स नन्द्यादयमर्जुनाद्रिवत् ॥२०॥

इति प्रशस्तिः श्री उत्तराध्ययनसिद्धान्तसर्वार्थसिद्धिविवरणस्य ॥ सर्वग्रन्थाग्रं साङ्कतः १३५१७ अ० २२ ॥

[1]**इदं च पुस्तकं लिखितम् । संवत् १६६९ वर्षे आश्वनि(श्विन)शुक्लसप्तम्यां सोमवारे श्रीमन्मरोट्टकोट्टे श्रीखरतगच्छे श्रीजिनचन्द्रसूरिविजयिनि श्रीजिनहंससूरिशिष्य-मुख्य-महोपाध्यायश्रीपुण्यसागराणां तच्छिष्यवाचनाचार्यवर्य्यजीवसुन्दरगणिगजेन्द्राणां तच्छिष्य पं० पासाख्येनालेखि ॥ शुभं भवतु ॥ कल्याणमस्तु ॥ श्रीरस्तु लेखक-पाठकयोः ॥**

**[ओशवंशाम्बुधिचन्द्रः श्रेष्ठी श्रीहेमचन्द्रकः ।
चित्कोशे स्वकृतेऽदाद् धन्यस्तं सज्ज्ञानप्राप्तये ॥१॥
संवत् १८९९ ना श्रावणसिततृतीयाघस्त्रे]**

[2]**संवत् १६१३ वर्षे श्रीमूलताननगरमध्ये श्रीखरतगच्छे श्रीजिनसमुद्रसूरिस्तत्पट्ट-पूर्वाचलश्रीश्रीश्रीश्रीश्रीजिनहंससूरिसार्वभौमस्तत्पट्टप्रतिष्ठितश्रीजिमाणिक्यसूरिस्तत्पट्ट-विजयमानगुरुश्रीजिनचन्द्रसूरीश्वरणां विजयिराज्ये वाचनाचार्यवर्यश्रीलक्ष्मीप्रभगणी तच्छिष्य पं० राजशेखरगणिना लिपीकृता प्रतिः स्ववाचनाहेतोः पं० कुमारसुन्दरगणी पं० रत्नसार वि० शक्तिहर्षादिवाच्यमाना चिरं नन्द्यात् ॥**

**यादृशं पुस्तके दृष्टं तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयताम् ॥१॥**

॥ कल्याणमस्तु ॥ आचन्द्रार्कं यावत्, प्रतिस्तावन्नन्दतु ॥ शुभं भूयात् श्रीश्रमणसङ्घस्य ॥ श्रीः ॥ छ ॥

॥ इति श्रीउत्तराध्ययनानि समाप्तानि ॥

---

१. उग्रसेनपुर(आगरा)स्थश्रीविजयधर्मलक्ष्मीज्ञानमन्दिरसत्कप्रत्यन्ते ।

२. श्रीमद्विजयोदयसूरिवर्याणां प्रत्यन्ते ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

परिशिष्टम्

[१]

मूलगाथानामकाराद्यनुक्रमः

अइतिक्खकंटकाइन्ने १९-५२
अकलेवरसेणिमुस्सिया सिद्धिं १०-३५
अकसायं अहक्खायं २८-३३
अक्कोसिज्ज परो भिक्खुं २-२४
अगारिसामाइयंगाइं ५-२३
अग्गिहोत्तमुहा वेया २५-१६
अग्गी य इइ के वुत्ते २३-५२
अचेलगस्स लूहस्स २-३४
अचेलगो य जो धम्मो २३-१३
अचेलगो य जो धम्मो २३-२९
अच्चंतकालस्स समूलयस्स ३२-१
अच्चंतनियाणखमा १८-५३
अच्चणं रयणं चेव ३५-१८
अच्चेइ कालो तूरंति राईओ १३-३१
अच्चेमु ते महाभागा १२-३४
अच्छिले माहए ३६-१४८
अच्छेरगमब्भुयए भोए ९-५१
अजहन्नमणुक्कोसं तित्तीसं ३६-२४४
अजाणगा जन्नवाई २५-१८
अज्जवयाए णं भंते ! २९-४८ सू.
अज्जुणसुवन्नगमई ३६-६०
अज्जेव धम्मं पडिवज्जयामो १४-२८
अज्जेवाहं न लब्भामि २-३१
अज्झत्थं सव्वओ सव्वं ६-७
अज्झावयाणं पडिकूलभासी १२-१६
अज्झावयाणं वयणं सुणित्ता १२-१९
अट्ट-रुद्दाणि वज्जित्ता ३०-३५
अट्ट-रुद्दाणि वज्जित्ता ३४-३१
अट्ठारस सागराइं ३६-२२९
अट्ठ कम्माइं वोच्छामि ३३-१
अट्ठ प्पवयणमायाओ २४-१
अट्ठजोयणबाहल्ला ३६-५९
अट्ठविहगोयरग्गं तु ३०-२५
अणंतकालमुक्कोसं ३६-१०३
अणंतकालमुक्कोसं ३६-११५
अणंतकालमुक्कोसं ३६-१२४
अणंतकालमुक्कोसं ३६-१३४
अणंतकालमुक्कोसं ३६-१४
अणंतकालमुक्कोसं ३६-१४३
अणंतकालमुक्कोसं ३६-१५३
अणंतकालमुक्कोसं ३६-१६८
अणंतकालमुक्कोसं ३६-१७७
अणंतकालमुक्कोसं ३६-२४६
अणंतकालमुक्कोसं ३६-८२
अणंतकालमुक्कोसं ३६-९०
अणगारगुणेहिं च पकप्पंमि ३१-१८
अणच्चावियं अवलियं २६-२५
अणभिग्गहियकुदिट्ठी २८-२६
अणसणमूणोयरिया ३०-८

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अणाइकालप्पभवस्स एसो ३२-१११
अणावायमसंलोए २४-१६
अणावायमसंलोए २४-१७
अणासवा थूलवया १-१३
अणाहो मि महाराय ! २०-९
अणिस्सिओ इहं लोए १९-९२
अणुक्कसाई अप्पिच्छे २-३९
अणुन्नए नावणए महेसी २१-२०
अणुप्पेहाए णं भंते ! २९-२२ सू.
अणुबद्धरोसपसरो ३६-२६६
अणुसासणमोवायं १-२८
अणुसासिओ न कुप्पिज्जा १-९
अणूणाइरित्तपडिलेहा २६-२८
अणेगछंदा इह माणवेहिं २१-१६
अणेगवासानउया जा ७-१३
अणेगाण सहस्साणं २३-३५
अण्णवंसि महोहंसि ५-१
अण्णवंसि महोहंसि नावा २३-७०
अत्थं च धम्मं च वियाणमाणा १२-३३
अत्थंतंमि य सूरंमि १७-१६
अत्थि एगं धुवं ठाणं २३-८१
अत्थि एगो महादीवो २३-६६
अथिरासणे कुक्कुईए १७-१३
अदंसणं चेव अपत्थणं च ३२-१५
अद्धाणं जो महंतं १९-२०
अद्धाणं जो महंतं तु १९-१८
अधुवे असासयंमी ८-१
अन्नं पाणं च न्हाणं च २०-२९
अन्निओ रायसहस्सेहिं १८-४३
अन्नेण विसेसेणं ३०-२३
अपसत्थेहिं दारेहिं १९-९३
अप्पं च अहिक्खिवई ११-११
अप्पडिबद्धयाए णं भंते ! २९-३० सू.
अप्पपाणेप्पबीयंमि १-३५
अप्पा कत्ता विकत्ता य २०-३७
अप्पा चेव दमेयव्वो १-१५
अप्पाणमेव जुज्झाहि ९-३५
अप्पाणा वि अणाहो सि २०-१२
अप्पिया देवकामाणं ३-१५
अप्फोवमंडवंमी झायती १८-५
अबले जह भारवाहए १०-३३
अब्भाहंमि लोगंमि १४-२१
अब्भुट्ठाणं अंजलिकरणं ३०-३२
अब्भुट्ठाणं गुरुपूया २६-७
अब्भुट्ठाणं नवमं २६-४
अब्भुट्ठियं रायरिसिं ९-६
अभयं पत्थिवा ! तुब्भं १८-११
अभिक्खणं कोही हवइ ११-७
अभिवायणमब्भुट्ठाणं २-३८
अभू जिणा अत्थि जिणा २-४५
अम्म ! ताय ! मए भोगा १९-११
अयं साहसिओ भीमो २३-५५
अयकक्करभोई य ७-७
अयसीपुप्फसंकासा ३४-६
अरइ-रइसहे पहीणसंथवे २१-२१
अरइं पिट्ठओ किच्चा २-१५
अरई गंडं विसूइया १०-२७
अरूविणो जीवघणा ३६-६६
अलोए पडिहया सिद्धा ३६-५६
अलोलुयं मुहाजीवी २५-२७
अलोलो न रसे गिद्धो ३५-१७
अवउज्झिऊण माहणरूवं ९-५५
अवउज्झिय मित्त-बंधवं १०-३०
अवसेसं भंडगं गिज्झ २६-३५
अवसो लोहरहे जुत्तो १९-५६
अवसोहिय कंटयापहं १०-३२
अवहेडियपिट्ठिसउत्तमंगे १२-२९
अवि पावपरिक्खेवी ११-८

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

असंखकालमुक्कोसं ३६-१०४
असंखकालमुक्कोसं ३६-८१
असंखकालमुक्कोसं ३६-८९
असंखकालमुक्कोसा ३६-११४
असंखकालमुक्कोसा ३६-१२३
असंखकालमुक्कोसा ३६-१३
असंखभागो पलियस्स ३६-१९२
असंखयं जीविय मा पमायए ४-१
असंखिज्जाणोसप्पिणीण ३४-३३
असइं उ मणुस्सेहिं ९-३०
असमाणो चरे भिक्खू २-१९
असासए सरीरंमि १९-१३
असासयं दट्ठुं इमं विहारं १४-७
असिप्पजीवी अगिहे अमित्ते १५-१६
असीहिं अयसिवण्णाहिं १९-५५
असुरा नाग-सुवन्ना ३६-२०६
अस्सकन्नी य बोधव्वा ३६-९९
अस्से य इइ के वुत्ते २३-५७
अह अट्ठहिं ठाणेहिं ११-४
अह अन्नया कयाई २१-८
अह आसगओ राया १८-६
अह ऊसिएण छत्तेण २२-११
अह कालंमि संपत्ते ५-३२
अह केसरंमि उज्जाणे १८-४
अह चउदसहिं ठाणेहिं ११-६
अह जे संवुडे भिक्खू ५-२५
अह तत्थ अइच्छंतं १९-५
अह तायगो तत्थ मुणीण तेसिं १४-८
अह ते तत्थ सीसाणं २३-१४
अह तेणेव कालेणं २३-५
अह तेणेव कालेणं २५-४
अह पच्छा उइज्जंति २-४१
अह पन्नरसहिं ठाणेहिं ११-१०
अह पालियस्स घरणी २१-४
अह भवे पइन्ना उ २३-३३
अह मोणेण सो भगवं १८-९
अह राया तत्थ संभंतो १८-७
अह सा भमरसंनिभे २२-३०
अह सा रायवरकन्ना २२-४०
अह सा रायवरकन्ना २२-७
अह सारही तओ भणइ २२-१७
अह सारही व चिंतेइ २७-१५
अह से तत्थ अणगारे २५-५
अह सो तत्थ निज्जंतो २२-१४
अह सो वि रायपुत्तो २२-३६
अह सो सुगंधगंधिए २२-२४
अहं च भोगरायस्स २२-४३
अहं पंचहिं ठाणेहिं ११-३
अहं पि जाणामि जहेह साहू १३-२७
अहमासि महापाणे १८-२८
अहवा तइयाए पोरिसीए ३०-२१
अहवा सपरिकम्मा ३०-१३
अहाउयं पालइत्ता २९-७२-७३ सू.
अहिंस-सच्चं च अतेणगं २१-१२
अहिज्ज वेए परिविस्स विप्पे १४-९
अहीणपंचिंदियत्तं पि से १०-१८
अहीवेगंतदिट्ठीए १९-३८
अहे वयइ कोहेणं ९-५४
अहो ! ते अज्जवं साहू ९-५७
अहो ! ते निज्जिओ कोही ९-५६
अहो ! वण्णो अहो ! रूवं २०-६
अंग-पच्चंग-संठाणं १६-४
अंगुलं सत्तरत्तेणं २६-१४
अंतोमुहुत्तंमि गए ३४-६०
अंतोमुहुत्तमद्धं लेसाण ३४-४५
अंतोहिययसंभूया लया २३-४५
अंधयारे तमे घोरे २३-७५
आउक्कायमइगओ १०-६

आउत्तया जस्स य नत्थि २०-४०
आगए कायवुस्सग्गे २६-४६
आगासे गंगसोउ व्व १९-३६
आगासे तस्स देसे य ३६-६
आणाणिद्देसकरे गुरूण १-२
आणाऽणिद्देसकरे गुरूण १-३
आमोसे लोमहारे य ९-२८
आयंके उवसग्गे २६-३४
आयरिएहिं वाहिंतो १-२०
आयरिय-उवज्झाएहिं १७-४
आयरिय-उवज्झायाणं १७-५
आयरियं कुवियं नच्चा १-४१
आयरियपरिच्चाई १७-१७
आयरियमाईए वेयावच्चंमि ३०-३३
आयवस्स निवाएणं २-३५
आयाणं नरयं दिस्स ६-८
आयामगं चेव जवोदणं च १५-१३
आरभडा संमद्दा २६-२६
आलंबणेण कालेण २४-४
आलओ थीजणाइन्नो १६-११
आलवंते लवंते वा १-२१
आलोयणयाए णं भंते ! २९-५ सू.
आलोयणारिहाईयं ३०-३१
आवज्जई एवमणेगरूवे ३२-१०३
आवन्ना दीहमद्धाणं ६-१३
आवरणिज्जाण दुन्हं पि ३३-२०
आसं विसज्जइत्ताणं १८-८
आसणं सयणं जाणं ७-८
आसणगओ न पुच्छिज्जा १-२२
आसणे उवचिट्ठिज्जा १-३०
आसमपए विहारे ३०-१७
आसा हत्थी मणुस्सा मे २०-१४
आसाढबहुलपक्खे २६-१५
आसाढे मासे दुपया २६-१३
आसिमो भायरा दो वि १३-५
आसीविसो उग्गतवो महेसी १२-२७
आहच्च चंडालियं १-११
आहच्च सवणं लद्धुं ३-९
आहारपच्चक्खाणेणं भंते ! २९-३५ सू.
आहारमिच्छे मियमेसणिज्जं ३२-४
इंदगोवगमाइया णेगहा ३६-१३९
इंदियगामनिग्गाही २५-२
इंदियत्थे विवज्जित्ता २४-८
इइ इत्तरियंमि आउए १०-३
इइ एएसु ठाणेसु ३१-२१
इइ चउरिंदिया एए ३६-१४९
इइ जीवमजीवे य ३६-२४९
इइ पाउकरे बुद्धे १८-२४
इइ पाउकरे बुद्धे ३६-२६८
इक्का य पुव्वकोडी ३६-१७५
इक्खागरायवसभो १८-३९
इच्चेए थावरा तिविहा ३६-१०६
इड्ढी जुई जसो वन्नो ७-२७
इड्ढी वित्तं च मित्ते य १९-८७
इड्ढीगारविए एगे २७-९
इत्तरिय-मरणकाला ३०-९
इत्थी पुरिस सिद्धा य ३६-४९
इत्थी वा पुरिसो वा ३०-२२
इत्थीविसयगिद्धे य ७-६
इंदियाणि उ भिक्खुस्स ३५-५
इमं च मे अत्थि इमं च नत्थि १४-१५
इमं च मे अत्थि पभूयमन्नं १२-३५
इमं सरीरं अणिच्चं १९-१२
इमा हु अन्ना वि अणाहया २०-३८
इमे खलु ते २-३ सू.
इमे य बद्धा फंदंति १४-४५
इयरो वि गुणसमिद्धो २०-६०
इरि-एसण-भासाए १२-२

इरियाभासेसणादाणे २४-२
इह एस धम्मे अक्खाए ८-२०
इह कामनियट्टस्स ७-२६
इह कामानियट्टस्स ७-२५
इह जीविए राय ! असासयंमि १३-२१
इह जीवियं अनियमेत्ता ८-१४
इहं सि उत्तमो भंते ९-५८
इहमेगे उ मन्नंति ६-९
ईसा-अमरिस-अतवो ३४-२३
उक्का विज्जू य बोधव्वा ३६-११०
उक्कोस-वहं विदित्तु धीरे १५-३
उक्कोसोगाहणाए य ३६-५०
उग्गओ खीणसंसारो २३-७८
उग्गओ विमलो भाणू २३-७६
उग्गमुप्पायणं पढमे २४-१२
उग्गं तवं चरित्ताणं २२-४८
उच्चारं पासवणं २४-१५
उच्चावयाहिं सेज्जाहिं २-२२
उच्चोदए महु कक्के य १३-१३
उज्जाणं संपत्तो २२-२३
उड्ढं थिरं अतुरियं २६-२४
उण्हाभितत्तो मेहावी २-९
उण्हाभितत्तो संपत्तो १९-६०
उत्तराइं विमोहाइं ५-२६
उदहिसरिसनामाणं वीसई ३३-२३
उदहिसरिसनामाणं सत्तरिं ३३-२१
उदहीसरिनामाणं तीसई ३३-१९
उद्देसियं कीयगडं नियागं २०-४७
उप्पासगदुट्ठवाई य ३४-२६
उभओ सीससंघाणं २३-१०
उमोयरिणं पंचहा ३०-१४
उल्लो सुक्को य दो छूढा २५-४१
उवक्खडं भोयण माहणाणं १२-११
उवट्ठिया मे आयरिया २०-२२
उवणिज्जई जीवियमप्पमायं १३-२६
उवरिमा उवरिमा चेव ३६-२१५
उवलेवो होइ भोगेसु २५-४०
उवहिपच्चक्खाणेणं २९-३४ सू.
उवासगाणं पडिमासु ३१-११
उवेहमाणो उ परिव्वइज्जा २१-१५
उसिणपरितावेणं २-८
उस्सेहो जस्स जो होइ ३६-६४
उक्कोसोगाहणाए उ ३६-५३
ऊससियरोमकूवो २०-५९
एए खरपुढवीए ३६-७७
एए चेव उ भावे २८-१९
एए नरिंदवसभा १८-४७
एए परीसहा सव्वे २-४६
एए पाउकरे बुद्धे २५-३३
एए य संगे समिक्कमित्ता ३२-१८
एएसिं तु विवच्चासे ३०-४
एएसिं वण्णओ चेव ३६-८३
एएसिं वण्णओ चेव ३६-९१
एएसिं वण्णओ चेव ३६-२०३
एएसिं वन्नओ चेव ३६-१०५
एएसिं वन्नओ चेव ३६-११६
एएसिं वन्नओ चेव ३६-१२५
एएसिं वन्नओ चेव ३६-१३५
एएसिं वन्नओ चेव ३६-१४४
एएसिं वन्नओ चेव ३६-१५४
एएसिं वन्नओ चेव ३६-१६८
एएसिं वन्नओ चेव ३६-१६९
एएसिं वन्नओ चेव ३६-१७८
एएसिं वन्नओ चेव ३६-१८७
एएसिं वन्नओ चेव ३६-१९४
एएसिं वन्नओ चेव ३६-२४७
एग एव चरे लाढे २-१८
एगओ विरइं कुज्जा ३१-२

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एगओ संवसित्ताणं १४-२६
एगकज्जपवन्नाणं विसेसे २३-२४
एगकज्जपवन्नाणं विसेसे २३-३०
एगखुरा दुखुरा चेव ३६-१८०
एगग्गमणसंनिवेसणयाए २९-२५ सू.
एगच्छत्तं पसाहित्ता १८-४२
एगत्तं व पुहत्तं च २८-१३
एगत्तेण पहुत्तेण ३६-११
एगत्तेण साईया ३६-६५
एगप्पा अजिए सत्तू २३-३८
एगभूओ अरण्णे वा १९-७७
एगया अचेलए होइ २-१३
एगया खत्तिओ होइ ३-४
एगया देवलोएसु ३-३
एगविहमनाणत्ता सुहुमा ३६-१००
एगविहमनाणत्ता सुहुमा ३६-८६
एगवीसा य सबलेसु ३१-१५
एगं डसइ पुच्छंमि २७-४
एगंतमणावाए इत्थी ३०-२८
एगंतरत्तो रुइरंसि गंधे ३२-५२
एगंतरत्तो रुइरंसि फासे ३२-७८
एगंतरत्तो रुइरंसि भावे ३२-९१
एगंतरत्तो रुइरंसि रूवे ३२-२६
एगंतरत्तो रुइरंसि सद्दे ३२-३९
एगंतरत्तो रुइरे रसंमि ३२-६५
एगंतरमायामं कट्टु ३६-२५३
एगूणवन्नहोरत्ता ३६-१४१
एगे जिए जिया पंच २३-३६
एगेण अणेगाइं पयाइं २८-२२
एगो पडइ पासेणं २७-५
एगो मूलं पि हारित्ता ७-१५
एमेव भावंमि गओ पओसं ३२-९८
एमेव रसंमि गओ पओसं ३२-७२
एमेव रूवंमि गओ पओसं ३२-३३
एमेव सद्दंमि गओ पओसं ३२-४६
एमेवहाछंदकुसील रूवे २०-५०
एयमट्ठं निसामित्ता ९-८
एयमट्ठं निसामित्ता ९-११
एयमट्ठं निसामित्ता ९-१३
एयमट्ठं निसामित्ता ९-१७
एयमट्ठं निसामित्ता ९-१९
एयमट्ठं निसामित्ता ९-२३
एयमट्ठं निसामित्ता ९-२५
एयमट्ठं निसामित्ता ९-२७
एयमट्ठं निसामित्ता ९-२९
एयमट्ठं निसामित्ता ९-३१
एयमट्ठं निसामित्ता ९-३३
एयमट्ठं निसामित्ता ९-३७
एयमट्ठं निसामित्ता ९-३९
एयमट्ठं निसामित्ता ९-४१
एयमट्ठं निसामित्ता ९-४३
एयमट्ठं निसामित्ता ९-४५
एयमट्ठं निसामित्ता ९-४७
एयमट्ठं निसामित्ता ९-५०
एयमट्ठं निसामित्ता ९-५२
एयमट्ठं सपेहाए ६-४
एयं अकाममरणं ५-१७
एयं तवं तु दुविहं जे ३०-३७
एयं पंचविहं नाणं २८-५
एयं पुण्णं पयं सोच्चा १८-३४
एयं सिणाणं कुसलेहिं दिट्ठं १२-४७
एया पवयणमाया २४-२७
एयाइं अट्ठ ठाणाइं २४-१०
एयाइं तीसे वयणाइं सुच्चा १२-२४
एयाओ अट्ठ समिईओ २४-३
एयाओ पंच समिईओ २४-१९
एयाओ पंच समिईओ २४-२६
एयाओ मूलपयडीओ ३३-१६

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एयारिसीए इड्डीए २२-१३
एयारिसे पंचकुसीलसंवुडे १७-२०
एरिसे संपयग्गंमि २०-१५
एवमद्दीणवं भिक्खुं ७-२२
एवमायाय मेहावी २-१७
एवमावट्टजोणीसु ३-५
एवमेव वयं मूढा १४-४३
एवं अभित्थुणंतो रायरिसिं ९-५९
एवं करंति संपन्ना १९-९६
एवं करिंति संबुद्धा ९-६२
एवं करेंति संबुद्धा २२-४९
एवं गुणसमाउत्ता २५-३४
एवं च चिंतइत्ताणं २०-३३
एवं जियं सपेहाए ७-१९
एवं तु संजयस्सावि ३०-६
एवं तु संसए छिन्ने २३-८६
एवं तु संसए छिन्ने २५-३५
एवं ते कमसो बुद्धा १४-५१
एवं ते राम-केसवा २२-२७
एवं थुणित्ताण स रायसीहो २०-५८
एवं धम्मं अकाऊणं १९-१९
एवं धम्मं पि काऊणं १९-२१
एवं धम्मं विउक्कम्म ५-१५
एवं नाणेण चरणेण १९-९४
एवं भवसंसारे संसरइ १०-१५
एवं माणुस्सगा कामा ७-१२
एवं लग्गंति दुम्मेहा २५-४२
एवं लोए पलित्तंमि १९-२३
एवं विणयजुत्तस्स १-२३
एवं वुत्तो नरिंदो सो २०-१३
एवं समुट्ठिए भिक्खू १९-८२
एवं ससंकप्प-विकप्पणासुं ३२-१०७
एवं सिक्खासमावन्ने ५-२४
एवं से उदाहु अणुत्तरनाणी ६-१८
एवं सो अम्मा-पियरो १९-८६
एवं सो विजयघोसो २५-४३
एविंदियत्था य मणस्स अत्था ३२-१००
एवुग्गदंते वि महातवोहणे २०-५३
एस अग्गी य वाऊ य ९-१२
एस धम्मे धुवे निच्चे १६-१७
एसा अजीवविभत्ती ३६-४७
एसा खलु लेसाणं ३४-४०
एसा तिरियनराणं लेसाण ३४-४७
एसा नेरइयाणं लेसाणं ३४-४४
एसा सामायारी २६-५२
एसणासमिओ लज्जू ६-१७
एसो खलु सम्मत्तपरक्कमस्स २९-७४ सू.
एसो बाहिरगतवो ३०-२९
एसो हु सो उग्गतवो १२-२२
एहि ता भुंजिमो भोए २२-३८
ओराला तसा जे उ ३६-१२६
ओहिनाणसुए बुद्धे २३-३
ओहोवहोवग्गहियं २४-१३
कंदप्प-कोक्कुयाइं ३६-२६३
कंदप्पमाभिओगं ३६-२'६
कंदंतो कंदुकुंभीसु १९-४९
कंपिल्लंमि य नयरे १३-३
कंपिल्ले नयरे राया १८-१
कंपिल्ले संभूओ चित्तो १३-२
कणकुंडगं चइत्ताणं १-५
कप्पं न इच्छेज्ज सहायलिच्छू ३२-१०४
कप्पाईया य जे देवा ३६-२१२
कप्पासट्ठिमिंजा य ३६-१३८
कप्पोवगा य बारसहा ३६-२१०
कम्मसंगेहिं संमूढा ३-६
कम्मा नियाणपगडा १३-८
कम्माणं तु पहाणीए ३-७
कम्मुणा बंभणो होइ २५-३२

कयरे आगच्छइ दित्तरूवे १२-६
कयरे तुमं इय अदंसणिज्जे १२-७
कयरे ते खलु २-२ सू.
करकंडू कलिंगेसु १८-४६
करणसच्चेणं भंते ! २९-५१ सू.
कलहडमरवज्जए ११-१३
कसायपच्चक्खाणेणं भंते ! २९-३६ सू.
कसाया अग्गिणो वुत्ता २३-५३
कसिणं पि जो इमं लोगं ८-१६
कस्स अट्ठा इमे पाणा २२-१६
कहं चरे भिक्खु ! वयं जयामो १२-४०
कहं धीरे अहेऊहिं १८-५४
कहं धीरो अहेऊहिं १८-५२
कहिं पडिहया सिद्धा ३६-५५
काउसग्गेणं भंते ! २९-१२ सू.
कामं तु देवीहि वि भूसियाहिं ३२-१६
कामाणुगिद्धिप्पभवं खु दुक्खं ३२-१९
कायगुत्तयाए णं भंते ! २९-५५ सू.
कायठिई खहयराणं ३६-१९३
कायठिई थलयराणं ३६-१८६
कायठिई मणुयाणं ३६-२०२
कायसमाहारणयाए णं भंते ! २९-५८ सू.
कायसा वयसा मत्ते ५-१०
कायस्स फासं गहणं वयंति ३२-७४
कालपडिलेहणयाए णं भंते ! २९-१५ सू.
कालीपव्वंगसंकासे २-३
कालेण कालं विहरेज्ज रट्ठे २१-१४
कालेण निक्खमे भिक्खू १-३१
कावोया जा इमा वित्ती १९-३३
किणंतो कइओ होइ ३५-१४
किण्हा नीला काऊ ३४-५६
किण्हा नीला य काऊ य ३४-३
किण्हा नीला य रुहिरा य ३६-७२
किमिणो सोमंगला चेव ३६-१२८
किरियं अकिरियं विणयं १८-२३
किरियं च रोयए धीरो १८-३३
किरियासु भूयगामेसु ३१-१२
किलिन्नगाए मेहावी २-३६
किं तवं पडिवज्जामि २६-५०
किं नु भो ! अज्ज मिहिलाए ९-७
किं माहणा ! जोइसमारभंता १२-३८
किंनामे किंगुत्ते १८-२१
कुकुडे सिंगिरीडी य ३६-१४७
कुंथुं-पिवीलिया दंसा ३६-१३७
कुप्पवयणपासंडी २३-६३
कुप्पहा बहवो लोए २३-६०
कुसं च जूवं तण-कट्ठमग्गिं १२-३९
कुसग्गमित्ता इमे कामा ७-२४
कुसग्गे जह उसबिंदुए १०-२
कुसीललिंगं इह धारइत्ता २०-४३
कुहाड-फरसुमाइहिं १९-६७
कूइयं रुइयं गीयं १६-५
कूइयं रुइयं गीयं १६-१२
कूवंतो कोलसुणएहिं १९-५४
के इत्थ खत्ता उवजोइया वा १२-१८
के ते जोई के व ते जोइठाणं १२-४३
के ते हरए के य ते संतितित्थे १२-४५
केण अब्भाहओ लोओ १४-२२
केरिसो वा इमो धम्मो २१-११
केसिं एवं बुवाणं तु २३-३१
केसीकुमारसमणे २३-९
केसीकुमारसमणे २३-१६
केसीकुमारसमणो २३-१८
केसीगोयमओ निच्चं २३-८८
को वा से ओसहं देइ १९-७९
कोट्ठगं नाम उज्जाणं २३-८
कोडीसहियमायामं ३६-२५५
कोलाहलगब्भूअं आसी ९-५

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कोसंबी नाम नयरी २०-१८
कोहा वा जइ वा हासा २५-२३
कोहे माणे य माया २४-९
कोहो य माणो य वहो य जेहिं १२-१४
खज्जूर-मुद्दियरसो ३४-१५
खणं पि मे महाराय २०-३०
खणमित्तसोक्खा बहुकालदुक्खा १४-१३
खत्तिय-गण-उग्ग-रायपुत्ता १५-९
खमावणाए णं भंते ! २९-१७ सू.
खलुंका जारिसा जोज्जा २७-८
खलुंके जो उ जोइए २७-३
